विवरणं। नवीनमपरिशुद्धञ्च। प० १०३। पङ्क्ति० ६। स्लो० २०००। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। शिवं नत्वा सूते स्वच्छे क्रियते सारसङ्ग्रहः। श्रीवाचस्पतिधीरेण वैधकृत्यप्रवर्त्तये ।।
अथ कालस्य तत्र संवत्सरश्चान्द्रः सौरः सावनो नाक्षत्रश्चेति चतुर्व्विधः ।

समाप्तिवा०। अयोनौ गोयोनौ अप्सु वा मैथुने देवी वाप इत्यस्य जपः प्राणायामशतं वा इति ।

विषयः। सङ्क्रान्त्याशौचप्रायश्चित्तादितिथ्यादिव्यवस्था ।

No. CCLXXIII.

Vais'vadevádi-mantra-vyákhyá. Object of the mantras for the performance of sráddha, &c.

२७३ । वैश्वदेवादिमन्त्रव्याख्या ।

ग्रन्थकारः ——?

विवरणं। प्राचीनमपरिशुद्धञ्च । प० २१ । पङ्क्ति० ६ । श्लो० २०० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताख्यश्रीयुतवाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । अग्नये स्वाहा इति सुगमं । देव हे अग्ने इति गम्यं देवे देवकर्म्मणि कृतस्य एनस्य पापस्य अवयजनं नाशनमसि ।

समाप्तिवा० ——?

विषयः । श्राद्धादिमन्त्रप्रतिमाद्यार्थविवरणं ।

No. CCLXXIV.

Vrihannirvána Tantra. An original Tantra. Contents, 1, origin of the universe; 2, the mundane creation; 3, praise of the female energy; 4 ; 5, 6, 7, 8, Goloka and other celestial regions; 9, the lotus of knowledge; 10, the upper part thereof; 11, knowledge of the Tantras; 12, Tantras appropriate to the Vaishṇavas; 13, praise of the Brahma whose name is formed of ten syllables; 14, characteristics of the *avadhuta* hermit.

२७४ । वृहन्निर्वाणतन्त्रं ।

ग्रन्थकारः ——?

विवरणं। प्राचीनमपरिशुद्धञ्च । प० २६ । पङ्क्ति० ७—८ । श्लो०१६ । अ० वङ्गीयं । आ० कागजः । का० ? शकाब्दाः १७३४ । स्था० कलिकाताख्यश्रीयुतवाबुयतीन्द्र० मोहनठाकुरः ।

प्रा० वाक्यं । कैलाशपर्व्वते रम्ये नानारत्नोपशोभिते ।
विपरीतरताशक्ता चण्डी पप्रच्छ शङ्करं ॥
श्रीचण्डिकोवाच । निराकारं निर्गुणञ्च स्तुतिनिन्दाविवर्जितं ।
यन्नित्यं सर्व्वकर्त्तारं वर्णातीतं सुनिश्चितं ॥

समाप्तिवा०। इति ते कथितं कान्ते चतुराश्रमलक्षणं ।
न वक्तव्यं पशोरग्रे प्राणान्तेऽपि महेश्वरि ॥
इति श्रीवृहन्निर्वाणतन्त्रे चण्डिकाशङ्करसंवादे चतुराश्रमवर्णनं नाम चतुर्दशः पटलः ॥

विषयः। १, ब्रह्माण्डकथनं। २, सृष्टिनिरूपणं। ३, प्रकृतिप्रशंसा। ४, सन्नासावस्थादिकथनं। ५. ६, ७, ८, गोलोकादिकथनं। ९. ज्ञानपद्मकथनं। १०, प्रोक्तपद्मस्योर्द्धदेशविवरणं। ११, तत्त्वज्ञानकथनं। १२, वैष्णवतत्त्वकथनं। १३, दशाक्षरमन्त्रमाहात्म्यं। १४, अवधूतलक्षणकथनं॥

CCLXXV.

Draitanirṇaya.—Dissertations, by Váchaspati Mis'ra, on disputed questions of Smṛiti, such as, bathing, duties during eclipses, when they extend from day to night, or night to day, adoption, intercalary months, shedding of the hair of the head near sacred streams, &c.

२७५। द्वैतनिर्णयः।

ग्रन्थकारः वाचस्पतिमिश्रः।

विवरणं। नवीनमपरिशुद्धञ्च। प० १०२। पङ्क्ति० ७। श्लो० २५००। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। आभीरदारकमुदञ्चितकिङ्किणीकमाताम्रपाणिचरणं पुरुषं पुराणं।
मञ्जीरमञ्जुमणाधरमम्बुजाक्षमद्वैतचिन्मयमनादिमनन्तमीडे॥
सरस्तुलितसागरं व्यधित यो नृपग्रामणीर्भजाविजितकाञ्चनैरदित यस्तुलापूरुषान्।
स एव नृपभैरवः समरसीम्नि पञ्चाननो जयत्यरिविदारको जगति राजवृन्दारकः॥
अयं वापि नामानतोतः कवीनां गुणैर्दोःप्रतापानतीतो भटानाम्।
त्रिलोकीपतिः श्रेयसी वासभूमिः पुनीते जगन्मण्डलं राजचन्द्रः॥
सत्यभामेव कृष्णस्य गौरीव मदनद्विषः।
सविशेषा जयत्येषा नृपभैरवभामिनी॥
विष्णोर्ध्यक्तः पुरमिव शम्भोरिव देहवामार्द्धं।
देवी सनाभिरेषा जयति जयात्मा महादेवी॥
एषा विदितविशेषा प्रसहारं वीक्ष्यते जगज्जननी।
तदुपरि परितः प्रपतति हाटकहीरकमयी वृष्टिः।
श्रीभैरवेन्द्रधरणीपतिधर्म्मपत्नी राजाधिराजपुरुषोत्तमदेवमाता।
वाचस्पतिं निखिलचन्द्रविदं नियुज्य द्वैते विनिर्णयविधिं विधिवत्तनोति॥

समाप्तिवा०। मेखलाबन्धसमये सर्व्वपञ्चकसङ्ग्रहं। शुभयुक्तं प्रशंसन्ति तदालोकितमेव वा॥
इति महामहोपाध्यायमिश्रवाचस्पतिविरचितो द्वैतनिर्णयः समाप्तः।

विषयः। १, स्नानादिद्वैतनिर्णयः। २, वृद्धिग्रहणविचारः। ३, दत्तकपुत्रविधानं। ४, अधिमासादिविचारः। ५, तीर्थमुण्डनादिविचारादिविविधसन्दिग्धार्थविनिर्णयो वर्त्तते।

CCLXXVI.

Sañskára-vádártha.—A Smriti compilation on essential sacraments or sañskáras.

२७६। संस्कारवादार्थः।

ग्रन्थकारः—?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ५। पङ्क्ति० ७। स्लो० ३८०। अ० वङ्गीयं। आ० कागजः। का०—? स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। ननु जातकर्म्मादिसंस्काराणां स्वकालाकरणे उपनयनकाले आगते प्रायश्चित्तं कृत्वा करणं तत्र बाध एवेति संशयः।

समाप्तिवा०। खण्डितं।

विषयः। जातकर्म्मादिसंस्काराणां कर्त्तव्यसमयादिविचारः।

CCLXXVII.

Kálanirṇaya.—On proper times for the performance of religious rites. By Gopála Nyáya-panchánana.

२७७। कालनिर्णयः।

ग्रन्थकारः गोपालन्यायपञ्चाननः।

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ४२। पङ्क्ति० ६। स्लो० ५००। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा०वाक्यं। कस्मिन् कर्म्मणि कः कालो नैव कालः कदा तयोः।
विलोक्य मुनिवाक्यानि निर्णयोऽत्र निगद्यते॥

समाप्तिवा०। एकस्मिन्नेव वर्षे तु द्वौमासावधिमासकौ। प्रकृतस्तत्र पूर्व्वः स्यादधिमासस्तदुत्तरः॥ इति जावालवचनाच्च परोऽधिमास इत्याहुः। इति मलमासकालनिर्णयः सम्पूर्णः।

विषयः। १, कार्य्यविशेषप्रतिपादकसमयनिरूपणं। २, मलमासादिकालनिरूपणञ्च।

CCLXXVIII.

Dánaságara.—A compilation, in 70 sections, on the advantages of various kinds of gifts, and their consecration. The author of this treatise was Rájá Vallála Sena of Bengal. He calls himself the son of Vijaya Sena, and grandson of Hemanta Sena. According to the author of the *Samaya Prakás'a*, the work was completed in the S'aka year 1019, = A. D. 1097. *Vide* Journal As. Soc. Bengal, XXXIV. pt. i. p. 137.

२७८ । दानसागरः ।

ग्रन्थकारः वल्लालसेनः ।

विवरणं । नवीनप्रायमपरिशोधितञ्च । प० २२९ । पङ्क्ति० ८ । श्लो० ३५०० । अ० वङ्गीयं । आ० कागजः । का० शकाब्दाः १७२८ । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । ये साचाद्वनीतलाहृतभुजो वर्णाश्रमन्यायसां
येषां पाणिषु निःक्षिपन्ति कृतिनः पाथे * * * * * ।
* * * * * * नियमगुरुब्रह्मचारित्रचर्य्या-
मर्य्यादागोत्र *नः कलिचकितसदाचारसञ्चारसीमा ॥

समाप्तिवा० । श्रीवल्लालनरेन्द्रवर्णितममुं सर्व्वानुसम्पत्प्रतिदानसागरमधिद्वैरूपार्द्धजनाः ।
इति परमेश्वरपरममाहेश्वरमहाराजाधिराजनिःशङ्कशङ्करश्रीमद्वल्लालसेनदेवविरचितः श्रीदानसागरः समाप्तः ।

विषयः । ब्राह्मणप्रशंसा । दानप्रशंसा । पात्रप्रशंसा । सात्त्विकराजसतामसदानफलं । तुलापुरुषदानादिनिरूपणं । धान्याचलादिदानं । गोदानादिविविधदानफलकथनं च । प्रयोगश्च ।

CCLXXIX.

Nirṇayámṛita.—A Smriti treatise on obligatory diurnal duties. By Súrya Sena.

२७९ । निर्णयामृतं ।

ग्रन्थकारः सूर्य्यसेनः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ३८ । पङ्क्ति० ६ । श्लो० ७०० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं। कारणमेकं जगतां वारणमास्येन वारणं विपदां।
किमपि महामहनीयं प्रत्यूहव्यूहदारणं वन्दे।
भावयामि दृढभक्तिभावनीं भाविताङ्घ्रियुगलां सुमङ्गलां।
इष्टदां सततमिष्टदेवतामन्त्रवत्सकलमन्त्रमातरं।
समाप्तिवा०। खण्डितत्वेन शेषवाक्यं नास्ति।
विषयः। १, तिथ्यादितत्कर्त्तव्यकर्म्मनिश्चयः।

CCLXXX.

Varṇabhairava.—On the origin, forms, and merits of the letters of the Sanskrit alphabet. By Rámagopála Panchánana, son of Rámanatha, grandson of Náráyaṇa.

२८०। वर्णभैरवः।

ग्रन्थकारः रामगोपालपञ्चाननः।
विवरणं। प्राचीनं परिशुद्धप्रायञ्च। प० १२। पङ्क्ति० ७। श्लो० २९०। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतवाबुयतीन्द्रमोहनठाकुरः।
प्रा० वाक्यं। सहस्रच्छदाम्भोजमध्योपविष्टं नितान्तप्रशान्तं सदाशक्तियुक्तं।
श्रिया युक्तमीडे गुरुं सुप्रसन्नं गिरीशं स्फुरद्धंसमीडे निषण्णं॥
यामलादीनि तन्त्राणि समालोक्य बहूनि च।
नानामुनिनिबन्धांश्च तथा सम्पूर्णसंहितां॥
साधकानां मतं ज्ञात्वा स्वयं युक्त्या निरूप्य च।
मन्त्राणां तत्त्वसङ्गत्यै रामगोपालशर्म्मणा॥
साधकानां तथा प्रीत्यै वर्णभैरव उच्यते।
समाप्तिवा०। विलोक्य नानातन्त्राणि ज्ञालेश्वरमतानि च।
अकारादिक्षकारान्तः वर्णभैरव ईरितः॥
यदत्र लिखितं भ्रान्त्या तद्दोषः क्षम्यतामुमे।
शक्नोति कथितुं को वा वाग्वैदग्ध्यं महेशितुः॥
विख्यातः कविराजमिश्रधरणीगीर्व्वाणवाचस्पति-
र्योगीशस्तनुजस्तदीयगुणयुक् षट्तर्कविद्यापतिः॥
आचार्य्योजनि तत्सुतः श्रुतिगुरुर्लक्ष्म्यादिनारायण-
स्तद्धीरात्मजरामनाथतनयस्यैषा कृती राजते॥
विषयः। १, शब्दोत्पत्तिकथनं। २, अकारादिप्रत्येकवर्णानां माहात्म्यकथनं॥

CCLXXXI.

S'rítattvabodhiní.—A compilation, by Krishṇánanda, embracing the whole of the S'ákta cult. The MS. is incomplete and contains only 15 chapters.

२८१ । श्रीतत्त्वबोधिनी ।

ग्रन्थकारः कृष्णानन्दः ।

विवरणं । प्राचीनं परिशुद्धप्रायञ्च । प० २१५ । पङ्क्ति० ६ । श्लो० २५०० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । श्रीनाथाङ्घ्रिसरोरुहं प्रतिदिनं सञ्चिन्त्य मुक्तिप्रदं
नानातन्त्रमतं विविच्य विदुषां श्रीनाथवक्त्रान्मुदा ।
सारं तेषु निगूढमाहृतवता ज्ञात्वा मया श्रीमता
कृष्णानन्दविदित्सुना विरचिता श्रीतत्त्वबोधिन्यपि ॥

समाप्तिवा० । खण्डितं ।

विषयः । १, कल्पे गुरुस्तोत्रकवचादिकथनं । २, नित्यकर्मानुष्ठानपूजादिकथनं । ३, शिवपूजाविधानं । ४, पूजाधारादिन्यासविवरणं । ५, साधारणपूजाकथनं । ६, जपरहस्यकथनं । ७, पञ्चाङ्गपुरश्चरणकथनं । ८, ग्रहणपुरश्चरणादिविवरणं । ९—१०, होमविवरणं । ११, कुमारीपूजादिकथनं । १२, षट्चक्रविधिकथनं । १३, शान्तिवश्यादिषट्कर्मकथनं । १४, शान्तिकल्पविधानं । १५, आथर्व्वणोक्तज्वरशान्तिकथनं । एवं पञ्चदशपटलाः सन्ति ।

CCLXXXII.

Yoginíhṛidaya.—This MS. is also incomplete. Its contents are, 1, hints regarding magic circles; 2, hints regarding mantras; 3, hints about the mode of worshipping the Deví; 4, derivation of mantras; 5, time meet for initiation; 6, how to become a *víra*, or one who can worship with spirituous liquors.

२८२ । योगिनीहृदयं ।

ग्रन्थकारः—?

विवरणं । नवीनमपरिशुद्धञ्च । प० २७ । पङ्क्ति० ७ । श्लो० ५०० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा॰ वाक्यं। श्रीदेव्युवाच। देवदेव महादेव परिपूर्णप्रथामय।
वामकेश्वरतन्त्रेऽस्मिन्नज्ञातार्थास्त्वनेकशः।
तांस्तानर्थानशेषेण वक्तुमर्हसि शङ्कर॥
श्रीभैरव उवाच। शृणु देवि महागुह्यं योगिनीहृदयं परं॥
त्वत्प्रीत्या कथयाम्यद्य गोपितव्यं विशेषतः॥

समाप्तिवा॰। खण्डितं।

विषयः। १, पटले श्रीचक्रसङ्केतकथनं। २, मन्त्रसङ्केतकथनं। ३, पूजासङ्केतकथनं। ४, मन्त्रोद्धारकथनं। ५, दीक्षाकालविनिर्णयादिकथनं॥ ६ वीरसाधनकथनं॥ एवं षट् पटला वर्त्तन्ते।

CCLXXXIII.

Yoginíhṛidaya-dípiká.—A commentary on No. CCLXXXII, by Amṛitánanda.

२८३। योगिनीहृदयदीपिका।

ग्रन्थकारः अमृतानन्दः।

विवरणं। नवीनमपरिशुद्धञ्च। प॰ ५३। पङ्क्ति॰ १० श्लो॰ १५००। अ॰ वङ्गीयं। आ॰ कागजः। का॰—?। स्था॰ कलिकातास्थश्रीयुतवाबुयतीन्द्रमोहनठाकुरः।

प्रा॰ वाक्यं। जगद्वन्द्यावेतौ गणपवटुकौ विश्वविनुतौ
जगद्रक्षाशीलौ जपनिरतसाहित्यवरदौ।
रथाङ्गेस * * रविशशिकृशानूज्ज्वलदृशौ
मयि स्यातां रक्षापरवशधियौ सद्गुरुमयौ॥

समाप्तिवा॰। खण्डितं।

विषयः। १, योगिनीहृदयतात्पर्य्यार्थविवरणं।

CCLXXXIV.

Táráprадípa.—A Tantra compilation by Lakshmaṇa Des'ika.

२८४। ताराप्रदीपः।

ग्रन्थकारः लक्ष्मणदेशिकः।

विवरणं। नवीनमपरिशुद्धञ्च। प॰ २४। पङ्क्ति॰ ७। श्लो॰ ९००। अ॰ वङ्गीयं। आ॰ कागजः। का॰—?। स्था॰ कलिकातास्थश्रीयुतवाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। पञ्चाशद्वर्णवेत्ता सकलगुणमयो पादचिद्रूपसाक्षी
व्यापी सत्ताविधाता परमगुरुतरो निष्कलो निर्विकारः।
आधारे लिङ्गनाभौ हृदि गलवदने भालदेशे स्वभावे-
ष्वांशं यो रामभद्रः स जयति नितरां योगिनां ज्ञानगम्यः॥
नत्वा भेदाब्धिपारं द्विजकुलतिलकं व्यासदेवं विधानै-
र्लोकानां धर्महेतौ कलिभवविभवे तारणार्थे प्रयत्नात्।
स्वच्छं संसारभूतं विविधजनहितं मन्त्रतन्त्रातिगुह्यं
व्याचष्टे भव्यमूर्त्तिर्व्वरजयनविधौ शास्त्रमेतत्समन्तात्॥
श्रीमल्लक्ष्मणदेशिको निजगुरोः पादाब्जसेवावशात्
व्याचष्टे जनरोचनाय विधिना शास्त्रं प्रमोदप्रदं।
केचित्त्वागममन्त्रतन्त्रनिपुणाः कौटिल्यमोहाहृता-
स्तेषां वामविमार्गमोचनधिया ताराप्रदीपं शुभं॥

समाप्तिवा०। खण्डितत्वेन शेषवाक्यं नास्ति।

विषयः। १. पटले गुरुशिष्यादिलक्षणं। २, पूजाज्ञानादिकथनं। ३, तारामहाविद्याया-
स्त्रयोदशावान्तरमहामूर्त्तिकथनं। ४, मारणोच्चाटनादिबहुविधोपायकथनं।
५, मन्त्रसाधनप्रभेदकथनं। एवं पञ्च पटलाः सन्ति।

CCLXXXV.

Niruttara Tantra.—An original Tantra, attributed to Mahádeva. Contents: 1, praise of Dakshiṇá Kálí; 2, the cult of that divinity; 3, charms, bearing her name; 4, purifications necessary for her worship; 5-6, the mode of worshipping her at night; 7-8, bathing her image for worship; 9, attainment of power over her mantra; 10, differences of the various forms of S'akti; 11, form of adoration appropriate for *Yogis;* 12, another form; 13, adoration of Siddha Vídyá, a form of S'akti; 14, characteristics of courtezans who may be engaged for the Kaula form of worship; 15, purifications of wine, flesh, meat, fish, gesticulation and female society, or the five essentials of Kaula worship.

२८५। निरुत्तरतन्त्रं।

ग्रन्थकारः——?

विवरणं। प्राचीनप्रायं परिशुद्धञ्च। प० १०८। पङ्क्तिः ४। श्लो० २०००। अ० वङ्गीयं।
आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। सिद्धविद्या पुरा प्रोक्ता मन्त्रयन्त्रादिकानि च।
नानाभावप्रभेदेन संस्कारो जायते प्रभो॥
भावभेदेन कथय लोकनिस्तारकारक।
सर्व्वेषां शरणं तन्त्रसिद्धान्तं विष्णुसम्मतं॥
आसामाराधना केन भावेन परिजायते।
आसां वा प्रकृतिः कापि तस्या वा कीदृशी क्रिया॥
तत्प्रकाशाय सम्यग् मे येन यामि निरुत्तरं।

समाप्तिवा०। न वारतिथिनक्षत्रं न योगकरणन्तथा।
सिद्धविद्या महाविद्या युगसेवा प्रकीर्त्तिता॥
इति श्रीनिरुत्तरतन्त्रे पार्व्वतीशिवसंवादे पञ्चदशः पटलः।

विषयः। १ देवीकर्त्तृकयावदीयप्रश्नोत्तरकरणात् देव्या निरुत्तरत्वेन निरुत्तरतन्त्रेति समाख्या यौगिकी। अत्र १५ पटला वर्त्तन्ते।
१, सङ्क्षेपेण दक्षिणकालिकाया माहात्म्यकथनं। २, दक्षिणकालिकायाः पूजा-प्रकारमन्त्रकथनं। ३, तस्याः कवचं। ४, तदीयपुरश्चरणविधानं। ५—६, रजनीदेव्याः पूजनादिकथनं। ७, दक्षिणकालिकाया अभिषेककथनं। ८, पुनस्तदीयाभिषेकादिकथनं। ९, मन्त्रसिद्धिप्रकारकथनं। १०, शक्तिप्रभेदकथनं। ११, योगिनां साधनविशेषविधानं। १२, साधनान्तरकथनं। १३, सिद्धविद्या-साधनोपयोगिशक्तिविशेषप्रतिपादनं। १४, कौलसाधनानुकूलवेश्याशक्तेः प्रभेद-प्रतिपादनं। १५, मद्यमांसमीनमुद्रामैथुनाख्यपञ्चमकारशुद्धिकथनं।

CCLXXXVI.

Jnánánanda-tarangini.—A Tantra compilation by S'iromani. The MS. is incomplete, containing only the first seven chapters and a portion of the 8th. The subject is the cult of the Deví and of her different manifestations. One chapter is devoted to prove that the Durgá pujá is founded upon unquestionable authorities.

२८६। ज्ञानानन्दतरङ्गिणी।

ग्रन्थकारः शिरोमणिः।

विवरणं। नवीनं परिशुद्धप्रायञ्च। प० १३०। पङ्क्ति० ८। श्लो० २०००। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा॰ वाक्यं। शक्तियुक्तं शिवं नत्वा शिरोमणिद्विजन्मना।
सङ्गृह्य सतप्रयत्नेन ज्ञानानन्दतरङ्गिणी॥
आलोक्य शिववाक्यञ्च नानातन्त्रे यथोदितं।
प्रकाश्यते मया यत्नात् साधकस्यार्थसिद्धये॥

समाप्तिवा॰। खण्डितं।

विषयः। १ परिच्छेदे गुरुशिष्यलक्षणाकडमाचाद्यासनप्रभेदमालासंस्कारादयः। २, पुरश्चरणयोनिमुद्राविधानादिग्रहणपुरश्चरणं। ३, महाविद्याविवेचनं। ४, भगवत्यास्तत्त्वविनिर्णयः, दुर्गात्मवप्रमाणञ्च। ५, सर्व्वतोभद्रमण्डलकथनं। ६, दीक्षाविधानं, सामान्यपूजाविधानञ्च। ७, गायत्र्यादिपूजाविधिः। ८, मन्त्रोद्धारकथनं। एवं कियदंशरहिता अष्टपरिच्छेदा वर्त्तन्ते।

No. CCLXXXVII.

Váráhi Tantra. A Vaishṇava Tantra attributed to Kṛishṇa. Contents: 1, dialogue between Kṛishṇa and Rádhiká on their birth and sojourn among the Gopa tribe; 2, description of Brahma stones and Brahma Líñgas; 3, sacred places, where perfection may be attained; 4, places with five sacred pools; 5-6, the Mahádeva of Chandrás'ekhara, a place of pilgrimage in Chittagong; 7, the Champaka forest, and other places of pilgrimage; 8, merits of reading hymns to Chaṇḍí, wearing charms bearing her name, &c.

२८७। वाराहीतन्त्रं।

ग्रन्थकारः श्रीकृष्णः।

विवरणं। नवीनं परिशुद्धप्रायञ्च। प॰ १७। पङ्क्ति॰ ८। श्लो॰ ५००। अ॰ वङ्गीयं। आ॰ कागजः। का॰—? । स्था॰ कलिकातास्थश्रीयुतवाबुयतीन्द्रमोहनठाकुरः।

प्रा॰ वाक्यं। एकदा गोलके रम्ये षोडशद्वारमन्दिरे।
नानामणीन्द्रनिर्म्माणे श्वेतचामरशोभिते॥
गोपत्रिकोटिभिः सार्द्धं गोपिकानां तथैव च।
पार्षदैर्विष्णुरूपैश्च ब्रह्मविष्णुशिवादिभिः॥

समाप्तिवा॰। खण्डितत्वात् शेषवाक्यं नास्ति।

विषयः। १ पटले नारायणं प्रति राधिकाया गोपकुलवासादिविषयकविविधप्रश्नोत्तरे। २, ब्रह्मशिलादिब्रह्मलिङ्गादीनां तत्त्वकथनं। ३, सिद्धिस्थानादिविनिर्णयः।

४, पञ्चकुण्डान्वितस्थानादिकथनं। ५—६, चन्द्रशेखरमहादेवावस्थित्यादिकथनं। ७, चम्पकारण्यादिवर्णनं। ८, चण्डीशचैकाहत्त्यादिपाठमाहात्म्यकथनं।
एवमष्टौ पटलाः सन्ति।

No. CCLXXXVIII.

Lingárchana Tantra. The rules and advantages of worshiping the Liñgam.

२८८। लिङ्गार्च्चनतन्त्रम्।

ग्रन्थकारः——?

विवरणं। प्राचीनं परिशुद्धप्रायञ्च। प० ६९। पङ्क्ति० ५—६। श्लो० १०००। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। श्रीदेव्युवाच। कामरूपसमासीनं शङ्करं चिदशेश्वरं।
पप्रच्छ सादरं देवी योगमाया जगन्मयी॥
तपोधन महादेव सर्व्वेषामीश्वर प्रभो।
पुरा यत् सूचितं देव शिवलिङ्गार्च्चनं प्रभो॥
हृदये विद्यते देव मम शल्योपमं सदा।
इदानीं परमेशान कृपया शल्यमुद्धर॥
शिवलिङ्गार्च्चनं तन्त्रं विचार्य्य कथय प्रभो।

समाप्तिवा०। स एव धन्यो देवेशि स एव श्रीसदाशिवः।
कैलाससदृशाकारं पश्यामि तस्य मन्दिरं॥
इति लिङ्गार्च्चनतन्त्रे देवीश्वरसंवादे ज्ञानप्रकाशेऽष्टादशपटलः समाप्तः॥

विषयः। १ पटले सर्व्वपूजानामादौ लिङ्गपूजाव्यवस्थापनं। २, शिवलिङ्गपूजनादिविधानं। ३, भस्मादिधारणविधानं। ४. पूजाङ्गध्यानादिविधानं। ५, पूजाधिष्ठानमण्डलयन्त्रादिकथनं। ६, उलूकोपाख्यानकथनं। ७, अष्टमूर्त्त्यादिपूजाविधानं। ८, भ्रमरीशक्त्या माहात्म्यादिकथनं। ९, षोडशोपचारादिकथनं, प्रलयादिकाले पूजाव्यवस्थाविधानञ्च। १०, विजयापत्रादिना लिङ्गपूजाविधानं। ११, देवीं प्रति महादेवस्य वाच्यज्ञानाद्युपदेशः। १२, शिवलिङ्गरहस्यकथनं। १३, शिवनिर्म्माल्यदूषणहत्तान्तकथनं। १४, ज्ञानोपदेशः। १५, तत्त्वज्ञानकथनं। १६, श्रीफलपत्रतत्त्वकथनं। १७, योगकथन १८, शिवलिङ्गार्च्चनफलकथनं॥

No. CCLXXXIX.

Mahánirvána Tantra. One of the original and most revered of Tantras, attributed to Mahádeva. The MS. includes only the first half in 14 chapters. Contents: 1, enquiry into salvation; 2-3, adoration of Para Brahma; 4, ditto of Prakriti or the female energy; 5, the decasyllabic mantra of the Deví, and adoration therewith; 6, homa, magic circles, &c.; 7, the cult of the Kaulas; 8, duties of the several castes and orders of men; 9, the ten sacraments; 10, S'ráddhas and other ceremonies; 11, expiations; 12, rules regarding conduct; 13, consecration of houses, tanks, temples, alms, images of gods, &c.; 14, consecration of Lingams; fourteen orders of Avadhúta ascetics, &c.

२८९। महानिर्व्वाणतन्त्रं।

ग्रन्थकारः —— ?

विवरणं। नवीनं परिशुद्धप्रायञ्च। प° १२५। पङ्क्ति° ६। श्लो° ३६००। अ° वङ्गीयं।
आ° कागज। का°—? स्था° कलिकातास्थश्रीयुतवाबुयतीन्द्रमोहनठाकुरः।

प्रा° वा°। गिरीन्द्रशिखरे रम्ये नानारत्नोपशोभिते। नानावृक्षलताकीर्णे नानापक्षिरवैर्युते॥

समाप्तिवा°। महानिर्व्वाणतन्त्रस्य माहात्म्यं किं ब्रवीमि ते।
विदित्वैनं महाता ब्रह्मनिर्व्वाणमाप्नुयात्॥
इति श्रीमहानिर्व्वाणतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे सर्व्वधर्म्मनिर्णयसारे श्रीमदाद्यासदाशिवसंवादे पूर्व्वकाण्डे शिवलिङ्गस्थापनचतुर्विधावधूतविवरणकथनं नाम चतुर्द्दशोल्लासः। समाप्तोयं पूर्वकाण्डः॥

विषयः। इदं खण्डद्वयविभक्तं। अत्र पूर्वार्द्धमात्रं वर्त्तते। अत्र चतुर्द्दशोल्लासाः सन्ति। तत्र १ प्रथमे, जीवनिस्तारोपायविषयकप्रश्नो भगवत्या महादेवं प्रति। २, परब्रह्मोपासनक्रमविषयकमहादेवोत्तरं। ३, परब्रह्मोपासनकथनं। ४, प्रकृतिसाधनोपक्रमः। ५, देव्या दशाक्षरादिमन्त्रोद्धारकलसस्थापनतत्त्वसंस्काराः। ६, श्रीपात्रस्थापनहोमचक्रानुष्ठानकथनं। ७, कुलतत्त्वकथनं। ८, वर्णाश्रमाचारकथनं। ९, कुशण्डिकादशविधसंस्कारविधिकथनं। १०, वृद्धिश्राद्धादिमृतक्रियापूर्णाभिषेककथनं। ११, स्वपरानिष्टजनकपापप्रायश्चित्तकथनं। १२, सनातनव्यवहारकथनं। १३, वास्तुग्रहयागजलाशयादिदेवगृहदानाद्यादिसर्वदेवप्रतिष्ठाकथनं। १४, शिवलिङ्गस्थापनचतुर्विधावधूतविवरणकथनं।

ग्रन्थोऽयं समीचिन इत्यवधीयते॥

No. CCXC.

Kulárnava Tantra. An original and standard Tantra—the text book of the Kaulas. Contents: 1, existence of created beings; 2, praise of the Kaula tenet; 3, praise of Urdhámnáya, &c.; 4, derivation of mantras, and rules regarding the regulation of the breath; 5-6, consecration of articles necessary for the Kaula form of worship; 7, adoration of the Vaṭuka attendants of S'iva and his consort; 8, rules regarding drinking during worship; 9, Yoga; 10, particular forms of worship; 11, rules of conduct for Kaulas; 12, respect for the shoes of S'rí; 13-14, teacher and the taught, their characteristics and trials; 15, mode of attaining perfection in mantras; 16, rites for the attainment of desirable objects; 17, miscellaneous rules regarding Kaula teachers.

२६० । कुलार्णवतन्त्रं ।

ग्रन्थकारः———?

विवरणं। नवीनं परिशुद्धप्रायञ्च । प० ६६ । पङ्क्ति० ९ । श्लो० २००० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतवावुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । कैलासशिखरासीनं देवदेवं जगद्गुरुं ।
पप्रच्छेशं परानन्दं पार्व्वती परमेश्वरं ॥
श्रीदेव्युवाच । भगवन् देवदेवेश पञ्चकृतुविधायक ।
सर्व्वज्ञ भक्तिसुलभ शरणागतवत्सल ॥

समाप्तिवा०। ऊर्द्धाम्नायः समाख्यातः समासेन च विस्तरात् ।
कुलार्णवमिदं शास्त्रं भुक्तिदमुपवर्णितं ॥
इति श्रीकुलार्णवमहारहस्ये सर्व्वागमोत्तमोत्तमे सपादलक्षग्रन्थे पञ्चमखण्डे गुरुनामवासनादिकथनं नाम सप्तदशोल्लासः ॥

विषयः। १, जीवस्थितिकथनं । २, कुलमाहात्म्यकथनं । ३, ऊर्द्धाम्नायादिमाहात्म्यकथनं । ४, मन्त्रोद्धारपोढान्यासकथनं । ५, कुलद्रव्यादिसंस्कारकथनं । ६, द्रव्यसंस्कारादिकथनं । ७, वटुकादिपूजाविधानं । ८, तत्त्वत्रयोल्लासपानभेदकथनं । ९, योगादिकथनं । १०, विशेषपूजाकथनं । ११, कुलाचारविधिकथनं । १२, श्रीपादुकाभक्तिलक्षणकथनं । १३, गुरुशिष्यलक्षणकथनं । १४, गुरुशिष्यादि परीक्षाकथनं । १५, पुरश्चरणविधिकथनं । १६, काम्यकर्म्मविधानं । १७, गुरुनामवासनादिकथनं ।

No. CCXCI.

Dakshiná-Kalpa. Manual of S'ákta worship. By Haragovinda Tattvavágis'a.

२९१। दक्षिणाकल्पः।

ग्रन्थकारः हरगोविन्दतत्त्ववागीशः।

विवरणं। नवीनं परिशुद्धप्रायञ्च। प० ५३। पङ्क्ति० ८। श्लो० १०००। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। प्रणम्य शिरसा देवं गुरुञ्च ज्ञानदायकं।
हरगोविन्दतत्त्वादिवागीशेन मयाधुना॥
नानातन्त्रात् समाहृत्य सारमादाय यत्नतः।
कथ्यते दक्षिणाकल्पः प्रयोगविधिरुत्तमः॥

समाप्तिवा०। शेषं खण्डितं।

विषयः। अत्र किञ्चिदधिकत्रयोदशपरिच्छेदा लभ्यन्ते। पुरुषप्रकृत्यभेदशाक्तप्रशंसा। दक्षिणकालिकामन्त्रोद्धारप्रातःकृत्यस्नानतिलकविधिः। सन्ध्यादिविधिः। पूजा-स्थाननिर्णयः। दिङ्नियमशिवपूजादिविधानगुरुपूजास्तोत्रादिदक्षिणकालिका-पूजामन्त्रादिप्रतिपादनं।

No. CCXCII.

Rudrayámala Tantra. An elaborate and original Tantra, including the whole range of S'ákta knowledge about religion, social orders, castes, sacred places, modes of adoration, forms of ceremonies, &c., &c. The MS. is imperfect, and contains nine thousand verses divided into 67 sections.

२९२। रुद्रयामलं।

ग्रन्थकारः—?

विवरणं। नवीनं परिशुद्धप्रायञ्च। प० २५८। पङ्क्ति० ७। श्लो० ९०००। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। भैरव उवाच। पुरा श्रीपरमेशानीवदनाम्भोजनिःसृतं।
श्रीयामलं महातन्त्रं स्वतन्त्रं विष्णुयामलं॥
शक्तियामलमाख्यातं ब्रह्मणस्सृष्टिहेतुना।

ब्रह्मयामलवेदाङ्गं सर्व्वञ्च कथितं प्रिये ॥

इदानीमुत्तराकाण्डं वद श्रीरुद्रयामलं।

समाप्तिवा० । शेषं खण्डितं।

विषयः। अत्र सप्तषष्टिसङ्ख्यकाः पटलाः सन्ति। १, सिद्धमन्त्रप्रकरणं। २, सर्व्वचक्रानुष्ठानमहागुरुप्रकरणं। ३, सर्व्वचक्रानुष्ठाने सिद्धमन्त्रप्रकरणे भावनिर्णयः। ४—५, चक्रानुष्ठानप्रकरणं। ६—७, कुमार्य्युपचर्य्याविन्यासप्रकरणं। ८, कुमारीपूजादिविवरणं। ९, कुमारीकवचोल्लासः। १०, कुमार्य्या अष्टोत्तरसहस्रनाम। ११, पशुभावविचारः। १२, आज्ञाचक्रसङ्केतसिद्धमन्त्रप्रकरणं। १३, आज्ञाचक्रसारसङ्केतकथनं। १४, भरण्यादिसप्तविंशतिनक्षत्रफलाफलकथनं। १५, वेदप्रकरणं। १६, वेदभाषापरिच्छेदः। १७, अथर्व्ववेदप्रकरणं। १८, चतुर्वेदोल्लासः। १९, प्रश्नचक्रसारसङ्केते चतुर्वेदोल्लासः। २०, फलचक्रसारसङ्केते चतुर्वेदोल्लासः। २१, भूमिचक्रखर्गचक्रतुलाचक्रवारिचक्रसारसङ्केते मूलपद्मोल्लासः। २२, षट्चक्रसारसङ्केते योगशिक्षाविधिः। २३, आसनकथनं। २४, योगशास्त्रतात्पर्य्यार्थकथनं। २५, ब्रह्मतत्त्वप्रकरणं। २६, प्राणायामनिरूपणं। २७, शक्तितत्त्वकथनं। २८, मन्त्रसिद्धिलक्षणकथन। २९, षटचक्रप्रकाशे महाप्रलयनिर्णयः। ३०, षट्चक्रसिद्धिसाधने डाकिनीब्रह्मस्तोत्रं। ३१, भेदिन्यादिस्तोत्रं। ३२, स्कन्दवासिनीस्तोत्रं। ३३, स्कन्दवासिनीकवचं। ३४—३५, पञ्चामरायोगसाधनं। ३६, महाकुण्डलिन्यष्टोत्तरसहस्रनामस्तवः। ३७, स्वाधिष्ठानश्रीकृष्णराकिणीसाधनं। ३८, श्रीकृष्णस्वाधिष्ठानप्रवेशः। ३९, श्रीकृष्णस्तवकवचं। ४०, षड्दलवर्णप्रकाशः। ४१, राकिणीस्तोत्रं। ४२, राकिण्या अष्टोत्तरसहस्रनामस्तोत्रं। ४३, षट्चक्रभेदादिकथनं। ४४, मणिपूरचक्रभेदप्रकारः। ४५, त्रितत्त्वलाकिनीशक्तिस्तवः। ४६, वर्णध्यानकथनं। ४७, रुद्रशक्तिलाकिनीस्तोत्रं। ४८, रुद्रमन्त्रप्रकाशः। ४९, रुद्रमृत्युञ्जयस्तवः। ५०, लाकिनीशक्तिस्तवः। ५१, मणिपूरभेदप्रकाशः। ५२, महारुद्रमृत्युञ्जयलाकिनीसाष्टोत्तरशतसहस्रनाम। ५३, मन्त्रार्थचैतन्यविन्यासः। ५४, मणिपूरभेदः। ५५, अमरुचामरादिपञ्चद्रव्यशोधनं। ५६, हटयोगकथनं ५७, अनाहतपद्मविन्यासः। ५८—५९, काकिनीश्वरवर्णपार्श्वचरयजनादिकथनं। ६०, काकिनीसिद्धिसाधन। ६१, काकिनीस्तोत्रविन्यासः। ६२, काकिन्यष्टोत्तरशत सहस्रनामस्तोत्रं। ६३, ईश्वरस्तोत्रविन्यासः। ६४—६५, अनाहतेश्वरसम्मोहनाथकवचं। ६६, शाकिनीशिवार्चनं। ६७, शाकिनीस्तोत्रविन्यासः॥

No. CCXCIII.

Nigama Kalpadruma. A Tantra compilation, on secret or licentious worship. Contents : 1, praise of wine, flesh, fish, gesticulation and female society ; 2, the reason why they should be purified ; 3, the noblest form of worship ; 4, praise of women as an instrument of worship ; 5, particulars thereof ; 6, worship thereof ; 7, especial worship ; 8, ditto with *svayambhu-kusuma*, a kind of filthy rag ; 9, purification of the five essentials of worship noticed in the 1st chapter ; 10, particular kinds of flesh, and their purification.

२९३ । निगमकल्पद्रुमः ।

ग्रन्थकारः—?

विवरणं । प्राचीनं परिशुद्धप्रायञ्च । प० ३६ । पङ्क्ति० ४ । श्लो० ६०० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । कैलासशिखरे रम्ये क्रीडस्थां नगनन्दिनीं ।
रतेः प्राथम्यसमये भगवान् शङ्करोऽब्रवीत् ॥

समाप्तिवा० । शक्तिसन्तोषमात्रेण पूर्णा याति कुलक्रिया ।
येन तेन प्रकारेण सक्तिसन्तोषणं चरेत् ॥
इति निगमकल्पद्रुमे श्रीशिवपार्व्वतीसंवादे दशमः पटलः ॥

विषयः । १ पटले पञ्चमकारप्रशंसा । २, पञ्चमकारशुद्धिकारणकथनं । ३, परमसाधनकथनं । ४, स्त्रिया माहात्म्यं । ५, तदङ्गविशेषप्रभेदादिकथनं । ६ तदीयपूजनादिकथनं । ७, तदीयसाधनविशेषकथनं । ८, स्वयम्भुकुसुमाभिधानं । ९. पञ्चतत्त्वादिशोधनं । १०, मांसविशेषादिकथनं तदीयशोधनप्रकारस्य ।

No. CCXCIV.

Brahmáṇḍa Tantra. A Tantra in which Náráyaṇa, in reply to a question from Nárada, expounds the truth about Brahma, Prakṛiti or female energy, and *Pralaya* or periodical destruction of the universe. Contents : 1, Unity of Prakṛiti and Purusha ; 2, praise of S'akti ; 3, description of Goloka, the region of Vishṇu ; 4, incarnation of Prakṛiti ; 5-6-7, various names of Prakṛiti ; 8, worship of Táriní ; 9, true knowledge explained ; 10, hymn to Prakṛiti ; 11, distinction between Prakṛiti and Purusha.

२९४ । ब्रह्माण्डतन्त्रं ।

ग्रन्थकारः नारायणः ।

विवरणं । प्राचीनं परिशुद्धप्रायञ्च । प० १७ । पङ्क्ति० ७ । श्लो० २०० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतवाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । नारायणं नमस्कृत्य नारदो मुनिपुङ्गवः । पप्रच्छ वेदसारञ्च सारभूतं सुमङ्गलं॥
नारद उवाच । ब्रह्म किं वद साकारं किं निराकारमीश्वरं ।
प्रलयं कीदृशं नाम का वा प्रकृतिरीश्वरी ॥

समाप्तिवा० । किम्भेदो लक्ष्यते तत्र यज्जले शैत्यमेव तत् ।
अत एव हि योगीन्द्रैः स्त्रीपुम्भेदो न लक्ष्यते ॥
इति ब्रह्माण्डतन्त्रे एकादशः पटलः ॥

विषयः । १ पटले । प्रकृतिपुरुषयोरभेदकथनं । २, शक्तिमाहात्म्यं । ३, गोलोकधामवृत्तान्तकथनं । ४, प्रकृतीनामाविर्भावादिकथनं । ५, प्रकृतिनामानि । ६—७, प्रकृतिनामानि । ८, तारिणीपूजाकथनं । ९, तत्त्वज्ञानकथनं । १०, प्रकृतिस्तवः । ११, प्रकृतिपुरुषविवेचन ।

No. CCXCV.

Pichchhilá Tantra. An original Tantra in two parts: the MS. includes the first. Contents: 1, characteristics of the spiritual guide; 2-3, praise of Káliká; 4, mantra of Krishna; 5, initiation; 6, rules for bringing people under control by charms; 7, mantras for seizing thieves, &c.; 8, ditto for overcoming snake poison; 9, the mystic diagram called *sarvatobhadra;* 10, individual peculiarities; 11, mantras of Káliká; 12, daily worship; 13, pacification of demons; 14, mantras of Durgá; 15, worship of virgins; 16, six mystic circles; 17, praise of the mantra of Káliká; 18, charm bearing the name of Bhuvanes'varí; 19, mantra of Mahá Kálí; 20, origin of Vidyá; 21, monosyllabic mantra of Káliká.

२९५ । पिच्छिलातन्त्रं पूर्व्वार्द्धं ।

ग्रन्थकारः———?

विवरणं । नवीनमपरिशुद्धञ्च । प० १९ । पङ्क्ति० ७ । श्लो० २५० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतवाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं। कैलासशिखरासीनं देवदेवं वृषध्वजं। भवानी रहसि प्रीत्या जगाद मधुरं वचः॥

श्रीदेव्युवाच। भगवन् देवदेवेश लोकानुग्रहकारक।

सूचितं यत् पुरा देव कालिकासाधनक्रमं॥

समाप्तिवा०। खण्डितं।

विषयः। १, गुरुलक्षणं। २—३. कालिकायाः प्रशंसा। ४, कृष्णमन्त्रकथनं। ५, दीक्षाप्रयोगविधानं। ६, वशीकरणकथनं। ७, चौरधारणार्थकप्राकृतभाषीयमन्त्रादिकथनं। ८, सर्पविषनाशकमन्त्रादिकथनं। ९, सर्व्वतोभद्रमण्डलकथनं। १०, भावप्रभेदकथनं। ११, कालीमन्त्रकथनं। १२, नित्यपूजाविधिकथनं। १३. भूतशुद्धिविधानं। १४, दुर्गामन्त्रकथनं। १५, कुमारीपूजनक्रमः। १६, षट्चक्रक्रमनिरूपणं। १७. कालीमन्त्रप्रशंसा। १८. भुवनेश्वरीकवचं। १९, महाकालीमन्त्रकथनं। २०, विद्योत्पत्तिप्रकारकथनं। २१, कालिकाया एकाक्षरमन्त्रनिरूपणं।

No. CCXCVI.

Vákyatattva. A Smárta treatise by Siddhánta Panchánana, on time meet for religious ceremonies.

२९६। वाक्यतत्त्वं।

ग्रन्थकारः सिद्धान्तपञ्चाननः।

विवरणं। परिशुद्धं प्राचीनञ्च। प० १२। पङ्क्ति० ५—६। श्लो० २६०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० ढाकाविक्रमपुरान्तर्गतमहाराजनगरस्थ-श्रीयुतकालीकृष्णगङ्गोपाध्यायः।

प्रा० वाक्यं। वाक्यतत्त्वं निरूप्यते। तत्र वाक्यं मासपक्षतिथिघटितं।

मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः।

उल्लेखनमकुर्व्वाणो न तस्य फलभाग् भवेत्॥

समाप्तिवा०। पूर्व्ववदेवान्यच्च सुगममित्याह। इति सिद्धान्तपञ्चाननकृतं वाक्यतत्त्वं समाप्तम्॥

विषयः। मासपक्षादिघटितवाक्यस्य तात्पर्य्यनिर्णयः।

No. CCXCVII.

Kávyádars'a-vyákhyá. A commentary on the Kávyádars'a, a treatise on rhetoric, by Dandí.

२९७ । काव्यादर्शव्याख्या ।

ग्रन्थकारः——? ।

विवरणं । अपरिशुद्धं प्राचीनं । प० ६ । पङ्क्ति० ८—९ । श्लो० २०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० ढाकाविक्रमपुरान्तर्गतमहाराजनगरस्थश्रीयुत-कालीकृष्णगङ्गोपाध्यायः ।

प्रा० वाक्यं । काव्यलक्षणमारभमाणः काव्यस्य वाङ्मयत्वात् तदधिष्ठात्रीं सरस्वतीं कीर्त्तयन्नाह चतुर्मुखेत्यादि । भगवतो मुखानां बहुत्वात् अम्भोजवनत्वेन निरूपणं ॥

समाप्तिवा० । अतस्तन्त्रैर्विगतालस्यैः ईश्वते समर्था भवन्ति ।

इति काव्यादर्शटीकायां प्रथमपरिच्छेदस्य व्याख्या समाप्ता ॥

विषयः । दण्ड्याचार्य्यकृतकाव्यादर्शनामालङ्कारग्रन्थस्य व्याख्या ।

No. CCXCVIII.

Sañkalpachandriká. A Smriti treatise on resolution to commence a religious ceremony. By Raghunandana Bhattácharya, the author of the 28 Tattvas.

२९८ । सङ्कल्पचन्द्रिका ।

ग्रन्थकारः रघुनन्दनः ।

विवरणं । परिशुद्धं प्राचीनञ्च । प० ४ । पङ्क्ति० ४—७ । श्लो० १०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० ढाकाविक्रमपुरान्तर्गतमहाराजनगरस्थश्रीयुत-कालीकृष्णगङ्गोपाध्यायः ।

प्रा० वाक्यं । श्रीगुरोश्चरणद्वन्द्वं नत्वा सङ्कल्पचन्द्रिकां । गङ्गातीरसमुद्भूतः करोति रघुनन्दनः ॥ अथ कस्मात् सङ्कल्प इति चेत् अत्र हारीतः । मनसा सङ्कल्पयति वाचाभि-लपति कर्म्मणा चोपपादयति । तथा ब्रह्मपुराणेऽपि । आसाद्य च शुभं कार्य्य-मुद्दिश्य च मनोगतं ।

समाप्तिवा० । अहः पदस्याहोरात्रार्थकतयाऽत्र चावगतत्वात् ।

इति रघुनन्दनभट्टाचार्य्यकृता सङ्कल्पचन्द्रिका समाप्ता ॥

विषयः । सङ्कल्पपदार्थादिनिरूपणं ।

No. CCXCIX.

Mímáńsá-nyáya-prakás'a. A treatise on the elements of the Mímáńsá philosophy, by Ápadeva son of Anantadeva. Dr. Hall describes this work as "of first-rate repute and great comparative currency." *Contributions* &c., p. 185.

२९९ । मीमांसान्यायप्रकाशः ।

ग्रन्थकारः आपदेवः ।

विवरणं । प्राचीनमपरिशोधितञ्च । प० ५३ । पङ्क्ति० १०—१३ । श्लो० २५०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० इगलीप्रदेशान्तर्गतवंशवाट्याख्यग्रामस्थः श्रीवर्द्धमानाधिपतेः सभापण्डितः श्रीयुततारकनाथतत्त्वरत्नः ।

प्रा० वाक्यं । यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयं । प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलं ॥
अनन्तगुणसम्पन्नमनन्तभजनप्रियं । अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणं ॥
इह खलु परमकारुणिकेन भगवता जैमिन्यृषिणा अथातो धर्म्मजिज्ञासा इत्यादिना द्वादशसु अध्यायेषु धर्म्मो विचारितः । अत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानो धर्म्मः । यथा यागादिः ।

समाप्तिवा० । ग्रन्थरूपो मदीयोऽयं वाग्व्यापारः सुशोभनः ।
अनेन प्रीयतां देवो गोविन्दो भक्तवत्सलः ॥
इति श्रीअनन्तदेवसूनुना आपदेवेन कृतं मीमांसान्यायप्रकाशसञ्ज्ञकं मीमांसाप्रकरणं समाप्तं ॥

विषयः । मीमांसादर्शनप्रतिपादितधर्म्मप्रमाणादिपदार्थनिरूपणं ।

No. CCC.

Muktitattva. Nine dissertations on the means of salvation as described by the Vedántic philosophers. By Rámánanda S'vámí.

३०० । मुक्तितत्त्वं ।

ग्रन्थकारः रामानन्दस्वामी ।

विवरणं । परिशुद्धं नवीनं । प० २४ । पङ्क्ति० ६—९ । श्लो० ७२० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० इगलीप्रदेशान्तर्गतवंशवाट्याख्यग्रामस्थः श्रीवर्द्धमानाधिपतेः सभापण्डितः श्रीयुततारकनाथतत्त्वरत्नः ।

प्रा० वाक्यं। ननु नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि।
अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम्॥
इति कथं सङ्गच्छते सृष्ट्यभावकाले कर्म्माभावात्। अत्र केनचिदुक्तं। सृष्टेर्नाशो नास्ति नित्यत्वात्। तथाचैं प्रमाणं। नासदुत्पद्यते न च सद् विनश्यति इति। न च कदाचिदनीदृशं जगदिति च॥

समाप्तिवा०। एवमेवात्मबुद्ध्या तु मायात्मानं विचिन्तय।
तेनैव सद्भिन्नो हि भविष्यसि सुनिश्चितं॥
इति श्रीमन्मुक्तितत्त्वे परमरहस्योपदेशे नवमः परिच्छेदः॥
समाप्तोऽयं ग्रन्थः॥

विषयः। १, परिच्छेदे ब्रह्मनिरूपणं। २, संसारवैचित्र्यकथनं। ३, जीवस्य बन्धननिवृत्तिहेतुकथनं। ४, अष्टाङ्गयोगकथनं। ५, भक्तिसूत्रकथनं। ६, साधनोपदेशे शाण्डिल्यविद्याकथनं। ७, गृहिब्रह्मचार्य्युदासीनवानप्रस्थसन्न्यासिनां सर्व्वेषामेव यथाक्रमं मुक्तेर्व्विधानकथनं। ८, मरणविशेषेण तीर्थादौ मुक्तिकथनं। ९, निर्व्वाणमुक्तेर्मुख्यत्वकथनं तदुपायनिरूपणञ्च॥

No. CCCI.

Bálabodhiní.—A commentary on the Gíta-Govinda of Jayadeva. By Chaitanya Dása.

३०१। बालबोधिनी।

ग्रन्थकारः चैतन्यदासः।

विवरणं। प्राचीनं प्रायशः शुद्धञ्च। प० ४१। पङ्क्ति० ९। श्लो० ८००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० हुगलीप्रदेशान्तर्गतवंशवाट्याख्यग्रामस्थः श्रीयुततारकनाथतत्त्वरत्नः श्रीयुक्तवर्द्धमानाधिपतेः सभापण्डितः।

प्रा० वाक्यं। श्रीचैतन्यपादपद्ममधून्मत्तेन केनचित्। टीका सङ्गृह्यते गीतगोविन्दस्य समासतः॥
स्वयम्बोद्धुमभिप्रायं जयदेवमहामतेः। क्रमेणोपक्रमाद्देषा ग्रथ्यते बालबोधिनी॥
अत्र व्याकरणादीनां ग्रन्थबाहुल्यभीतितः।
विवृतिर्न कृता सा स्याद् ज्ञेया ग्रन्थान्तराद् बुधैः॥
वक्तव्यो बालबोधिन्यां शब्दार्थः शब्दवेदिभिः।
भावार्थदीपिकायाञ्च भावो भावार्थलोलुपैः॥

समाप्तिवा० । श्रीगोविन्दपादसेवाप्रभावादुदिता स्वयं ।
चैतन्यदासतो बालबोधिनो स्यात् सतां मुदे ॥
श्रीमद्रूपगणान् वन्दे दण्डवत् भुवि सम्पतन् ।
समर्थोत्कर्षपीयूषं साध्यते यैरहर्निशम् ॥ * समाप्ता चेयं बालबोधिनी ॥

विषयः । जयदेवगोस्वामिप्रणीतगीतगोविन्दकाव्यस्य तात्पर्य्यार्थविवरणं ।

CCCII.

Rámalilodaya.—An epic poem, in twenty cantos, on the life of Ráma from his birth to his coronation. By Rámakánta.

३०२ । रामलीलोदयं ।

ग्रन्थकारः रामकान्तः ।

विवरणं । नवीनं परिशुद्धञ्च । प० ९१ । पङ्क्ति० १३ । श्लो० ४५०० । अ० वङ्गीयं । आ० कागजः । शकाब्दाः १७८० । स्था० हुगलीप्रदेशान्तर्गतवंशवाट्याख्यग्रामस्थः श्रीयुक्तवर्द्धमानाधिपतेः सभापण्डितः श्रीयुततारकनाथतत्त्वरत्नः ।

प्रा० वाक्यं । नवीनघननीरदप्रभमतीवमुद्यज्ज्वल-
न्मणिस्रजमुदन्वति प्रबलवीचिमातन्वति ।
कृतालिमुरसा दृशा चरणजानुमूर्द्ध्ना हृदा
भुजेन वचसा भृशं मधुरमूर्त्तिरामं भजे ॥ १ ॥
को जानाति महेन्द्रवज्रवपुषो वातात्मजस्यामलं
विक्रान्तं जननीप्रसूतिसमयेऽधावत् प्रचण्डद्युतिं ।
यो गम्भीरपयोधिपारमगमत् लीलारसव्यञ्जनात्
दग्ध्वा काञ्चनपद्मसञ्चयलसल्लङ्कामगाहत् पुनः ॥ २ ॥
यस्यानुग्रहमात्रतो जडजनैः पाण्डित्यमातन्यते
येन श्रीरघुनाथपादकमले भृङ्गीकृतं मानसं ।
येनानीय महौषधालयगिरिं श्रीलक्ष्मणो रक्षितः
तं वन्दे सुरशत्रुदर्पदलनं वीरं समीरात्मजं ॥ ३ ॥

समाप्तिवा०। धीरश्रीयुतरामकान्तकृतिना स्वर्गापवर्गार्थिना
पाठाभ्यासविचारमज्जनमनोमोदं समाकाङ्क्षिणा ।
श्रीवाणेश्वरसूनुना विरचिते श्रीरामलीलोदये
काव्ये विंशतिरीरितोऽतिरुचिरो रामाभिषेकाभिधः ॥ २० ॥

विषयः । १ सर्गे, श्रीरामजन्म । २, जानकीपरिणयः । ३, भार्गवजयः । ४, वनान्तराभिगमनं । ५, भरतागमः । ६—७, जानकीहरणं । ८, लङ्कादाहः । ९, हनूमत्प्रत्यागतिः । १०, सीतासन्देशः । ११, विभीषणाश्वासः । १२, अङ्गदागमनं । १३, लक्ष्मणशक्तिवेधः । १४, अतिकायनिकुम्भबधः । १५, इन्द्रजिद्युद्धं । १६, मयशक्तिमोचणं । १७, रामचन्द्रकर्त्तृकब्रह्मास्त्रपरित्यागः । १८, शुभसंवादकथनं । १९, भरतदर्शनं । २०, श्रीरामाभिषेकः ।

CCCIII.

Siddhánta Gítá.—A treatise on salvation. It says that the first three Vedas are the great causes of bondage, and the last the means of freedom from transmigration and of eternal beatitude. It is said to be a part of a work named *Atharva-rahasya,* and is divided into eight chapters.

३०३ । सिद्धान्तगीता ।

ग्रन्थकारः——? ।

विवरणं । नवीनमपरिशुद्धञ्च । प० ९ । पङ्क्ति० ७—२२ । श्लो० २७०० । अ० वङ्गीयं । आ० इंरेजीयकागजः । शकाब्दाः १७८७ । स्था० ङगलीप्रदेशान्तर्गतवंशवाटग्राख्यग्रामस्थः श्रीयुततारकनाथतत्त्वरत्नः श्रीयुक्तवर्द्धमानाधिपतेः सभापण्डितः ।

प्रा० वाक्यं । श्रीअर्जुन उवाच । देवादिदेव देवेश कथयस्व महामते ।
केन ज्ञानप्रभावेन मुच्यते भवबन्धनात् ॥ १ ॥
श्रीभगवानुवाच । वेदत्रयं महाप्राज्ञ भवबन्धनकारणं ।
चतुर्थञ्च परिज्ञातं मुच्यते भवसागरात् ॥ २ ॥
ऋग्यजुःसामभेदोऽयं परित्याज्यो महामते ।
वेदे चाथर्व्वणे सारं ग्राहयित्वा प्रयत्नतः ॥ ३ ॥
तत्रास्ति प्रणवो मूलं विचार्य्यैव पुनः पुनः ।
वेदत्रयविनिर्म्मुक्तो मात्रात्रयविवर्ज्जितः ॥ ४ ॥

समाप्तिवा० । सकलभुवनहेतुः ज्ञानमार्गैकसेतुः गुरुचरणजबोधः सर्व्वसंसाररोधः ।
सगुणभजनहानिः प्राणिनां मोक्षपाणिः दिशतु दिशतु तूर्णं सद्गुरुः सातपूर्त्तं ॥
इति श्रीमदथर्व्ववेदरहस्ये श्रीकृष्णार्जुनसंवादे सिद्धान्तगीतायामष्टमोऽध्यायः ॥

विषयः । १ अध्याये, मतनिदर्शनं । २, वर्णाक्षरयोः परिचयः । ३, केवलं ब्रह्माहमिति प्रतिपत्तिः । ४, तत्त्वज्ञानतत्त्वयोगतत्त्वार्थचिन्ताप्रभृतयः । ५, देहनिर्णयः । ६, लिङ्गदेहसमुच्चयः । ७, निर्गुणशतनामवर्णनं । ८, महाकारणदेहादिकथनम् ॥

CCCIV.

Sriharistotra.—A hymn in praise of Hari. By S'ankara A'chárya.

३०४ । श्रीहरिस्तोत्रं ।

ग्रन्थकारः शङ्कराचार्य्यः ।

विवरणं । नवीनं परिशुद्धञ्च । प० ४ । पङ्क्ति० १९ । श्लो० १२० । अ० वङ्गीयं । आ० इंरेजीयकागजः । का०—? । स्था० हुगलीप्रदेशान्तर्गतवंशवाट्याख्यग्रामनिवासि-श्रीयुततारकनाथतत्त्वरत्नः श्रीयुक्तवर्द्धमानाधिपतेः सभापण्डितः ।

प्रा० वाक्यं । स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं यस्मिन्नेतत् संहृतिचक्रं भ्रमतीत्थं । यस्मिन् दृष्टे नश्यति तत् संहृतिचक्रं तं संसारध्वान्तविनाशं हरिमीडे ॥ १ ॥

समाप्तिवा० । इत्थं स्तोत्रं भक्तजनेड्यं भवतीति ध्वान्तार्काभं भगवत्पादीयमिदं यः । विष्णोर्लोकं पठति शृणोति व्रजति ज्ञानं ज्ञेयं स्वात्मनि चाप्नोति मनुष्यः ॥ इति श्रीमच्छङ्कराचार्य्यविरचितं श्रीहरिस्तोत्रं समाप्तं ॥

विषयः । ४४ सङ्ख्यकश्लोकात्मकमिदं स्तोत्रं । अत्र भगवतो नारायणस्य माहात्म्यप्रति-पादनम् ॥

CCCV.

A'nandatarañgini. Itinerary from Chandananagara to Benares, and description of the latter city, its foundation and ancient legends. By Vechaváma Nyáyálankára.

३०५ । आनन्दतरङ्गिणी ।

ग्रन्थकारः वेचारामन्यायालङ्कारः ।

विवरणं । नवीनं परिशुद्धञ्च । प० ९६ । पङ्क्ति० ४—११ । श्लो० २००० । अ० वङ्गीयं ।

आ० तुलटकात्मजः। शकाब्दाः १७२१। स्था० डुगलीप्रदेशान्तर्गतवंशवाट्याख्य-
ग्रामस्थः श्रीयुक्तवर्द्धमानाधिपतेः सभापण्डितः श्रीयुततारकनाथतत्त्वरत्नः।

प्रा० वाक्यं। विश्वेशमाधवकढुण्ढिकदण्डपाणिश्रीकालभैरवगुहामरनिम्नगाभिः।
दुर्गादिभिश्च मणिकर्णिकया च युक्ता वाराणसी मम मनोरथसिद्धयेऽस्तु॥ १॥
आनन्दं ब्रह्मरूपं श्रुतिवच इति यच्चैकमेवाद्वितीयं
ब्रह्मैतत् स्वात्मनो दर्शयितुमिति न भिन्ना च शक्तिर्जगत्सु।
यः सर्व्वाम्नायबोधः स्वयमपि भगवान् अर्द्धनारीश्वरोऽभूत्
तत्पादाम्भोजलुब्धो भवतु मम मनश्चञ्चरीकश्चिराय॥ २॥
प्रणम्य सञ्चिन्त्य सदाशिवासतिं महेश्वरं सोमसुपास्य कोऽपि सन्।
स्वनिर्म्मितानन्दतरङ्गिणीकृतौ करोति सिद्धान्ततरिं सतां मुदे॥
कोमलोऽपि सतां श्लोको विघूर्णयति बालकं।
विनाऽपि धातुवैषम्यात् यथा मातुलपुत्त्रकः॥

समाप्तिवा०। सिद्धान्तोत्तरराजरामतनयो वन्द्यान्वयः श्रीयुतो
वेचारामसुधीर्महेशनगरीं दृष्ट्वा चिक्लो मुदा।
तेनानन्दतरङ्गिणी कविमनःसन्तोषणी निर्म्मिता
सा चेद्वाष्टमसर्गमूलसहिता लेभेऽथ सम्पूर्णतां॥
ग्रन्थसमाप्त्यनन्तरं ग्रन्थकृता पञ्चभिः श्लोकैः स्वपरिचयः प्रदत्तः। तेषामन्त्यः श्लोको यथा।
यश्चैतन्यरहस्यमद्भुतरसं सत्काव्यरत्नाकरं
वैद्यानां सुखहेतवेऽतिबहुलं भैषज्यरत्नाकरं।
तस्मात् श्रीमणिमञ्जरीं सुरुचिरां नेपालभूपाज्ञया
श्रीसिद्धान्तमनोरमां समकरोत् टीकां तथा ज्योतिषि॥
महामहोपाध्यायश्रीराजरामसिद्धान्तभट्टाचार्य्यात्मजश्रीवेचारामन्यायालङ्कारविरचिता श्रीसिद्धान्ततरिनाम्नी श्रीआनन्दतरङ्गिणी टीका सम्पूर्णा॥

विषयः। १ प्रथमसर्गे, वर्त्मकथनं। अर्थात् चन्दननगरात् काशीपर्य्यन्तभागीरथीतीरवर्त्तिग्रामादिवर्णनं। २, शम्भुशिवारहस्यवर्णनं। ३, रत्नपुरीनिधानकथनं। ४, हिमशैलराजचरितवर्णनं। ५, व्यासभुजावरोधकथनं। ६, व्यासविलापकथनं। ७, तीर्थकशक्तिलिङ्गकथनं। ८, काशीपुरीवर्णनं ग्रन्थसमाप्तिश्च।

No. CCCVI.

Siddhántamaṇi-manjarí. An astrological compendium, by Vechá-ráma Nyáyálankára, containing detailed accounts of the effects of particular conjunctions of the Planets.

३०६ । सिद्धान्तमणिमञ्जरी ।

ग्रन्थकारः वेचारामन्यायालङ्कारः ।

विवरणं । नवीनं परिशुद्धञ्च । प० २२ । पङ्क्ति० ३—९ । श्लो० ४०० । अ० वङ्गीयं । आ० तुलटकागजः । शकाब्दाः १७३७ । स्था० ऊगलीप्रदेशान्तर्गतवंशवाटाख्यग्रामनिवासिश्रीवर्द्धमानाधिपतिसभापण्डितश्रीयुततारकनाथतत्त्वरत्नः ।

आ० वाक्यं । वाणीपाणिग्रलग्नाङ्गुततमविचलत्तन्त्रिकोत्या समन्तात्
प्रोद्यद्रासन्नरागोत्तमसधुरिमसम्मूर्च्छनासूज्ज्वलाङ्गी ।
मीमांसान्यायवैशेषिकविरसविचारप्रयासातिशुष्कं
सत्काव्यन्नित्रदाची सुखयतु हृदयं कल्पकीकाकली वः ॥ १ ॥
निजनिर्म्मितसिद्धान्तरत्नाकरसमुद्धृतां ।
करोमि काव्यवत् स्वल्पां सिद्धान्तमणिमञ्जरीं ॥ २ ॥

समाप्तिवा० । वैधेयो मास्तु विधेयो भवतितरां तत्र नैव नः खेदः ।
दोषज्ञा दोषज्ञा न गुणज्ञा एतदाश्चर्य्यम् ॥ १६२ ॥
इति वन्द्यघटीयश्रीराजरामसिद्धान्तभट्टाचार्य्यात्मजश्रीवेचारामन्यायालङ्कारविरचिता सिद्धान्तमणिमञ्जरी सम्पूर्णा ॥

विषयः । ग्रन्थकारनिवेदनं । राशिविभागः । राशिविशेषसञ्ज्ञा । क्षेत्रकथनं । होराद्रेक्काणकथनं । नवांशः । द्वादशांशः । त्रिंशांशः । तन्वादिभावाः । पापग्रहाः । ग्रहदृष्टिः । रवेर्मित्रं । रवेः शत्रुः । चन्द्रस्य मित्रं । कुजशत्रुमित्रे । बुधशत्रुमित्रे । गुरुशत्रुमित्रे । शुक्रशत्रुमित्रे । शनिशत्रुमित्रे । राहुशत्रुमित्रे । केतुशत्रुमित्रे । तात्कालिकमित्राणि । गोचरः । चन्द्रताराशुद्धेरावश्यकं । चन्द्रशुद्धिः । ताराशुद्धिः । नक्षत्राधीशाः । सप्तगणाः । पाठान्तरेण लघुगणाः । अधोमुखगणः । ऊर्द्धमुखगणः । पुन्नामगणः । नक्षत्रमुहूर्त्ताः । पुष्यप्रशंसा । वारवेला । इत्यादिविविधज्योतिर्विषया वर्त्तन्ते ।

No. CCCVII.

Yatyáchára-Sangraha. A manual of the duties of a Yati, by Vis'-ves'vara Sarasvatí. The MS. found contains only the rules for the funeral of Yatis, and is entitled Yatisañskára Prayoga.

३०७। यत्याचारसङ्ग्रहीययतिसंस्कारप्रयोगः।

ग्रन्थकारः विश्वेश्वरसरस्वती।

विवरणं। नवीनं परिशुद्धञ्च। प० १। पङ्क्ति० ११। श्लो० २५। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० वर्द्धमानप्रदेशान्तर्गतमानकरग्रामस्थश्रीयुतबाबुहितलालमिश्रः।

प्रा० वाक्यं। अथ यतिसंस्कारः। तद्व्यवस्था विश्वेश्वर्य्याख्यसङ्ग्रहोक्ता यथा,
शौनकः। अथवा कालगत्या च भिक्षुके गतजीविते।
संस्कुर्य्यात् ब्राह्मणो विद्वान् गृही धर्म्मपरायणः॥
भगवत्पादपूज्यश्रीगोविन्दसरस्वतीनां। अस्मत् परमेष्ठिगुरूणां विचार आचारश्चेति।
असंस्कृतं विशीर्य्येत यत्र देशे कलेवरं।
धर्म्मलोपो भवेत्तत्र दुर्भिक्षं मड़कादिकं॥

समाप्तिवा०। परमानन्दपूर्व्वकं स्वस्वगृहं व्रजेयुः।
इति विश्वेश्वरसरस्वतीविरचितयत्याचारसङ्ग्रहीययतिसंस्कारप्रयोगः समाप्तः॥

विषयः। यत्यन्त्येष्टिक्रिया।

No. CCCVIII.

Panchikarana Várttika. A metrical paraphrase of S'ankara Áchárya's *Panchikarana, Prakriyá,*—a disquisition on the union of the five elements in the formation of the universe, and the means of redemption therefrom. By Súres'vara Áchárya.—Vide Hall's *Contributions*, 139.

३०८। पञ्चीकरणवार्त्तिकं।

ग्रन्थकारः सुरेश्वराचार्य्यः।

विवरणं। नवीनं परिशुद्धञ्च। प० ४। पङ्क्ति० ४—१६। श्लो० १००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० वर्द्धमानप्रदेशान्तर्गतमानकरग्रामस्थश्रीयुतबाबुहितलालमिश्रः।

प्रा० वाक्यं। ॐकारः सर्व्वदेवानां सारतत्त्वप्रकाशकः।
तेन चित्तसमाधानं मुमुक्षूणां प्रकाश्यते॥ १॥
आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियं।
तत् स्वमायासमावेशात् वीजमव्याकृतात्मकं॥ २॥

समाप्तिवा०। समभ्यसेद्दिवामुत्र भोगानासक्तधीः सुधीः।

रागद्वेषादिरहितः स्वात्मानं चिन्तयेत् सदा ॥ ६४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्करभगवत्पूज्यपादशिष्यसुरेश्वराचार्य्यस्य कृतौ पञ्चीकरणवार्त्तिकं समाप्तम् ॥

विषयः। आसियाटिकशोसाइटीनामकसभालयस्थितात् पुस्तकात् स्वतन्त्रमिदं। सङ्क्षेपेण ब्रह्मतत्त्वपञ्चीकारवर्णनं॥

No. CCCIX.

Prasthána-bheda. Essay on the different schools of the Vedanta Philosophy. By Madhusúdana Sarasvatí.

३०९। प्रस्थानभेदः।

ग्रन्थकारः मधुसूदनसरस्वती।

विवरणं। नवीनं परिग्रहस्य। प० ५। पङ्क्ति० १२। श्लो० ६६। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० वर्द्धमानप्रदेशान्तर्गतमानकरग्रामस्थश्रीयुतबाबुहितलालमिश्रः।

प्रा० वाक्यं। अथ सर्व्वेषां शास्त्राणां भगवत्येव तात्पर्य्यं साक्षात् परम्परया चेति समासेन तेषां प्रस्थानभेदोऽत्र उद्दिश्यते। तथा हि। ऋग्वेदो यजुर्वेदः सामवेदोऽथर्व्ववेद इति वेदाश्चत्वारः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति वेदाङ्गानि षट्। पुराणन्यायमीमांसाधर्म्मशास्त्राणि चेति चत्वार्य्युपाङ्गानि। अत्र उपपुराणानामपि पुराणे अन्तर्भावः।

समाप्तिवा०। तत्र तेषां तात्पर्य्यमबुद्धा वेदविरुद्धेऽप्यर्थे तात्पर्य्यमुत्प्रेक्षमाणास्तन्मतमेवोपादेयत्वेन गृह्णन्तो जना नानापथजुषो भवन्ति इति सर्व्वमनवद्यं।

इति श्रीमधुसूदनसरस्वतीविरचितः प्रस्थानभेदः समाप्तः॥

विषयः। वेदान्तशास्त्रीयप्रस्थानविशेषनिरूपणं।

No. CCCX.

Syámá-pradípa. A manual for the worship of Syámá. Contents: 1. The derivation of the mystic mantra of the Devi. 2. The mode of worshiping her. 3. Prayers. 4. Fee &c. 5. Purification. 6. Natures of the worshipers and the worshiped. 7. Occasional worship. 8. Esoterics of the cult. 9. What are desirable objects. 10. Ritual for the worship of Tárá. 11. Especial worship. 12. Hymns and prayers. 13. Expiations, &c.

३१० । श्यामाप्रदीपः ।

ग्रन्थकारः———? ।

विवरणं। परिशुद्धं । प० १४९ । पङ्क्ति० ६—७ । श्लो० २००० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं। नमामि परदेवतां प्रणतकार्य्यसिद्धिप्रदां महेशकमलापतिप्रभृतिदेवदेवस्तुतां । अनेकजननार्ज्जितप्रथितपुण्यलभ्याश्रयां निरङ्कुशशलाञ्छनप्रचुरबिम्बकान्ताननां ॥

समाप्तिवा०। लोकैर्दृश्यते न तु तद्वान्तरमिति (?) तथाहेति । इत्यासां विस्तरः । इति श्यामाप्रदीपे ताराकल्पे त्रयोदशपरिच्छेदः ॥

विषयः। १, देव्या मन्त्रोद्धारविनिर्णयः । २, पूजाविधिः । ३. स्तवादिकथनं । ४, दक्षिणाविधानं । ५, पुरश्चरणं । ६, भावनिर्णयः । ७, नैमित्तिकनिरूपणं । ८, गोप्यनिर्णयः । ९, काम्यविधानं । १०, ताराकल्पः । ११, देव्या अर्च्चनं । १२, विशेषतः स्तवादिकथनं । १३, प्रकीर्णप्रकरणं ॥

No. CCCXI.

Achára-málá. Rules of conduct, or what to do and what to avoid. By Nidhiráma S'armá.

३११ । आचारमाला ।

ग्रन्थकारः निधिरामशर्म्मा ।

विवरणं। परिशुद्धं कदर्य्यलिखितञ्च । प० ४२ । पङ्क्ति० ६—७ । श्लो० ८०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं। नत्वा विघ्नविनाशाय देवेन्द्रं गणनायकं ।
दुर्गां दुर्गतिनाशाय शिवाय च शिवं गुरुं ॥
आचारमाला नाम (?) स्मृतितन्त्रानुसारिणी ।
भण्यते निधिरामेण द्विजेन प्रीतये सताम् ।

समाप्तिवा०। खण्डितं ।

विषयः। सदाचारनिरूपणम्।

No. CCCXII.

Dánavákyávali. Consecration of various kinds of gifts, and the merits of bestowing them upon particular persons.

३१२ । दानवाक्यावली ।

ग्रन्थकारः ———?

विवरणं । परिशुद्धं नवीनञ्च । प० १०९ । पङ्क्ति० ६—७ । स्लो० १५०० । अ० वङ्गीयं । आ० तुलटकागजः । शकाब्दाः १६८५ । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थ-महाराजश्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं । देशे काले तथा पात्रे धनं न्यायार्जितं तथा ।
यद्दत्तं ब्राह्मणश्रेष्ठास्तदनन्तं प्रकल्पितं ॥
मत्स्यपुराणे, न्यायेनार्ज्जनमर्थस्य वर्ज्जनञ्चातिरक्षणं ।
सत्पात्रे प्रतिपत्तिश्च सर्व्वशास्त्रेषु गीयते ॥

समाप्तिवा० । ततः कुशादीनादाय अमुकनामगोत्रायेत्यादि । दक्षिणा च ।
वर्षे गौड़महीभुजः शशिसरिन्नाथाग्निचिक्रे शुचौ
पञ्चम्यां भृगुनन्दने रतिपतिः श्रीमानसे श्रीयदा ।
एतत् पुस्तकमुत्तमं गुणगणग्रामाभिरामाय वै
गोविन्दार्चनतत्पराय भवते श्रीरत्नपाणेऽस्तु ते ॥

विषयः । हिरण्यतैजसरजतरत्नालङ्कारपुष्परागादिमणिवेश्मधेनुवृषभगवाश्वाजादिपशुस्वर्ग-घृतधेनुतिलधेन्वादिविविधदाननिरूपणं ॥

No. CCCXIII.

Kámarúpíya-nibandha Tantra. Various kinds of potentates, kings, and emperors, the curse of Vasistha on drinkers of spirits, &c.

३१३ । कामरूपीयनिबन्धतन्त्रं ।

ग्रन्थकारः ———?

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ८० । पङ्क्ति० ३—६ । स्लो० १००० । अ० वङ्गीयं । आ० पत्रविशेषः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीश-चन्द्रः ।

प्रा० वाक्यं । देव्युवाच । भगवन् सर्व्वधर्मज्ञ चन्द्राद्धिकृतभूषण ।
विप्रक्षत्रविशां धर्म्माः शूद्रस्य कथितास्त्वया ॥

निर्णीतं लक्षणं तेषां यथानुक्रमयोगतः ।
ब्रह्मचर्य्ये तथा गार्हे वानप्रस्थाश्रमेऽपि च ॥

समाप्तिवा०। खण्डितं ।

विषयः । हरगौरीसमागमराजनिर्णयवशिष्ठशापचक्रवर्त्तिनियमादिवर्णनम् ।

No. CCCXIV.

Nirdosha-kula-sáraválí. Kulins, their attributes, defects, and genealogy. The bulk of the work is in Sanscrit, but in some places the Bengali language is introduced.

३१४ । निर्द्दोषकुलसारावली ।

ग्रन्थकारः————?

विवरणं । प्राचीनमपरिशुद्धञ्च । प० २८६ । पङ्क्ति० ९—१२ । श्लो०९००० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतलोहारामशिरोरत्नः ।

प्रा० वाक्यं । अथ दुर्बलिप्रकरणं । दुर्बले वार्त्तियं आर्त्तो अरविन्दजः न्यून मु सिरो खञ्जकरं गर्द्दोषा उभोजः उचित मु विकर्त्तन साधुः उभोजः सिरो खञ्जकरणात् पर विकर्त्तनप्राप्तित्वात् दुर्बलेः साधुः केचित् इत्यादि ।

समाप्तिवा०। सर्व्वे द्राधवकाटीनिवासिनः ।
इति निर्द्दोषकुलसारावल्यां काञ्जीकुलं समाप्तम् ।

विषयः । पुस्तिकादौ संस्कृतभाषया लिखिता । परन्तु कुत्र कुत्रचित् वङ्गभाषापि विद्यते । अत्र कुलीनानां लक्षणादि वंशावलिश्च वर्त्तते । कुलीनानां प्रभेदश्च विद्यते ॥

No. CCCXV.

Des'íyarája-s'ekhara-kosha. A dictionary of Synonyms. By Panchánana Bhattáchárya.

३१५ । देशीयराजशेखरकोषः ।

ग्रन्थकारः पञ्चाननभट्टाचार्य्यः ।

विवरणं । अपरिशुद्धं प्राचीनञ्च । प० ३ । पङ्क्ति० ३—७ । श्लो० ९० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः ।

प्रा॰ वाक्यं। सारस्वतरहस्यानि रसमुग्धि पदे पदे।
सर्व्वस्वानि कवीन्द्रस्य शब्दतत्त्वानि बोधत॥
सामजः सिन्धुरः कुम्भी मदहन्दो महाव्हगः।
कुञ्जरे कुन्दरोवाहैर्बालमाङ्गनवेस्य ये (?)॥
पारावतः कलरवे गुञ्जनं गजमज्जने।
कादम्बिनी मेघदाम्नि सवो हावे भुजा भुजे॥
समाप्तिवा॰। कण्ठीरवस्तु पारीन्द्रो मृगेन्द्रे तरसं तथा। इति देशीयराजशेखरकोषः॥
विषयः। पर्य्यायशब्दकथनम्॥

No. CCCXVI.

Syámá-nitya-pújá-paddhati. A manual for the daily worship of Syámá.

३१६। श्यामानित्यपूजापद्धतिः।

ग्रन्थकारः———?
विवरणं। प्राचीनं परिशुद्धञ्च। प॰ १९। पङ्क्ति॰ ३—६। श्लो॰२००। अ॰ वङ्गीयं। आ॰ पत्र-
विशेषः। का॰—?। स्था॰ नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः।
प्रा॰ वाक्यं। हस्तौ पादौ प्रक्षाल्य। ॐ सूर्य्यः सोमः यमः कालो महाभूतानि पञ्च च।
एते शुभाशुभस्येह कर्म्मणो नव साक्षिणः॥
समाप्तिवा॰। ॐउच्छिष्टचाण्डालिन्यै नम इति निर्म्माल्येन सम्पूज्य दक्षिणां कुर्य्यात्॥
विषयः। कालिकाराधनानुष्ठानकथनम्।

No. CCCXVII.

Kṛishi-vishaya. A guide to agriculture.

३१७। कृषिविषयः।

ग्रन्थकारः———?
विवरणं। प्राचीनं परिशुद्धञ्च। प॰ ५। पङ्क्ति॰ ४। श्लो॰ १००। अ॰ वङ्गीयं। आ॰ तुलट-
कागजः। का॰—?। स्था॰ नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः।
प्रा॰ वाक्यं। जयति पराशरनामा मुनिः कृषिकर्म्मधर्म्मसंवेदी।
कृषका यस्य मतज्ञा वसुधां फलन्ति सर्व्वरत्नानि॥

चतुर्व्वेदार्थतत्त्वज्ञो ब्रवीति कृपणं वचः ।
अलब्ध्वाऽऽगच्छते सोऽपि प्रार्थनालाघवान्वितः ॥
सुवर्णमणिमाणिक्यवसनैरपि पूरितः ।
तथापि प्रार्थयन्त्येते कृषकान् भक्ततृष्णया ॥
कटौ हस्ते च कर्णे च सुवर्णं विद्यते यदि ।
उपवासस्तथापि स्यात् अन्नालाभेन देहिनाम् ॥

समाप्तिवा०। अङ्गारको यदा सिंहे तदाङ्गारमयी मही ।
स एव रविणा युक्तः समुद्रमपि शोषयेत् ॥
इति कृषिविषयः समाप्तः ॥

विषयः । कृषिसम्बन्धिनानाविधोपायकथनम् ।

No. CCCXVIII.

Sangita-nárayana. On tone, rythm, gamut, &c. of the Indian music. By Purusottma Mis'ra.

३१८ । सङ्गीतनारायणं ।

ग्रन्थकारः पुरुषोत्तममिश्रः ।

विवरणं। प्राचीनमपरिशुद्धं सुजीर्णतमञ्च । प० ८० । पङ्क्ति० ५—७ । श्लो० १५०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः ।

प्रा० वाक्यं । लीलाद्रिकन्दरानन्दिमन्दरायणवन्दितं ।
वन्दे वन्दारुसाङ्ग(?)मन्दिर मेन्दिरं महः ॥
प्रवृत्तलालं करतालिकाभिराभीरिकानां कलवेणुगीतं ।
न्दत्यन्तमत्यन्तमुदीर्णहासं रासं भजन्तं हरिमन्तमीडे ॥

समाप्तिवा०। दोर्मूलकूलङ्कषशातकुम्भभसम्वरारम्भिकुचापि यापि ॥
श्रीकविरत्नपुरुषोत्तममिश्रकृतः सङ्गीतनारायणनामा ग्रन्थः समाप्तः ॥

विषयः । सङ्गीतापयोगिस्वरताललयादिविवरणं ।

No. CCCXIX.

A'chára-sára-prakarana of the *Brahma-jámala Tantra.* The praise of Buddha in seven cantos.

३१९। आचारसारप्रकरणं।

ग्रन्थकारः——?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० २२। पङ्क्ति० ५। स्रो० २५०। अ० वङ्गीयं। आ० तुलटकागजः। शकाब्दाः १६९२। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराज-श्रीयुक्तसतीशचन्द्रः।

प्रा० वाक्यं। देव्युवाच। महाचीनक्रमाचारः सूचितो न प्रकाशितः।
इदानीं श्रोतुमिच्छामि कथयस्व महेश्वर॥

समाप्तिवा०। एतत्ते कथितं सर्व्वं विजयाकल्पमुत्तमं।
प्रसादाद्चिरादस्य वाञ्छितं ते भविष्यति॥
इति ब्रह्मयामले आचारसारप्रकरणे सप्तमः पटलः॥

विषयः। भगवतो बुद्धदेवस्य माहात्म्यवर्णनेन महाचीनाचारस्य गौरवमुक्तं ब्रह्मणा। शिवेनैतद्देवोक्तं भगवत्यै॥

No. CCCXX.

Smárta-vyavasthárṇava. Responsa prudentum, on various questions of Hindu law. By Raghunátha.

३२०। स्मार्त्तव्यवस्थार्णवः।

ग्रन्थकारः रघुनाथः।

विवरणं। प्राचीनमपरिशुद्धञ्च। प०४४। पङ्क्ति० ४—६। स्रो० ९००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्त-सतीशचन्द्रः।

प्रा० वाक्यं। नत्वा श्रीरघुनाथ ईश्वरपदाम्भोजं गुरुं सादरात्
मन्वादिस्मृतिसंहितार्थमवधार्य्याचार्य्यवाक्येन च।
बालानां पटुताविधायकममुं स्मार्त्तव्यवस्थार्णवं
रायश्रीयुतराघवस्य नृपतेरादेशतो निर्म्ममे॥
तिथिसङ्क्रान्त्यशौचेषु द्रव्यशुद्ध्यधिकारिणः।
प्रायश्चित्तोद्वाहदायेष्वपि वाच्योऽत्र निर्णयः॥

समाप्तिवा०। खण्डितं।

विषयः। रघुनन्दनभट्टाचार्य्यसङ्कलितधर्म्मशास्त्रीयबहुविधव्यवस्थायाः सङ्क्षेपेण प्रतिपादनम्॥

No. CCCXXI.

Kávya-prakás'a-rahasya-prakás'a. A commentary on the Kávyapraká's'a of Mammaṭṭa Bhaṭṭa. By Rámanátha Vídyáváchaspati.

३२१ । काव्यप्रकाशरहस्यप्रकाशः ।

ग्रन्थकारः रामनाथविद्यावाचस्पतिः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ११६ । पङ्क्ति० ७—८ । स्लो० १८०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः ।

प्रा० वाक्यं । व्रजशिशुवृन्दवयस्यं सततमुपास्यं मुनीन्द्राणां ।
वेदाविदितरहस्यं गिरिशनमस्यं नमस्यामः ॥
मौनीभूतमुखार्द्धमादरदरस्तुत्याकुलार्द्धाननं
रम्यं सार्द्धविलोचनं भयपरिम्लानान्यमार्द्धेक्षणं (?) ।
रुद्धं वामकरेण सव्यचरणन्यस्तान्यदोःपल्लवं
व्यामुह्यच्छिरसा पदान्तपतनं शैवं वपुः पातु वः ॥
निःशेषशास्त्रसारं वारं वारं विचार्य्य चिन्वानः ।
काव्यप्रकाशगूढं विद्यावाचस्पतिर्विकाशयति ॥

समाप्तिवा० । खण्डितं ।

विषयः । मम्मटभट्टप्रणीतकाव्यप्रकाशार्थविवरणं ।

No. CCCXXII.

Panchama-sára-sañhitá. Dissertations on the notes of the Hindu gamut. By Nárada.

३२२ । पञ्चमसारसंहिता ।

ग्रन्थकारः नारदः ।

विवरणं । प्राचीनं परिशुद्धञ्च । प० ११ । पङ्क्ति० ३—५ । स्लो० २०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुतवावु-उमानन्दरायः ।

प्रा० वाक्यं । मयूरवृषभच्छागक्रौञ्चकोकिलवाजिनः ।
मातङ्गाश्च क्रमेणाङ्कः स्वरानेतान् सुदुर्गमान् ॥

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥

समाप्तिवा०। खण्डितम् ।

विषयः। निषादादिसप्तस्वरग्राममूर्च्छनादिनिरूपणम् ।

No. CCCXXIII.

Koshṭhi-pradípa. Elements of horoscopy. By S'rínátha Bhaṭṭa.

३२३ । कोष्ठीप्रदीपः ।

ग्रन्थकारः श्रीनाथभट्टः ।

विवरणं। प्राचीनमपरिशुद्धञ्च। प० १८ । पङ्क्ति० ७—९ । श्लो० २५० । अ० वङ्गीयं। आ० तुलटकागजः। का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरग्रामनिवासिश्रीयुतवावु-उमानन्दरायः ।

प्रा० वाक्यं। तच्चिन्तामणिमात्रस्य प्रभावात् प्रभविष्णवे ।
सर्व्ववेदार्थतत्त्वाय कस्मैचित् श्रेयसे नमः ॥
तन्त्राणि यत्नेन विमृश्य भूयसा शुभप्रभावोज्ज्वलसारकल्पनं ।
श्रीनाथभट्टः सुरनिम्नगातटे कोष्ठीप्रदीपं विदधे विचक्षणः ॥

समाप्तिवा०। विवाहितायाः पतिफलेनैव फलवतीत्वं, अविवाहितायाः सप्तमं स्थानं फलजननाय विचार्य्यमिति भावः ।
इति कोष्ठीप्रदीपे तनुवित्तादिप्रकाशिका समाप्ता ॥

विषयः। तन्वादिद्वादशस्थानविचारलग्नादिनिरूपणं ।

No. CCCXXIV.

PanchapakshíTíká. A commentary, by Rághavanandana, on the Pancha-pakshí, a treatise on horoscopy.

३२४ । पञ्चपक्षीटीका ।

ग्रन्थकारः राघवनन्दनः ।

विवरणं। प्राचीनमपरिशुद्धञ्च। प० २० । पङ्क्ति० ९ । श्लो० २०० । अ० वङ्गीयं। आ० तुलट-कागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतवावु-उमानन्दरायः ।

प्रा० वाक्यं। पञ्चभिश्च हृतादिति। जन्मसकासात् कार्त्तिकवर्षादिगणनया यावन्तः संवत्सरा गतास्त एव वयः। राशिद्वेषादिर्जन्मकालीनो ग्राह्यः खरोऽपि। यत्र नामाक्षरं तदङ्कं एकादिरूपं तदा च शुक्लैकादश्यादौ जन्मनि वयोवर्षे एकं देयं॥

समाप्तिवा०। पताकीगणनं कृत्वा पापं ज्ञेयं, एवं त्रिपापे त्रिपापीति॥

इति श्रीराघवनन्दनविरचिता पञ्चपक्षीटीका समाप्ता॥

विषयः। प्रश्नादिगणनाप्रतिपादकपञ्चपक्षीयतात्पर्य्यविवरणम्।

No. CCCXXV.

Súddhidípiká. Astrological disquisitions on auspicious and inauspicious days. By S'rínivása.

३२५। शुद्धिदीपिका।

ग्रन्थकारः श्रीनिवासः।

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ८५। पङ्क्ति० ४—५। श्लो० १०००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुत-वावु-उमानन्दरायः।

प्रा० वाक्यं। तृष्णातरङ्गदुस्तरसंसाराम्भोधिलङ्घने तरणिः।
उदयवसुधाधरारुणमुकुटमणिः (?)॥
अस्तं गतवति मिहिरेऽतिमलिनदोषाकुले च गोविभवे।
उद्वाहादिषु शुद्धिग्रहणार्थं दीपिका क्रियते॥

समाप्तिवा०। रिपुरन्ध्रचतुर्थगता नयन्ति चास्तारिनिधनस्थाः। मृतस्य देवलोकादिगति-निर्णयः।
सुविस्तरे ज्योतिषि यत्नतः कृतां समस्तकर्म्मव्यवहारदर्शिकां।
श्रीश्रीनिवासेन समाहृतामिमाममत्सराः पश्यत शुद्धिदीपिकां॥
इति शुद्धिदीपिकायां यात्रानिर्णयो नामाष्टमोऽध्यायः॥

विषयः। लग्नविवाहयात्रादीनां निरूपणं।

No. CCCXXVI.

Vidvanmanoramá. A commentary on a hymn to Chandiká in the Márkandeya Purána. By Gaurívara S'armá.

३२६ । विद्वन्मनोरमा ।

ग्रन्थकारः गौरीवरशर्म्मा ।

विवरणं । प्राचीनं परिशुद्धञ्च । प० ७१ । पङ्क्ति० ६—७ । श्लो०२५०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुतवावु-उमानन्दरायः ।

प्रा० वाक्यं । समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ।
पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिरिति श्लोकात् सप्तमपत्राच्च विद्यते ।

समाप्तिवा० । वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरावित्यतः श्लोकात् ७१ पत्राच्च खण्डिता ॥

विषयः । मार्कण्डेयपुराणान्तर्गतचण्डिकास्तोत्रतात्पर्य्यव्याख्यानं ॥

No. CCCXXVII.

Grantha-Sangraha. A collection of rules and maxims for calculating nativities, &c. By Prajápati Dása. At the end of the work there is a collection of the astrological maxims of Khaná, in Bengali.

३२७ । ग्रन्थसङ्ग्रहः ।

ग्रन्थकारः प्रजापतिदासः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० १४ । पङ्क्ति० ५—८ । श्लो० २०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुतवावु-उमानन्दरायः ।

प्रा० वाक्यं । इष्टदेवं नमस्कृत्य गोपालं कुलदैवतं ।
श्रीप्रजापतिदासेन क्रियते ग्रन्थसङ्ग्रहः ॥
नवग्रहान्नमस्कृत्य देवीञ्चैव सरस्वतीं ।
प्रणिपत्य गुरुं मूर्द्ध्ना ज्योतिर्ग्रन्थं वदाम्यहं ॥

समाप्तिवा० । काणा खोड़ा तुमि शनैश्चर मानुषमारे पोड़ाय घरे । कौल चापड़ पड़े पीठे चावुकेर वाड़ी गाय उठे ॥ श ॥ केतुकुण्डलिनीफलं समाप्तं ॥

विषयः । शिशुरिष्टमातृरिष्टपितृरिष्टदण्डपलादिनिर्णयः । पुंजन्मक्लीवजन्मस्त्रीजन्मनिर्णयः । जारजज्ञानं । सुखदुःखादिनिर्णयः ।
षष्ठाध्याये ग्रन्थसमाप्तिः । खनायाः वचनमपि सङ्गृहीतं ।

No. CCCXXVIII.

S'akuna-dípiká. On good and evil omens. By Ganes'a.

३२८। शकुनदीपिका।

ग्रन्थकारः गणेशः।

विवरणं। परिग्रुद्धं प्राचीनञ्च। प० ६। पङ्क्ति० ८। श्लो० १००। अ० वङ्गीयं। आ० तुलट-कागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुतबाबु-उमानन्द-रायः।

प्रा० वाक्यं। वाञ्छाकल्पतरुं नृणां संसाराम्भोधिपारदं।
लम्बोदरपदाम्भोजद्वन्द्वं वन्दामहे वयं॥
अज्ञानतिमिरध्वंसकारिणी दृष्टदर्शिनी।
तन्यते श्रीगणेशेन मुदा शकुनदीपिका॥

समाप्तिवा०। खण्डितं॥

विषयः। अत्र शुभाशुभसूचकनिमित्तानि विद्यन्ते।

No. CCCXXIX.

Guru-páduká-panchaka-stotra Tíká. A commentary on five hymns in praise of the great guru; attributed to Mahádeva. By Durgádása Vídyáváchaspati.

३२९। गुरुपादुकापञ्चकस्तोत्रटीका।

ग्रन्थकारः दुर्गादासविद्यावाचस्पतिः।

विवरणं। नवीनं परिशुद्धञ्च। प० ८। पङ्क्ति० ५—६। श्लो०१२०। अ० वङ्गीयं। आ० तुलट-कागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतबाबु-उमानन्दरायः।

प्रा० वाक्यं। ब्रह्मरन्ध्रसरसीरुहोदरे नित्यलग्नमवदातमद्भुतम्।
कुण्डलीविवरकाण्डमण्डितं द्वादशार्णसरसीरुहं भजे॥

समाप्तिवा०। एतद्वचनानुसारेण षडाम्नायागमोक्तोपासनाबाधां कुर्वन्ति तेऽतिमन्दधियो भ्रान्ता इति सङ्क्षेपः॥

इति श्रीदुर्गादासविद्यावाचस्पतिमिश्रविरचिता श्रीमच्छिवपञ्चवक्त्रविनिर्गतश्री गुरुपादुकापञ्चकस्तोत्रटीका समाप्ता॥

विषयः। श्रीगुरुदेवमाहात्म्यप्रकाशकगुरुपादुकापञ्चकस्तोत्रस्य तात्पर्य्यविवरणं॥

No. CCCXXX.

A'nandadípaní Tíká. A commentary on a hymn called Karpúra Stotra. By Brahmánanda Sarasvatí.

३३० । आनन्ददीपिनीटीका ।

ग्रन्थकारः ब्रह्मानन्दसरस्वती ।

विवरणं । नवीनं परिशुद्धञ्च । प० ३५ । पङ्क्ति० ५—६ । श्लो० ८०० । अ० वङ्गीयं । आ० तुलटकागजः । का० शकाब्दाः १७४२ । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासि-श्रीयुतबाबु-उमानन्दरायः ।

प्रा० वाक्यं । अथानन्दमयीं ब्राह्मीं त्रिगुणां निर्गुणात्मिकां ।
वन्देऽहं नीलकुहरत्विषा स्मितविलासिनीं ॥
सञ्चिन्त्य कृष्णाङ्घ्रिसरोरुहामलं सङ्घट्य वेदागमव्यासवाक्यं ।
हिताय मन्मन्त्रजपार्थिकानां कुर्वे स्फुर्य्यानन्दकलास्वरूपां (?) ॥
आनन्ददीपिनी टीका स्तोत्रव्याख्यास्वरूपतः ॥

समाप्तिवा०। तत्कीदृशः प्रेम्णा रसेन तरलमित्यर्थः ।
इति श्रीब्रह्मानन्दसरस्वतीविरचिता श्रीकर्पूराख्यस्तोत्रस्य आनन्ददीपिनी टीका समाप्ता ॥

विषयः । टीकेयं कर्पूराख्यस्तोत्रस्य टीकाकृता २२ श्लोकानां समीचीना व्याख्या कृता । अस्यां कालिकाया मन्त्रोद्धारो वर्त्तते । स्तोत्रस्यादिमः श्लोकः, कर्पूरं मध्यमान्त्यस्वरपरि-रहितमित्यादिः ॥

No. CCCXXXI.

Kramachandriká. Tántric Liturgy. By Ratnagarbha Sárva-bhauma.

३३१ । क्रमचन्द्रिका ।

ग्रन्थकारः रत्नगर्भसार्व्वभौमः ।

विवरणं । प्राचीनं परिशुद्धञ्च । प० ७४ । पङ्क्ति० ७—८ । श्लो० २२२० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहा-राजश्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं । गुरौ सन्निहिते यस्तु पूजयेदन्यदैवतं ।
स याति नरकं घोरं सा पूजा विफला भवेत् ॥

समाप्तिवा०। तत्पादपद्मरजसा निर्धूताखिलकल्मषः।

प्रकाशितोऽस्मि शास्त्राणि ज्ञात्वा सारं ततोऽर्थतः ॥

इति श्रीरत्नगर्भसार्व्वभौमविरचिता क्रमचन्द्रिका समाप्ता ॥

विषयः। तन्त्रशास्त्रप्रतिपादितार्थव्याख्यानं।

No. CCCXXXII.

Dravyaguṇádhirája. Physiological action of various articles of food, drink and medicine.

३३२। द्रव्यगुणाधिराजः।

ग्रन्थकारः ——— ?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ४९। पङ्क्ति० ५२। श्लो० ९६०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीशचन्द्रः।

प्रा० वाक्यं। द्वौ जातौ भुवि वासवौ निरुपमौ राजन्यविप्रान्वयौ

सप्तद्वीपपतिर्व्विराट् पुनरसौ विप्रो नवद्वीपराट्।

नामाद्यः परिरटन्त्यतेऽत्र चरमे शेषस्य राज्ञर्मुखे

चत्रस्यास्य सभासदो मुनिगणा विप्रस्य तर्कोल्वणाः॥ १॥

समाप्तिवा०। सच्चितं परप्रीतीनां शिवेन परमात्मना।

खट्टीजिगीसतावत्स आयुर्व्वेदः प्रकाशितः॥ इत्यायुर्व्वेदः समाप्तः॥

विषयः। अत्र मधुराम्ललवणकटुतिक्तकषायशीतवीर्य्योष्णवीर्य्यप्रभृतीनां द्रव्याणां गुणकथनं।

No. CCCXXXIII.

Puráṇa-Sarvasva. Summary of various Puranic legends, ancient dynasties, cosmic phenomena, consecration of houses, cars, &c. &c. By Purusottama.

३३३। पुराणसर्व्वस्वं।

ग्रन्थकारः पुरुषोत्तमः।

विवरणं। प्राचीनं परिशुद्धञ्च। प० ३३१। पङ्क्ति० ४—९। श्लो० ८३००। अ० वङ्गीयं। आ० तुलटकागजः। का० शकाब्दाः १५९३। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुतसतीशचन्द्रः।

प्रा॰ वाक्यं। योऽयं वेदपुराणभारतमनुस्मृत्यादिरामायणैः
शास्त्रैस्तैः पुरुषोत्तमैरहरहो ज्ञातो हिताकाङ्क्षिभिः।
सब्रह्मर्षिसुरासुरैरभिनुतो वन्द्योऽभिनन्द्यो जनै-
र्देवो वः शिवमातनोतु सततं त्रैगुण्यभिन्नो हरिः॥

समाप्तिवा॰। इत्येतत् कथितं विप्र पञ्चमीकल्पमुत्तमं।
यत्रायं पठ्यते मन्त्रः सर्व्वसर्पविशेषकः॥
ॐ कुरु कुरु नवः फट् स्वाहा॥ इति पुराणसर्व्वस्वे नागलक्षणं॥

विषयः। अनुक्रमणिका। चन्द्रवंशः। मन्वन्तरकथनं। वंशानुचरितं। इक्ष्वाकुचरितं। गणेशस्तवः। पुरुवंशः। पृथिव्यादिसंस्थानं। योजनसङ्ख्या। भुवनकोषः। नरककथनं। भूकम्पलक्षणं। नरकनिर्णयः। संसारचक्रं। स्वर्गस्थानं। भुवर्लोकादिकथनं। अहःपरिमाणं। सूर्य्यरथपरिमाणं। मेघलक्षणं। अहोरात्रिव्यवस्था। चतुर्मुखसङ्ख्या। चन्द्रकरसंस्थानं। अमावास्यायां वृक्षच्छेदनदोषः। बुधादिग्रहरथवर्णनं। ध्रुवादिसंस्थानं। जातिधर्म्मः। ग्रहदर्शनमाहात्म्य। भुवनकोषसमाप्तिः। श्राद्धादिप्रकरणं। ब्रह्मपुराणीयनानातीर्थप्रकरणं। प्रासादनिर्म्माणं। ध्वजदानं। सम्मार्ज्जनं। उपलेपः। देवाक्रानफलं। द्रव्यपूजाफलं। शासनादिदानं। दक्षिणावर्त्तशङ्खदानप्रभृतयः॥

No. CCCXXXIV.

Vidyotpatti-vidhi. Descriptions of the various manifestations of the Deví, or Vidyá, and the most appropriate days and manner of worshipping them.

३३४। विद्योत्पत्तिविधिः।

ग्रन्थकारः——?

विवरणं। प्राचीनमपरिशुद्धञ्च। प॰ ७। पङ्क्ति॰ ४-६। श्लो॰ ११२। अ॰ वङ्गीयं। आ॰ तुलटकागजः। का॰—?। स्था॰ नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीशचन्द्रः।

प्रा॰ वाक्यं। श्यामार्चनधृतविष्णुयामले। आगमोक्तविधानेन कलौ देवान् यजेत् सुधीरित्यादि॥

समाप्तिवा॰। तृतीया माधवे शुक्ला कुलर्क्षे (?) दारुणा तिथिः।
इत्येताः तिथयः पुण्या अन्याश्चैव सहस्रशः॥
इति गुह्यातिगुह्यतः प्रोक्तो विद्योत्पत्तिविधिः॥

विषयः। नानाविद्यानामुत्पत्तिकथनम्।

No. CCCXXXV.

Kálíká-máhátmya. Praise of Kálíká, a manifestation of the Devi: a compilation from some of the Tantras.

३३५ । कालिकामाहात्म्यम् ।

ग्रन्थकारः——?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० १२। पङ्क्ति० ५। श्लो० २३०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुत-सतीशचन्द्रः।

प्रा० वाक्यं। श्यामामोदतरङ्गिण्यां। मातर्वदामि देवेशि कालिकानामतः फलं।
ककारो वाञ्छितं दत्ते धनपुत्रादिकान् परान्॥

समाप्तिवा०। असकृद्वा सकृद्वापि येन काली स्मृता परा।
मुक्तिस्तस्य करे देवि नात्र कार्य्या विचारणा॥ इति कालिकानाममाहात्म्यं॥

विषयः। कालिकाया महत्त्वख्यापनम्॥

No. CCCXXXVI.

Vidyá-máhátmya. Praise of Ádyá Vidyá and the mode of worshipping her. This work is likewise a Tantric compilation.

३३६ । विद्यामाहात्म्यम् ।

ग्रन्थकारः——?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ३। पङ्क्ति० २-६। श्लो० ४०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुत-सतीशचन्द्रः।

प्रा० वाक्यं। श्यामार्च्चनचन्द्रिकाधृतगान्धर्व्वे। अस्या विज्ञानमात्रेण कुलकोटीः समुद्धरेत्।
नन्दन्ति पितरः सर्व्वे गाथां गायन्ति ते मुदा॥

समाप्तिवा०। चन्द्रसूर्य्यसमो भूत्वा वसेत् कल्पायुतं दिवि।
न तस्य दुर्लभं किञ्चित् यः स्मरेत् कालिदक्षिणां॥
इति विद्यामाहात्म्यं समाप्तं॥

विषयः। आद्याविद्याया महत्त्वप्रतिपादनम्॥

No. CCCXXXVII.

Sáráralí. A treatise on astrological influence on wars, coronations, and other human actions. By Rájá Kalyána Varmá.

३३७ । सारावली ।

ग्रन्थकारः राजा कल्याणवर्म्मा ।

विवरणं। प्राचीनमपरिशुद्धञ्च । प० १०३ । पङ्क्ति० ६—७ । स्रो० ३१०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः ।

प्रा० वाक्यं । यस्योद्गमे जगदिदं प्रतिबोधमेति मध्यस्थिते प्रसरति प्रकृतिक्रियासु ।
अस्तङ्गते स्वपिति बोद्वसितैकमात्रं (?) सूर्य्यः स एष जयति प्रकटप्रभावः ॥
विस्तरीकृतानि मुनिभिः पुरातनानि शास्त्राणि ।
होरातन्त्रं रचितं वराहमिहिरेण सङ्क्षेपात् ॥
राशिदशावर्गो नृपतियोगा युद्धयोगाश्चरदशायां ।
विषयविभागः स्पष्टं कर्त्तुं न शक्यते यतस्तेन ॥
अतएव विस्तरेभ्यो यवननरेन्द्रादिरचितशास्त्रेभ्यः ।
सकलमसारं त्यक्ता तेभ्यः सारं समुद्धृत्य ॥

समाप्तिवा० । खण्डितं ।

विषयः । राशिदशावर्ग-नृपतियोग-युद्धयोग-प्रभृतिज्योतिर्विषयकथनम् ॥

No. CCCXXXVIII.

Rásayátrápaddhati. A manual for the celebration of the anniversary of Krishṇa's grand festival with the milk maids of Vrindávana, held on the full moon and on the two preceding days of Kártika, October—November. By Raghunandana.

३३८ । रासयात्रापद्धतिः ।

ग्रन्थकारः रघुनन्दनः ।

विवरणं। अपरिशुद्धं प्राचीनञ्च । प० ४ । पङ्क्ति० ४—६ । स्रो० ८० । अ० वङ्गीयं । आ० तुलटकागजः । शकाब्दाः १७४९ । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुक्तबाबु-उमानन्दरायः ।

प्रा० वाक्यं । प्रणम्य कमलाकान्तं वागीशमजमव्ययं ।
प्रयोगं रासयात्राया वक्ति श्रीरघुनन्दनः ॥

समाप्तिवा० । अशक्तानां द्विश्राद्वहोमौ नावश्यकौ ॥   इति रामयात्रापद्धतिः ॥
विषयः ।   कार्त्तिकपौर्णमासीकर्त्तव्यं रासयात्राविवरणं ।

No. CCCXXXIX.

Sañkalpadurgabhanjana. On the necessity of a formal resolution (*sankalpa*) in the performance of religious rites. By Chandrásekhara.

३३९ । सङ्कल्पदुर्गभञ्जनं ।

ग्रन्थकारः   चन्द्रशेखरः ।
विवरणं । प्राचीनमपरिशुद्धञ्च । प० ९ । पङ्क्ति० ७—८ । श्लो० ५०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीशचन्द्रः ।
प्रा० वाक्यं । सदानन्दमयं स्मृत्वा चन्द्रशेखरशर्म्मणा ।
सङ्कल्पस्मृतिदुर्गानां भञ्जनं क्रियतेऽधुना ॥
काम्यकर्म्मणि सङ्कल्पं विना फलाल्पत्वस्मृतेरित्यादि ।
समाप्तिवा० । खण्डितं ।
विषयः ।   कर्म्मादौ क्रियमाणसङ्कल्पविचारः ॥

No. CCCXL.

Vásishthasára. An epitome of the scheme of salvation as inculcated in the Yogavásishtha. Contents. 1, dispassion; 2, unreality of the creation; 3, characteristics of the devotee who is liberated in this life; 4, annihilation of the mind; 5, anecdote of Vásala; 6, meditation; 7, worship of the soul; 8, definition of the soul; 9, liberation in this life.

३४० । वाशिष्ठसारः ।

ग्रन्थकारः———? ।
विवरणं । प्राचीनं परिशुद्धञ्च । प० १६ । पङ्क्ति० ७—८ । श्लो० २२० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतबाबु-उमानन्दरायः ।
प्रा० वाक्यं । दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥

अहं बद्धो विमुक्तः स्यामिति यस्यास्ति निश्चयः ।
नात्यन्तमज्ञो नो तज्ज्ञः सोऽस्मिन् शास्त्रेऽधिकारवान् ॥

समाप्तिवा० । एक एव च भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥
इति योगवाशिष्ठसारे जीवन्मुक्तिदर्शनप्रकरणं ॥

विषयः । १ प्रकरणे, वैराग्यं । २, जगन्मिथ्यात्वं । ३, जीवन्मुक्तिलक्षणं । ४, मनोलयः । ५, वासनोपाख्यानं । ६, मननं । ७, आत्मार्चनं । ८, आत्मनिरूपणं । ९, जीवन्मुक्तिः ।

No. CCCXLI.

Náráyaṇíya-pras'návalí. The means of propounding the past, the present and the future by astrological and mystic calculations. This is a fragment of the Brahmayámala Tantra.

३४१ । नारायणीयप्रश्नावली ।

ग्रन्थकारः————?

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ५ । पङ्क्ति० ६—७ । श्लो० १२५ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतबाबु-उमानन्दरायः ।

प्रा० वाक्यं । वन्दे नारायणं देवमनादिनिधनं विभुं ।
यस्य स्मरणमात्रेण सर्व्वज्ञो जायते नरः ॥
देव्युवाच । भगवन् देवदेवेश भक्तानामभयङ्कर ।
येनोपायेन जानीयात् भूतभव्यादिकं नरः ॥

समाप्तिवा० । सङ्क्षेपोऽत्र मया प्रोक्तस्तव प्रियार्थं महेश्वरि ।
एतज् ज्ञात्वापि मनुजः सामान्यार्थं वदेत् प्रिये ॥
इति श्रीब्रह्मयामले नारायणीप्रश्नावली समाप्ता ॥

विषयः । अतीतादिविषयकप्रश्नगणनाविधानम् ।

No. CCCXLII.

Vedántárthasangraha. A digest of the Vedanta system of Philosophy with a commentary. By S'rírāma S'armá.

३४२ । वेदान्तार्थसङ्ग्रहः, सटीकः ।

ग्रन्थकारः श्रीरामशर्म्मा ।

विवरणं । प्राचीनमपरिग्राह्यञ्च । प० १६ । पङ्क्ति० ९—१२ । श्लो० ५०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतवाबु-उमानन्दरायः ।

प्रा० वाक्यं । यस्मात् जनिस्थितिलयस्सचराचरस्य विश्वस्य यत्परिचितं नवलक्षणैस्तत् ।
वारीव तेजसि म्रषाऽनदिव चिसर्गो यस्मिन् महोऽखलकुहकं प्रभजामि सत्यं ॥ १ ॥
श्रीरामचरणाम्भोजमकरन्दकणाञ्जनं । द्वैतध्वान्ताश्वितधियामन्धकारं धुनोतु नः ॥२॥
अर्थाः पद्यैर्निबध्यन्ते वेदान्तसूरिसम्मताः । श्रीरामचन्द्रभूपेन्द्रतुष्ट्यैः श्रीरामशर्म्मणा॥३।
राजश्रीरामचन्द्रः क्षितिपगणशिरश्चन्द्रकान्तादिकान्त्या-
क्रान्तोपान्ताङ्घ्रिपीठो भुविविमलयशश्चन्द्रमालोक्य यस्य ।
मूढो ह्यशः कलङ्की भ्रमति वियति हा चन्द्रमाः ख्यातकीर्त्ति-
स्तस्तानां चासशान्तो स्वयमिव जनको ब्रह्मनिष्ठासु जीयात् ॥ ४ ॥

समाप्तिवा० । खण्डितं ।

विषयः । वेदान्तार्थप्रतिपादनम् ॥

No. CCCXLIII.

Siddhánta Sangraha. An elementary exposition of the Vedanta Philosophy, according to the school of the nondual theorists. By Apyayídikshita.

३४३ । सिद्धान्तसङ्ग्रहः ।

ग्रन्थकारः अप्पयीदीक्षितः ।


विवरणं । प्राचीनमपरिग्राह्यञ्च । प० ४६ । पङ्क्ति० २—१२ । श्लो० १२०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुत-वाबु-उमानन्दरायः ।

प्रा० वाक्यं । तत्र तावदात्मावारे द्रष्टव्यः श्रोतव्यः प्रत्यधीतसाङ्गस्वाध्यायस्येत्यादि ।

समाप्तिवा० । सच्चिदानन्दपरमेश्वरभावापत्तिर्मन्तव्येति सिद्धं ॥

इति श्रीअप्पयीदीक्षितकृतसिद्धान्तसङ्ग्रहे चतुर्थः परिच्छेदः ॥

विषयः । सङ्क्षेपतः अद्वैतमतानुसारिवेदान्तीयविविधसिद्धान्तप्रतिपादनम् ।



No. CCCXLIV.

S'ilámáhátmya. Praise of the *sálagráma* or ammonite stone, and the advantage of worshipping it as Vishnu. This is probably an extract from one of the Puránas. The stone is found in the Gandak River in Oudh; according to the MS. the best place for the petrified shell is a spot forty miles to the south of a peak of the Himálaya, called Gandaka.

३४४ । शिलामाहात्म्यं ।

ग्रन्थकारः ——?

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ७ । पङ्क्तिः ५—७ । श्लो० १०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतबाबु-उमानन्दरायः ।

प्रा० वाक्यं । क त्वं वससि भो विष्णो किं नामासि त्वदाश्रमं । कथं वा प्रीयसे देव तत्सर्व्वं कथयस्व मे ॥ श्रीविष्णुरुवाच ॥ निवसामि सदा ब्रह्मन् शालग्रामेऽथवाश्मनि । गण्डक्यां गिरिराजस्य दक्षिणे दशयोजनं ॥

समाप्तिवा० । यत्कृत्वा मुनयः सर्व्वे शालग्रामशिलार्च्चनं । सर्व्वतो मोक्षमाप्नोति (?) विष्णुलोकं गताः सुखं । इति श्रीब्रह्मविष्णुसंवादे वेदव्यासागमप्रोक्तशिलामाहात्म्यं समाप्तं ॥

विषयः । शालग्रामशिलाया महत्त्वख्यापनं, तस्यां श्रीविष्णोः पूजनादिविधानञ्च ।

No. CCCXLV.

Kátantra-vritti. An exposition, by Durga Sinha, of the Sanskrit grammar, by Sarvavarma A'chárya entitled *Kátantra*, or *Kalápa.*

३४५ । कातन्त्रवृत्तिः ।

ग्रन्थकारः श्रीपतिदत्तः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० १४४ । पङ्क्तिः १०—१२ । श्लो० ५००० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतमती-शचन्द्रः ।

प्रा० वाक्यं । देवदेवं प्रणम्यादौ सर्व्वज्ञं सर्व्वदर्शिनं । कातन्त्रस्य प्रवक्ष्यामि व्याख्यानं सार्व्ववर्म्मिकं ॥ सिद्धो वर्णसमाम्नायः । सिद्धः खलु वर्णानां समाम्नायो वेदितव्यः ॥

समाप्तिवा० । जनावौ । ऊट इति किम् । आदोटाकदेतो औरितिसिद्धे वृद्धिग्रहणं मङ्गलार्थम् । इति दौर्गसिंह्यां वृत्तौ कृतसु षष्ठपादः समाप्तः ॥

विषयः । सर्व्ववर्मकृतकातन्त्रव्याकरणार्थकथनम ।

No. CCCXLVI.

Rájadharmakaustubha. The jurisdiction of kings, their characteristics and defects; characteristics of queens, ministers, royal priests and astrologers; requirements of kings; rites to be performed by them; royal unction; duties to be observed for some days after coronation, &c., &c. By Ananta Deva.

३४६ । राजधर्म्मकौस्तुभः ।

ग्रन्थकारः अनन्तदेवः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ७९ । पङ्क्ति० ६—८ । श्लो० १६०० । अ० वङ्गीयं
आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराज-
श्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं । दृश्वा पूरितमात्ममूर्त्तिकलसं धृत्वा व्रजन्तीं व्रजे
काञ्चित् गोपकुमारिकां क्वनु गतिर्युक्तेति सम्पृच्छतीं ।
दृष्ट्वा श्रीमुरलीधरः स्मितयुतभ्रूयुग्मभङ्ग्या यथा
तस्यै सूचितवान् गतिं समुचितां पायात् तथा मे मतिं ॥
यत्प्रताप उदिते दितेः सुता विष्णुचक्र इव सर्व्वशत्रवः ।
न्यस्तहस्तगतशस्त्रबुद्धयो * * * गयमितास्तभागिनः ॥

समाप्तिवा० । योऽनन्तदेवकृतमन्थनसन्निबन्धक्षीराब्धितोथ हरिणा सततं धृतो यः ।
भूपाभिषेकविषया भवदीदृशीयं सन्दीधितिर्हरिमुदावहकौस्तुभे स्यात् ।
इति श्रीमन्महाराजाधिराजश्रीराजबाहादुरचन्द्रभूपवराज्ञाप्रवृत्तेनापदेवसुतानन्त-
देवविदुषा कृते राजधर्म्मकौस्तुभे तृतीयाभिषेकदीधितिः ॥

विषयः । राज्याधिकारिनिर्णयः । राजलक्षणं । व्यसनानि । पट्टमहिषीलक्षणं । मन्त्रिलक्षणं ।
पुरोहितलक्षणं । ज्योतिर्विल्लक्षणं । अङ्गानि । उपाङ्गानि । शान्तिप्रयोगः । विना-
यकस्नपनं । नक्षत्रावाहनमन्त्राः । नैर्ऋतयागः । शर्म्मवर्म्मगणः । रौद्रगणः । ऐन्द्र-
शान्तिः । अभिषेकदिनात् कतिपयदिनपर्य्यन्त प्रतिदिनकार्य्यं । अभिषेकप्रयोगः ।
अभिषेकमन्त्राः । पुष्पाभिषेकः । संवत्सराभिषेकप्रभृतयः ॥

No. CCCXLVII.

Patrakaumudi. The universal letter-writer, containing rules for determining the size, shape and decorations of letters, according to the different ranks of the parties to whom they are to be addressed; qualifications of letter-writers; forms of addresses, &c., &c. By Vararuchi, one of the "nine jewels" of Vikramáditya.

३४७। पत्रकौमुदी।

ग्रन्थकारः वररुचिः।

विवरणं। प्राचीनमनतिशुद्धञ्च। प० ९। पङ्क्ति० ५—६। श्लो० २५०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतवाबु-उमानन्दरायैः।

प्रा० वाक्यं। श्रीमत्कृष्णपदारविन्दयुगलं ब्रह्मेश्वराद्यामर-
श्रेणीनम्रकिरीटकोकवडभीपुष्पार्पितं सन्ततं।
वाणीञ्च प्रणमामि विश्वजननीं प्रत्यूहविध्वंसिनीं
भक्तानुग्रहकारिणीं भगवतीं नित्यं वचोऽहृदये॥
विक्रमादित्यभूपस्य कीर्त्तिसिन्धोर्निदेशतः।
श्रीमान् वररुचिर्धीमांस्तनोति पत्रकौमुदीं॥
राज्ञां मन्त्रिप्रवीराणां पण्डितानां तथैव च।
गुरूणां स्वामिभार्य्याणां तथैव पितृपुत्रके॥

समाप्तिवा०। खण्डितं॥

विषयः। अनुक्रमणिका। पत्राणां रञ्जनं। पत्रप्रमाणानि। पत्रलेखकलक्षणानि। पत्ररचनाक्रमः। पत्रलिखनक्रमः। पत्रनयनक्रमः। पत्रपठनं। पाठापाठप्रभृतयः॥

No. CCCXLVIII.

Sakárabheda. Words having the three Sanskrit sibilants, arranged in classes. By Purusottama Datta.

३४८। सकारभेदः।

ग्रन्थकारः पुरुषोत्तमदेवः।

विवरणं। प्राचीनमपरिशुद्धञ्च। प० २। पङ्क्ति० ९—१०। श्लो० ८१। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतवाबु-उमानन्दरायः।

प्रा० वाक्यं। अथ तालव्यशकारभेदः॥ श्रेयः शर्म्मणि शते शते शकारशोचिर्य्यशोचिर्यशः
श्लक्ष्णश्रीपदशुद्धशोभनभृशं शून्यं शरणं शिवं।
शृङ्गं दर्शनशातनं शुभशतं किंशायशस्यांशुकं
स्यात् कलिशं शस्यमञ्जरीत्यमरः (?)॥

समाप्तिवा०। संसारसामहासञ्च सारस्वतसरोरुपाः। साहसं यत्निशचूहि दन्त्यसद्वयसंयुता (?)॥

इति पुरुषोत्तमदेवकृतः सकारभेदः समाप्तः॥

विषयः। तालव्यमूर्द्धन्यदन्त्यशकारविशेषप्रतिपादनं।

No. CCCXLIX.

Koshṭhi-prakaraṇa. Horoscopy, according to the principles of Keralí. No work of Keralí has yet been discovered, but he is reckoned to be a high authority on astrology and chiromancy.

३४९। केरलीसम्मतं कोष्ठीप्रकरणं।

ग्रन्थकारः केरली।

विवरणं। प्राचीनमपरिशुद्धञ्च। प० १०। पङ्क्ति० ५—७। श्लो० २५०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतवाबु-उमानन्दरायः।

प्रा० वाक्यं। खण्डितं।

समाप्तिवा०। सङ्ख्यानामाद्यरा ज्ञेया। अन्त्यवर्णादयो ज्ञेया एको ह्रासस्ततो भवेत्॥

इति केरलीसम्मतं कोष्ठीप्रकरणं॥

विषयः। अस्य प्रथमद्वितीयपत्रे खण्डिते। द्रेक्काणनवांशत्रिंशांशादिप्रतिपादनम्।

No. CCCL.

Divyachúḍámaṇi. Rules for calculating future events by astrological and other recondite means. By Chúḍámaṇi.

३५०। दिव्यचूडामणिः।

ग्रन्थकारः चूडामणिः।

विवरणं। प्राचीनमपरिशुद्धञ्च। प० १५। पङ्क्ति० २—७। श्लो० ४००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतवाबु-उमानन्दरायः।

प्रा० वाक्यं। यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणि।

पङ्क्तिं व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीपकवत्॥

लोकस्य चरितार्थाय दिव्यचूडामणिं वदे।

क्रियते त्रिविधार्थानां शृण्वन्तु स्थिरचेतसः॥

समाप्तिवा० । खण्डितं ।

विषयः । शुभाशुभविषयकप्रश्नोत्तरनिरूपणं ॥

No. CCCLI.

Ushmaviveka. On Sanskrit aspirates and nasals. By Gada Siñha.

३५१ । ऊष्मविवेकः ।

ग्रन्थकारः गदसिंहः ।

विवरणं । अपरिशुद्धं प्राचीनञ्च । प० ९ । पङ्क्ति० ४—८ । श्लो० २५० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसती-शचन्द्रः ।

प्रा० वाक्यं । वर्णोज्ज्वला गुणवती सहृदयहृदयानुरञ्जिनी सरसा ।
नानालङ्कारवती प्रियेव कविता सती जयति ॥

समाप्तिवा० । इत्यूष्मभेदः कृतः श्रीगदसिंहेनाल्पबुद्धीनां प्रीत्यै ।
स करोतु सदसि ज्ञानं यस्यायं वर्त्तते हृदये ॥
इति गदसिंहविरचिते ऊष्मविवेके ऊष्मभेदकथनं समाप्तं ॥

विषयः । सकारनकारविशेषप्रतिपादनम् ।

No. CCCLII.

Mugdha-bodha-paris'ishta. A supplement to the Sanskrit grammar entitled "Mugdhabodha." It treats of prefixes, affixes, suffixes, &c. By Kásís'vara Bhaṭṭácharya.

३५२ । मुग्धबोधपरिशिष्टः ।

ग्रन्थकारः काशीश्वरः ।

विवरणं । प्राचीनं परिशुद्धञ्च । प० ९३ । पङ्क्ति० ४ । श्लो० ८०० । अ० वङ्गीयं । आ० तुलटकागजः । का० शकाब्दाः १७०९ । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवा-सिमहाराजश्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं । नत्वा पदाम्बुजमशेषगुणैकसिन्धो रामस्य वीक्ष्य मुनितन्त्रमशेषतश्च ।
श्रीवोपदेवकविना कृतमुग्धबोधे काशीश्वरो वितनुते परिशिष्टमेतत् ॥

समाप्तिवा० । हृञ् हृः । हरिः । इति श्रीकाशीश्वरभट्टाचार्य्यकृतं मुग्धबोधपरिशिष्टं समाप्तं ॥

विषयः । प्रकृतिप्रत्ययागमादिव्यवस्थापनं ।

No. CCCLIII.

Dakárádi-sahasranáma-stotra. A hymn to Durgá, in which a thousand names or epithets beginning with the letter द are strung together. This work professes to be a portion of the eighth part (*Khaṇḍa*) of the Kulárṇava Tantra, but it does not occur in the MS. of that name noticed on page 138.

३५३ । दकारादिसहस्रनामस्तोत्रं।

ग्रन्थकारः—?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० २०। पङ्क्ति० ५—६। श्लो० २००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुक्तबाबु-उमानन्दरायः।

प्रा० वाक्यं। भैरवी उवाच। कथं भैरव सर्व्वज्ञ जम्बूद्वीपे कलौ युगे।
अलसानां बुभुक्षूणां नृणामल्पायुषामपि॥
विना योगाभ्यासमहो तत्त्वज्ञानं भवेत् शुभं।
ऐहिका अपि भोगाश्च भवेयुः स्वेच्छया प्रभो॥
श्रीभैरव उवाच। शृणु देवि प्रवक्ष्यामि सर्व्वमेतत् भवेद् यथा।
सामवेदात्मने मुनिप्रोक्तं (?) जैमिनये तु यत्॥
पुरा पुरन्दरमुखाः स्वेश्वरत्वाभिमानिनः।
ऊचुः किमीश्वरोऽस्त्यस्मादतिरिक्तः सुरानिति॥

समाप्तिवा०। एतावर्त्तनमेतस्य पुरश्चरणमुच्यते। स्तुतिसारो निगदितः किं भूयः श्रोतुमिच्छसि॥ इति कुलार्णवे महारहस्ये सर्व्वागमोत्तमे सपादलक्षग्रन्थे पार्व्वतीश्वरसम्वादेऽष्टमखण्डे श्रीदुर्गादकारादिसहस्रनामस्तोत्रं सम्पूर्णं॥

विषयः। दुर्गाया माहात्म्यप्रतिपादनम्।

No. CCCLIV.

Nánárthas'abda. A dictionary of words having various meanings. By Mathures'a.

३५४। नानार्थशब्दः।

ग्रन्थकारः मथुरेशः।

विवरणं। नवीनं परिशुद्धञ्च। प० ५८। पङ्क्ति० ६। श्लो० २०००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुतबाबु-उमानन्दरा(यः)।

प्रा॰ वाक्यं। नत्वा ज्योतिः परं ब्रह्म मूर्च्छाखानन्दपाश्रया।
नानार्थशब्दा लिख्यन्ते मथुरेशेन यत्नतः॥
द्विचितुःपञ्चषट्कवर्णाः कान्तादिचिह्निताः।
स्वरान्ता व्यञ्जनान्ताश्च नानार्थाः सूरिचोदिताः॥
एकवर्णोऽपि नानार्थः क्रमादादौ निबध्यते।
नानार्थः प्रथमान्तः स्यात् सप्तम्यन्ते च वर्त्तते॥
क एकः॥ को ब्रह्मवायुसूर्य्याग्नियमदक्षात्मवर्हिषु।
कामे ध्वनौ च पुंसि स्यात् जलमूर्द्धसुखेषु कं॥
समाप्तिवा॰। खण्डितं॥
विषयः। ककारादिवर्णक्रमेण नानार्थशब्दनिरूपणम्॥

No. CCCLV.

Rahasyátirahasya Purus'charaṇa. Details of a mode of acquiring superhuman power by meditation and mystic rites. These rites should be performed on a burning-ground at night, while seated on a corpse. On this account it is called the most secret of all secret modes of purification.

३५५। रहस्यातिरहस्यपुरश्चरणं।

ग्रन्थकारः———?।
विवरणं। प्राचीनमपरिशुद्धञ्च। प॰ ५। पङ्क्ति॰ ७। श्लो॰ १००। अ॰ वङ्गीयं। आ॰ तुलटकागजः। का॰—?। स्था॰ नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः।
प्रा॰ वाक्यं। अथेदानीं रहस्यातिरहस्यपुरश्चरणं लिख्यते। तथाच गान्धर्व्वे॥
समाप्तिवा॰। ततो दक्षिणां दत्वाच्छिद्रावधारणं कुर्य्यात्॥
इति रहस्यातिरहस्यपुरश्चरणं समाप्तं॥
विषयः। श्मशानादौ विशिष्टपुरश्चरणविधिः।

No. CCCLVI.

Váhyamátṛiká-nyása and *Maháshoḍhá-nyása.* On the merits of two particular modes of regulating the breath during meditation. This is an extract from the Urdhámnáya Tantra; the work is distinct from Urdhamnya Sañhitá.

३५६ । वाद्यमातृकान्यासो महाषोढान्यासश्च ।

ग्रन्थकारः विरूपाक्षः ।

विवरणं। प्राचीनमपरिशुद्धञ्च । प० ६ । पङ्क्तिः ७—८ । श्लो०१५० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः ।

प्रा० वाक्यं । तद्ध्यानं यथा । पञ्चाशल्लिपिभिरित्यादि ॥

समाप्तिवा० । इत्यूर्द्ध्वाम्नायान्तर्गतमहाषोढान्यासः ।

इति विरूपाक्षपरमहंसपरिव्राजकसिद्धा महाषोढा ॥

विषयः । अकारादिपञ्चाशद्वर्णैश्शरीरस्थमुखादिप्रदेशेषु न्यासविधानं ।

No. CCCLVII.

Chaṇḍí Tíká. A commentary on the Chaṇḍí, an episode of the Márkaṇḍeya Puráṇa, on the wars of the Deví with certain Asuras. By Kámadeva Kavivallabha. The commentary commonly known is by Nágoji Bhaṭṭa, the author of the S'abdenduseikhara.

३५७ । चण्डीटीका ।

ग्रन्थकारः कामदेवकविवल्लभः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ५२ । पङ्क्तिः ७—१० । श्लो० १००० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः ।

प्रा० वाक्यं । यत्संसर्गविशेषादुदयति गुणितैर्निर्गुणस्यापि ।
गुणिनामपि नैर्गुण्यं यत्संसर्गात् सा सदा जयति ॥
स्वजननिरस्तौ मुनितः श्रुतमाहात्म्यमुपास्य यां देवीं ।
मनुतापवर्गभाजौ सुरथसमाधी सदैवासादयतां ॥
अथ श्रीमद्व्यासशिष्यो जैमिनिरित्यादि ।

समाप्तिवा० । शेषे कतिपयपङ्क्तयो विलुप्तप्रायाः । अतएव समाप्तिवाक्यं नोद्धृतं ।

विषयः । मार्कण्डेयपुराणान्तर्गतचण्डिकास्तोत्रार्थविवरणं ।

No. CCCLVIII.

Kávyakámadhenu Ṭíká. A commentary, by Vopadeva, on the Kavi-kalpadruma.

३५८ । काव्यकामधेनुटीका ।

ग्रन्थकारः वोपदेवः ।

विवरणं । अपरिशुद्धं प्राचीनञ्च । प० ५२ । पङ्क्ति० ९—६ । स्लो० ८०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराज-श्रीयुक्तसतीशचन्द्रः ।

प्रा० वाक्यं । प्रथमपत्रं खण्डितं ।

समाप्तिवा० । सर्व्वव्याकरणार्हायानास्यां तान्यलिखितं ह्यहं (?) ॥

विषयः । कविकल्पद्रुमार्थविवरणं ।

No. CCCLIX.

Mahábhágavata. An apocryphal Puráṇa, containing legends of the Deví.

३५९ । महाभागवतं ।

ग्रन्थकारः ——— ?

विवरणं । प्राचीनमपरिशुद्धं खण्डितञ्च । प० १९१ । पङ्क्ति० ५—१० । स्लो० ४००० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थ-महाराजश्रीयुक्तसतीशचन्द्रः ।

प्रा० वाक्यं । यामाराध्यविरिञ्चिरस्य जगतः स्रष्टा हरिः पालकः
संहर्त्ता गिरिशः स्वयं समभवद् ध्येया च या योगिभिः ।
यामाद्यां प्रकृतिं वदन्ति मुनयस्तत्त्वार्थविज्ञाः परां
तां देवीं प्रणमामि विश्वजननीं स्वर्गापवर्गप्रदाम् ॥
या स्वेच्छयास्य जगतः प्रविधाय सृष्टिं सम्प्राप्य जन्म च तथा पतिमापशम्भुं ।
उग्रैस्तपोभिरपि यां समवाप्य पत्नीं शम्भुः पदं हृदि दधे परिपातु सा वः ॥
एकदा नैमिषारण्ये शौनकाद्या महर्षयः । पप्रच्छुर्मुनिशार्दूलं सूतं वेदविदां वरं ॥

समाप्तिवा० । ऋषय ऊचुः । शत्रोर्निधनमन्विच्छन् अकालेऽपि विधानतः ।
देवीं सम्पूजयामास भूयः किं श्रोतुमिच्छसि ॥
इति श्रीमहाभागवते महापुराणे अष्टचत्वारिंशत्तमोऽध्यायः ॥
अतः परं द्वित्रिस्लोकाः सन्ति ॥

विषयः । भगवतीमाहात्म्यप्रतिपादकपुराणम् ।

No. CCCLX.

Vírachintámaṇi. A treatise on arms and military tactics. By Sárngadhara.

३६० । वीरचिन्तामणिः ।

ग्रन्थकारः शार्ङ्गधरः ।

विवरणं। अपरिशुद्धं प्राचीनं सम्पूर्णञ्च । प० ७ । पङ्क्तिः० ७—६ । स्लो० २०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराज-श्रीयुक्तसतीशचन्द्रः ।

प्रा० वाक्यं । अश्वायुधो लक्षणं । नमो जिघ्नन्ति ये वाहा भास्करार्पितहृदयः ।
पृथुकुक्षिकटीवक्षाः सुनिश्रा(?)श्चिरजीविनः ॥

समाप्तिवा० । तस्मात् हेयं विधातव्यं । शेषमस्पष्टं चरणद्वयं ॥
इति शार्ङ्गधरविरचितवीरचिन्तामणौ धनुर्व्वेदस्य परिच्छेदः ॥

विषयः। अत्र अश्वायुर्लक्षणाश्वपरीक्षा-तुरगप्रशंसा-धनुर्द्धारणप्रशंसा-धनुर्द्धारणविधि-धनुर्दानविधि-चापप्रमाण-गुणशरफलकलक्षण-फलकधारण-नाराचनालिकस्थान-मुष्ट्याकर्षणलक्षण-गुणचतुष्टयधनुर्मुष्टिसन्धानव्यायाम-लक्ष्यानभ्यासश्रमक्रिया-लक्ष्यस्खलनविधि-शीघ्रसन्धान-दूरपातित्व-दृढप्रहारित्व-दृढवेधित्व-हीनयन्त्रक-हीनगति-बालस्खलनगति-लक्ष्यस्खलनगति शुद्धगति-दृढचतुष्कचित्रविधि-वाणभङ्गवराटिकावर्त्तकाष्ठच्छेदनविन्दुकगोलकचित्रविधि-धारलक्ष्यशरवेधित्वास्त्रविधि-शस्त्रवारण-विघ्नुपशमशस्त्रविधि-मन्त्रस्मरण-विष्णुस्मरण-सङ्ग्रामविध्यक्षौहिणीसङ्ख्या-महाक्षौहिणीव्यूहविधि-युद्धप्रभृतयो निरूपिताः ॥

No. CCCLXI.

Tárákshobhya Saṅváda. A Tantric compilation on the adoration of Tárá, and anecdotes regarding her.

३६१ । ताराक्षोभ्यसंवादः ।

ग्रन्थकारः——?

विवरणं। अपरिशुद्धमसम्पूर्णञ्च । प० १४ । पङ्क्तिः० ७ । स्लो० ३०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराज-श्रीयुक्तसतीशचन्द्रः ।

प्रा० वाक्यं । निरुत्तरतन्त्रे । तारोवाच । लतायां साधयेत् कालीं नीले नीलसरस्वतीं ।
यदुक्तं तद्वदेदानीं येन यामि निरुत्तरं ॥

समाप्तिवा० । खण्डितत्वात् शेषवाक्यं नास्ति ॥

विषयः। तारामाहात्म्यादिव्यवस्थापनं ।

No. CCCLXII.

Kálárkarudra-pújá Paddhati. A manual for the adoration of Kálárkarudra—a form of S'iva.

३६२ । कालार्करुद्रपूजापद्धतिः ।

ग्रन्थकारः———?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ८। पङ्क्ति० ६—७। स्लो० १००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः।

प्रा० वाक्यं। तत्र स्वाङ्गं प्रधानीभूत इत्यादि॥

समाप्तिवा०। परमोत्सवेन नृत्यगीतपुरःसरेण प्रतिमां यथास्थानं नयेयुः। ततः पार्व्वणं कुर्य्यात्॥ इति कालार्करुद्रपूजापद्धतिः समाप्ता॥

विषयः। कालार्करुद्रार्चनविधानं।

No. CCCLXIII.

Nis'ácharapújá. A manual for the worship of the Deví at night.

३६३ । निशाचरपूजा ।

ग्रन्थकारः———?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० २ पङ्क्ति० ७—८। स्लो० ५०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः।

प्रा० वाक्यं। प्रथमं सूर्य्यार्घं दत्वा इत्यादि॥

समाप्तिवा०। अच्छिद्रावधारणं कुर्य्यात्। इति निशाचरपूजापद्धतिः समाप्ता॥

विषयः। निशाचरपूजननिरूपणं।

No. CCCLXIV.

Ratnamálá. A treatise on precious stones. By Pasupati.

३६४ । रत्नमाला ।

ग्रन्थकारः पशुपतिः।

विवरणं। परिशुद्धं प्राचीनञ्च। प० ३। पङ्क्ति० ४—६। स्लो० १००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः।

प्रा० वाक्यं। का भूषा योगानां किञ्च शिशोः कण्ठमण्डनं भाति।
निर्म्मलमुक्तामाला पशुपतिरचिता चातुरी वाचां॥

समाप्तिवा०। गुणहृदयङ्गमवक्ता (?) निर्मलसुवर्णालङ्काराङ्गी।
श्रीमत्पशुपतिरचिता सम्पूर्णा रत्नमालैषा॥

विषयः। अत्र मुक्ताफल-पद्मराग-मरकत-इन्द्रनील-वैदूर्य्य-काञ्चनपरीक्षा विद्यन्ते।

No. CCCLXV.

Padárthakhandana Tippaní. A gloss on the Padárthakhaṇḍana of Ragunátha Siromaṇi. By Rámabhadra Sárvabhauma.

३६५। पदार्थखण्डनटिप्पनी।

ग्रन्थकारः रामभद्रसार्व्वभौमः।

विवरणं। प्राचीनं परिशुद्धञ्च। प० ३०। पङ्क्ति० ५—६। श्लो० ५००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराज-श्रीयुतसतीशचन्द्रः।

प्रा० वाक्यं। प्रारम्भे विलुप्ताः पङ्क्तयः। अतिप्राचीनत्वात्।

समाप्तिवा०। क्रमशः कारणतायामनिवेशेत्यलमतिविस्तरेणेति दिक्।
इति महामहोपाध्यायश्रीमद्रामभद्रसार्व्वभौमविरचितपदार्थखण्डनटिप्पनी समाप्ता॥

विषयः। रघुनाथशिरोमणिप्रणीतपदार्थखण्डनाभिधेयग्रन्थार्थविवरणं॥

No. CCCLXVI.

A'khyátaváda Tippaní. A gloss on the A'khyátaváda of Raghunátha S'iromaṇi. By Bhavánanda Tarkavágís'a.

३६६। आख्यातवादटिप्पनी।

ग्रन्थकारः भवानन्दतर्कवागीशः।

विवरणं। प्राचीनं परिशुद्धञ्च। प० ४५। पङ्क्ति० ५—६। श्लो० १२३०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुत-सतीशचन्द्रः।

प्रा० वाक्यं। प्रारम्भे विलुप्ताः पङ्क्तयः। अतिप्राचीनत्वात्।

समाप्तिवा०। गुरुत्वादित्यपि द्रष्टव्यमिति सङ्क्षेपः।
इति तर्कवागीशविरचिताख्यातवादटिप्पनी समाप्ता॥

विषयः। रघुनाथशिरोमणिप्रणीताख्यातार्थविचारतात्पर्य्यार्थविवरणं।

No. CCCLXVII.

S'abdakhaṇḍa Tippaní. A gloss on the S'abdhachintámaṇi of Ganges'a Upádhyáya. By Mathuránátha.

३६७ । शब्दखण्डटिप्पणी ।

ग्रन्थकारः मथुरानाथः ।

विवरणं । प्राचीनं परिशुद्धञ्च । प० ४७ । पङ्क्ति० ६—९ । श्लो० १६०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं । प्रथमपत्रं खण्डितं ।

समाप्तिवा० । यथार्थपदार्थतानवच्छेदकप्रकारकज्ञानविषयत्वमा, इत्यतः परं खण्डितं ।

विषयः । गङ्गेशोपाध्यायप्रणीतशब्दचिन्तामणितात्पर्य्यार्थव्याख्यानं ।

No. CCCLXVIII.

Tattvánanda-tarranginí. A treatise on mantras, their derivation and uses, homas, mystic diagrams, sanctification and other Tantric subjects. By Púrṇánanda Paramahaṅsa. The MS. examined is incomplete, and contains only the rituals.

३६८ । तत्त्वानन्दतरङ्गिणी ।

ग्रन्थकारः पूर्णानन्दपरमहंसः ।

विवरणं । प्राचीनं परिशुद्धञ्च । प० ३० । पङ्क्ति० ३—७ । श्लो० ११२० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं । दिक्कालादिविनिर्मुक्तं निर्मुक्तं त्रिगुणैरपि ।
आनन्दघनसन्दोहमात्मानं समुपाश्रय ॥
तडिदाकारमानन्दमूलकन्दसमाश्रितं ।
भजामि वचसां मूलं यन्मूलं जगतामपि ॥
स्थूलनीलमणिश्यामं वामम‍र्द्धं महेशितुः ।
आनन्दनन्दनोल्लासं प्रकाशं जगतां भजे ॥
तन्त्राणां सङ्गतिं वक्ष्ये तत्त्वानन्दतरङ्गिणीं ।
धर्म्मार्थकाममोक्षाणां आद्यसाधनपद्धतिं ॥

समाप्तिवा० । षष्ठमासेन रुद्ररूपो भवेदिति शिवं ।

इति श्रीमहामहोपाध्यायब्रह्मानन्दपरमहंसपरिव्राजकशिष्यश्रीपूर्णानन्दपरमहंसरचिता तत्त्वानन्दतरङ्गिण्याः प्रयोगविधिः । समाप्तश्चायं ग्रन्थः ॥

विषयः । मन्त्रबीजपूजाहोमपुरश्चरणमन्त्रोद्धारयन्त्रोद्धारध्यानकवचपूजास्थानप्रभृतीनां निरूपणं ॥

No. CCCLXIX.

S'ambhunáthárchana. Manual for the worship of S'ambhunátha or S'iva.

३६९ । शम्भुनाथार्चनं ।

ग्रन्थकारः——?

विवरणं । प्राचीनं परिग्रहश्च । प० ५ । पङ्क्ति० ५ । स्लो० ४० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं । देव्युवाच । त्वत्प्रसादान्महादेव पवित्राहं न चान्यथा ।
शम्भुनाथार्चनं देव श्रोतुमिच्छामि साम्प्रतं ॥

समाप्तिवा० । इति ते कथितं देवि तन्त्राणां तन्त्रमुत्तमं ।
बहु किं कथ्यते देवि भूयः किं श्रोतुमिच्छसि ॥ परिसमाप्तिशेषवाक्यं नास्ति ॥

विषयः । महादेवध्यानमन्त्रादिकथनं ।

No. CCCLXX.

Chandí Purána. An apocryphal Purána on the exploits of the Devi in destroying various Asuras; attributed to Márkandeya. Contents: 1, curse to Daksha; 2, suicide of Satí; 3, praise of sacred places where the different members of Satí fell; 4, destruction of Madhu and Kaitabha; 5, ditto of Dundubhi; 6, ditto of Ghora; 7, ditto of Namuchi and Chikshura; 8, ditto of Mahishásura; 9, ditto of Sunda and Upasunda; 10, anecdote of Sanatkumára; 11, destruction of Mura.

३७० । चण्डीपुराणं ।

ग्रन्थकारः मार्कण्डेयः ।

विवरणं । प्राचीनं परिग्रहश्च । प० ९२ । पङ्क्ति० ५—६ । स्लो० १००० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुतसतीशचन्द्रः ।

प्रा॰ वाक्यं। मार्कण्डेयं मुनिश्रेष्ठं तपसा हतकल्मषं।

कौमारको मुनिश्रेष्ठः पप्रच्छ तपसो निधिं॥

समाप्तिवा॰। पाठकाय प्रदातव्यं यदीच्छेत् लोकमक्षयं।

पाठके परितुष्टे तु सन्तुष्टाः सर्व्वदेवताः॥

इत्याद्ये चण्डीपुराणं सम्पूर्णम्॥

विषयः। १ प्रथमः, दक्षशापः। २, सतीदेहत्यागः। ३, तीर्थमाहात्म्यं। ४, मधुकैटभवधः। ५, दुन्दुभिवधः। ६, घोरवधः। ७, नमुचिचिक्षुरवधः। ८, महिषासुरवधः। ९, सुन्दोपसुन्दवधः। १०, सनत्कुमारोपाख्यानं। ११, मुरवधः॥

No. CCCLXXI.

Sanmohana Tantra. The MS. is incomplete, and comprises only the latter portion of the second part of the work. Its subject is Tantric ritual for the adoration of the Deví named Kulakuṇḍaliní. The work is reckoned to be an original Tantra, and not a compilation.

२७१। सम्मोहनतन्त्रम्।

ग्रन्थकारः——?

विवरणं। प्राचीनं परिग्राह्यश्च। प॰ १७। पङ्क्ति॰ ५—६। श्लो॰ ५००। अ॰ वङ्गीयं। आ॰ तुलटकागजः। का॰—?। स्था॰ नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराज-श्रीयुतसतीशन्द्रः।

प्रा॰ वाक्यं। प्रथमपत्रं खण्डितं।

समाप्तिवा॰। इति ते कथितं पुत्र दिव्यभावं परात् परं।

न कलौ दिव्यभावोऽस्ति कलौ सर्व्वेऽजितेन्द्रियाः॥

इति सम्मोहनतन्त्रे उत्तरखण्डे सप्तमः पटलः॥

विषयः। कुलकुण्डलिनीशक्तिप्रातःकृत्यषोढान्याससर्व्वतोभद्रकवचादिनिरूपणं।

No. CCCLXXII.

Kumári-karachollása. The virtues of a charm bearing the name of Kúmárí or the virgin goddess. It is a portion of the 9th section of the last book of the Rudrayámala Tantra.

३७२ । कुमारीकवचोल्लासः ।

ग्रन्थकारः —— ?

विवरणं । अतिप्राचीनं परिशुद्धञ्च । प० ३ । पङ्क्ति० ५—६ । श्लो० ८० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराज-श्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं । आनन्दभैरव्युवाच । अथातः सम्प्रवक्ष्यामि कुमारीकवचं शुभं ।
त्रैलोक्यमङ्गलं नाम महापातकनाशनं ॥

समाप्तिवा० । लोकानामतिसौख्यदं भयहरं श्रीपादभक्तिप्रदं
मोक्षार्थं कवचं शुभं प्रपठतामानन्दसिन्धूद्भवं ।
पार्थानां कलिकालघोरकलुषध्वंसैकहेतुं जयं
ये लोकाः प्रपठन्ति धर्म्ममतुलं मोक्षं व्रजन्ति क्षणात् ॥
इति श्रीरुद्रयामले उत्तरतन्त्रे सर्व्वतन्त्रोद्दीपने कुमार्य्युपचर्य्याविन्यासे कुमारीकवचोल्लासे सिद्धमन्त्रप्रकरणे दिव्यभावनिर्णये नवमः पटलः ।

विषयः । कुमारीकवचमाहात्म्यं ॥

No. CCCLXXIII.

Padmapushpánjali-stotra. A hymn to Bhagaváti, literally a prayer with a handful of lotus flowers. By Sañkara Áchárya.

३७३ । पद्मपुष्पाञ्जलीस्तोत्रं ।

ग्रन्थकारः शङ्कराचार्य्यः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ८ । पङ्क्ति० ४—६ । श्लो० १०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्त-सतीशचन्द्रः ।

प्रा० वाक्यं । भगवतीभववत्पदपङ्कजं भ्रमरभूतसुरासुरसेवितं ।
सुजनमानसहंसपरिष्कृतं कमलयामलया निभृतं भजे ॥

समाप्तिवा० । स्तुतिमिमिस्तुतिमितः सुसमाधिना नियमतो रमतोऽनुदिनं पठेत् ।
परमथा रमया स निषेव्यते परिजनो विजनोऽपि च तं भजेत् ॥
इति श्रीशङ्कराचार्य्यविरचितं भगवतीपद्मपुष्पाञ्जलिस्तोत्रं सम्पूर्णं ॥

विषयः । भगवत्याः स्तुतिः ।

No. CCCLXXIV.

Satyanáráyaṇa-vratakathá. Ritual for the adoration of Satyanáráyaṇa, and the fruit thereof. This is an attempt to Hinduise the worship of a Mahomedan Saint, commonly called Satyapir, or the true Saint. The word *pir*, for obvious reasons, is changed to Náráyaṇa, and the story of his life is cast in a Hindu mould. The work is attributed to S'ukadeva; but it is manifestly the composition of a modern paṇḍit.

३७४ । सत्यनारायणव्रतकथा ।

ग्रन्थकारः शुकदेवः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ९ । पङ्क्ति० ६ । श्लो० ५०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुत-सतीशचन्द्रः ।

प्रा० वाक्यं । नारयणं नमस्कृत्य इत्यादि ।

ऋषय ऊचुः । व्रतेन तपसा वापि प्राप्यते वाञ्छितं फलं ।

सर्व्वं त्वां श्रोतुमिच्छामः कथयस्व महामुने ॥

समाप्तिवा० । व्रतमस्ति महा इत्यतः परं खण्डितं ।

विषयः । सत्यनारायणमाहात्म्यकथनं ॥

No. CCCLXXV.

Panchasáyaka. An erotic composition. Contents: 1, classification of women; 2, female society; 3, mantras of Chamuṇḍá; 4, prostitution; 6, characteristics of women under eight different conditions. By Jyotirís'vara.

३७५ । पञ्चसायकः ।

ग्रन्थकारः ज्योतिरीश्वरः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ४३ । पङ्क्ति० ५ । श्लो० १०५२ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तस-तीशचन्द्रः ।

प्रा० वाक्यं । रतिपरिमलसिन्धुः कामिनीकेलिबन्धुः विहितभुवनमोदः सेव्यमानप्रमोदः ।
जयति मकरकेतुर्मोहनस्यैकहेतुर्विरचितबहुसेवः कामिभिः कामदेवः ॥
अस्ति प्रत्यहमित्यादि ॥

समाप्तिवा० । ये दीनेषु दयालवः स्पृशति यानल्पो न श्रीमानवः
व्यग्रा ये च परोपकारकरणे हृष्यन्ति ये याचिताः ।
स्वस्थाः सन्त्यपि ये च नोदरमहाव्याधिप्ररोहेऽपि ये
ते भूमण्डलमन्तनैकतिलकाः सन्तः कियन्तो जनाः ॥
इति कविशेखराचार्य्यश्रीज्योतिरीश्वरविरचिते पञ्चमसायके पञ्चसायकः समाप्तः ॥

विषयः । १म-सायके चित्रिण्यादिलक्षणं । २, सुरतभेदादिकथनं । ३, ग्राम्यधर्म्मोपयोगि-चामुण्डामन्त्रादिकथनं । ४, परदारगमनादिनिरूपणं । ५, अष्टनायिकादीनां लक्षणं ॥

No. CCCLXXVI.

Krityarája. Rules and directions for various religious rites and observances, compiled by the court pandits of Rájá Krishnachandra Ráya of Nuddia.

३७६ । कृत्यराजं ।

ग्रन्थकाराः राजश्रीकृष्णचन्द्ररायाज्ञप्तपण्डिताः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ७२ । पङ्क्ति० ५—८ । श्लो० २५०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतस-तीशचन्द्रः ।

प्रा० वाक्यं । नत्वा हेरम्बगौरीगिरिशहरिहरद्वाजिनः पञ्च देवान्
वाग्देवीकेलिगङ्गोज्ज्वलवलयनवद्वीपराज्याधिपस्य ।
राज्ञः श्रीकृष्णचन्द्रक्षितिपतितिलकस्याज्ञया प्राज्ञवर्गा
धर्म्मस्य स्थापनार्थं विदधति सुधियः पुस्तकं कृत्यराजं ॥

समाप्तिवा० । पूज्यान् जनांश्च सम्पूज्य सांवत्सरपुरो इत्यतः परं खण्डितं ।

विषयः । नानाविधश्रौतस्मार्त्तादिकर्म्मणां निरूपणं ॥

No. CCCLXXVII.

S'yámáratna. Manual for the adoration of Kálí, Tárá, Shoḍashí, Bhuvanes'varí, Bhairaví, Chhinnamastá, Dhumávatí, Vagalá, Mátangi and Kamalátmiká, the ten manifestations of the Deví known under the collective name of Das'amahávidyá. By Yádavendra Vidyálankára.

३७७ । श्यामारत्नं ।

ग्रन्थकारः यादवेन्द्रविद्यालङ्कारः ।

विवरणं । अपरिशुद्धं प्राचीनञ्च । प० ४४ । पङ्क्ति० ४—५ । श्लो० १२०० । आ० वङ्गीयं । आ० तुलटकागजः । का० शाके १४१४ । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः ।

प्रा० वाक्यं । नत्वा गुरुपदद्वन्द्वं शुभाभं मुक्तिदायकं ।
भवान्यङ्घ्रियुगार्च्चानां लिख्यते पटलप्रभा ॥
प्रणम्य कालिकापादं चतुर्व्वर्गफलप्रदं ।
विबुधैः सेवितं नित्यं साधकानां हिताय च ।
क्रियते यादवेन्द्रेण प्रयोगं मन्त्रविग्रहं ।
श्यामारत्नं बुधै रम्यं सुखदं ज्ञानवर्द्धनं ॥
तत्रादौ दश महाविद्या निरूप्यन्ते । तत्रावधेयं मुण्डमालातन्त्रे । यथा,
कालीतारेत्यादि ।

समाप्तिवा० । रात्रौ पर्य्यटनञ्चैव रात्रौ शक्तिप्रपूजनं ।
न करोति कथं देवः साधकः कौलिको भवेत् ॥
इति श्रीमद्दक्षिणाकालीपूजापद्धतिः ।

विषयः । अत्र दशमहाविद्यामन्त्रोद्धारपुरश्चरण-जप-होम-दक्षिणाप्रभृतयो विद्यन्ते ॥

No. CCCLXXVIII.

Bhavánístava-s'ataka. A hymn to Bhavání in a hundred stanzas.

३७८ । भवानीस्तवशतकं ।

ग्रन्थकारः——?

विवरणं । प्राचीनमशुद्धं खण्डितञ्च । प० ९ । पङ्क्ति० ३—६ । श्लो० १५० । आ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुक्तसतीशचन्द्रः ।

प्रा॰ वाक्यं । काशीनाथपुरे सदाशिवहृदि न्यस्तं कलौ तारकं
कालीपादयुगारविन्दयुगलं ध्यात्वा च तद्वद् गुरोः ।
रम्भाम्भोरुहमध्यवासमनिशं श्रीतातपादं तथा
काल्याः पद्मशतेन पुण्यचयदं तन्ये भवान्यास्तवं ॥
इयं कालीकारे चितितललसत्पादकमला
गतायातैर्वातैर्गमयति रसां नागभुवनं ।
ऊऊङ्कारोत्कारैर्दनुजगणमुण्डानि दलना
कटौ क्षीणा येना विजितविहगेना त्रिनयना ॥

समाप्तिवा॰ । इत्थं स्तुतिञ्च विविधां कवचञ्च कृत्वा कृत्वा प्रदक्षिणमनुत्रिकृतं करार्चौ ।
अष्टाङ्गसन्नतिविधिञ्च विधाय मन्त्री न्यूनातिरिक्तयजनं विनिवेदयेच ॥

विषयः । भवान्याः स्तुतिः ॥

No. CCCLXXIX.

Annapúrṇá-sahasra-náma-stava. A hymn to Annapúrṇá in which a thousand names or epithets are strung in verses. This is an extract from the Vis'vasára Tantra.

३७९ । अन्नपूर्णासहस्रनामस्तवः ।

ग्रन्थकारः——?

विवरणं । परिशुद्धं प्राचीनञ्च । प॰ ९ । पङ्क्ति॰ ६—८ । श्लो॰ २०० । अ॰ वङ्गीयं । आ॰ तुलटकागजः । का॰—? । स्था॰ नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराज-श्रीयुक्तसतीशचन्द्रः ।

प्रा॰ वाक्यं । देव्युवाच । देवदेव महादेव सर्व्वशास्त्रविशारद ।
ब्रह्मविष्णुशिरोरत्ननिघृष्टचरणाम्बुज ॥

समाप्तिवा॰ । मातृजारसमं ज्ञात्वा गोपयेत् स्तवराजकं ।
सत्यं सत्यं महेशानि गोप्यं सर्व्वागमेषु च ॥
इति विश्वसारतन्त्रे देवीमहेश्वरसंवादे अन्नपूर्णासहस्रनामस्तवः समाप्तः ॥

विषयः । अन्नपूर्णायाः माहात्म्यवर्णनं ॥

No. CCCLXXX.

Málá-sanskára. Consecration of the málá or rosary for counting prayers.

३८० । मालासंस्कारः ।

ग्रन्थकारः ———?

विवरणं। अपरिशुद्धं । प० १ । पङ्क्ति० ४—५ । श्लो० २० । अ० वङ्गीयं । आ० तुलट-कागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुक्त-सतीशचन्द्रः ।

प्रा० वाक्यं। उड्याकरपद्धत्यां । आदौ प्राणान् प्रतिष्ठाप्य पश्चात संस्कारमाचरेत् ।
यथा ॐ ह्रीं श्रीं इत्यादि ।

समाप्तिवा० । इति सर्व्वत्र नवकोणाश्वत्थपत्रे मालास्थापनं ।

विषयः । मालाधारणानुष्ठानप्रतिपादनम् ॥

No. CCCLXXXI.

Japarahasya. Rules for counting prayers.

३८१ । जपरहस्यं ।

ग्रन्थकारः——?

विवरणं। परिशुद्धम्। प० १। पङ्क्ति० ७–९। श्लो० ५०। अ० वङ्गीयं। आ० तुलट-कागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुत-सतीशचन्द्रः।

प्रा० वाक्यं। जपक्रमं प्रवक्ष्यामि शृणु त्वं कमलानने। येन विना न सिद्ध्येत कल्पकोटिशतैरपि॥

समाप्तिवा०। देवतागुरुमन्त्रेषु समभावपराय च। निन्दकेभ्यः शठेभ्यश्च पशुभ्यो नैव दर्शयेत्॥
इति जपरहस्यं समाप्तम्॥

विषयः। जपनिरूपणं।

No. CCCLXXXII.

Maháshoḍhá-nyása. Rules for the regulation of breath and gesticulation during S'ákta worship. By Virupáksha.

३८२ । महाषोढान्यासः ।

ग्रन्थकारः विरूपाक्षः।

विवरणं। परिशुद्धं । प० ९ । पङ्क्ति० ७—८। श्लो० २००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुत-सतीशचन्द्रः।

प्रा॰ वाक्यं । अथ वाह्यमातृकान्यासः । तद्ध्यानं यथा, पञ्चाशल्लिपिभिरित्यादि ।

समाप्तिवा॰ । इत्यूर्द्ध्वाम्नायान्तर्गतमहाषोढान्यासः ।

इति विरूपाक्षपरमहंसपरिव्राजकसिद्धमहाषोढा ॥

विषयः । कराङ्गन्यासादिविधानं ॥

No. CCCLXXXIII.

Rádhá Tantra. Rules and observances for the guidance of S'ákta worshipers. The MS. is very imperfect, containing only the 23rd section.

३८३ । राधातन्त्रं ।

ग्रन्थकारः——?

विवरणं । अशुद्धं । प॰ ६ । पङ्क्ति॰ ५ । श्लो॰ १२॰ । अ॰ वङ्गीयं । आ॰ तुलटकागजः । का॰—? । स्था॰ नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुत-सतीशचन्द्रः ।

प्रा॰ वाक्यं । ईश्वर उवाच । यदुक्तं तन्त्रमन्त्रेषु कुलाचारं वरानने ।
तत्सर्व्वं परमेशानि पद्मानि परमाद्भुतं ॥
विसृज्य बहुधा मूर्त्तिं नायिकां पद्ममालया ।
कोटिकोटिं महेशानि सृष्ट्वा वै पद्मानि प्रिये ॥

समाप्तिवा॰ । यदुक्तं सुकुरङ्गाक्षि त्रिपुरापदपूजनात् ।
किमसाध्यं महेशानि त्रिपुरायाः प्रसादतः ॥
इति श्रीवासुदेवरहस्ये राधातन्त्रे हरपार्व्वतीसंवादे त्रयोविंशतिपटलः ॥

विषयः । कुलाचारसम्मतपूजनजपनादि ॥

No. CCCLXXXIV.

Vyánjanaguṇa. This MS. is also a fragment of a large work; it is devoted to the culinary art.

३८४ । व्यञ्जनगुणं ।

ग्रन्थकारः——?

विवरणं । अशुद्धम् । प॰ २ । पङ्क्ति॰ १०—११ । श्लो॰ १०० । अ॰ वङ्गीयं । आ॰ तुलटकागजः । का॰—? । स्था॰ नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुत-सतीशचन्द्रः ।

प्रा० वाक्यं । शुष्कपचान्वितो रुच्यः सङ्ग्राही कफपित्तजित् ।
कर्कटीशीर्षहन्तादिसिद्धो मत्स्यस्तु पित्तजित् ॥
समाप्तिवा० । ताम्बूलं दोषजिद् वक्त्रपाटवोत्साहकान्तिदं ।
मद्यं सुप्तोत्थिते भुक्ते त्यज्य दन्ता गद्गदे (?) ॥ परिसमाप्तिसूचकवाक्यं नास्ति ।
विषयः । सिद्धमत्स्यादीनां गुणकथनं ॥

No. CCCLXXXV.

Todala Tantra. An original Tantra on the S'ákta cult. The MS. is incomplete, breaking off at the middle of the 11th section.

३८५ । तोडलतन्त्रं ।

ग्रन्थकारः—?
विवरणं। विशुद्धम्। प० २५। पङ्क्ति० ५। श्लो० ५००। अ० वङ्गीयं। आ० तुलट-
कागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुक्त-
सतीशचन्द्रः।
प्रा० वाक्यं। देव्युवाच। ब्रूहि मे जगतां नाथ सर्व्वविद्यामय प्रभो।
महाविद्यासु सर्व्वासु पुण्यासु भुवनत्रये ॥
एतासां दक्षिणे भागे नानारूपः पिनाकधृक्।
पृथक् पूज्यो महादेव कथयस्व मयि प्रभो ॥
समाप्तिवा०। बहुजन्मार्ज्जितात् पुण्यात् बहुभाग्यवशाद् यदि।
श्रीगुरुर्लभ्यते देव तस्याध्या इत्यतः परं खण्डितं। एकादशोल्लासप्रारम्भे ॥
विषयः। महाविद्यादीनां पूजापुरश्चरणहोमप्रभृतयः ॥

No. CCCLXXXVI.

S'yámákavacha. A charm bearing the náme of S'yámá, a form of Durgá. This is an extract from the Bhairava Tantra.

३८६ । श्यामाकवचं ।

ग्रन्थकारः—?
विवरणं। परिशुद्धम्। प० ४। पङ्क्ति० ४—६। श्लो० ३८१। अ० वङ्गीयं। आ० तुलट-
कागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुत-
सतीशचन्द्रः।

प्रा० वाक्यं। भैरव्युवाच। कालीपूजा श्रुता नाथ भावाश्च विविधाः प्रभो।
इदानीं श्रोतुमिच्छामि कवचं पूर्व्वसूचितम्॥
समाप्तिवा०। अतलचं प्रजप्त्वापि तस्य विद्या न सिद्ध्यति।
स श्लघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात्॥
इति भैरवतन्त्रे भैरवभैरवीसंवादे कालीकल्पे श्यामाकवचं समाप्तम्॥
विषयः। कालिकाराधनाप्रवर्त्तकप्रयोजनादिकथनं॥

No. CCCLXXXVII.

Sankshepa-purascharaṇavidhi. Directions for attaining perfection in mystic mantras;—an extract from the Nitánta Tantra.

३८७। सङ्क्षेपपुरश्चरणविधिः।

ग्रन्थकारः——?

विवरणं। अपरिशुद्धम्। प० ६। पङ्क्ति० ६। श्लो० १००। अ० वङ्गीयं। आ० तुलट-कागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुत-सतीशचन्द्रः।
प्रा० वाक्यं। अथ नितान्ततन्त्रोक्तशिवपार्वतीसंवादकसङ्क्षेपपुरश्चरणविधिर्लिख्यते।
सङ्क्षेपेण पुरश्चर्य्यां वक्ष्यामि शृणु पार्व्वति।
यां कृत्वा साधको देवि परं मोक्षमवाप्नुयात्॥
समाप्तिवा०। अन्यत् पूर्व्ववत्। इति सङ्क्रान्तिपुरश्चरणं।
इति नितान्ततन्त्रोक्तहरपार्व्वतीसंवादकतिथ्यादिपुरश्चरणप्रयोगः॥
विषयः। समयविशेषकर्त्तव्यपुरश्चरणविवरणं॥

No. CCCLXXXVIII.

Ashṭádas'ottara-s'átas'loka. A hymn to Deví, in 108 stanzas, by S'ivachandra, the great great grandfather of the late Mahárájá Satíschandra Ráya, of Krishṇanagara.

३८८। अष्टादशोत्तरशतश्लोकी।

ग्रन्थकारः शिवचन्द्रः। पुस्तिकादौ राज्ञः सतीशचन्द्रस्य प्रपितामहपितुः शिवचन्द्रस्य कृतिरित्यनुमीयते। तदनुमानं सतीशचन्द्रेणापि वाढमनुमोदितम्।

विवरणं। परिशुद्धं। प० २०। पङ्क्ति० ४। श्लो० २६०। अ० वङ्गीयं। आ० तुलट-
कागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुत-
सतीशचन्द्रः।

प्रा० वाक्यं। अशक्तास्त्वां स्तोतुं विधिहरिमहेशादिविबुधाः
प्रवर्त्तेऽहं जानन्निति तदपि दुर्धीः पशुरिव।
भवत्या हन्तव्यं तदिति शशिचूडे जननि यन्
महाकालेनोक्तं न खलु पशुबोधः समुचितः॥

समाप्तिवा०। शिवाख्यः प्रेतस्त्वच्चरणसरसीजद्वयतले
समन्ताद् वर्त्तन्ते निरवधिशिवाख्याश्च पशवः।
शिवाख्यस्ते भर्त्ता स्वयमपि शिवाख्यासि यद्‌तः
शिवाख्यं मां हातुं तव भवति युक्तं न कुत्रचित्॥ परिसमाप्तिसूचकवाक्यं नास्ति॥

विषयः। देव्याः स्तुतिः।

No. CCCLXXXIX.

Sangīta-dāmodara. An elaborate treatise on music, both vocal and instrumental. By Subhankara.

३८९। सङ्गीतदामोदरः।

ग्रन्थकारः शुभङ्करः।

विवरणं। प्राचीनमपरिशुद्धञ्च। प० १२१। पङ्क्ति० ४। श्लो० ५०००। अ० वङ्गीयं।
आ० तालपत्रं। का० शकाब्दाः १६४२। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासि-
महाराजश्रीयुतसतीशचन्द्रः।

प्रा० वाक्यं। भावो हावानुभावौ गतिसमयदशास्थानदूतीविभावाः
स्त्रीपुंसौ नादगीतस्वरगमकगणा मूर्च्छना वर्गतालाः।
ग्रामो रागाङ्घ्रिताल श्रुतिसचित्कला वाद्यमाचाङ्गहारा
न्नृत्यन् निर्दोषगानानभिनयनरसाः कृष्णलीलां वहन्तु॥

समाप्तिवा०। ख्यातो यः कविचक्रवर्त्तिपदतो विद्याबलैरञ्चितः
सौभद्रेयमिमं यमर्ज्जुनयशाः सोऽजीजनत् श्रीधरः।
तस्य श्रीलशुभङ्करस्य भणिते सङ्गीतदामोदरे
साभोगः स्तवकः प्रपञ्चितरसः श्रीमानयं पञ्चमः॥
इति श्रीलशुभङ्करकृतः सङ्गीतदामोदरः समाप्तः॥

विषयः। विभावानुभाव-सञ्चारिभाव-नायक-नायिकादूत्यादीनां निरूपणं। सङ्गीतापयोगि-निषादादिस्वरग्राममूर्च्छनातालखयादीनाञ्च प्रतिपादनं।

No. CCCXC.

A'yurveda. This MS. professes to include the whole circle of the science of medicine as known to the ancient Hindus, but the Pandit who examined it, states that it contains only notices of the properties of certain articles of food and medicine. I have not had an opportunity of seeing the work.

३९०। आयुर्वेदः।

ग्रन्थकारः——?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ५१। पङ्क्ति० ४—८। स्रो० ५३५। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराज-श्रीयुतसतीशचन्द्रः।

प्रा० वाक्यं। प्रथमद्वितीयपत्रेण खण्डितः।

समाप्तिवा०। रचितं परप्रीतीनां शिवेन परमात्मना।

खट्टी जिज्ञीसता वत्स आयुर्वेदः प्रकाशितः॥ इत्यायुर्वेदः समाप्तः॥

विषयः। अत्र यवादिधान्यविशेषमांसमत्स्यशाकफलादीनां गुणा निर्द्दिष्टाः॥

No. CCCXCI.

Mahákálarudrodita-stotra. A hymn to Dakshiṇákálí, supposed to have been composed by Mahákálarudra, a form of S'iva.

३९१। महाकालरुद्रोदितस्तोत्रं।

ग्रन्थकारः——?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० २। पङ्क्ति० ५—६। स्रो० ५०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराज-श्रीयुतसतीशचन्द्रः।

प्रा० वाक्यं। महाकाल उवाच। अचिन्त्यामिताकारशक्तिस्वरूपा प्रतिव्यक्त्यधिष्ठानसत्त्वैकमूर्त्तिः। गुणातीतनिर्द्वन्द्वबोधैकगम्या त्वमेका परं ब्रह्मरूपेण सिद्धा॥

समाप्तिवा०। महाकालरुद्रोदितस्तोत्रमेतत् सदा भक्तिभावेन योऽध्येति भक्तः।

न शोको न रोगो न मृत्युर्भवेत् * * सिद्धिरन्ते च कैवल्यलाभः॥

विषयः। दक्षिणकालिकाया माहात्म्यप्रतिपादनं।

No. CCCXCII.

Sundarí-s'aktidána stotra. A hymn to Kálí, by Adinátha Mahákála. This is an extract from the Mahákála Sañhitá.

३९२ । सुन्दरीशक्तिदानस्तोत्रं ।

ग्रन्थकारः आदिनाथ-महाकालः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० २६ । पङ्क्ति० ७ । श्लो० ५०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिमहाराजश्रीयुत-सतीशचन्द्रः ।

प्रा० वाक्यं । कैलासशिखरे रम्ये नानादेवगणावृते । नानावृक्षलताकीर्णे नानापक्षिरवैर्युते ॥
चतुर्मण्डलसंयुक्ते शृङ्गारमण्डलान्विते ।
समाधौ संस्थितं शान्तं क्रीडन्तं योगिनीप्रियं ॥

समाप्तिवा० । इति सङ्क्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥ ७४ ॥
इति श्रीमदादिनाथमहाकालविरचितायां महाकालसंहितायां कालीकालसंवादे सुन्दरीशक्तिदानाख्यं कालीस्वरूपं मेधासाम्राज्यस्तोत्रं सम्पूर्णं ॥

विषयः । कालिकायाः स्तोत्रं ॥

No. CCCXCIII.

Pipítakadvádas'ívrata. Manual for the performance of a religious rite on the twelfth of the waxing of the moon in the month of Vais'ákha, when the giving away of water, food and other articles is held meritorious. The rite was first instituted by a Bráhman named Pipítaka.

३९३ । पिपीतकद्वादशीव्रतं ।

ग्रन्थकारः——?

विवरणं । प्राचीनं परिशुद्धञ्च । प० ४ । पङ्क्ति० ५ । श्लो० ८० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुतलोहाराममिशिरोरत्नः ।

प्रा० वाक्यं । ततः पूर्व्वदिने उपोष्य प्रातःस्नातः शुचिराचान्तः प्राङ्मुखः सूर्य्यार्घं दत्वा स्वस्ति-वाचनपूर्व्वकं सूर्य्यसोमेति पठित्वा सङ्कल्पं कुर्य्यात् ।

समाप्तिवा० । इह पुत्रादिकैर्युक्तो धनधान्यशुभान्वितः ।
अन्ते याति परं स्थानं विष्णोरेव न संशयः ॥

विषयः । श्रीविष्णुप्रीत्यर्थकव्रतविशेषानुष्ठानकथनं ।

No. CCCXCIV.

Samásaváda. A Nyáya dissertation on the Sanskrit cases, by Govinda Chakravartí. This is probably different from the work of this name, by Jayaráma Nyáyapanchánana, noticed by Dr. Hall in his *Contributions*, p. 61, and by Weber in the Berlin Catalogue, p. 217.

३९४ । समासवादः ।

ग्रन्थकारः गोविन्दचक्रवर्त्ती ।

विवरणं। नवीनमपरिशुद्धञ्च । प० १७ । पङ्क्ति० ६ । श्लो० ४०० । अ० वङ्गीयं । आ० तुलटकागजः । का० शकाब्दाः १७७५ । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासि-श्रीयुक्तलोहारामशिरोरत्नः ।

प्रा० वाक्यं । नाम्नां समासो युक्तार्थ इति वैयाकरणाः । नाम्नामिति बहुत्वमविवक्षितं ॥

समाप्तिवा० । समासस्य प्रत्येकपदान्यत्वात् लिङ्गसङ्ख्यायां कारकविभक्त्यादिकमुत्पद्यते इति सङ्क्षेपः ॥ इति महामहोपाध्यायश्रीगोविन्दभट्टाचार्य्यचक्रवर्त्तिविरचितः समासवादः सम्पूर्णः ॥

विषयः । समासपदस्य वाचकत्वादिव्यवस्थापनं ॥

No. CCCXCV.

Mugdhabodha-ṭíká. A commentary on the Sanskrit grammar of Vopadeva, entitled Mugdhabodha. By Rámánanda A'chárya.

३९५ । मुग्धबोधटीका ।

ग्रन्थकारः रामानन्दाचार्य्यः ।

विवरणं । प्राचीनं परिशुद्धञ्च । प० ८६ । पङ्क्ति० ५—९ । श्लो० १२२० । अ० वङ्गीयं । आ० तुलटकागजः । शकाब्दाः १६२२ । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासि-श्रीयुतलोहारामशिरोरत्नः ।

प्रा० वाक्यं । प्रणम्य परमात्मानं रामं पद्मदलेक्षणं । मुग्धबोधस्य टीका श्रीरामानन्देन रच्यते ॥ श्रीवोपदेवपण्डितः सङ्क्षेपतः स्वयङ्कृतस्य व्याकरणस्य दुरूहतया वृत्तिं चिकीर्षुः

प्रारब्धसमाप्तये शिष्टाचारप्राप्तं मङ्गलं कुर्व्वन् वृत्तेः सम्बन्धाभिधेयप्रयोजनानि व्याकरणनाम च निर्द्दिशति मुकुन्दमित्यादि ॥

समाप्तिवा० । करोतीति कारुः वातीति वायुः इत्यादि । इति महामहोपाध्यायश्रीरामानन्दाचार्य्यविरचिता मुग्धबोधव्याकरणटीका समाप्ता ॥

विषयः । मुग्धबोधव्याकरणार्थविवरणं ॥

No. CCCXCVI.

S'abdártha-sára-manjarí. Logical meaning of words in a crude state as also when compounded. By Jayakrishna S'armá. A work of this name, by Bhavánanda Siddhántavágís'a, is noticed in Hall's *Contributions*, p. 5.

३९६ । शब्दार्थसारमञ्जरी ।

ग्रन्थकारः जयकृष्णशर्म्मा ।

विवरणं । नवीनं परिशुद्धञ्च । प० २८ । पङ्क्ति० ५—६ । श्लो० ५०० । अ० वङ्गीयं । आ० तुलटकागजः । का० शकाब्दाः १७७५ । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुतलोहारामशिरोरत्नः ।

प्रा० वाक्यं । हेरम्बचरणद्वन्द्वं विघ्ननाशकरं परं । प्रणम्य जयकृष्णेन क्रियते सारमञ्जरी ॥
तत्र प्रथमं कालत्रयनिरूपणं । वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वमित्यादि ।

समाप्तिवा० । आलोक्यविविधग्रन्थं विचार्य्य च पुनः पुनः ।
कृतेयं जयकृष्णेन शब्दार्थसारमञ्जरी ॥
इति जयकृष्णशर्म्मणा विरचिता शब्दार्थसारमञ्जरी समाप्ता ॥

विषयः । आख्यातार्थसमासार्थादिव्यवस्थापनम् ॥

No. CCCXCVII.

Subodhá. A commentary on the Kumárasambhava of Kálidása, by Bharata Sena, son of Gauránga Sena. The MS. is imperfect, and contains explanations of only the first three cantos. The writer states that the Kumárasambhava originally included 16 cantos, of which the last eight never got currency, and the eighth was cursed by the Deví, so he confined his commentary to the first seven cantos. Commentaries on the Meghadúta and the Mágha by this author are noticed by Aufrecht in the Bodleian Catalogue, and several others are current in Bengal, the most esteemed being that on the Amavakosha. The author lived about a hundred years ago, and had the title of Mallika.

३९७ । सुबोधा ।

ग्रन्थकारः भरतसेनः ।

विवरणं। प्राचीनमपरिशुद्धञ्च । प० २७ । पङ्क्ति० ८—१० । श्लो० १३०० । अ० वङ्गीयं ।
आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुत-
लोहारामशिरोरत्नः ।

प्रा० वाक्यं । कुमारसम्भवं नाम कालिदासमहाकविः ।
यच्चकार महाकाव्यं सर्गैः षोड़षभिः श्रुतं ॥
तस्य शेषाष्टसर्गस्य सञ्चारोऽभून्न दैवतः । पाठोऽष्टमस्य सर्गस्य देवीशापान्न विद्यते ॥
टीका ततसप्तसर्गस्य सुबोधाख्या यथामति । गौराङ्गसेनपुत्रेण भरतेन वितन्यते ॥
श्रीमान् कालिदास इत्यादि ।

समाप्तिवा० । अद्रिसुरगजयोः शुक्लत्वात् उन्नतत्वाच्च साम्यं ।
इति वैद्यहरिहरात्मजवंशसम्भवगौराङ्गमल्लिकात्मजश्रीभरतसेनकृतायां कुमार-
सम्भवटीकायां सुबोधायां तृतीयः सर्गः ॥

विषयः । कुमारसम्भवाभिधेयकाव्यार्थव्याख्यानं ॥

No. CCCXCVIII.

Grahayámala Tantra. On daily prayers, rites and other liturgical details.

३९८ । ग्रहयामलं ।

ग्रन्थकारः———?

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ४२ । पङ्क्ति० ५—१० । श्लो० ४०० । अ० वङ्गीयं ।
आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुत-
लोहारामशिरोरत्नः ।

प्रा० वाक्यं । परमं विषयेऽर्काद्यासि परं विष्णवे नरः । परमा शङ्करा यूयमेतान्नमतस् वो नमः ? ॥

समाप्तिवा० । अहयं कवच इत्यतः परं सप्तमपटलात् खण्डितं ॥

विषयः । वैदिकीसन्ध्याभिषेकादिजपसङ्ख्याग्रहचरितादिनिर्णयः ॥

No. CCCXCIX.

Meghadútártha-muktávalí. A commentary on the Meghadúta of Kálidása, by Vis'vanátha Mís'ra. This work is different from the six commentaries noticed under No. 221.

३९९ । मेघदूतार्थमुक्तावली ।

ग्रन्थकारः विश्वनाथमिश्रः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० २६ । पङ्क्ति० १०—११ । श्लो० १४०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुक्त-लोहारामशिरोरत्नः ।

प्रा० वाक्यं । उपास्य विश्वकर्म्माणं मुक्तावलिरियं मया । ग्रथ्यते मेघदूतीया विदुषां कण्ठभूषणं ॥ तत्र कालिदासस्य महाकवेराखिकत्वात् ग्रन्थस्य परिसमाप्तिविशिष्टशिष्टाचारानु-मितपरीप्सितनिर्विघ्नपरिसमाप्तिहेतुमङ्गलाचार * * महाकाव्यमिदमतः प्रथमं वस्तुनिर्देशः । तथा च दण्डी ।

समाप्तिवा० । विद्युता कलत्रेण तव विप्रयोगो माभूदिति भावः ।
इति विश्वनाथमिश्राचार्य्यकृता मेघदूतार्थमुक्तावली समाप्ता ॥

विषयः । मेघदूताख्यकाव्यार्थव्याख्यानम् ॥

No. CCCC.

Mahávans'ávalí. Genealogy of the Kulinas, or the nobility created by Vallála Sena of Bengal. By Dhrúvánanda Mis'ra.

४०० । महावंशावली ।

ग्रन्थकारः ध्रुवानन्दमिश्रः ।

विवरणं । प्राचीनमपरिशुद्धं । प० ११५ । पङ्क्ति० ६—७ । श्लो० १२४० । अ० वङ्गीयं । आ० तुलटकागजः । का० शकाब्दाः १२६१ । स्था० नवद्वीपान्तर्गतकृष्णनगर-निवासिश्रीयुतलोहारामशिरोरत्नः ।

प्रा० वाक्यं । नत्वा तां कुलदेवतां खलु सदा सन्मानसे हंसतां
जातां भक्तिविशेषतः कुलसभामध्ये सदा मोदितां ।
श्रीमद्वन्द्यघटीयकादिकमहावंशावलीं व्यक्तितो
वक्ष्ये तत्परिवर्त्तवर्त्तनविधिं मिश्रो ध्रुवानन्दकः ॥

समाप्तिवा० । हस्यौ मूकजजानकीशमुकजश्रीरामचन्द्राह्वय-
आर्त्तिर्मूकजवाणिनाथसुकृतौ हेस्यौ रमानाथकः ।

लक्ष्मीनाथमुकः सुतौ सुविदितौ सच्चट्टवंशोद्भवौ
गङ्गानन्दसुधीस्तथा कुलकृती श्रीषष्ठिदासस्ततः ॥
परिसमाप्तिसूचकं वाक्यं नास्ति ॥

विषयः । कुलीनवंशावलीवर्णनम् ॥

No. CCCCI.

Vyávasthá-sára. A dissertation on the law of inheritance according to the Bengal school. By Náráyana S'armá.

४०१ । व्यवस्थासारः ।

ग्रन्थकारः नारायणशर्म्मा ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० १४५ । पङ्क्ति० ६—७ । श्लो० १०० । अ० वङ्गीयं । आ० तुलटकागजः । का० शकाब्दाः १७२० । स्था० नवद्वीपान्तर्गतकृष्णनगर-निवासिश्रीयुक्तलोचारामशिरोरत्नः ।

प्रा० वाक्यं । नत्वा कृष्णपदद्वन्द्वं श्रीनारायणशर्म्मणा । क्रियतेऽतिप्रयत्नेन व्यवस्थासारसङ्ग्रहः ॥

समाप्तिवा० । तत्कुम्भान्तपिण्डमेकं गृह्णीयादविलम्बितः ।
धर्म्मं गृह्णीते शुद्धः स्यादधर्म्मं तु महीयते ॥
इति व्यवस्थासारे विवादादिपरीक्षान्तव्यवस्थापरिच्छेदः ॥
श्रीनारायणशर्म्मणा विरचितं व्यवस्थासारपुस्तकं समाप्तम् ॥

विषयः । दायविभागादिनिरूपणम् ।

No. CCCCII.

Mis'ra. Genealogy of the Mukhyoṭi, Ghosála, Chaṭṭa and Gánguli septs of the Kulina Bráhmans of Bengal. By Mis'ra Ácharya.

४०२ । मिश्रः ।

ग्रन्थकारः मिश्राचार्य्यः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० १२८ । पङ्क्ति० ५—६ । श्लो० २१२० । अ० वङ्गीयं । आ० तुलटकागजः । का० शकाब्दाः १७६३ । स्था० नवद्वीपान्तर्गतकृष्णनगर-निवासिश्रीयुतलोचारामशिरोरत्नः ।

प्रा० वाक्यं । वन्द्यो मुखैटी काञ्ची घोषालस्तु तथापरे ।
चट्टः पूतिश्च गाङ्गोली कुन्दग्रामी क्रमादमी ॥
आर्हतो वसुरूपाख्यः शिरो गोवर्द्धनः सुधीः ।
गाशिषो (?) मकरन्दश्च जाह्नवाख्यः समा इमे ॥
समाप्तिवा० । आर्त्तिर्मूखजवाणिनाथसुकृती चेम्यो रमानाथको
लक्ष्मीनाथमुखः सुतो सुविदितो सञ्चट्टवंशोद्भवौ ।
* * * * * * * * * * * * * * * * *
गङ्गादाससुधीः कुलकृती श्रीचट्टदासस्ततः ॥ परिसमाप्तिसूचकवाक्यं नास्ति ॥
विषयः । कुलिनवंशावलीसंवर्णनं ॥

No. CCCCIII.

Dhruvánanda-matavyákhyá. The Bráhman Kulinas of Bengal, their orders, gradations, subdivisions, &c. The work professes to be a commentary on the text of Dhruvánanda. The author, Gopála S'armá, says that the ancient text having been destroyed by the Bargis, he compiled the work with great labour in his native village, Harinadí, near Sántipur, on the eastern bank of the Bhágirathí. He writes of 5 gotras, including 56 Gánís or families, of which 22 were Kulinas, and the rest S'rotriyas. Of the Kulinas, 8 are called *Mukhya* or chief, and 14 *Gauna*, or inferior.

४०३ । ध्रुवानन्दमतव्याख्या ।

ग्रन्थकारः गोपालशर्म्मा ।
विवरणं । प्राचीनमपरिशुद्धञ्च । प० १२२ । पङ्क्ति० १० । श्लो० ६००० । अ० वङ्गीयं ।
आ० तुलटकागजः । का० शकाब्दाः १६७२ । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुतलोहारामशिरोरत्नः ।
प्रा० वाक्यं । नत्वा रामपदद्वन्द्वं गुरुञ्च कुलदेवतां । ध्रुवानन्दमतव्याख्या कृता गोपालशर्म्मणा ॥
वर्गिकेन हृतं सर्व्वं पुस्तकं विमलं महत् । ततोऽपि बहुकालेन कृता विप्रप्रसादतः ॥
ग्रामे हरिनदीरम्ये गङ्गायाः पूर्व्वभागतः ।
शाके नन्दचतुर्भूपे शुभारम्भः कृतो मुदा ॥
पञ्चगोत्रसमुद्भूताः षट्पञ्चाशतगाञ्जिकाः ।
तेषां द्वाविंशतिकुला अपरे श्रोत्रिया वराः ॥
द्वाविंशतिमध्ये अष्टौ मुख्यकुलाश्चतुर्दश गौणाः ।

समाप्तिवा० । अधुना हरं गदाधरखान्यो नहि ॥ १०॥ तत्रैव च० अभवन् केचित् ॥ १ ॥ १० यज्ञेश्वर आर्त्तिरच दीर्घाङ्गीसम्पर्कः । मु० मृत्युञ्जयस्य पूर्णाधन्यसम्पर्कः । वाणीपुत्रः चेम्य इति ॥ परिसमाप्तिसूचकं वाक्यं नास्ति ॥

विषयः । १, कन्या । २, खड़्दह । ३, बल्लवी । ४, सर्व्वानन्दी । ५, पण्डितरत्नी । ६, वाङ्गाल । ७, आठी । ८, विजयपण्डिती । ९, सुराइ । १०, गोपालघटकी । ११, कांटावनी । १२, आचार्य्यशेखरी । १३, चट्टराघवी । १४, विद्याधरी । १५, चांदाइ । १६, माधाइ । १७, पारिहाल । १८, मालाधरखानी । १९, श्रीरङ्गभट्टी । २०, बालि । २१, मोदिनी । २२, काकुत्स्थमिश्री । २३, शतानन्दखानी । २४, नरेन्द्री । २५, चन्द्रपति । २६, खालकुलिया । २७, राघवघोषाली । २८, शुद्ध-सर्व्वानन्दी । २९. दासरथी । ३०, भैरवी । ३१, आचम्बिता । ३२, देहाटा । ३३, शुद्धवाजखानी । ३४, सैारी । ३५. धराधरी । ३६, नत्या । ३७, रूद इत्यादि कुलीनवंशावलीविवरणम् ॥

No. CCCCIV.

Phuliyákula. Genealogy of the Kulinas of the order of Phuliyá, a village near Sántipur, in the district of Nuddea.

४०४ । फुलियाकुलं ।

ग्रन्थकारः——— ?

विवरणं । प्राचीनमपरिशुद्धञ्च । प० ८ । पङ्क्ति० ५—६ । स्ला० ५२० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरनिवासिश्रीयुक्तलोहाराममिश्रेराल्लयः ।

प्रा० वाक्यं । रामाचार्य्योऽतिवर्य्यः कुलकुलमिहिरो धैर्य्यगाम्भीर्य्ययुक्तः
ख्यातः चैाणीतलेऽसैा वितरणविधिना सर्व्वपूज्यः सुरेज्यः ।
आर्त्तीगा यदुकेशवैा सुललितैा चानात्रि वन्द्यं ततो
लभ्यं श्रीभुवनं सुचट्टजननं लक्ष्मीपतिं सोऽकरोत् ॥

समाप्तिवा० । सत् श्रीनारायणोऽसैा शुभकुलजयिनो धन्या धरामण्डले
तेषां सत्कर्म्मशाली कुलनिपुणजगज्जीवनो गाङ्गनीयः ।
परिसमाप्तिसूचकं वाक्यं नास्ति ॥

विषयः । फुलियावंशावलीकथनं ॥

No. CCCCV.

S'aktisangama Tantra. An original Tantra, including the whole circle of the S'ákta cult. It is said to have originally contained sixty thousand s'lokas, but the MS. examined does not exceed eleven thousand. It is divided into four parts or khandas, of which the 1st comprises twenty chapters, the 2nd, sixty-five chapters, the 3rd, nineteen chapters, and the 4th, eleven chapters.

४०५ । शक्तिसङ्गमतन्त्रम् ।

ग्रन्थकारः——?

विवरणं। प्राचीनं प्रायशः परिशुद्धञ्च । प० ३१९ । पङ्क्ति० ७ । श्लो० ११०० । अ० वङ्गीयं । आ० तुलटकागजः । का० शकाब्दाः १६७४ । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं। श्रीदेव्युवाच । अनादिरूप भूतेश शशिशेखर शङ्कर ।
देवाधिदेव विश्वेश विश्वाराध्य सुरेश्वर ॥

समाप्तिवा० । रहस्यातिरहस्यञ्च रहस्यातिरहस्यकम् ।
इति सङ्क्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥
इति श्रीमदक्षोभ्यतारासंवादे तारासूक्ते ब्रह्मजातिवर्णने एकादशः पटलः ॥
समाप्तश्चायं ग्रन्थः ॥

विषयः। अत्र चत्वारः खण्डाः सन्ति । प्रथमे खण्डे २० पटलास्तत्र, १ पटले, अकाराक्षरतत्त्वकथनादि । २, भूगोलकृतादियुगनिर्णयः । ३, देवीशक्त्याद्यष्टगुणकरणकथनं । ४, पूजापात्रनिर्णयकथनं । ५, कृष्णिधनिचक्रोक्तिः । ६, नानादेवतानामविवरणं । ७, दीक्षाविवरणं । ८, प्रदोषसमयकर्त्तव्यानुष्ठानं । ९, पूजाद्रव्यादिकथनं । १० होमचत्वरकृतबिन्द्वादिरेखादिविशेषस्वरूपसेतुकथनं । ११, साधकस्य पूर्णाभिषेकादिकथनं । १२, तारामन्त्रसिद्धिप्रयोगः । १३, वीररात्र्यादिकतिपयरात्रिकथनं । १४, दक्षिणाकालीसिद्धिप्रकारः । १५, सुन्दरीसाधनप्रकारः । १६, क्रमदीक्षाविशेषकथनं । १७, पवित्रधारणं । १८, पवित्ररक्षाकरणं । १९, दमनारोपणविधिः । २०, पत्रलिखनप्रकारादि ॥

द्वितीयशेषः खण्डितः । अत्र ६५ पटला लभ्यन्ते, तत्र, १ प्रथमे, तन्त्रादिग्रन्थनामतत्श्लोकसङ्ख्याषोडशमहाविद्यासाधनप्रकाराद्युक्तिः । २, साधकस्य तन्त्रोक्तविधिना संस्कारविशेषकथनादि । ३, शाक्ताम्नायादिकथनं । ४, कालीमन्त्रतत्साधनायुक्तिः । ५, यक्षिणीगन्धर्वादिसमूहकथनं । ६, महाविद्यासिद्धिप्रकारादि । ७, कुशमुण्डाद्यासनकथनादि । ८, वीरसिद्धेश्वरीसाधनप्रकारादि । ९, भूतशुद्धिनिरूपणादि । १०—१९, कवचपुरश्चर्याकौलतीर्थसिद्धपीठ-

विषयः। पीठशक्तितत्पूजाप्रकारादिनटीकापालिकीवेश्यादिशक्तितल्लक्षणतत्साधनप्रकारादि-कथनं । २०, नवरात्रनिर्णयदेवीपूजाप्रकारादि । २१—२३, चन्द्रसूर्य्यग्रहणे मन्त्रजपादिप्रकारादिकथनम्। २४, कालिकादिदशमहाविद्यासाधनप्रकारभेदादिकथनम् । २५, महाचीनाभिधशक्तिसाधनक्रमविशेषकथनं । २६, गन्धर्वक्रमाख्यशक्तिसाधनक्रमविशेषकथनं । २७, वगलाभिधशक्तिसाधनक्रमविशेषकथनं । २८, महाराजाभिधशक्तिसाधनक्रमविशेषकथनं । २९, भुवनेश्वरीसाधनक्रमनिर्देशः। ३०, कमलासाधनक्रमविशेषः। ३१ धूमावतीसाधनक्रमः। ३२, ब्रह्ममार्गाभिधसाधनक्रमः। ३३, भुवनेश्वर्य्यादिमन्त्रजपार्थं मालानिर्माणद्रव्यविशेषादिकथनं । ३४, नीलाभिधदेवतासाधनक्रमाद्युक्तिः। ३५, ब्राह्म्यादिमुद्रातत्त्वादिकथनादि। ३६, पानभेदकथनादि । ३७, स्त्रीसाधनप्रकारादि। ३८, निशायोगे कालीपूजाप्रकारादि । ३९, स्त्रीपूजनमद्यपानादिप्रकारकथनं । ४०, मञ्जुघोषसाधनं। ४१, मुण्डासनसाधनादि। ४२, मालाग्रथननिर्णयादि । ४३, देवीस्वरूपभवनप्रकारादि । ४४, विद्यासिद्धिनिर्णयादि । ४५, सुन्दरीदेवीसाधनक्रमः ४६, भवननिर्णयादिकथनं । ४७, मन्त्रत्यागदोषादिकथनं । ४८, यन्त्रविशेषे देवीपूजनादि । ४९, दिग्गजासननिरूपणादि । ५०, आसनारोहणपूर्वकदेवीविशेषमन्त्रजपः। ५१, सौभाग्यप्रदयन्त्रलेखनधारणादिप्रकारः। ५२, यन्त्रलेखनाद्युक्तिविशेषफलादि । ५३, भूमौ यन्त्रलेखनप्रकारादि। ५४, मालाविशेषजपसिद्धिदिननियमकथनादि । ५५, रजतस्वर्णाङ्गुरीयपवित्रादिधारणनियमः। ५६, नानाविधद्रव्यजातमालाकथनं । ५७, उक्तमालाफलकीर्त्तनं । ५८, स्त्रीदीक्षादिविनिर्णयः। ५९, कालीरहस्यवर्णनं । ६०, आसनविशेषे जपप्रकारादि । ६१, बालिकापूजनप्रकारादि । ६२, ब्रह्मराजाभिधयोगकथनादि । ६३, रहसि कुमारीपूजनादि । ६४, भग्नयन्त्रप्रायश्चित्तादि । ६५, महायन्त्रसंस्कारकथनं ॥

तृतीयस्यादिः खण्डितः। २० पटले खण्डसमाप्तिर्दृश्यते। तत्र, ४—१०, मन्त्रप्रस्तार-मन्त्रपारायण-मन्त्रन्यास नानाविधस्नान-सन्ध्यामन्त्रजप-तदङ्गहोम-पूज्यपूजकक्रमाप्रशाद्यादिदिङ्निर्णय-देशव्यवस्था-परस्त्रीपूजनस्वरूपानन्दयोगकथनादि। ११, धूमकेतूदयादिमहोत्पाताश्वपत्यादिदेशसिद्धविशेषजीवन्यासविनिर्णयपुरश्चरणभेदभूतप्रेतादिनिग्रहकथनादि। १२, षट्चक्रगतदेवध्यानतत्फलकालीमन्त्रकथनादि । १३, कपालिनीमन्त्रसिद्धिप्रकारकथनादि । १४, कुरुकुल्लानाम्नीकालीविरोधिन्यादिसाधनविधानकथनादि । १५, विप्रचित्तोग्रनित्यासाधनादि । १६, दीप्तनित्यामहानीलसरस्वतीसाधनप्रकारादि । १७, मुद्रानित्यामात्रानित्यामन्त्रार्चनादिकथनं । १८, तिरस्कारिणिकामन्त्रार्चनकथनादि । १९, सम्पत्सरस्वतीमन्त्रार्चनकथनादि । २०, शत्रुनिग्रहविद्याकथनादि ॥

विषयः। चतुर्थ एकादशपटलास्तत्र, १प्रथमे, दशमहाविद्यामन्त्रादिकथनं । २, अङ्गवङ्गादिकतिपयदेशनामोल्लेख-तन्त्रविशेषाम्नायक्रम-विद्याविशेषसाधनादिप्रकारः । ३, जपविशेषादिप्रकारः । ४, मार्गभेदेन विद्याविशेषसाधनभेदकथनादि । ५, शक्तिपूजार्हपुष्पविशेष-देशभेदाम्नायभेद-विद्याविशेषोत्पत्तिकथनादि । ६, बगलाश्रीकृष्णाद्यवतारादिकथनं । ७, आम्नायभेदेन विद्याभेदकथनादि । ८, ईश्वरतत्त्वत्रयभेदनिरूपणादि । ९, कालिकायाः सर्वविद्यास्वरूपत्ववर्णनादि । १०, विद्यासाधनमतभेदादिकथनं । ११, खोदीक्षाविधानादि ॥

No. CCCCVI.

Kámarúpayátrá Paddhati. Guide to pilgrimage to Kámarúpa or Assam. The work is divided into ten chapters, and contains notices of the different sacred places in that district, as also directions for worshipping the images of Kámákhyá &c.—By Holiráma S'armá. The work was printed for private circulation 38 years ago.

४०६। कामरूपयात्रापद्धतिः।

ग्रन्थकारः हलिरामशर्म्मा ।

विवरणं। परिशुद्धं मुद्रितञ्च । प० ८९ । पङ्क्ति० ७। श्लो० १०८० । अ० वङ्गीयं । आ० तुलटकागजः । का० शकाब्दाः १७५५ । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं। श्रीनीलशैलस्थितनीलवर्णं सकामनिष्कामदपूर्वकर्णम् ।
अजं गजेन्द्रास्यसुदश्यवेशं सेवेऽनिशं विघ्नहरं गणेशम् ॥
नमो भवगुहामध्यवासिनीं कामरूपिणीम् ।
वन्दे कामेशहृदिनीं कामाख्यां कामदायिनीम् ॥

समाप्तिवा०। भवानीहृदयानन्दवर्द्धनं भवभञ्जनम् ।
भक्तान्तरायहरणं भजे श्रीमद्गजाननम् ॥
इति श्रीकामरूपयात्रापद्धत्यां कामाख्यादिपञ्चमूर्त्तिपूजाविधिर्नाम दशमः पटलः समाप्तः ।
प्रणम्य लक्ष्मीपतिपादपङ्कजं प्रयत्नतः श्रीहलिरामशर्मणा ।
विनिर्मितेयं किल कामरूपप्रयाणबोधार्थकरी सुपद्धतिः ॥
निदेशतस्तस्य दयार्द्रचेतसः श्रिया भवानीचरणे धरामरः ।
अमुद्रयचन्द्रिकयेति पद्धतिं हिताय तत्तीर्थगणाभिगामिनाम् ॥

विषयः। अत्र दशपटलाः, तत्र प्रथमे पटले कामरूपशब्दव्युत्पत्ति-कामाख्यापञ्चदेवीमूर्त्तिपूजामाहात्म्य-यात्रिककर्त्तव्य-कामाख्यापूजन-कालविशेष-मणिकूटतीर्थयात्रामाहात्म्य-कामरूपक्षेत्रमाहात्म्यादिवर्णनं। २तीये, अश्वक्रान्ततीर्थादियात्राविधिः। ३तीये, मणिकर्णिकेश्वरादियात्रा। ४र्थे, पाण्डुनाथपर्वतगमनादिवर्णनं। ५मे—६ष्ठे, कामाख्यायात्रापूजनादिवर्णनं। ७मे, हयग्रीवविष्णुयात्रापूजाविध्यादिकथनं। ८मे, दिक्पालादियात्राकथनं। ९मे, यात्रासङ्क्षेपकथनं। १०मे, कामाख्यादिपञ्चदेवीमूर्त्तिपूजाकथनं॥

No. CCCCVII.

Nigama-tattvasára. Directions for secret worship of the Deví for the attainment of perfection in S'ákta mantras.

४०७। निगमतत्त्वसारः।

ग्रन्थकारः———?

विवरणं। अशुद्धं खण्डितञ्च। प० ४। पङ्क्ति० ९—१४। श्लो० १२५। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। प्रथमपत्रं नास्त्यतो नात्र प्रारम्भवाक्यलिपिः।

समाप्तिवा०। खयोषिद्रूपमाश्रित्य छायायां मण्डपालये।
मां सम्पश्यति साधकेन्द्रः सर्वथैव कुलेश्वर॥
इति निगमतत्त्वसारे गुप्ततत्त्वविधाने तृतीयः पटलः॥

विषयः। मन्त्रस्तोत्रादिसाधनेन सिद्धिप्राप्तिकथनं॥

No. CCCCVIII.

Brahmajnána-mahátantrarája. On Brahma, the cause of the evolution and absorption of the universe, and on knowledge thereof—a Tantric modification of the Vedanta doctrine.

४०८। ब्रह्मज्ञानमहातन्त्रराजम्।

ग्रन्थकारः———?

विवरणं। अपरिशोधितम। प० १७। पङ्क्ति० ११। श्लो० २४०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा॰ वाक्यं। कैलासशिखरासीनं देवदेवं जगद्गुरुम्।
पृच्छत्येवमुमादेवी ब्रह्मज्ञानं महेश्वरम्॥
कुतः सृष्टिर्भवेद्देव कुतः सृष्टिर्विनश्यति।
ब्रह्मज्ञानं कथं देव सृष्टिसंहारवर्ज्जितम्॥

समाप्तिवा॰। नादोपरिमहादेव शक्तियुक्तं निरञ्जनम।
ध्यायेन्मूर्द्ध्नि शिवज्योतिस्तत्त्वं स्फटिकसन्निभम्॥
इति श्रीपार्वतीशिवसंवादे ब्रह्मज्ञानमहातन्त्रराजं सम्पूर्णम्॥

विषयः। तान्त्रिकक्रमेण ब्रह्मविद्याकथनम्॥

No. CCCCIX.

Kálisahasranáma-stotra. A hymn to Kálí in which a thousand epithets are worked out into verses. This is an extract from the *Káliká-kula-sarvasva.*

४०९। कालीसहस्रनामस्तोत्रं।

ग्रन्थकारः——?

विवरणं। प्राचीनमपरिशुद्धञ्च। प॰ ५। पङ्क्ति॰ ६—८। स्लो॰ १००। अ॰ वङ्गीयं। आ॰ तुलटकागजः। का॰—?। स्था॰ भारतवर्षीयगवर्णमेण्टः।

प्रा॰ वाक्यं। अथ कालीसहस्रनामस्तोत्रम्। तदुक्तं कालिकाकुलसर्व्वस्वे। श्रीभैरव उवाच।
एतस्मिन्नेव काले तु भृगुरामस्य पार्वति।
कार्त्तवीर्य्यसुताः सर्वे चिच्छिदुः पितरं क्षणात्॥

समाप्तिवा॰। अन्ते खण्डितत्वात् समाप्तिवाक्यं नोद्धृतम्।

विषयः। क्षत्रियान्तकरणाय परशुरामं प्रति शिवकर्तृककालीसहस्रनामोपदेशः।

No. CCCCX.

S'ríguru-sahasranáma-stotra. Praise of the Guru or spiritual guide in a thousand epithets worked out into verses. This is an extract from the *Sanmohana Tantra.*

४१०। श्रीगुरुसहस्रनामस्तोत्रम्।

ग्रन्थकारः——?।

विवरणं। प्राचीनमपरिशुद्धञ्च। प॰ ८। पङ्क्ति॰ ९। स्लो॰ २४०। अ॰ वङ्गीयं। आ॰ तुलटकागजः। का॰—?। स्था॰ भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। सूत उवाच। कैलासशिखरासीनं चन्द्रखण्डविराजितं।

पप्रच्छ विनयाद् भक्त्या गौरी नत्वा वृषध्वजम्॥

समाप्तिवा०। यत्र गृहे सहस्रञ्च नाम्नस्तिष्ठति पूजनम्।

श्रीगुरोः कृपया शिष्यो ब्रह्मसायुज्यमाप्नुयात्॥

इति सम्मोहनतन्त्रे शिवपार्वतीसंवादे श्रीगुरुसहस्रनामस्तोत्रं समाप्तम्॥

शिषयः। पार्वतीं प्रति शिवकर्तृकः श्रीगुरुसहस्रनामस्तोत्रोपदेशः॥

No. CCCCXI.

Brahmajnána Tantra. Identification of the universe in the human body as a means of acquiring a knowledge of Brahma with a view to salvation—a Tantric modification of the Yoga doctrine.

४११। ब्रह्मज्ञानतन्त्रम्।

ग्रन्थकारः——?

विवरणं। नवीनमपरिशुद्धञ्च। प० ५। पङ्क्ति० ८। श्लो० १२०। अ० वङ्गीयं। आ० तुलटकागजः। का० शकाब्दाः १७२९। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। श्रीदेव्युवाच। पृथिव्यापस्तथा तेजो वायुराकाशमेव च।

पञ्चतत्त्वं कुतः सृष्टिः पुनः कुत्र विलीयते॥

समाप्तिवा०। काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुपूजनम्।

ब्रह्मज्ञानसमो धर्म्मो नान्यो धर्म्मो विधीयते॥

इत्युमामहेश्वरसंवादे खदेहे ब्रह्मज्ञानम्।

विषयः। शारीरिकपदार्थेषु चन्द्रसूर्य्यादिवाह्यपदार्थभावनादिना ज्ञानोत्पादनप्रकारः।

No. CCCCXII.

Nádíjnána-dípiká alias *Antarayoga.* An extract from the *Goraksha Sañhitá* on the details of performing the Yoga.

४१२। नाडीज्ञानदीपिका वा अन्तरयोगः।

ग्रन्थकारः——?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० २। पङ्क्ति० ९। श्लो० ७०। अ० वङ्गीयं। आ० तुलटकागजः। का० शकाब्दाः १७२९। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा॰ वाक्यं। अथ गोरक्षसंहितायां नाडीज्ञानदीपिकेयम्। श्रीगौतम उवाच॥
देवर्षे योगयुक्तात्मन् योगानुभवदर्शक।
साङ्ख्ययोगविशेषज्ञ कर्म्मयोगनिषेवक॥

समाप्तिवा॰। ततः सिद्धमनो मन्त्री जपहोमं समभ्यसेत्।
ततः परं न किञ्चिच्च कृत्यमस्ति मुने हरेः॥
इति श्रीनारदगौतमसंवादे अन्तरयोगः॥

विषयः। योगसाधनोपायः॥

No. CCCCXIII.

Dolárohana Paddhati. A manual for the performance of the *Dola* ceremony; when the image of Jagannátha at Puri is placed in a swing, and a red powder, called holi, is sprinkled on the image and on the worshippers. By Vidyánivása.

४१३। दोलारोहणपद्धतिः।

ग्रन्थकारः विद्यानिवासः।

विवरणं। प्राचीनमपरिशुद्धञ्च। प॰ २०। पङ्क्ति॰ ६। श्लो॰ ५००। अ॰ वङ्गीयं। आ॰ देशीयकागजः। का॰—?। स्था॰ भारतवर्षीयगवर्णमेण्टः।

प्रा॰ वाक्यं। ब्रह्मास्वादसहोदरनिर्भरमधुरीभाजे विद्यानिवासस्तनुते याचाकर्म्माणि स भूतभर्त्तुः ?। कोत्र विधिनिषेधो नीलमणिर्यथा ?।

समाप्तिवा॰। तदधः सप्तवारान् गोविन्दं भ्रामयित्वा अवतार्य्य उदीच्यां शाय्यायनहोमादिवामदेव्यगान्त्यन्तं कर्म्म समाप्य कर्म्म कारयित्वा ब्राह्मणाय दक्षिणां दत्वाऽच्छिद्रावधारणं कुर्य्यात्। इति दोलारोहणपद्धतिः समाप्ता॥

विषयः। श्रीजगन्नाथदेवस्य वार्षिकयात्रोत्सववर्णनम्॥

No. CCCCXIV.

Vrihaddharma Purána. An upa-Purána in which Vyása, in reply to Jávála, relates a number of stories inculcating filial and other moral duties.

४१४ । वृहद्धर्म्मपुराणम् ।

ग्रन्थकारः———?

विवरणं। प्रायः शुद्धं प्राचीनं सूक्ष्मारर्लिखितञ्च। प० १५। पङ्क्ति० ७। श्लो० ६००। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० आसियाटिक् सोसाइटी।

प्रा० वाक्यं। ॐ भूर्भुवः स्वरिति तत्सवितुर्वरेण्यं भर्गो निसर्गविमलं परमस्य पुंसः। देवस्य धीमहि धियोऽधिगतं वयं यो यत्नान्न ईहितमतींलु प्रचोदयादोम्॥

समाप्तिवा०। खण्डितत्वात् समाप्तिवाक्यं न लब्धम्।

विषयः। अत्राष्टावध्यायाः। जावालिव्यासंवादच्छलेन पितृमातृभक्ततुलाधारोपाख्यानादि-विविधधर्म्मकथानिरूपणम्।

No. CCCCXV.

Práyas'chitta-viveka. A treatise on Expiations, of paramount authority in Bengal, and cited as of authority in all the modern digests, including those of Raghunandana. By Súlapáṇí Bhaṭṭa. No. 1109 India H. L.

४१५। प्रायश्चित्तविवेकः।

ग्रन्थकारः शूलपाणिभट्टः।

विवरणं। प्रायः परिशोधितं प्राचीनञ्च। प० १५६। पङ्क्ति० ७—८। श्लो० ४०००। अ० वङ्गीयं। आ०। तुलटकागजः। का० शकाब्दाः १७२७। स्था० आसियाटिक् सोसाइटी।

प्रा० वाक्यं। नित्यश्रुत्युदितस्वधर्म्मचरणानुध्यानहीनात्मनां,
तत्तद्वेदनिषिद्धकर्म्मनिचयानुष्ठाननिष्ठावताम्।
लोकानां कलिकालरूढकलुषध्वंसानुमेयोऽधुना,
प्रायश्चित्तविवेकमत्र विदधे श्रीशूलपाणिः सुधीः॥

समाप्तिवा०। तेनैकपञ्चाभोजनं सार्द्धसप्तप्राजापत्यतुल्यं। अतः पञ्चाभोजने सार्द्धसप्तधेनवो देयाः। इति धेनुसङ्कल्पनम्।

इति साडुडियानमहामहोपाध्यायश्रीशूलपाणिभट्टविरचितः प्रायश्चित्तविवेकः समाप्तः॥

विषयः। महापातकादिनानाविधपातकप्रायश्चित्तकथनम्॥

No. CCCCXVI.

Káli-stavarája. A hymn to Kálí, an extract from Kálíhṛidaya Tantra.

४१६ । कालीस्तवराजः ।

ग्रन्थकारः——?

विवरणं। नवीनमनतिशुद्धञ्च । प० २ । पङ्क्ति० ६—७ । श्लो० २६ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं। अथ कालीहृदयोक्तकालीस्तोत्रम्। कालभैरव उवाच ।

स्तवराजं शृणु राम कालिकाया मनोहरम्।

यस्याः स्मरणमात्रेण कालिका सुप्रसीदति ॥

समाप्तिवा०। शृणु वत्स प्रयत्नेन स्तवमेनं प्रदर्शयेत्।

प्रमादाद्दर्शयेद्वापि सर्वसिद्धिर्भवेन्नहि ॥

इति कालीहृदये कालभैरवपरशुरामसंवादे श्रीकालीस्तवराजः समाप्तः ।

विषयः। कालिकायाः स्तुतिः ।

No. CCCCXVII.

Syámá-stotra. A hymn to Syámá, by Mahákála—said to be an extract from the Vira Tantra, but No. 229 does not contain it. No. 268 contains the 15th chapter of the work.

४१७ । श्यामास्तोत्रम् ।

ग्रन्थकारः महाकालः ।

विवरणं। प्राचीनमनतिशुद्धञ्च । प० ३ । पङ्क्ति० ६—७ । श्लो० ५४ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं। अथ वीरतन्त्रोक्तस्तोत्रान्तरम्। श्रीकालभैरव उवाच ।

कर्पूरं मध्यमान्त्यस्वरपररहितं सेन्दुवामाक्षियुक्तं

वीजं ते मातरेतत् त्रिपुरहरवधु त्रिःकृतं ये जपन्ति ।

तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसत्येव वाचः

स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ॥

समाप्तिवा०। इति ते कथितं स्तोत्रं सर्वसिद्धिप्रवर्त्तकं ।
एतज् ज्ञात्वा दक्षिणायाः स्तवं जानाति नान्यथा ॥
इति वीरतन्त्रे महाकालविरचितं श्यामास्तोत्रं समाप्तम् ।
विषयः। दक्षिणकालिकायाः स्तुतिः ।

No. CCCCXVIII.

Yatibhushaṇí. Directions for the ordination of a Yati or professed hermit. By Rámánanda Tírtha. The MS contains the first chapter only.

४१८ । यतिभूषणी ।

ग्रन्थकारः रामानन्दतीर्थः ।
विवरणं। प्राचीनमपरिशोधितञ्च । प० १० । पङ्क्ति० ७ । श्लो० १७० । अ० वङ्गीयं। आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।
प्रा० वाक्यं। अथ यतिधर्म्मः । सशाखोपनिषद्गीतं विष्णोर्नामसहस्रकम् ।
श्रीरौद्रं पौरुषं सूक्तं नित्यमावर्त्तयेद्यतिः ॥
समाप्तिवा०। द्वादशाहमनध्यायं शिष्यः कुर्य्यात्समाहितः ॥
आतुरसन्न्यासी शिखो चेत् त्रिदण्डीवत् क्रियाः कार्य्याः ।
इति रामानन्दतीर्थकृतायां यतिभूषण्यां प्रथमः परिच्छेदः ॥
विषयः। सन्न्यासाश्रमग्रहणविधिः ।

No. CCCCXIX.

Dars'anakaliká. Definitions of the principal technical terms of the different schools of Indian Philosophy. By Rámánanda Tírtha, author of the *Vrihat-tantrasára, Jnána-vaibhara Tantra, and Kundatattra-prakás'a,* and of glosses on the *Chakra, Mohamudgara, Mahimnastava, Vedántasára, Rámatatva-prakás'a, and Adhyátmarámáyaṇa.*

४१९ । दर्शनकलिका ।

ग्रन्थकारः। रामानन्दतीर्थः ।
विवरणं। प्राचीनमपरिशोधितञ्च । प० ५ । पङ्क्ति० ८ । श्लो० ८० । अ० वङ्गीयं। आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा॰ वाक्यं। परात्मानं रामं भुवनजननीं भूमितनयां
भजे शेषं देवं निखिलशरणं लक्ष्मणमपि।
कृपापारावारं भरतमनुजं शत्रुदमनं
महावज्रं देवं करुणहृदयं वायुतनयं॥

समाप्तिवा॰। रामदासः शक्तिवादः श्रीमद्भागवताश्रयः।
रामानन्दयतेरेते ग्रन्थाः सारार्थवाचकाः॥
इति श्रीरामानन्दतीर्थकृता दर्शनकलिका समाप्ता।

विषयः। प्रकृतिपुरुषजीवमुक्त्यादिदार्शनिकपारिभाषिकशब्दनिरूपणम्।

No. CCCCXX.

Sis'u-bodhiní. An elementary treatise on judicial astrology, eclipses, planets, constellations, &c. By S'iva Chakravartí.

४२० । शिशुबोधिनी ।

ग्रन्थकारः शिवचक्रवर्त्ती।

विवरणं। प्राचीनमपरिशोधितञ्च। प॰ ६९। पङ्क्ति॰ ४। श्लो॰ ७००। अ॰ वङ्गीयं। आ॰ तालपत्रं। का॰ शकाब्दाः १५७९। स्था॰ भारतवर्षीयगवर्णमेण्टः।

प्रा॰ वाक्यं। प्रथमपत्रस्य खण्डितत्वात् प्रारम्भवाक्यं न लिखितं।

समाप्तिवा॰। नवाश्ववाणचन्द्रे च शाके हि शिवशर्म्मणा।
बालानामाशुबोधेन क्रियते शिशुबोधिनी॥
इति वन्द्यघटीयशिवचक्रवर्त्तिविरचिता शिशुबोधिनी समाप्ता॥

विषयः। ग्रहनक्षत्रमुहूर्त्तादिशुभाशुभविचारः।

No. CCCCXXI.

Bhagavad-bhakti-viläsa. Directions for the observance of a fast on the eleventh day of the moon, in honor of Vishṇu. By Gopála Bhaṭṭa.

४२१ । भगवद्भक्तिविलासः, सटीकः ।

ग्रन्थकारः गोपालभट्टः।

विवरणं। प्रायः शुद्धम्। प॰ ४१। पङ्क्ति॰ त्रिवलीकृतं १०—१२। श्लो॰ मूलस्य १०२५। टीकायाः ७२५। अ॰ वङ्गीयं। आ॰ तुलटकागजः। का॰—?। स्था॰ भारतवर्षीयगवर्णमेण्टः।

मूलप्रा० वाक्यं। नमो भगवते तस्मै यस्य प्रियतमा तिथिः।
एकादशी द्वादशी च सर्वाभीष्टप्रदा नृणाम्॥

टीकाप्रा०। श्रीचैतन्यप्रभुं वन्दे यदाश्रयरसाप्लुतः।
वाञ्छातीतं फलत्येव मनोरथमहीरुहः॥

मूलसमाप्तिवा०। अन्येऽपि द्वादशीभेदा बहवः सन्ति विश्रुताः।
अग्रतो लेखनीयास्ते तत्तन्मासप्रसङ्गतः॥
इति श्रीगोपालभट्टविलिखिते भगवद्भक्तिविलासे विष्णुव्रतोत्सवो नाम त्रयोदशविलासः॥

टीकासमाप्ति०। अन्येऽपि मात्स्यादिद्वादश्यो निर्जलाद्याश्च॥ १३॥ इति त्रयोदशः॥

विषयः। एकादशीनिर्णयतद्व्रतविष्णुपूजादिकथनं।

No. CCCCXXII.

Bhaktiratnávalí sakántimálá. A commentary on passages of the Bhágavata Purána, inculcating faith in Krishna. By Vishnu Purí.

४२२। श्रीभक्तिरत्नावली, सकान्तिमाला।

ग्रन्थकारः श्रीविष्णुपुरी।

विवरणं। परिशुद्धं चारुलिखितञ्च। प० १०४। पङ्क्ति० ७। श्लो० २०८६। अ० वङ्गीयं। आ० तुलटकागजः। का० शकाब्दाः १६४०। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। ये मुक्तावपि निस्पृहाप्रतिपदप्रोन्मीलदानन्ददां,
यामास्थाय समस्तमस्तकमणिं कुर्वन्ति यं स्वे वशे।
तान् भक्तानपि ताञ्च भक्तिमपि तं भक्तप्रियं श्रीहरिं,
वन्दे सन्ततमर्थयेऽनुदिवसं नित्यं शरणं भजे॥

समाप्तिवा०। इत्येषा बहुयत्नतः खलु कृता श्रीभक्तिरत्नावली,
तत्प्रीत्यैव तथैव सम्प्रकटिता तत्कान्तिमाला मया।
अत्र श्रीधरसत्तमोक्तिनिखिले न्यूनाधिकं यत्त्वभूत्,
तत् क्षन्तुं सुधियोऽर्हथ स्वरचनालुब्धस्य मे चापलम्॥
इति श्रीपुरुषोत्तमचरणारविन्दकृपामकरन्दबिन्दुप्रोन्मीलितविवेकतेव(?)भक्तपरमहंसश्रीविष्णुपुरीग्रथितायां श्रीमद्भागवताब्धिलब्धश्रीभक्तिरत्नावली सकान्तिमाला समाप्ता॥

विषयः। अत्र त्रयोदशविवेचनानि सन्ति। तत्र भगवद्भक्तभक्तिलक्षणादिनिरूपणम्॥

No. CCCCXXIII.

Harinámámṛita. A Sanskrit grammar, in which all the examples allude to Hari. By Jíva Gos'vámí.

४२३ । हरिनामामृतम् ।

ग्रन्थकारः जीवगोस्वामी ।

विवरणं। परिशोधितं चारु लिखितञ्च। प० ३१। पङ्क्ति० ७। स्लो० ५८१। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। य एकः सर्वरूपाणां सर्वनाम्नां तथाश्रयः।
तस्य विष्णोः पदं सर्वं विष्णुभक्त्या निरूप्यते॥

समाप्तिवा०। सान्तक्रत्। कृत्वा कर्त्तुङ्कारं कारमित्यादि च। महाहरत्वादौ तु पाण्डवेषु न। अहो इत्यादि ज्ञेयम्॥ इति श्रीहरिनामामृताख्ये वैष्णवव्याकरणे नामविष्णुपद-प्रकरणं द्वितीयम्॥

विषयः। हरिनामादिसङ्केतवल्लक्षणादिभिः सन्धिसुवन्तादिपदसाधनम्॥

No. CCCCXXIV.

Isána-sañhitá. The preeminence of Vaishṇavas, and their duties, an extract from the Kulárṇava Tantra.

४२४ । ईशानसंहिता ।

ग्रन्थकारः———?

विवरणं। प्रायः परिशुद्धं चारु लिखितञ्च। प० ९। पङ्क्ति० ५। स्लो० १८१। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। गौतम उवाच। देवर्षे सर्वधर्मज्ञ सर्वदर्शिन् दयानिधे।
वैष्णवाचारधर्म्माश्च योगधर्म्मास्तथा गुरो॥

समाप्तिवा०। अनिशं हृदि सञ्चिन्त्य करुणाम्बुनिधिं विभुम्।
विमुक्ता यान्ति ते मर्त्यास्तद्विष्णोः पदमव्ययम्॥
इति नारदगौतमसंवादे कुलार्णवीयगुप्ताम्नाये ईशानसंहिता समाप्ता॥

विषयः। वैष्णवधर्म्मनिरूपणम्॥

No. CCCCXXV.

Mátriká-kosha. On the meaning of letters as employed in the formation of mystic mantras.

४२५ । मातृकाकोषः ।

ग्रन्थकारः———?

विवरणं। प्रायः परिशुद्धम्। प० ९। पङ्क्ति० १०। श्लो० २००। अ० वङ्गीयं। आ० तुलटकागजः। का० शकाब्दाः १७२७। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। उद्यत्प्रद्योतनप्रख्यमतर्क्यगुणवैभवम्।
सम्बेरमास्यमम्बाया ह्यङ्कस्थं नौमि भूतये॥
श्रीमच्चतुर्भुजाचार्य्यचरणाम्बुरुहद्वयम्।
नत्वा सङ्क्षेपतो वक्ष्ये मातृकाकोषमद्भुतम्॥

समाप्तिवा०। अयन्तु मातृकाकोषः सर्वकोषोत्तमोत्तमः।
धारणादस्य मन्त्राणां भवेदुद्धरणे क्षमः॥ इति मातृकाकोषः समाप्तः॥

विषयः। अकाराद्यक्षराणां मान्त्रिकपर्य्यायकथनम्॥

No. CCCCXXVI.

Madana-párijáta. The duties of the different orders of people; a Smriti compilation of great authority in the North Western Provinces. By Vis'ves'vara Bhatta.

४२६ । मदनपारिजातम्।

ग्रन्थकारः श्रीविश्वेश्वरभट्टः।

विवरणं। प्रायः परिशुद्धम्। प० ८१। पङ्क्ति० ७। श्लो० १९१२। अ० नागरं। आ० देशीयकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। प्रबालाद्रिप्रस्थद्युतिनिचयपर्य्यायवपुषे,
नमो विघ्नश्रेणीविघटनवरिष्ठाय महसे।
जगत्प्रादुर्भावस्थितिलयनिरासाय रचना-
विनोदासक्ताय प्रणतफलसिद्धिप्रतिभुवे॥

समाप्तिवा०। खण्डितत्वात्समाप्तिवाक्यं नास्ति॥

विषयः। अत्र नवस्तवकाः सन्ति। तेषु ब्रह्मचर्य्यगृहस्थाश्रमाह्निकगर्भाधानादिसंस्काराशौच-द्रव्यशुद्धिश्राद्धविभागप्रायश्चित्ताभिधानां नवपदार्थानां क्रमेण निर्णयकथनम्॥

No. CCCCXXVII.

S'ánti-s'ataka. A collection of miscellaneous stanzas, inculcating dispassion, or renunciation of attachment to worldly objects.

४२७ । शान्तिशतकम् ।

ग्रन्थकारः———?

विवरणं। प्रायः परिशुद्धं। प० १२। पङ्क्ति० ६। श्लो० २६४। अ० वङ्गीयं। आ० तुलटकागजः। का० शकाब्दाः १७५। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। नमस्यामो देवान्ननु हतधियस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्म्मैकफलदः।
फलं कर्म्मायत्तं किममरगणैः किञ्च विधिना
नमस्तत्कर्म्मभ्यो विधिरपि न येभ्यः प्रभवति॥

समाप्तिवा०। मयि बोधाम्बुधौ स्वच्छे तुच्छोऽयं विश्वबुद्बुदः।
विलीनतडितो वेति विकल्पपटलः कुतः॥ इति शान्तिशतके चतुर्दशः परिच्छेदः।

विषयः। सांसारिकमोहनिवर्त्तकसदुपदेशवाक्योक्तिः।

No. CCCCXXVIII.

Shaṭ-chakra-bheda-ṭippaní. A commentary on the *Shaṭ-chakra-bheda*—a Yoga treatise. By S'añkara A'chárya, a native of Bengal and author of several Tántric compilations.

४२८ । षट्चक्रभेदटिप्पनी ।

ग्रन्थकारः श्रीशङ्करः।

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च । प० १० । पङ्क्ति० ८—११ । श्लो० ३३० । अ० वङ्गीयं आ० तुलटकागजः। का०——?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। प्रणम्य शैलाधिपकन्यकायाः पादाब्जमब्जासहि (?) विष्णुपूज्यम्।
प्रतन्यते श्रीयुतशङ्करेण षट्चक्रटीकाख्यसुपुस्तिकेयम्॥

समाप्तिवा० सन्ध्ययोरधीते दिवा स्वीयभावावस्थितः सन् तस्यावश्यमेव अभीष्टमन्तर्मनो यस्य स तथेति। इति षट्चक्रभेदटिप्पनी समाप्ता॥

विषयः। शरीरस्थमूलाधारादिषट्चक्रतदधिष्ठातृदेवतादिनिरूपकग्रन्थार्थविशदीकरणं॥

No. CCCCXXIX.

Shaṭ-chakra-vivṛiti-ṭíká. A gloss on a commentary on the Shaṭ-chakra-bheda. By Vis'vanátha, son of Vámadeva, and grandson of Náráyaṇa Bhaṭṭácháryа.

४२९ । षट्चक्रविवृतिटीका ।

ग्रन्थकारः श्रीविश्वनाथः ।

विवरणं । प्रायः परिशुद्धं प्राचीनञ्च । प० १८ । पङ्क्ति० ९ । श्लो० ४६८ । अ० वङ्गीयं । आ० तुलटकागजः । का० शकाब्दाः १७२७ । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । टीका श्रीविश्वनाथेन नत्वा सन्तन्यतेऽम्बिकाम् ।
कैवल्यकलिकातन्त्रद्वितीयपटलस्य च ॥

समाप्तिवा० । नारायणो वैदिकस्य भट्टाचार्य्यः समीरितः ।
तस्यात्मजो वामदेवभट्टाचार्य्यस्तथैव च ॥
तस्यात्मजो विश्वनाथस्तेनेयं रचिता मुदा । इति षट्चक्रविवृतिटीकेयं ॥

विषयः । शरीरस्थस्वाधिष्ठानादिषट्चक्रविवरणादि ।

No. CCCCXXX.

Sráddhavidhi. A manual for the performance of the *Sráddha* or offering of the funeral cake to the manes, with a preliminary dissertation, on the meaning of that word and the nature of the ceremony. By Váchaspati Mis'ra.

४३० । श्राद्धविधिः ।

ग्रन्थकारः वाचस्पतिमिश्रः ।

विवरणं । अपरिशुद्धं प्राचीनञ्च । प० ५६ । पङ्क्ति०६ । श्लो० १७०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थश्रीयुतनिमाइ-चन्द्रशिरोमणिः ।

प्रा० वाक्यं । प्रणम्य परमात्मानं विचार्य्याचार्य्यसंहिताः ।
श्रीवाचस्पतिमिश्रेण श्राद्धस्य विधिरुच्यते । अथ श्राद्धस्वरूपं । तत्रापस्तम्बः । अथ एतत् मनुः । श्राद्धशब्दं कर्म्म प्रोवाच प्रजानिःश्रेयसार्थं तत्र पितरो देवता ब्राह्मणस्त्वाहवनीयार्थे मासि मास्यपरपक्षस्यापराह्णः श्रेयान् । श्राद्धशब्दं श्राद्धनामकं कर्म्म तत्र श्राद्धे पितरो देवता मन्त्रकरणकहविर्भागित्वेनोद्देश्या ब्राह्मणा इति प्रतिपत्तिभागितया आहवनीयस्थानीयाः तेन पितृदेवताको द्रव्यत्यागो ब्राह्मणस्वीकारान्तस्य श्राद्धं ।

समाप्तिवा० । अविच्छिन्ना श्राद्धसमाप्तिः । इत्यत इतितः ।

विषयः । श्राद्धशब्दार्थविचारः पार्व्वणादिश्राद्धानुष्ठानविधानञ्च ।

No. CCCCXXXI.

Divyachúdámaṇi. Divination with the aid of the letters of the Sanskrit alphabet. By Kerala Ácharya. The work is divided into four parts, of which the 1st treats of terrestrial objects; the 2nd of Nágas or subterranean objects; the 3rd of aerial objects; and the 4th of etherial, or celestial objects.

४३१ । दिव्यचूडामणिः ।

ग्रन्थकारः केरलाचार्य्यः ।

विवरणं । प्रायशः परिशुद्धं प्राचीनञ्च । प० ११ । पङ्क्ति० ६—९ । श्लो० २८६ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । यदुपहितमन्यजन्मनि शुभाशुभं तस्य कर्म्मणः ।
पङ्क्तिं व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ॥
लोकस्य च हितार्थाय दिव्यचूडामणिर्मया ।
वक्ष्येऽत्र विविधानर्थान् शृण्वन्तु स्थिरचेतसः ॥

समाप्तिवा० । प्रथमवर्गे पृथिवी । द्वितीयवर्गे नागः । तृतीयवर्गे वायुः । चतुर्थवर्गयाकाशः । इति श्रीकेरलाचार्य्यविरचितो दिव्यचूडामणिः समाप्तः ।

विषयः । अकाराद्यक्षरक्रमेण धातुजीवादिप्रश्नप्रकारकथनं ॥

No. CCCCXXXII.

Annapúrṇá Upanishad. On the divinity of Annapúrṇá, a form of the goddess Durgá,—an apocryphal Upanishad.

४३२ । अन्नपूर्णोपनिषत् ।

ग्रन्थकारः———?

विवरणं । प्रायः परिशुद्धम् । प० १५ । पङ्क्ति० ७ । श्लो० २५० । अ० नागरं । आ० देशीय-कागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । ॐ भद्रं कर्णेभिरिति शान्तिः । निदाघो नाम योगीन्द्र ऋभुं ब्रह्मविदां वरम् ।
प्रणम्य दण्डवद्भूमावुत्थाय स पुनर्मुनिः ॥
आत्मतत्त्वमनुब्रूहीत्येवं पप्रच्छ सादरम् ।
कयोपासनया ब्रह्मन्नीदृशं प्राप्तवानसि ॥
तां मे ब्रूहि महाविद्यां मोक्षसाम्राज्यदायिनीम् ।

निदाघ त्वं कृतार्थोऽसि शृणु विद्यां सनातनीम् ॥

समाप्तिवा०। अन्नपूर्णोपनिषदं योऽधीते गुर्वनुग्रहात् ।

स जीवन्मुक्ततां प्राप्य ब्रह्मैव भवति स्वयम् ॥ इति पञ्चमोऽध्यायः ॥

इति श्रीमद्दिव्याधिष्ठानपरमहंससद्गुरुश्रीरामचन्द्रार्पणमस्तु ।

श्रीअन्नपूर्णोपनिषत् समाप्ता ॥

विषयः। अत्र निदाघपृष्ट ऋभुः स्वस्मै अन्नपूर्णोपदिष्टां ब्रह्मविद्यां निदाघायोपदिशति ।

No. CCCCXXXIII.

Nirváṇa Upanishad. An Upanishad on Nirváṇa, or final absorption into the Deity.

४३३। निर्वाणोपनिषत् ।

ग्रन्थकारः——?

विवरणं। प्रायः परिशुद्धम्। प० २। पङ्क्ति० ७। श्लो० ५०। अ० नागरं। आ० देशीय-कागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। ॐ वाङ् मे मनसीति शान्तिः। अथ निर्वाणोपनिषदं व्याख्यास्यामः। परम-हंसपरिव्राजकाः पश्चिमलिङ्गा मन्मथक्षेत्रपाला गगनसिद्धान्तममृतकल्लोलनदी-त्यादि ।

समाप्तिवा०। अन्ते ब्रह्माखण्डाकारनित्यं सर्वदेहनाशनमेतं निर्वाणदर्शनं शिष्यं पुत्रं विना न देयमित्युपनिषत्। श्रीमद्दिव्याधिष्ठान० ।

इति निर्वाणोपनिषत् समाप्ता ॥

विषयः। निर्वाणमोक्षविद्योपदेशः।

No. CCCCXXXIV.

Ekákshara Upanishad. On the merits of Om as the emblem of the godhead.

४३४। एकाक्षरोपनिषत् ।

ग्रन्थकारः——?

विवरणं। प्रायः परिशुद्धम्। प० २। पङ्क्ति० ७। श्लो० ४७। अ० नागरं। आ० देशीय-कागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। सहनाववत्विति शान्तिः। एकाक्षरं त्वक्षरतासि सोमे सुषुमणया चेह दृढोन एकः। त्वं विश्वभूर्भूतपतिः पुराणः पर्जन्य एको भुवनस्य गोप्ता ॥

समाप्तिवा०। य एवं नित्यं वेदयते गुहाशयं प्रभुं पुराणं सर्वभूतं हिरण्मयम्। हिरण्मयं बुद्धिमतां परां गतिं स बुद्धिमान् बुद्धिमतीत्य तिष्ठतीत्युपनिषत् ॥

इति एकाक्षरोपनिषत्समाप्ता।

विषयः। एकाक्षरीब्रह्मविद्योपदेशः।

No. CCCCXXXV.

Yájnavalkya Upanishad. An Upanishad in which Yájnavalkya inculcates the preeminence of Sannyása or asceticism.

४३५। याज्ञवल्क्योपनिषत्।

ग्रन्थकारः———?

विवरणं। प्रायः परिशुद्धम्। प० २। पङ्क्ति० ७। स्ला० ७०। अ० नागरं। आ० देशीयकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। ॐ पूर्णमद इति शान्तिः। अथ जनको ह वैदेहो याज्ञवल्क्यमुपसमेत्योवाच भगवन् सन्न्यासमनुब्रूहीति कथं सन्न्यासलक्षणं। सहोवाच याज्ञवल्क्यः।

समाप्तिवा०। यतीनां तदुपादेयः पारमहंस्यं परं पदम्। नातः परतरं किञ्चिद्विद्यते मुनिपुङ्गवेत्युपनिषत् ॥

श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्रार्पणमस्तु।

याज्ञवल्क्योपनिषत्समाप्ता।

विषयः। अत्र जनकपृष्टो याज्ञवल्क्यो जनकाय सन्न्यासलक्षणोपनिषद्विद्यामुपदिशति।

No. CCCCXXXVI.

Akshamáliká Upanishad. On different materials fit for making rosaries, and the merit of using such rosaries.

४३६। अक्षमालिकोपनिषत्।

ग्रन्थकारः———?

विवरणं। प्रायः परिशुद्धम्। प० ४। पङ्क्ति० ७। स्ला० १०४। अ० नागरं। आ० देशीयकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। ओं वाङ् मे मनसीति शान्तिः। अथ प्रजापतिर्गुहं पप्रच्छ भो ब्रह्मन् अक्षमालिका-विधिं ब्रूहीति।

समाप्तिवा०। एवमक्षमालिकया प्राप्ता मन्त्रः सद्यः सिद्धिकरो भवति इत्याह भगवान् गुहः प्रजापतिमित्युपनिषत्। इति अक्षमालिकोपनिषत्समाप्ता।

विषयः। मौक्तिकस्फटिकरुद्राक्षादिमालानिर्माणसंस्कारविधिः, तादृशमालाकृतजपस्य सिद्धिदायकत्वस्य च वर्णनं।

No. CCCCXXXVII.

Vagalámukhí-kavacha. A charm bearing the name of Vagalámukhí, a form of Durga. This is said to be an extract from the Rudra-yámala Tantra, but it is not included in No. CCXCII.

४३७। वगलामुखीकवचं।

ग्रन्थकारः——?

विवरणं। प्रचीनं प्रायशः परिशुद्धञ्च। प० २। पङ्क्ति० ४। श्लो० २४। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्ट.।

प्रा० वाक्यं। श्रीदेव्युवाच। श्रुता च वगलापूजा स्तोत्रञ्च परमेश्वर।
इदानीं श्रोतुमिच्छामि कवचं वद मे प्रभो॥

समाप्तिवा०। महाभये विपत्तौ च पठेद्वा पाठयेत्तु यः।
तस्य सर्वार्थसिद्धिः स्याद्भक्तियुक्तस्य पार्वति॥
इति रुद्रयामले वगलामुखीकवचं समाप्तम्।

विषयः। मन्त्रादिभिरात्मरक्षणम्।

No. CCCCXXXVIII.

Vagalámukhi-stotra. A hymn in praise of Vagalámukhí, an extract from the Rudra-yámala Tantra. Not included in No. CCXCII.

४३८। वगलामुखीस्तोत्रं।

ग्रन्थकारः——?

विवरणं। प्राचीनं प्रायः परिशुद्धञ्च। प० ४। पङ्क्ति० ४। श्लो० ४८। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। अस्य वगलामुखीस्तोत्रस्य भगवान्नारद ऋषिस्त्रिष्टुप् छन्दः श्रीवगलामुखी देवता अमुकस्य सन्निहितानां विरोधिनां वाङ्मुखपदजिह्वानामित्यादि।

समाप्तिवा०। त्राहि मां जगतां मातः सृष्टिसंहारकारिणि।
नमस्त्वच्चरणाम्भोजे प्रसीद हरवल्लभे॥
इति रुद्रयामले वगलामुखीस्तोत्रं समाप्तम्।

विषयः। वगलामुख्याः स्तुतिः।

No. CCCCXXXIX.

Vástuhoma. Directions for performing a homa before entering a new house.

४३९। वास्तुहोमः।

ग्रन्थकारः ——?

विवरणं। प्रायः परिशुद्धम्। प० ४। पङ्क्ति० ४—५। स्रो० ५६। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। अथ यजुर्वेदी वास्तुहोमः। ततः पञ्चवर्णगुण्डिकया वास्तुमण्डलं निर्माय तदुपरि घटं संस्थाप्येत्यादि।

समाप्तिवा०। दक्षिणापूर्णपात्रादिकं दत्वा अच्छिद्रावधारणं कुर्यात्। इति वास्तुहोमः समाप्तः।

विषयः। गृहप्रतिष्ठादौ कर्त्तव्यकर्म्मकथनम्।

No. CCCCXL.

Bhagavatí Gítá. An imitation of the *Bhagavad Gítá* of the Mahábhárata. It treats of the Yoga scheme of salvation. The interlocutors are Himálaya, the mountain of that name personified, and his daughter Bhagavatí. The latter is the expounder of the scheme.

४४०। भगवतीगीता।

ग्रन्थकारः ————?

विवरणं। प्राचीनं शुद्धञ्च। प० १०। पङ्क्ति० ९—१०। स्रो० ७८। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। श्रीनारद उवाच। ब्रूहि देव महेशान यथा सा परमेश्वरी।
बभूव मेनकागर्भे पूर्णभावेन पार्व्वती॥

समाप्तिवा०। लीलया मेनकागर्भे भयः किं श्रोतुमिच्छसि। इति भगवतीगीता समाप्ता॥

विषयः। हिमालयकर्त्तृकदुर्गास्तवः, हिमालयं प्रति भगवत्या योगसारकथनञ्च।

No. CCCCXLI.

Chaurak'irya alias *Chaurapanchás'iká.* Fifty stanzas by the celebrated poet *Chora* of Telingáná, every one of which is applicable both to a princess disconsolate on separation from her lover, and to the goddess Durgá. A commentary by *Rádhákrishna* explains the text. The MS. is imperfect. The whole of Chora's elegant poem was, some years ago, published, along with a French translation, in the *Journal Asiatique.* A Bengáli poet, Bháratachandra, quoted a few of the s'lokas in his *Vidyá-sundara*, from which circumstance the whole of the stanzas are, in Bengal, attributed to Sundara, the hero of the poem.

४४१ । चौरकाव्यम्, सटीकम्, चौरपञ्चाशिका वा ।

ग्रन्थकारः मूल० चोरः । टीका० राधाकृष्णः ।

विवरणं । प्रायः परिशुद्धम् प्राक्लिखितञ्च । प० ६ । पङ्क्ति० ६—११ । स्लो० ४३६ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । अद्यापि तां कनकचम्पकदामगौरीं फुल्लारविन्दनयनां तनुरोमराजीम् ।
सुप्तोत्थितां मदनविह्वललालसाङ्गीं विद्यां प्रमादगलितामिव चिन्तयामि ॥

समाप्तिवा० । खण्डितत्वात् समाप्तिवाक्यं नास्ति ।

विषयः । प्रतिपद्ये एकेनार्थेन विद्याया राजकन्याया अपरेणार्थेन देव्या वर्णनम् ।

No. CCCCXLII.

Gáyatrí-hridaya. Origin, derivation and meaning of the *Gáyatrí*, a verse of the Rig Veda. This is apparently an extract from one of the Tantras; the part of the Tantra whence it is taken is called *Nárada Upanishad.*

४४२ । गायत्रीहृदयं ।

ग्रन्थकारः———?

विवरणं । प्रायः परिशुद्धं प्राचीनञ्च । । प० ४ । पङ्क्ति० ४ । स्लो० ४८ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा वाक्यं । वैशम्पायन उवाच । अथ भगवन्तं परिपृच्छामि अग्नेरुत्पत्तायाग्नेर्देवतानां गायत्रीणां ब्राह्मणो वै मनुष्याणां वसन्त ऋतूनां मेरुः शिखरिणामेवं ब्राह्मणस्य गायत्री ।

समाप्तिवा० । अश्रोत्रियः श्रोत्रियो भवति अष्टौ ब्राह्मणान् गृहीत्वा ब्रह्मलोके महीयते ॥
इति नारदोपनिषत्संवादे गायत्रीहृदयं समाप्तम् ।

विषयः । गायत्र्युत्पत्तिवर्णनपूर्व्वकं गायत्र्यर्थप्रतिपादनम् ।

No. CCCCXLIII.

Gáyatrikalpa. Mode of adoration through the Gáyatrí, and its advantages. This is probably another chapter of the work named under No. CCCCLII.

४४३ । गायत्रीकल्पम् ।

ग्रन्थकारः——?

विवरणं । प्रायः परिशुद्धं प्राचीनञ्च । प० ४ । पङ्क्ति० ४ । श्लो० ४८ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । अथ गायत्रीकल्पम् । पद्मयोनिसमुत्पन्नमष्टनेत्रं चतुर्मुखम् ।
प्रणम्य शिरसा देवं नारदः परिपृच्छति ॥
नारद उवाच । गायत्र्याः कीदृशं ध्यानं वर्णरूपञ्च कीदृशम् ।
कीदृशं देवता छन्द आवाहनविसर्जनम् ॥

समाप्तिवा० । यं यं स्पृशति हस्तेन यं यं पश्यति चक्षुषा ।
रं यं भवति (?) चित्तेन सर्वं पूर्णत्वमेति च ॥ इति गायत्रीकल्पम् ।

विषयः । गायत्रीध्यानरूपमाहात्म्यादिवर्णनम् ।

No. CCCCXLIV.

Jñána Tantra. An original Tantra. Contents: 1st, the characteristics of a spiritual guide; 2nd, means of knowing the creation, animate and inanimate; 3rd, salvation and damnation; 4th, *pujá*, *homa* and other forms of worship; 5th, origin of mantras; 6th, purification of mantras; 7th, obviation of the curse on, and adoration with, mantras; 8th, mantra through which the Nága king upholds the earth; 9th, obviation of the curse on mantras by a Gandharva.

४४४ । ज्ञानतन्त्रम् ।

ग्रन्थकारः——?

विवरणं । प्रायः परिशुद्धं प्राचीनञ्च । प० ८ । पङ्क्ति० ६—७ । श्लो० ८३ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । श्रीनारद उवाच । यत् त्वयोक्तं महादेव विस्तरेण श्रुतं मया ।
इदानीं श्रोतुमिच्छामि सङ्क्षेपाद्गुरुलक्षणम् ॥

समाप्तिवा० । आद्यर्चस्य पितैर्देवैर्द्याद्देवस्य दक्षिणे ।

यद्वत्तु (?) वामहस्ते च घण्टावाद्यपुरःसरम् ॥
एवं जपं सम प्याथ साधयेत्सकलेप्सितम् ॥
इति श्रीशिवनारदसंवादे ज्ञानतन्त्रे नवमः परिच्छेदः ।

विषयः । अत्र नव परिच्छेदाः सन्ति । तत्र १ प्रथमे गुरुपरीक्षाऽकालदीक्षादिकथनम् । २ ये, चराचरविषयज्ञानोपायः । ३ ये, कस्य मुक्तिर्नरकस्येत्यादिप्रश्नः । ४ र्थे, पूजाहोमबलिदानादिविधिकथनम् । ५ मे, मन्त्रोत्पत्तिनिरूपणम् । ६ षष्ठे, मन्त्रशोधनादिप्रकारः । ७ मे, मन्त्रशापोद्धारपूजाप्रकारादिनिरूपणम् । ८ मे, कस्य मन्त्रस्य जपप्रभावेण नागराट् पृथिवीं धारयतीत्यस्योत्तरम् । ९ मे, मन्त्राणां गन्धर्वशापमोचनम् ॥

No. CCCCXLV.

Gurugítá. The attributes of a spiritual guide :—said to be an extract from the Rudra-yámala Tantra. This portion is not included in No. CCXCII.

४४५ । गुरुगीता ।

ग्रन्थकारः——?

विवरणं । प्रायशः शुद्धं प्राचीनञ्च । प० ६ । पङ्क्ति० ७—१० । श्लो० १९५ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । अथ गुरुगीता । नमोस्य गुरुगीतास्तोत्रस्य परमशिव ऋषिर्विराट् छन्दः श्रीगुरुः परमात्मा देवता हं वीजं सं शक्तिः क्रौं कीलकं श्रीगुरोः प्रसादात् परमार्थसिद्धये विनियोगः ।

समाप्तिवा० । संसारसागरसमुद्धरणैकमन्त्रं ब्रह्मादिदेवमुनिपूजितसिद्धमन्त्रम् ।
दारिद्र्यदुःखभवशोकविनाशमन्त्रं वन्दे महाभयहरं गुरुराजमन्त्रम् ॥
इति रुद्रयामलतन्त्रे गुरुगीता समाप्ता ।

विषयः । गुरुस्तुतिमाहात्म्यादिवर्णनम् ।

No. CCCCXLVI.

Píṭhanirṇaya. Notices of the fifty-one sacred spots in India where portions of the body of the Deví fell when cut up by S'iva : an extract from the Tantra-chúḍámaṇí.

४४६ । पीठनिर्णयः ।

ग्रन्थकारः——?

विवरणं। प्रायशः शुद्धं प्राचीनञ्च। प० ७। पङ्क्ति० ३। श्लो० ८०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। अथ महापीठलक्षणम्। श्रीईश्वर उवाच। मातः परात्परे देवि सर्वज्ञानमयीश्वरि। कथ्यतां मे सर्वपीठशक्तिभैरवदेवताः॥

समाप्तिवा०। शठाय क्रूरकार्याय दत्वा मृत्युमवाप्नुयात्।
दद्यात् शान्ताय शिष्याय मन्त्री मन्त्रार्थसिद्धये॥
इति तन्त्रचूड़ामणौ पार्वतीशिवसंवादे एकपञ्चाशद्विद्योत्पत्तौ पीठनिर्णयः समाप्तः।

विषयः। सत्यङ्गपतनोत्पन्नपीठस्थानस्थितशक्तिभैरवादिकथनम्।

No. CCCCXLVII.

Sarasvatí Tantra. A mystic Tantra. Contents : 1st, placing of the divinity to be meditated upon, on a spot in the human body entitled *múládhára-chakra* or the circle of primary receptacle; 2nd, emancipation by *nirváṇa;* 3rd and 4th, the number of syllables appropriate in the mantras of Káliká and other goddesses; 5th, purification of the mantra sacred to Vidyá; 6th, vivification of mantras.

४४७। सरस्वतीतन्त्रम्।

ग्रन्थकारः——?

विवरणं। प्रायशः परिशुद्धं प्राचीनञ्च। प० ५। पङ्क्ति० ७। श्लो० १५१। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। पार्वत्युवाच। मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः। शतकोटिजपेनापि तस्य विद्या न सिद्ध्यति॥

समाप्तिवा०। एतत्तन्त्रं गृहे यस्य तत्राहं सुरवन्दिते। तिष्ठामि नात्र सन्देहो गोप्तव्यं मम वेश्मनि॥
इति सरस्वतीतन्त्रे षष्ठः पटलः।

विषयः। अत्र षट्पटलाः सन्ति। तत्र १ मे, मूलाधारादिचक्रविशेषे इष्टदेवतादिध्यानप्रकारः। २ ये, निर्वाणमुक्तिप्रकारविशेषकथनम्। ३ ये, ४ र्थे. कालिकादिकतिपयदेव्यादीनां मन्त्राक्षरसङ्ख्या। ५ मे, विद्यामन्त्रशोधनम्। ६ षष्ठे, मन्त्रप्राणदानप्रकारः॥

No. CCCCXLVIII.

Vidyotpatti. Origin of Vidyá, a form of Durgá,—an extract from the *Guhyátiguhya Tantra.*

४४८। विद्योत्पत्तिः।

ग्रन्थकारः——?

विवरणं। प्रायशः परिशुद्धं प्राचीनञ्च। प० ६। पङ्क्ति० ६। श्लो० १३८। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। अथ विद्योत्पत्तिः। सत्ये काले च श्रीविद्या कमला भुवनेश्वरी।
सिद्धविद्या महेशानि त्रिशक्तिः कमला शिवे॥

समाप्तिवा०। तृतीया माधवे शुक्ला कुलर्चा दारुणा तिथौ(?)।
इत्येतास्तिथयः पुण्या अन्याश्चैव सहस्रशः॥
इति गुह्यातिगुह्यतन्त्रे विद्योत्पत्तिः समाप्ता।

विषयः। कालिकाच्छिन्नमस्तादिविद्योत्पत्तिकथनं।

No. CCCCXLIX.

Mugdhabodha Ṭíká. A commentary on the Sanskrit Grammar of Vopadeva. By Durgádása. This work is highly esteemed in Bengal; but it has scarcely any currency out of it.

४४९। मुग्धबोधटीका।

ग्रन्थकारः दुर्गादासः।

विवरणं। प्रायः परिशोधितं प्राचीनञ्च। प० १२७। पङ्क्ति० ७—९। श्लो० ४२१५। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। लक्ष्मीकान्तं निखिलजगतां सर्गसंहारहेतुं दुर्गादासो धरणिपतितः कोटिशस्त्वः प्रणम्य। पर्यालोच्याखिलबुधमतं धीमतां पाठकानां सन्तोषार्थं रचयति मितां मुग्धबोधस्य टीकाम्॥

समाप्तिवा०। खण्डितत्वात्समाप्तिवाक्यं नास्ति। अव्ययीभावसमासप्रारम्भपर्यन्ता॥

विषयः। वोपदेवकृतमुग्धबोधव्याकरणव्याख्यानम्।

No. CCCCL.

Puruscharaṇa-vidhi. Directions for acquiring proficiency in mantras, and the advantage of repeating them a certain number of times under particular lunar and astral influences. This is an extract from the *Svatantra Tantra.*

४५०। पुरश्चरणविधिः।

ग्रन्थकारः—?

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च। प० २। पङ्क्ति० १०। श्लो० ६०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। अथ रहस्यपुरश्चरणम्। स्वतन्त्रतन्त्रे। पार्वत्युवाच।

कथयस्व महादेव सिद्धिकारणमुत्तमम्।
येन सिद्धिं समायान्ति सर्वे मन्त्राश्च सिद्धिदाः॥

समाप्तिवा०। उत्तराभिमुखो भूत्वा जपेन्मन्त्रं समाहितः।
शत्रुनाशाय सततं दक्षिणाभिमुखो जपेत्॥
इति स्वतन्त्रतन्त्रे हरगौरीसंवादे पुरश्चरणविधिः सम्पूर्णः॥

विषयः। नक्षत्रविशेषे कृतमन्त्रजपसङ्ख्याविशेषस्य फलविशेषोक्तिः।

No. CCCCLI.

Goraksha Sataka. The advantage of giving up life while engaged in Yoga meditation.

४५१। गोरक्षशतकम्।

ग्रन्थकारः—?

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च। प० ४। पङ्क्ति० ११। श्लो० १२८। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। श्रीगुरोः परमानन्दं वन्दे स्वानन्दविग्रहम्।
यस्य सान्निध्यमात्रेण मोक्षो नश्यति सत्वरम्॥

समाप्तिवा०। स्नातं तेन समस्ततीर्थसलिले दत्ता च पृथ्वी द्विजे
यज्ञानां बहुलं सहस्रमयुतं देवार्चनं निश्चितम्।
नित्यं तेन सुतर्पिताश्च पितरः स्वर्गञ्च नीताः पुन-
र्यस्य ब्रह्मविचारणे क्षणमपि प्राप्नोति धैर्यं मनः॥

विषयः। प्राणनिरोधकृतयोगसाधनफलकथनं।

No. CCCCLII.

Púrṇánanda-nirúpaṇa-ṭiká. A gloss on a work, by Púrṇánanda, on Yoga mysticism, and certain imaginary receptacles in the human body, on which the soul is centred during meditation. Six such receptacles are enumerated. By Rámavallabha S'armá.

४५२ । पूर्णानन्दचक्रनिरूपणटीका ।

ग्रन्थकारः श्रीरामवल्लभशर्मा ।

विवरणं। प्रायः परिशुद्धं । प० १२ । पङ्क्तिः० १० । श्लो० ७५० । अ० वङ्गीयं । आ० देशीयकागजः । का० शकाब्दाः १७१७ । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । मोहान्धकारविध्वंसि भवतीह भयापहम् ।
भवानीचरणद्वन्द्वं भज भाग्यवशान् मनः ॥
पूर्णानन्दोदितानन्दनिर्वाहाङ्कुरकारिकां ।
विशदां कुरुते तूर्णं द्विजः श्रीरामवल्लभः ॥

समाप्तिवा०। योगी कीदृशः यतात्ममनाः संयतात्ममनाः वशीकृतचित्त इत्यर्थः ।
इति षट्चक्रटीका श्रीरामवल्लभशर्मणा ।
कृता समाप्ता सुबोधा मता सज्जनरञ्जनी ॥
अशुद्धं किञ्चिदत्रास्यां चेन् महादुःखे भ्रमादयः (?) ।
सुधीभिस्तत्परिष्कार्यमित्येष विनयो मम ॥
इति चन्द्रद्वीपान्तर्गतवत्सपुराख्यग्रामनिवासिश्रीरामवल्लभशर्म्मणा कृता पूर्णानन्दचक्रनिरूपणटीका समाप्ता ॥

विषयः । मूलाधारादिषट्चक्रनिरूपकपूर्णानन्दचक्रनिरूपणाख्यग्रन्थव्याख्यानम् ।

No. CCCCLIII.

Yoga-vivarana. Directions for performing various kinds of Yoga meditation—an extract from the Vas'ishṭha Yogakáṇḍa. By Vas'ishṭha.

४५३ । वशिष्ठयोगकाण्डीयं, योगविवरणम् ।

ग्रन्थकारः वशिष्ठः ।

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च । प० ८ । पङ्क्तिः० ६—८ । श्लो० २२८ । अ० वङ्गीयं । आ० देशीयकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । अथ वशिष्ठयोगकाण्डं लिख्यते । वशिष्ठ उवाच ।

जातस्य द्विविधो ज्ञेयो पन्थानो वेदबोधितो ॥
कर्म्मार्थकावुभावेतो प्रवर्त्तकनिवर्त्तको ।
समाप्तिवा०। योगशास्त्रं पठेन्नित्यं किमन्यैः शास्त्रविस्तरैः ।
योगशास्त्रमिदं तत्त्वं वशिष्ठेन प्रभाषितम् ॥
स्नातं तेन समस्ततीर्थसलिले दत्ता च पृथ्वी द्विजे, यज्ञानाञ्च कृतं सहस्रमयुतं देवाश्च सम्पूजिताः ।
नित्यं तेन सुतर्पिताश्च पितरः स्वर्गञ्च नीताः पुनर्यस्य ब्रह्मविचारणे चणमपि प्राप्नोति धैर्य्यं मनः॥ इति वशिष्ठयोगकाण्डे योगविवरणं समाप्तं ॥
विषयः। यमनियमाद्यष्टाङ्गयोगनिरूपणम् ।

No. CCCCLIV.

I's'varígítá Upanishad alias *S'ivagítá*. An imitation of the Bhagavad Gítá, designed to establish the preeminence of S'iva as the supreme divinity—said to be an extract from the Kurma Puráṇa.

४५४ । ईश्वरगीतोपनिषत्, कूर्म्मपुराणीया ।

ग्रन्थकारः व्यासः ।
विवरणं। प्रायः परिशुद्धम् प्राचीनञ्च । प० १४ । पङ्क्ति० ८ । श्लो० ४४५ । अ० वङ्गीयं। आ० देशीयकागजः । का० शकाब्दाः १७२२ । स्था० भारतवर्षीयगवर्णमेण्टः ।
प्रा० वाक्यं। अथ शिवगीता । नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
ऋषय ऊचुः । भवता कथितः सम्यक् सर्गः स्वायम्भुवस्ततः ।
ब्रह्माण्डस्यास्य विस्तारो मन्वन्तरविनिश्चयः ॥
तत्रेश्वरेश्वरो देवो वर्णिभिर्धर्मतत्परैः ।
ज्ञानयोगरतैर्नित्यमाराध्यः कथितस्त्वया ॥
तद्वदाशेषसंसारदुःखनाशनमुत्तमम् ।
ज्ञानं ब्रह्मैकविषयं येन पश्येम तत्परम् ॥
समाप्तिवा०। यश्चैतत् शृणुयान्नित्यं भक्तियुक्तो दृढव्रतः ।
सर्व्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ॥
तस्मात् सर्व्वप्रयत्नेन पठितव्यो मनीषिभिः ।
श्रोतव्यश्चानुमन्तव्यो विशेषाद् ब्राह्मणैः सदा ॥

इत्यादिमहापुराणे कौर्मे शिवविष्णुव्यासादिसंवादे ईश्वरगीतासूपनिषत्सु नवमो-
ध्यायः ।

विषयः । अत्रेश्वरः सनत्कुमरादिभ्यो ब्रह्मज्ञानमुपदिशति ।

No. CCCCLV.

Gañgáshṭaka. A hymn in praise of Gangá in eight stanzas. By S'añkára Ácharya.

४५५ । गङ्गाष्टकं ।

ग्रन्थकारः शङ्कराचार्य्यः ।

विवरणं । प्रायः परिशुद्धं प्राचीनञ्च । प० १ । पङ्क्ति० ७ । श्लो० २७ । अ० वङ्गीयं । आ० देशीयकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । भगवति भवलीलामौलिमाले तवाम्भः
कणमणुपरिमाणं प्राणिनो ये स्पृशन्ति ।
अमरनगरनारीचामरग्राहिणीनां
विगतकलिकलङ्कातङ्कमङ्के लुठन्ति ॥

समाप्तिवा० । मातर्गङ्गे तरलतरङ्गे सततं वारिधिवारिणि सङ्गे ।
मम तव तीरे पिवतो नीरं हरि हरि जपतः पततु शरीरं ॥
इति शङ्कराचार्य्यविरचितं गङ्गास्तोत्रं समाप्तं ।

विषयः । गङ्गायाः स्तवः ।

No. CCCCLVI.

Annadákalpa. A Tantra. Contents : 1, praise of Annadá ; 2nd, initiation into her mantra ; 3, derivation of her mantra ; 4, purification of her mantra ; 5, bathing and other duties of neophites ; 6, ablution of the face and other preliminaries of worship ; 7, intellectual adoration ; 8, other rituals to end of *pújá ;* 9, adoration of the emblem of Annadá ; 10, mantras for pouring sacred water into jars ; 11, employment of a fair damsel of eighteen years of age as a substitute for a jar ; 12, ceremonials to be observed in connection with the jars ; 13, ceremonials from invocation to sacrifice ; 14, repetition of the mantra of the divinity with the belief that the divinity, the spiritual guide, and the mantra, are identical ; 15, worship of the divinity and offerings ; 16, adoration through women ; 17, charms bearing the name of Annadá.

४५६ । अन्नदाकल्पः ।

ग्रन्थकारः——?

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च । प० ४७। पङ्क्ति० ७ । श्लो० ७०० । अ० वङ्गीयं। आ० देशीयकागजः। का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं। नित्यानन्दमयीं सदाशिवमनःसम्मोहिनीं चित्कलां
संसारार्णवतारिणीं त्रिजगतामुत्पत्तिमूलाश्रयां ।
ध्यानज्ञाननिदानभूतविभवां ब्रह्मादिभिः सेवितां
भूतानां परिपालनश्रयमतां (?) तामन्नपूर्णां श्रये ॥

समाप्तिवा०। इत्थं कवचमाहात्म्यं वक्तुं नालं यथोदितं ।
वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि ॥
इति अन्नदाकल्पे सर्व्वसिद्धिप्रदकवचविवरणे सप्तदशः पटलः ।

विषयः। १ पटले अन्नदायाः प्रशंसा । २, तस्या मन्त्रग्रहणप्रकारः। ३, तस्या मन्त्रोद्धारः। ४, तस्य पुरश्चरणं। ५, साधकस्नानादिविधानं। ६, आचमनादिपीठन्यासपर्य्यन्तविवरणं। ७, हृत्पद्ममासनं दद्यादित्यादिमानसपूजाकथनं। ८, पूजासमाप्तिकालपर्य्यन्तस्थायिविशेषार्घ्यसंस्कारः। ९, अन्नदापीठार्च्चनं। १०, मन्त्रविशेषेण प्रक्षालितकलसे तीर्थजलपूरणं। ११, अष्टादशवर्षीयां स्वीयां परकीयां वा नारीं मन्त्रविशेषेणाभिषिच्य तया सह पात्रसंस्थापनं। १२, स्थापितपात्रादिजलेन वटुकादीनन्नदाञ्च प्रतर्प्य पूर्व्वादिभागेषु वटुकादिभ्यो बलिदानं। १३, आवाहनादिबलिदानपर्य्यन्तविवरणं। १४, देवतागुरुमन्त्राणामभेदेन जपः। १५, नारिकेलकदलीपक्वाद्यादिद्रव्यविशेषकृतहोमादिभिः साधनोपायकथनं। १६, नायिकासाधनात्मककाम्यविध्यादिकथनं। १७, अन्नदाकवचं।

No. CCCCLVII.

Puras'charaṇa-rasollása. A Tantra. Contents: 1, purification; 2, praise of initiation; 3, adoration in charnal places for attainment of power over mantras; 4, evil of initiation on the fifth of the waxing moon in the month of Mágha; 5, praise of the ten great Vidyás, Kálí, Tárá, Shoḍashí, Bhuvanes'varí, Bhairaví, Chhinnamastá, Dhúmávatí, Vagalá, Mátañginí, Kamalátmiká.

४५७। पुरश्चरणरसोल्लासः ।

ग्रन्थकारः——?

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च। प० ३२। पङ्क्ति० ७। श्लो० ४८८। अ० वङ्गीयं।
आ० देशीयकागजः। का०——?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। श्रीदेव्युवाच। देवपूज्य महाबाहो संसारार्णवतारक।
रहस्यं देवदेवेश पुरश्चरणकर्म्मणः॥

समाप्तिवा०। कलारूपेण सा देव्यभवद् ब्रह्मस्वरूपिणी।
इति ते कथितं सर्व्वं तव स्नेहाद्वरानने॥
इति पुरश्चरणरसोल्लासतन्त्रे देवदेवीसंवादे दशमः पटलः। समाप्तोयं ग्रन्थः।

विषयः। १ पटले पुरश्चरणं। २, दीक्षाप्रशंसनं। ३, श्मशाने मन्त्रसाधनं। ४, श्रीपञ्चम्यां दीक्षायां दोषकथनं। ५, काल्यादिदशमहाविद्यामाहात्म्यं। ६, सुषुम्णामार्ग-संस्थितरहस्यविशेषदेवीदीक्षादिकथनं। ७, महादेवविग्रहकार्यविशेषादिवर्णनं। ८, सहस्रारपद्मदलस्थितगुर्वादिध्यानपूर्वकजपफलादिकथनं। ९, सहस्रारपद्मस्व-रूपस्थानादिकथनं १० मन्त्रदीक्षोपयोगितिथ्यादिनिरूपणम्।

No. CCCCLVIII.

Gañgáshṭaka. A hymn in praise of Gangá, in eight stanzas. By Válmíkí.

४५८। गङ्गाष्टकम्।

ग्रन्थकारः वाल्मीकी।

विवरणं। प्राचीनं प्रायः परिशुद्धञ्च। प० १। पङ्क्ति० ९। श्लो० ३६। अ० वङ्गीयं।
आ० देशीयकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। मातः शैलसुतासपत्नि वसुधाशृङ्गारहारावलि स्वर्गारोहिणि वैजयन्ति भवतीं भागीरथीं प्रार्थये, इत्यादि।

समाप्तिवा०। प्रक्षाल्य गात्रकलिकल्मषपङ्कमाशु मोक्षं लभेत् पतति नैव पुनर्भवाब्धौ॥
इति श्रीवाल्मीकिना विरचितं गङ्गाष्टकस्तोत्रं समाप्तम्॥

विषयः। गङ्गायाः स्तुतिः।

No. CCCCLIX.

Devíkavacha. A charm bearing the name of Devi, Yayá &c.

४५९ । देवीकवचं ।

ग्रन्थकारः ——?

विवरणं । प्राचीनं प्रायः परिशुद्धश्च । प० २ । पङ्क्ति० १० । स्लो० ७५ । अ० वङ्गीयं ।
आ० देशीयकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । मार्कण्डेय उवाच । यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्य चिदाख्यातं तन्मे ब्रूहि पितामह ॥

समाप्तिवा० । देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ ५० ॥
तत्र गच्छति भक्तोपि पुनरागमनं न हि ।
सम्प्राप्नोति मनुष्योसौ महामायाप्रसादतः ॥
इति हरिहरब्रह्मविरचितं देवीकवचं समाप्तम् ।

विषयः । जयादिदेवीनामविशेषाणामङ्गप्रत्यङ्गादिषु विन्यासः ।

No. CCCCLX.

Puras'charaṇa-viveka. Directions for acquiring proficiency in mantras. This forms the first chapter of the *Uttara Tantra.*

४६० । पुरश्चरणविवेकः ।

ग्रन्थकारः ——?

विवरणं । प्राचीनं प्रायः परिशुद्धश्च । प० ३ । पङ्क्ति० ६—८ । स्लो० ६२ । अ० वङ्गीयं ।
आ० तुलटकागजः । का० ——? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । भैरव उवाच । कैलासशिखरारूढमेकदा तु महेश्वरम् ।
पप्रच्छ पार्वती देवी प्रणयेन सुखोषिता ॥

समाप्तिवा० । सहस्रं वा शतं वापि जप्त्वा मन्त्रं समर्पयेत् ।
गुरवे दक्षिणां दत्वा ब्राह्मणानपि भोजयेत् ॥
पूजयित्वा सुखी भूत्वा विहरेत् साधकोत्तमः ।
इत्युत्तरतन्त्रे परमरहस्ये पुरश्चरणविवेके प्रथमः पटलः ।

विषयः । मन्त्रपुरश्चरणसुलभोपायकथनं ।

No. CCCCLXI.

Durgádádi-náma-stotra. A hymn to Durgá in which every epithet begins with the letter द=*d*. It is probably an extract from one of the Tantras.

४६१। दुर्गादिनामस्तोत्रं।

ग्रन्थकारः——?

विवरणं। प्राचीनं परिशुद्धञ्च। प० १२। पङ्क्तिः० ८। श्लो० २६४। अ० वङ्गीयं। आ० देशीयकागजः। का०——?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। कैलासशृङ्गे शृङ्गारवर्द्धने सुमनोरमे।
शीतलैर्म्मृदुलैश्चारुगन्धैर्वातैः सुवीजिते॥

समाप्तिवा०। देवतागुरुमन्त्राणामैक्यं सम्भाव्य साधकः।
सर्व्वदा प्रपठेत् स्तोत्रं सर्व्वत्र सुखभाग् भवेत्॥
इति श्रीशिवपार्व्वतीसंवादे दुर्गादिनामस्तोत्रं सम्पूर्णम्।

विषयः। दकारादिपदैर्दुर्गायाः स्तुतिः।

No. CCCCLXII.

Takárádisvarúpa. A thousand epithets of Tárá, a form of Durgá, strung into verses, and the advantages of acquiring proficiency in them: all the epithets begin with the letter त=*t*. This work is an extract from the *Báláviläsa Tantra.*

४६२। तकारादिस्वरूपम्।

ग्रन्थकारः——?

विवरणं। प्राचीनं प्रायः परिशुद्धञ्च। प० १३। पङ्क्तिः० ८। श्लो० ३१२। अ० वङ्गीयं। आ० तुलटकागजः। का०——?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। ॐ सुमेरुशिखरे रम्ये नानादेवगणावृते।
कामेश्वरं समालिङ्ग्य पप्रच्छ त्रिपुरा पुरा॥

समाप्तिवा०। इति परमरहस्यं गोपितं सर्व्वतन्त्रे
त्रिदिवसुखनिदानं सिद्धिसङ्घप्रमाणम्।
शुचिरशुचिरवश्यं यः पठेत्पाठयेद्वा
भवति मनुजवर्य्यस्तारिणीप्रेमपात्रम्॥
इति श्रीबालाविलासतन्त्रे देवीश्वरसंवादे तकारादिस्वरूपाख्यं सहस्रनामस्तोत्रं सम्पूर्णम्॥

विषयः। तकारादिपदैस्तारायाः स्तुतिः, एतत्स्तोत्रपुरश्चरणफलादिकथनं च।

No. CCCCLXIII.

Níla Tantra. An original Tantra, one of the sixty-four said to have been related by S'iva to his consort Durgá. A chapter of this work, probably the 13th, has been noticed under No. CCXV. The present MS. comprises seventeen chapters or Paṭalas, of which the 13th is wanting, and the 12th is incomplete. In its complete form, the work probably comprises many more chapters. Contents: 1st, Praise of the Níla Tantra, and the duties to be observed by the faithful on rising from their beds in the morning; 2nd, directions for bathing and prayers; 3rd, places meet for worship; 4th, emblem of the Níla Deví or the blue goddess, purification of the elements, meditation on the goddess, her emblem and her attributes; 5th, adoration of the goddess, with fish, flesh meat, rice, gesticulation, regulation of breath, &c.; 6th, purification of the mouth by repeating her mantra; 7th, sacrifice with a view to the attainment of worldly objects; 8th, dedication to her of the fruits of one's own deeds, circumambulation, &c.; 9th, directions for drinking spirituous liquors; 10th, initiation; 11th, purification of the mantra of the blue goddess; 12th, offering particular kinds of flowers and fruits to her, and praise of her worshipers; 13th, wanting; 14th, merits of several Tantras and praise of asceticism; 15th, directions for ensuring the reward of repeating mantras; 16th, connexion with women of different classes as a part of religious duty; 17th, directions for particular forms of worship for attaining perfection.

४६३ । नीलतन्त्रम् ।

ग्रन्थकारः———?

विवरणं। प्राचीनं प्रायः परिशुद्धञ्च । प० २५ । पङ्क्ति० ७ । श्लो० ५८७ । अ० वङ्गीयं। आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं। देव्युवाच । भगवन् देवदेवेश पञ्चकृत्यविधायक ।
सर्वज्ञ भक्तिसुलभ शरणागतवत्सल ॥

समाप्तिवा०। गोपितव्यं प्रयत्नेन स्वयोनिरिव पार्वति ।
प्रकाशात् सिद्धिहानिः स्यान् न प्रकाश्यं कदाचन ॥
इति श्रीनीलतन्त्रे पार्वतीश्वरसंवादे परमरहस्ये सप्तदशः पटलः ।

विषयः । अत्र सप्तदशपटलाः सन्ति । तत्र १ प्रथमे नीलतन्त्रमाहात्म्यं, नीलदेव्युपासकोक्तिः, एतत्तन्त्रानुसारिशय्योत्थानानन्तरकर्त्तव्यदेवीस्मरणादि च । २ ये, तान्त्रिकस्नानमन्त्रजपादिविधिः । ३ ये, पूजास्थाननिर्णयः । ४ र्थे, नीलदेवीयन्त्रलिखनभूतशुद्धियन्त्रशक्तिदेवताध्यानादिप्रकारः । ५ मे, नीलदेवीपूजनविधिः, मत्स्यमांसादिनैवेद्यदान-

वीजन्यासमुद्रादर्शनतारामन्त्रगुरुकथनादि च। ६ ष्ठे, मन्त्रजपेन मुखशोधनादि-प्रकारः। ७ मे, काम्यबलिदानप्रकारः। ८ मे, आत्मकृतकर्मसमर्पणं। देवप्रदक्षिणादिप्रकारः। ९ मे, मद्यपानविधिः। १० मे, दीक्षाविधिः। ११ शे, मन्त्रपुरश्चरणविधिः। १२ शे, पुष्पविशेषादिना देवीपूजनफलस्य शाक्तप्रशंसादेश्चोक्तिः, द्वादशत्रयोदशपटलसमाप्तिवाक्यं न दृश्यते। १३ शे—, । १४ शे, कतिपयतन्त्रनामोल्लेखपूर्वकमवधूताश्रमप्रशंसादि। १५ शे, जपसिद्ध्यादिप्रकारः। १६ शे, शृङ्गारमन्त्रजपकुलीनादिप्रशंसादि। १७ शे, साधनादिविशेषैः सिद्धभवनप्रकारादि।

No. CCCCLXIV.

Vagalá Paṭala. Liturgy for worshiping the goddess Vagalá. A hymn to this goddess occurs under No. CCCCXXXVIII, and her charms under No. CCCCXXXVII.

४६४। वगलापटलः।

ग्रन्थकारः ——————?

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च। प० २। पङ्क्ति० ८। श्लो० ७८। अ० वङ्गीयं। स्था० तुलटकागजः। का० —?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। ॐ ह्रीं श्रीं वगलामुखि सर्वदुष्टानां वाचं मुखं स्तम्भय कीलय कीलय बुद्धिं विनाशय ह्रीं ॐ स्वाहा इति मन्त्रस्य नारद ऋषिरित्यादि।

समाप्तिवा०। भैरवाय बलिं दत्वा देव्यै पुष्पाञ्जलित्रयं दत्वा यथाशक्ति जप्त्वा धूपादिकं दत्वा विसर्जयेत्॥ इति वगलापटलः समाप्तः।

विषयः। वगलामन्त्रतत्पूजनप्रकारादि।

No. CCCCLXV.

Adbhuta-sára-sañgraha. An abstract of the astrological work noticed under No. CCLII. The author, Navadvípa, calls himself a descendant of Nityánanda a cousin and follower of Chaitanya, the Vaishṇavite reformer of Nuddea.

४६५। अद्भुतसारसङ्ग्रहः।

ग्रन्थकारः नवद्वीपः, नित्यानन्दवंशजः।

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च। प० २०। पङ्क्ति० ६। श्लो० २९०। अ० वङ्गीयं। स्था० तुलटकागजः। का० —?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। नत्वा मद्याप्रभुं कृष्णचैतन्याख्यं तदग्रजम्।
प्रभुं नित्यानन्दरामं प्रभुमद्वैतमीश्वरम्॥
नित्यानन्दवंशजेन नवद्वीपेन कन चित्।
क्रियते शान्तिसहितोद्भुतसारस्य सङ्ग्रहः॥
समाप्तिवा०। खण्डितत्वात् शेषवाक्यादिकं नास्ति।
विषयः। दिव्यनाभसभूमिजादित्रिविधोत्पातशान्तिवर्णनादि।

No. CCCCLXVI.

Rájavallabha alias *Dravyaguṇa* A portion of this work has been noticed under the name of *Dravyaguṇa*, No. CCIX.; and the *Paryyáya-ratnamálá*, No. CCVIII, of Mádhava Kaviràja has been described as the work of an author named Rájavallabha, and as being current in his name, but the second verse of this MS. shows the description to be unauthorised. The codex contains six chapters, of which the first treats of the sanitary duties to be observed at dawn; the second treats of exercise on foot and on horseback, rubbing of oil on the body, bathing, &c.; the third, of midday duties or breakfast and the aliments most appropriate for the occasion; the fourth, of articles having bitter, hot and other tastes; the fifth, of sexual intercourse, chewing betel, &c.; and the sixth, of the qualities of various medicaments. By Náráyaṇadása Kaviràja.

४६६। राजवल्लभः।

ग्रन्थकारः नारायणदासकविराजः।
विवरणं। प्रायः परिशुद्धं। प० १६। पङ्क्ति० ६—८। श्लो० ५२८। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।
प्रा० वाक्यं। परमानन्दसन्दोहकन्दं भद्रकरं सतां।
इन्दिरामन्दिरं वन्दे गोविन्दं नन्दनन्दनम्॥
श्रीनारायणदासेन कविराजेन धीमता।
प्रतिसंस्क्रियते द्रव्यगुणोयं राजवल्लभः॥
प्रभातप्राह्णमध्याह्नापराह्णरजनीभवाः।
इति पञ्च परिच्छेदाः षष्ठोप्यत्रौषधाश्रयः॥
समाप्तिवा०। कषायमधुरा रूक्षा वातघ्नी वंशलोचना।
तुगाह्वरी (?) चयश्वासकासघ्नी मधुरा हिमा॥

इति नानौषधिगुणाः। दिङ्मात्रं दर्शितं ह्येतद्गृह्यतामन्यतः परम्॥
षष्ठौषधिपरिच्छेदः समाप्तो राजवल्लभः।
इति नारायणदासकविराजकृतो राजवल्लभो नाम द्रव्यगुणः समाप्तः॥

विषयः। १ परिच्छेदे मलमूत्रोत्सर्गादिनैत्यकर्मरूपप्रातःकृत्यनिरूपणं। २ ये, वायुसेवनाश्व-पृष्ठव्यायामतैलमर्द्दनोद्वर्त्तनस्नानादिपौर्वाह्णिककर्मनिरूपणं। ३ ये, तण्डुलशाकदधि-दुग्धमांसादिविविधखाद्यद्रव्यसंस्कारादिमाध्याह्निककर्मकथनं। ४ र्थे, कटुतिक्ता-दिषड्रसगुणकथनादि। ५ मे, स्त्रीसम्भोगताम्बूलसेवनादिवर्णनं। ६ ष्ठे, नानौषधि-गुणवर्णनम्।

No. CCCCLXVII.

Roga-vinis'chaya. Causes, nature and diagnosis of fever, dysentery, cholera and other diseases.

४६७। रोगविनिश्चयः।

ग्रन्थकारः——?

विवरणं। प्रायः परिशुद्धं। प० २१। पङ्क्ति० ५। श्लो० २५०। अ० वङ्गीयं। आ० तुलट-कागजः। का०——?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। प्रणम्य जगदुत्पत्तिस्थितिसंहारकारणम्।
स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम्॥
नानामुनीनां वचनैरिदानीं समासतः सद्भिषजां नियोगात्।
सोपद्रवारिष्टनिदानलिङ्गो निबध्यते रोगविनिश्चयोऽयम्॥

समाप्तिवा०। खण्डितत्वात् शेषवाक्यादि नास्ति।

विषयः। ज्वरातीसारविसूचिकादिरोगनिदानं।

No. CCCCLXVIII.

Sáñkhya-kaumudí. An epitome of the Sáñkhya Philosophy in verse. By Ráma-krishṇa. This is a very different work from the Sáñkhya-tattva-kaumudí, otherwise called Sáñkhya Kaumudí, of Váchaspati Mis'ra. Hall's *Contributions*, 5.

४६८। साङ्ख्यकौमुदी।

ग्रन्थकारः रामकृष्णः।

विवरणं। प्रायः परिशुद्धं । प० ४०। पङ्क्ति० ५। स्लो० ७६०। अ० वङ्गीयं। आ०
तुलटकागजः। का०——? । स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। कृष्णं प्रणम्य पुरुषात् प्रकृतेश्च परं विभुम्।
तन्यते रामकृष्णेन रम्येयं साङ्ख्यकौमुदी॥

समाप्तिवा०। इति षष्टिपदार्थानामष्टाभिः सह सिद्धिभिः।
तथाचात्र षष्टिपदार्थविवेचनान्नेदं प्रकरणमपितु सत्त्वमेवेति।
इतिहासपुराणादौ द्रागगूढप्रत्ययार्थिभिः।
रामकृष्णतता भूयाद् दृश्यतां साङ्ख्यकौमुदी॥
इति साङ्ख्यकौमुदी समाप्ता॥

विषयः। प्रकृतिपुरुषादिषष्टिपदार्थविवेचनादि।

No. CCCCLXIX.

Munḍa-málá Tantra. An original Tantra, probably incomplete. The initial verse seems doubtful. Contents: 1, descriptions of Bhuvanes'varí and other Vidyás; 2, rosaries; 3, proper place and seat for repeating mantras; 4, sacrifice of fish and flesh meat; 5, attainment of perfection in mantras; 6, mode of worshiping Bhuvanes'varí.

४६९। मुण्डमालातन्त्रम्।

ग्रन्थकारः——?

विवरणं। प्रायः शुद्धं प्राचीनञ्च। प० १२। पङ्क्ति० ५। स्लो० १८७। अ० वङ्गीयं। आ०
देशीयकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। लक्ष्मीबीजादिभेदेन पञ्चमी सा भवेदिह।
एकाक्षरी महाविद्या बीजहीना भवेत्पुरा॥
भुवनेशी त्र्यक्षरी तु महाविद्या प्रकीर्त्तिता।
देव्युवाच। दुष्टविद्याश्च देवेश कथिता न प्रकाशिताः।
इदानीं देव भावेन कथयानन्दसुन्दर॥

समाप्तिवा०। गोप्तव्यञ्च प्रयत्नेन यद्यहं तव वल्लभः।
यस्मै कस्मैन दातव्यं जीवनं तस्य दुर्लभं॥
इति मुण्डमालातन्त्रे षष्ठः पटलः।

विषयः। १ मे, भुवनेश्वर्यादिकतिपयविद्याकथनं। २ ये, अक्षमालादिकतिपयमालानिर्माणकथनं। ३ ये, जपस्थानासनादिकथनं। ४ र्थे, मत्स्यच्छागादिबलिदानप्रकारः। ५ मे, मन्त्रपुरश्चरणविधिः। ६ ष्ठे, भुवनेश्वरीपूजनप्रकारः॥

No. CCCCLXX.

Achárasára Tantra. Fragment of a Tantra on the duties of a Kaula.

४७० । आचारसारतन्त्रं ।

ग्रन्थकारः——?

विवरणं। प्रायः शुद्धं। प० ५। पङ्क्ति० ६। श्लो० ९५। अ० वङ्गीयं। आ० देशीयकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। खण्डितं पत्रद्वयं।

समाप्तिवा०। वामे वामा रमणकुशला दक्षिणे चारुपात्रं
अग्रे न्यस्तं चमकपुटकं शूकरस्योष्णमांसं।
स्कन्धे वीणालसितसुभगा सम्मतिः सत्कथायां
कौलो धर्मः परमगहनो योगिनामप्यगम्यः॥
इत्याचारसारतन्त्रे महारहस्ये सप्तमः पटलः।

विषयः। १, २, ३, पटला न सन्ति। ४ र्थे, कौलधर्मोक्तिः। ५ मे. कामक्रोधादिरिपुदमनादिसाधनोपायविशेषकथनं। ६ ष्ठे, कौलाचारेण शक्तिसाधनादिकथनं। ७ मे, संविदाख्यज्ञानजननोपायकथनं।

No. CCCCLXXI.

Dwirúpa-kosha. A vocabulary of words of the same or similar sounds but different spellings. By Purushottama Deva.

४७१। द्विरूपकोषः।

ग्रन्थकारः पुरुषोत्तमदेवः।

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च। प० ५। पङ्क्ति० ६। श्लो० ८०। अ० वङ्गीयं। आ० देशीयकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। अथ द्विरूपकोषः। भवेदाषाढ आशाढो विषुवद्विसुवच्च तत्।
मातुःष्वसा मातुःस्वसा कशायां कषिता कषा॥

समाप्तिवा०। हलन्तो गीयते कश्चिददन्तोपि च गीयते।
दुर्लभो ग्रन्थतो लोके धातुवीजप्रमाणतः॥
इति पुरुषोत्तमदेवविरचितो द्विरूपकोषः समाप्तः।

विषयः। एकस्य शब्दविशेषस्य आकृतिवैकल्प्यकथनं।

No. CCCCLXXII.

Sandhyá-paddhati. Liturgy for the three diurnal prayers, according to the ordinance of the Yajur Veda.

४७२। सन्ध्यापद्धतिः।

ग्रन्थकारः——?

विवरणं। अपरिशुद्धं प्राचीनञ्च। प० ७। पङ्क्ति० ८। श्लो० १८२। अ० वङ्गीयं। आ० देशीयकागजः। का० शकाब्दाः १७२९। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। अथ यजुर्वेदोक्तसन्ध्याप्रयोगः। आदौ कुशस्नान।
ॐ शन्न आपो धन्वन्या शमनः सन्तु नूप्याः (?) इत्यादि।

समाप्तिवा०। नमो मण्डलद्वीपाय शिरोरत्नाय धूर्जटिकलाभिर्वर्द्धमानाय नमः सोमाय चारवे ॐ चन्द्राय नमः। इति सन्ध्यापद्धतिः समाप्ता।

विषयः। प्रतिदिनब्राह्मणकर्त्तव्यत्रिसन्ध्यानुष्ठानोक्तिः।

No. CCCCLXXIII.

Karpúra-stava-ṭíká. A gloss, by Anantaráma, on a hymn to Durgá, entitled *Karpúra-stava*, or 'the camphor praise,' said to have been composed by Mahákála, one of the attendants of S'iva. The hymn occurs under the name of Syámástotra under No. CCCCXVII, and is there said to be an extract from the *Víra Tantra*.

४७३। कर्पूरस्तवटीका।

ग्रन्थकारः——?

विवरणं। प्रायः शुद्धं प्राचीनञ्च। प० ६। पङ्क्ति० ५। श्लो० १२६। अ० वङ्गीयं। आ० देशीयकागजः। का० शकाब्दाः १७२६। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। कर्पूरमित्यादि। कर्पूरमित्यत्र ककाररेफयोर्मध्यमपरिरहितं, अकाररेफपकारोकाररहितमित्यर्थः।

समाप्तिवा०। प्रतिजनु प्रतिजन्मनि देवीभक्तो भक्तो भवति ॥ २२ ॥ इतीत्यादि।
इतिशब्द एवम्प्रकारार्थः, ते तव सर्वसिद्धिप्रदायकं स्तोत्रं कथितम्, इति टीका समाप्ता।

विषयः। कर्पूरस्तवार्थविवरणं।

No. CCCCLXXIV.

S'va-sañhitá. A Tantric dialogue in which S'iva, in reply to Nandi, discourses on, 1st, Prakṛití and Purasha; 2nd, the corporeality of Vishṇu, Mahádeva, &c.; 3rd, the constituent elements of creation; 4th, the condition of a Brahmachárí; 5th, the difference between the individual and the universal souls; 6th, the organs of sense; 7th, the organs of life, 8th, praise of the Deví; 9th, birth of the Deví; 10th, duties of the several orders and conditions of life; 11th, hymns to Brahmá, Vishṇu, Deví, &c.

४७४। शिवसंहिता।

ग्रन्थकारः———?

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च। प० ९२। पङ्क्ति० ७। श्लो० २५११। अ० वङ्गीयं। आ० तुलटकागजः। का०——?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। कैलासशिखरे रम्ये देवदेवं जगद्गुरुम्।
ध्यानतत्परमासीनं प्रसन्नमुखपङ्कजम्॥
सुरासुरशिरोरत्नरञ्जिताङ्घ्रियुगं प्रभुं।
प्रणम्य शिरसा नन्दी कृताञ्जलिरभाषत॥
नन्दुवाच। देव त्वं जगतामीश सर्वस्तुत्यो जगन्मयः।
विश्वकर्त्ता विश्वपाता विश्वहर्त्ता च सर्ववित्॥
त्वत्परा देवता नास्ति त्वमेव शरणं सताम्।
त्वत्प्रसादादहं देव सर्वं जानामि निश्चितम्॥
देवदेव महादेव संशयोस्ति महान्मम।
रहस्यं किञ्चिदिच्छामि प्रष्टुं त्वां भक्तवत्सल॥
देवतायास्त्वया कस्याः स्तोत्रमेतद्दिवानिशं।
पठ्यते भक्तिभावेन किमाश्चर्यमिदं प्रभो॥

समाप्तिवा०। खण्डितत्वात् शेषवाक्यं न लिखितं।

विषयः। अस्य एकादशपरिच्छेदाः प्राप्ताः। तत्र १ प्रथमपरिच्छेदे प्रकृतिपुरुषादिनिरूपणं। २ ये, विष्णुमहादेवादिशरीरपदार्थनिरूपणं। ३ ये, प्राकृतजीवदेहस्थितप्राणादिपदार्थकथनं। ४ र्थे, ब्रह्मचर्य्याद्याश्रमतद्धर्मादिकथनं। ५ मे, जीवात्मपरमात्मनोः परस्परतारतम्यनिरूपणादि। ६ ष्ठे, शब्दस्पर्शादिज्ञानसृष्टिप्रकारविशेषादिकथनं। ७ मे, सृष्टपदार्थकतिपयनामदेहतत्त्वादिकथनं। ८ मे, देव्या माहात्म्यवर्णनादि। ९ मे, देवीजन्मोपाख्यानादि। १० मे, वर्णाश्रमाचारादिनिरूपणम्। ११ शे, ब्रह्मविष्णुदेव्यादिस्तवकथनादि।

No. CCCCLXXV.

Gáyatrí-hridaya. Origin, meaning and use of the Gáyatrí in the adoration of the Universal soul,—alleged to have been described by Brahmá in reply to a query of Vasishṭha.

४७५ । गायत्रीहृदयम् ।

ग्रन्थकारः——?

विवरणं । प्रायः परिशुद्धं प्राचीनञ्च । प० ६ । पङ्क्तिः० ५ । स्लो० ९० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । अथ गायत्रीहृदयम् । अथातो वशिष्ठः स्वयम्भुवमपृच्छत् भगवन् गायत्रीं नो ब्रूहि । श्रीब्रह्मोवाच । ब्रह्मज्ञानोत्पत्तिप्रकृतिं गायत्रीं व्याख्यास्यामः ।

समाप्तिवाक्यं । इहामुत्र च सर्वत्र सुखमाप्नोति मानवः ।
गायत्रीहृदयं नित्यं++यो ब्राह्मणः पठेत् ॥
गायत्र्याः षष्टिसहस्रलक्षत्रयजपस्य फलं लभते ।
सर्वतीर्थेषु स्नातो भवति । सर्व वेदे ज्ञातो (?) भवति ।
सर्ववेदाधीती भवति । इति गायत्रीहृदयं समाप्तम् ।

विषयः । गायत्र्युत्पत्तितदर्थतदृषिवर्णादिकथनं ।

No. CCCCLXXVI.

Gaurikanchulíká, 'or the boddice of Gaurí.' An astro-medical dissertation, forming the last chapter of *Gopála Sañhitá.* Contents: discrimination of the age of the moon, the day of the week, and the influence of the Nakshatras, when collecting herbs or digging out roots and simples; duration of disease influenced by the Nakshatras; treatment of herpes, gonorrhœa, glandular swellings on the neck, &c.; preparation of conserves with silk-cotton tree, *plumbago zeylanica*, *vitex negundo* and other substances, for securing perpetual juvenescence.

४७६ । गौरीकञ्चुलिका ।

ग्रन्थकारः——?

विवरणं । प्रायः परिशुद्धं प्राचीनञ्च । प० १५ । पङ्क्तिः० ७ । स्लो० १२० । अ० वङ्गीयं । आ० देशीयकागजः । का०——? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । देव्युवाच । ज्ञातं तव प्रसादेन यथा कालस्य वञ्चनं ।

मन्त्रस्य सारसम्भूतमिदानीमौषधं वद ॥

समाप्तिवा०। मृगहस्ताविशाखाश्च ज्येष्ठामूलानुराधिकाः।

धनिष्ठा शतभिषा चैव हितमौषधभक्षणम् ॥ इति गौरीकञ्चुलिका समाप्ता।

विषयः। ओषधिखननोत्पाटनादौ तिथिवारनक्षत्रादिनियमः। नक्षत्रविशेषे रोगोत्पत्तौ तद्भोगकालसाध्यासाध्योक्तिः। दद्रुप्रमेहगण्डमालादिविविधरोगविशेषचिकित्सा। शरीरजराविनाशकशाल्मलीचित्रकनिर्गुण्ड्यादिकल्पकथनम् ॥

No. CCCCLXXVII.

Kálí-kádi-sahasranámá-stuti-ratna-ṭíká. A commentary, by Púrṇánanda Paramahañsa, on a hymn in praise of Kálí. The hymn comprises a thousand epithets, every one of which begins with the letter क = k, and is an extract from the *Mahákála Sañhitá* where it is named *Sundarí-s'aktidána.*

४७७। सुन्दरीशक्तिदानाख्यकालीकादिसहस्रनामस्तुतिरत्नटीका।

ग्रन्थकारः पूर्णानन्दपरमहंसः।

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च। प० २६। पङ्क्ति० १२। श्लो० ११४४। आ० वर्त्तुलं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। कैलासशिखरे देवी शङ्करं पप्रच्छ। कैलासशिखरे किम्भूते, रम्ये, नानारत्नविभूषिते, नानावृक्षलतया आकीर्णे, व्याप्ते, नानापक्षिवरैर्युते, चतुर्मण्डपसंयुक्ते। चतुर्मण्डल- इति क्वचित्पाठः।

समाप्तिवा०। सर्वविद्याधिपो भवेत्। शून्यालये इत्यादि। एषु स्थानेषु सर्वकामार्थसिद्धये सहस्रनामाख्यस्तोत्रं पठेदिति ॥

इति श्रीपूर्णानन्दपरमहंसविरचिता कालीकादिसहस्रनामस्तुतिरत्नटीका समाप्ता।

विषयः। ककारादिशब्दक्रमपठितकालीसहस्रनामार्थविवरणम्।

No. CCCCLXXVIII.

Sundarí-s'aktidána. A hymn to Kálí, by Ádinátha Mahákála. Vide No. CCCCLXXVII.

४७८। सुन्दरीशक्तिदानं।

ग्रन्थकारः आदिनाथमहाकालः।

विवरणं। प्रायः परिशोधितं प्राचीनञ्च। प० २२। पङ्क्ति० ७। श्लो० ४६४। अ० वङ्गीयं।
आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। कैलासशिखरे रम्ये नानारत्नविभूषिते।
नानावृक्षलताकीर्णे नानापक्षिरवैर्युते॥
चतुर्मण्डपसंयुक्ते शृङ्गारमण्डपान्विते।
समाधौ संस्थितं शान्तं क्रीडन्तं योगिनीप्रियं॥
तत्र मौनधरं दृष्ट्वा देवी पप्रच्छ शङ्करम्।

समाप्तिवा०। इति निगदितमशेषं कालिकावर्णरूपं प्रपठति यदि भक्त्या सर्वसिद्धीश्वरः स्यात्।
अभिनवसुखकामं सर्वविद्याभिरामं भवति सकलसिद्धिः सर्ववीरादिसिद्धिः॥
इति सङ्क्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि।
इति श्रीमदादिनाथमहाकालविरचितायां महाकालसंहितायां कालीकालसंवादे सुन्दरीशक्तिदानाख्यं कालीस्वरूपं सहस्रनामस्तोत्रं समाप्तम्।

विषयः। ककारादिशब्दक्रमेण कालीसहस्रनामकथनं।

No. CCCCLXXIX.

Víjakosha. Explanations of mystic mantras—an extract from the *Bhairava Tantra.* By Krodhís'a-bhairava.

४७९। वीजकोषः।

ग्रन्थकारः क्रोधीशभैरवः।

विवरणं। प्राचीनमपरिशोधितञ्च। प० ५। पङ्क्ति० ६। श्लो० ७५। अ० वङ्गीयं।
आ० देशीयकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। अथ वक्ष्ये मनोः कोषं कथितं भूतडामरे। क्रमशो वीजविधानं तत्र शाक्तादीनां विज्ञानं।

समाप्तिवा०। किङ्करी पिशिताक्षी च किन्नरी च मनोहरी।
ध्वाङ्क्षवैतालिकं फेत्कारिणीशूलपाशधरे (?)॥
चतुर्विंशतिवीजानि तन्त्रे स्मर्यश्चडामरे (?)।
इति श्रीमत्क्रोधीशभैरवविरचिते भैरवतन्त्रे वीजकोषः॥

विषयः। ओं श्रीं इत्यादि चतुर्विंशतिवीजविशेषोद्धारः।

No. CCCCLXXX.

Gañgástava. Hymn, by Bhagíratha, in praise of the river Ganges: an extract from Vrihaddharma Purána. This is different from the works noticed under Nos. CCCCLV and CCCCLVIII.

४८०। गङ्गास्तवः, वृहद्धर्मपुराणमध्यमखण्डीयः।

ग्रन्थकारः———?

विवरणं। प्राचीनं प्रायः परिशुद्धञ्च। प॰ १०। पङ्क्ति॰ ६। श्लो॰ २०५। अ॰ वङ्गीयं। आ॰ देशीयकागजः। का॰—। स्था॰ भारतवर्षीयगवर्णमेण्टः।

प्रा॰ वाक्यं। शुक उवाच। अथ देवी तदा गङ्गा तपस्यन्तं भगीरथं।
आत्मानं दर्शयामास श्वेतं चारु चतुर्भुजम्॥

समाप्तिवा॰। शुक उवाच। इत्युक्ता सा तदा देवी तत्रैवान्तरधीयत।
भगीरथोपि राजर्षिरात्मानं बह्वमन्यत॥
इति वृहद्धर्मपुराणे मध्यमखण्डे गङ्गास्तवः।

विषयः। भगीरथकृतगङ्गास्तुतिः।

No. CCCCLXXXI.

Gáyatrí-bráhmanollása Tantra. Five chapters of the *Kámadhenu Tantra*, containing: 1st, rules for the repetition and meditation of the Gáyatrí; 2nd, purport of the words *bhur*, *bhuva* and *sva* (called *vyáhriti*) in the Gáyatrí; 3rd, the object of the Gáyatrí; 4th, the brahminical thread, the vehicle of Gáyatrí; 5th, the daily triple worship, prayers, &c.

४८१। गायत्रीब्राह्मणोल्लासतन्त्रं, सूचीपत्रसहितं।

ग्रन्थकारः———?

विवरणं। प्राचीनं प्रायः परिशुद्धञ्च। प॰ ३८। पङ्क्ति॰ ६। श्लो॰ ८२५। अ॰ वङ्गीयं। आ॰ देशीयकागजः। का॰—?। स्था॰ भारतवर्षीयगवर्णमेण्टः।

प्रा॰ वाक्यं। श्रीदेव उवाच। अधुना सम्प्रवक्ष्यामि गायत्रीं परमाचराम्।
स्मरणात् सर्वपापेभ्यो मुक्तो भवति तत्क्षणात्॥

समाप्तिवा॰। तेऽपापाः प्रययुः शीघ्रं स प्रययौ स्थानमुत्तमम् (?)।
बलिदानं विना हत्यागत्या सर्वत्र गर्हिता॥
प्रसङ्गात्कथिता हत्या बलिदानं विना यथा।

इति कामधेनुतन्त्रे आगमसन्दर्भे ज्ञानदर्पणे श्रीदेवदेवीसंवादे आत्मज्ञाननिरूपणं गायत्रीब्राह्मणोल्लासतन्त्रं समाप्तम्॥

विषयः। अत्र पञ्च पटलाः सन्ति। १ प्रथमे पटले ध्यानजपादिविविधगायत्र्युपयोगिविधानकथनं। २ ये, भूरादिव्याहृत्यर्थनिरूपणादि। ३ ये, गायत्रीजपस्वरूपादिकथनं। ४ र्थे, गायत्र्यावाहनयज्ञोपवीतनिर्माणादिकथनं। ५ मे, सन्ध्योपासनादयुक्तिः।

No. CCCCLXXXII.

Tripurá-sára-samuchhaya Ṭíká. A commentary, by Govinda S'armá, on the *Tripurá-sára-samuchhaya*, a treatise on the worship of Tripurá.

४८२। त्रिपुरासारसमुच्चयटीका।

ग्रन्थकारः गोविन्दशर्मा।

विवरणं। प्रायः परिशुद्धं प्राचीनञ्च। प० ४०। पङ्क्तिः० ७। श्लो० ११२५। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। नत्वा शङ्करचरणं श्रीमद्गोविन्दशर्मणा।
त्रिपुरासारटीकेयं रच्यते सार+ +ना॥
तस्मै दिशे सततमञ्जलिरेष पौष्पः
प्रक्षिप्यते मुखरितो मधुरैर्द्विरेफैः।
जागर्त्ति यत्र भगवान् गुरुचक्रवर्त्ती
विश्वोदयप्रणयनाटकसूत्रधारः॥

समाप्तिवा०। तेजोविशेषणं जनयति तद्बोधं करोति। कीदृक् मन्त्रः, शक्तितन्त्रनिवितः कुशलः, तथा सूत्राद्यमालायुक्तः सूत्ररूपाकारः, अकारादिक्षकारान्तवर्णमालायुक्तः, एवं चिन्तनं नित्यजपरूपो भवति॥
इति श्रीगोविन्दाचार्यविरचितायां श्रीत्रिपुरासारसमुच्चयटीकायां पदार्थादर्शे दशमः पटलः समाप्तः।

विषयः। त्रिपुरासारसमुच्चयार्थव्याख्यानं।

No. CCCCLXXXIII.

Aparokshánubhúti alias *Aparokshánubhava.* A short metrical paraphrase of the Vedanta scheme of salvation, touching most of the leading topics of the doctrine, which a candidate for release from the trammels of the world has to bear prominently in mind. By S'añkara A'charyya. Hall's *Contributions*, 104. Aufrecht's Bodleian Catalogue, 223.

४८३ । अपरोक्षानुभूतिः ।

ग्रन्थकारः शङ्कराचार्य्यः ।

विवरणं। प्रायः शुद्धं प्राचीनञ्च । प० ४ । पङ्क्ति० १०—१२ । श्लो० १५२ । अ० वङ्गीयं ।
आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । श्रीहरिं परमानन्दमुपदेष्टारमीश्वरं ।
व्यापकं सर्व्वलोकानां कारणं तं नमाम्यहं ॥
अपरोक्षानुभूतिर्वै प्रोच्यते योगसिद्धये ।
सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥

समाप्तिवा०। परिपक्वं मनो येषां केवलो (?) पञ्चसिद्धिदः ।
गुरुदैवतभक्तानां सर्व्वेषां सुलभो भवेत् ॥
श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमतशङ्कराचार्य्यविरचिता अपरोक्षानुभूतिः
समाप्ता ।

विषयः । देहात्मबुद्ध्यादिनिराशकज्ञानोपदेशः ॥

No. CCCCLXXXIV.

Svarodaya. An Astrological dissertion on the indications which the human breath affords under particular circumstances and astral conjunctions of the duration of life and future events. The *Svaratattva* of Jivanátha, belonging to the Bodleian collection (p. 337), is described by Aufrecht, as having the alternative title of *Svarodaya*, but its initial and concluding verses are different. The subject, however, of both the works appears to be the same; and some of the verses quoted by Aufrecht occur in the MS. under notice.

४८४ । स्वरोदयं ।

ग्रन्थकारः ——?

विवरणं। प्रायः शुद्धं प्राचीनञ्च । प० १२ । पङ्क्ति० ११ । श्लो० ४९४ । अ० वङ्गीयं । आ०
तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । श्रीपार्व्वत्युवाच । देवदेव महादेव सर्व्वज्ञ परमेश्वर ।
कथयस्व प्रभो ज्ञानं कृपां कृत्वा दयानिधे ॥
कथं ब्रह्माण्डमुत्पन्नं कथं वा परिवर्त्तते ।

समाप्तिवा०। इदं स्वरोदयं शास्त्रं मर्व्वज्ञेन प्रकाशितं ।
सर्व्वातिप्रेमवत्त्वेन लोकानां हितकाम्यया ॥

एवं प्रवर्त्तितं लोके प्रसिद्धं सिद्धयोगिभिः ।
आचन्द्रार्कग्रहं यावत् पठतां सिद्धिदायकं ॥
इति श्रीउमामहेश्वरसंवादे स्वरोदयं शास्त्रं समाप्तं ।

विषयः । नासिकारन्ध्रविनिर्गतदक्षवामश्वासफलस्य इडादिनाड्यादीनां च विवरणं ।

No. CCCCXXXV.

Pavanavijaya. Tantric form of Yoga meditation. The creation, support and the dissolution of the universe; the different effects of the vital air escaping at death through one of the nostrils or the mouth; the symptoms of death, &c.; regulation of breath in inspiration and expiration; suppression of breath; circulation of vital air through the three principal arteries, *idá*, *pingalá* and *susumná*. Aufrecht's Bodleian Catalogue 107.

४८५ । पवनविजयः ।

ग्रन्थकारः——?

विवरणं । प्रायः शुद्धं प्राचीनञ्च । प० २४ । पङ्क्ति० ६ । श्लो० २९२ । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० भारतवर्षीयगवर्णमेण्टः ।

प्रा० वाक्यं । महेश्वरं नमस्कृत्य शैलजां गणनायकं ।
गुरुञ्च परमात्मानं भयसंसारतारणं ॥
श्रीदेव्युवाच । देवदेव महादेव कृपां कृत्वा ममोपरि ।
सर्वसिद्धिकरं ज्ञानं कथयस्व महाप्रभो ॥
कथं ब्रह्माण्डमुत्पन्नं कथं वा परिवर्त्तते ।
कथं विलीयते देव वद ब्रह्माण्डनिर्णयम् ॥

समाप्तिवा० । चिन्तयेत्परमात्मानं यो वदेत्स भविष्यति ।
इति श्रीशिवोमासंवादे नवप्रकरणान्वितपवनविजयः समाप्तः ।

विषयः । दक्षिणवामनासारन्ध्रविनिर्गतवायोर्युद्धकृषिरोगादिकतिपयकार्येषु शुभाशुभफलप्रदत्वकथनं ।

No. CCCCLXXXVI.

Mátṛiká-jaganmañgala-kavacha. A charm bearing the name of Mátṛiká, a form of Durgá. This work professes to be an extract from the *Chintámáṇi Tantra.*

४८६ । माटकाजगन्मङ्गलकवचं ।

ग्रन्थकारः——?

विवरणं। प्रायः शुद्धं प्राचीनञ्च। प० ६। पङ्क्ति० ८। श्लो० १२६। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। ईश्वर उवाच। शृणु कमलपत्राक्षि माटकां ब्रह्मरूपिणीं।

समाप्तिवा०। स एव धन्यो यस्यार्थे महेशो व्यग्रमानसः॥

इति चिन्तामणितन्त्रे देवीश्वरसंवादे माटकाश्रीजगन्मङ्गलं नाम कवचं समाप्तं।

विषयः। माटकाकवचतद्धारणप्रशंसादिकथनं।

No. CCCCLXXXVII.

Grantha-sañgraha. This is another exemplar of No. CCCXXVII., but it includes seven chapters, and not six as the latter, substituting the last in the place of the Bengali maxims of Khaná. Contents: 1st, horoscopic calculation of the life of an infant; 2nd, influence of certain conjunctions of planets and stars at the birth of a child on the life of its mother; 3rd, ditto ditto on the life of its father; 4th, calculations for ascertaining the sex of a person from his horoscope; 5th and 6th, effect of the planets according to their positions on the prospects of a child; 7th, fatal conjunctions.

The work professes to be a compilation by Prajápati Dása, a Vadya by caste, from the *Varaha Sutra* and other leading works on astrology.

४८७। ग्रन्थसङ्ग्रहः।

ग्रन्थकारः प्रजापतिदासः।

विवरणं। प्रायः शुद्धं प्रचीनञ्च। प० १०। पङ्क्ति० ६—७। श्लो० २२५। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। इष्टदेवं नमस्कृत्य गोपालं कुलदैवतं।

श्रीप्रजापतिदासेन क्रियतेग्रन्थसङ्ग्रहः॥

नवग्रहान्नमस्कृत्य देवीं सरस्वतीं तथा।

प्रणिपत्य गुरुं किञ्चिज् ज्योतिर्ग्रन्थो निगद्यते॥

सद्वैद्यार्हं कुले जातः परिहारः कृतो मया।

ज्योतिर्वित्सु च सर्वेषु ब्राह्मणेषु विशेषतः॥

वराहकृतसूत्रेण यत्किञ्चित् क्रियते मया।
ज्योतिर्विदः प्रपश्यन्तु ग्रहाणां सुविचारकाः॥
पञ्चस्वराभिधानञ्च ग्रन्थं निदानसंश्रयम्।
किञ्चिदुद्देशगम्यञ्च स्वल्पं वच्यामि शाश्वतम्॥
ज्योतिर्विद्भिः पुरा सर्वैः कृतो निर्णयविस्तरः।
तन्वादिव्ययपर्यन्तं राशिचक्रे व्यवस्थितम्॥
धर्मकर्मसुखं दुःखं मूर्त्यादिसुतबान्धवम्।
तत्र बुद्ध्वा कुमतयो वल्गयन्ति यथातथा॥
अपास्य मरणं जीवं चाहयन्ति (?) शुभाशुभम्।
मरिष्यति यदा दैवात् को भोक्ष्यति शुभाशुभम्॥

समाप्तिवा०। आयुर्दायं तथारिष्टं यदुक्तं ग्रन्थसङ्ग्रहे।
पापदृष्टे भवेद्रिष्टं शुभदृष्टे शुभप्रदः॥
इति सप्तमोऽध्यायः। समाप्तोऽयं ग्रन्थः।

विषयः। अत्र सप्ताध्यायाः सन्ति। तत्र १ मे, पताकीचक्रविचारानुसारेण शिशुरिष्टिकथनादि। २ ये, शिशुप्रसवकाले स्थानविशेषस्थितग्रहविशेषानुसारेण मातृरिष्टिकथनं। ३ ये, तन्वादिभावविशेषस्थितग्रहविशेषानुसारेण पितृरिष्टिकथनं। ४ थे उत्पन्नस्य जन्तोः स्त्रीपुंनपुंसकादिज्ञानप्रकारः। ५ मे, ६ ष्ठे, तन्वादिभावस्थितरव्यादिग्रहशुभाशुभफलोक्तिः। ७ मे, मृत्युयोगविचारः।

No. CCCCLXXXVIII.

Prasna-kaumudí. A manual of foretelling, or ready means of calculating replies to recondite questions. By Vibhákara Áchár yya.

४८८। प्रश्नकौमुदी।

ग्रन्थकारः विभाकराचार्य्यः।

विवरणं। प्रायः शुद्धं प्राचीनञ्च। प० १०। पङ्क्ति० ८। श्लो० ३४५। अ० वङ्गीयं
आ० तुलटकागजः। का०——?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। शक्त्या युक्तं प्रणम्यादौ शिवं सन्तोषतः सतां।
श्रीमान् विभाकराचार्य्यः करोति प्रश्नकौमुदीं॥
प्रश्नधर्म्मौनिनः सर्वे सन्तः सर्वगुणान्विताः।
शिवशक्तिप्रमाणेन प्रश्नं वक्तुं समोद्यमः॥

समाप्तिवा०। एवं कृते विधानेन धनलाभो भविष्यति ॥

इति प्रश्नकौमुद्यां धनोद्धारो नाम द्वादशोऽध्यायः समाप्तः।

विषयः। धातुमूलजीवघटितविविधप्रश्नगणनाप्रकारकथनं।

No. CCCCLXXXIX.

Jyotiḥ-ságara-sára. Judicial astrology, by Mathures'a. Contents: 1, conjunctions of the *tithis* or ages of the moon, days of the week, and the constellations; 2, the duration of the influence of each of the planets on human life, and its effects; 3-5, calculation of auspicious conjunctions of planets and stars for marriage, first entrance of a bride into her husband's house, ceremonies during conception, birth, first eating of rice, and other domestic observances. I. O. 1052.

४८९। ज्योतिःसागरसारः।

ग्रन्थकारः मथुरेशः।

विवरणं। प्रायः शुद्धं प्राचीनञ्च। प० १०। पङ्क्ति० ८। श्लो० ५२५। अ० वङ्गीयं। आ० तुलटकागजः। का०——?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। जगदीशं हरिं नत्वा लोकानुग्रहकारिणं।

ज्योतिःसागरसारोयं मथुरेशेन रच्यते॥

समाप्तिवा०। अन्यदन्यत्र विज्ञेयं नोक्तं ग्रन्थस्य गौरवात्।

इति ज्योतिःशास्त्रसागरसारे पञ्चमोऽध्यायः समाप्तः॥

विषयः। अत्र पञ्चाध्यायाः सन्ति। तत्र १ मे, तिथिवारनक्षत्रयोगजाततत्तद्योगकथनम्। २ ये, राशिभोग-कालशुद्ध्यादिकथनं। तृतीयपञ्चमयोर्मध्ये विवाहवध्वागमनगर्भाधानपञ्चामृतजातकान्नप्राशनादिविविधकर्मणां शुभमुहूर्त्तादिनिरूपणं। अत्र तृतीयचतुर्थाध्यायनामोल्लेखो नास्ति।

No. CCCCXC.

Chandronmílana. An astrological miscellany compiled from various works, but principally from the following five Tantras, *viz. Rudra-yámala, Brahma-yámala, Vishṇu-yámala, Umá-yámala,* and *Budha-yámala,* as also the *Adíchúḍámaṇi,* a work said to have been compiled by the chief of the Jainas, that is, Jina himself. It contains directions for and the mode of foretelling the past, the present, and the future; loss, gain and success in warfare; accidental death; attainment of wealth; human

thoughts; the contents of a closed fist; hidden property; empty receptacles; the names of thieves and those of their villages; nights, figures and dates; assaults on forts; famine; the measure of rain during the rainy season; overthrow of kings; revolutions; the sites for tanks, wells, fountains and gardens; the locale of fish; merits of horses, elephants and other animals; trade, sale and purchase; the councils of kings ***; the transition to heaven or hell after death; in short all and everything that exists in the three regions of the universe, and occurring among men, gods and titans. *Index Of.* 854.

४९० । चन्द्रोन्मीलनं ।

ग्रन्थकारः—?

विवरणं। प्रायः शुद्धं प्राचीनञ्च। प० १९। पङ्क्ति० ६। श्लो० ४८५। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। नमस्कृत्य गणाधीशं विश्वरूपं त्रिलोचनं।
ब्रह्मविष्णू तथा शुक्रं सर्व्वरूपां सरस्वतीं॥
स्वरसञ्ज्ञा गणाः सर्वाः (?) अनिलं सूर्यचन्द्रकौ।
पृथिव्यां पञ्चभूतानि स्मरेन्महिषमर्द्दिनीम्॥
सप्तार्द्धपीठदेवांश्च चतुःषष्टिञ्च योगिनीम्।
नमस्कृत्य मया सर्वं दर्शनाद्गुरुभाषितं॥
जामलं ब्रह्मरुद्रस्य विष्णोर्जामलमेव च।
उमाया जामलं ज्ञानं पञ्चमं बुधजामलम्॥
आदिचूडामणेः सारं स्वयं जैनेन्द्रभाषितम्।
तच्च दृष्टं मया ज्ञानं ग्रन्थभेदमनेकधा॥
सारात् सारतरं ज्ञानं क्षीरे सर्पिर्यथा स्थितम्।
समुद्रस्य यथा रत्नं पुष्पमध्ये यथा मधु॥
पाषाणान्निःसृतं सर्वं हिरण्यादि यथाक्रमम्।
तथैव सर्वशास्त्राणां सारभूतं मया कृतम्॥
दृष्ट्वा शास्त्राण्यनेकानि कोटिभेदशतानि च।
तेन दृष्टेन शास्त्रेण चन्द्रोन्मीलनभाषितम्॥
अतीतानागतञ्चैव वर्त्तमानं शुभाशुभम्।
लाभो हानिर्जयो युद्धे अपमृत्युर्धनागमः॥
मनोमध्ये च याचिन्ता मुष्टिभेदमनेकधा।
लुकिश्च द्रव्यशून्यञ्च (?) ग्रामनाम च तस्करं॥

निशाभोगं तथा ज्ञेयं सन्ध्या च दिनमेव च।
कोटभङ्गञ्च दुर्भिक्षं प्राहषि जलदागमम्॥
छत्रभङ्गं नरेन्द्राणां राष्ट्रभङ्गस्य लक्षणम्।
वापीकूपजलोद्देशमुद्यानं मत्स्यमन्दिरम्॥
द्विषतं+षष्टिसङ्क्रमर्घकाण्डस्य (?) लक्षणम्।
गजादिसर्वनस्येषु (?) वाणिज्यं क्रयविक्रयं॥
परोक्षमन्त्रो भूपानां पात्रखण्डञ्च मुद्रितं (?)।
परधी रमते यत्र जीवन्मृत्युमुपेक्षया॥
स्वपस्य सन्धियुक्तस्य उड्डं नष्टञ्च जातकम्।
ज्ञातव्यं भूमिभागञ्च सकलं निष्फलानि च॥
मृतेपि गम्यते यत्र मोक्षञ्च नरकानि च।
अन्यच्च त्रिषु लोकेषु वर्त्तते सुरदानवैः॥
उद्धृतञ्च मया ज्ञानं ज्ञातव्यं सचराचरं।
इति चन्द्रोन्मीलने तत्त्वसम्बन्धः प्रथमप्रकरणम्॥
अतः परं प्रवक्ष्यामि वर्णवर्गं यथाविधि।
एकैकस्य यथाभेदं कथयामि नसंशयः॥ इत्यादि।

समाप्तिवा०। बुद्धिभ्रंशो प्रजायेत ज्ञानं नैव स्फुटे (?) भवेत्।
एतैर्दोषैर्विनिर्मुक्तिं कठिनीं मूर्छ्रिं सन्न्यसेत्॥
इति चन्द्रोन्मीलनं समाप्तं॥

विषयः। वक्तव्यविषयप्रतिज्ञाप्रश्नाक्षरनिर्णयातीतानागतवर्त्तमानलाभालाभजयाजयधातुमूल-जीवादिविषयकप्रश्नगणनाविवरणं।

No. CCCCXCI.

Chhándogya-bháshya. A commentary on the first two chapters of the Chhándogya Bráhmaṇa of the Sáma Veda, in the order in which they have been quoted by Bhavadeva in his *Das'akarma paddhati.* The mantras refer principally to the marriage ceremony. Sáyaṇa Ácharya is said to have commented upon this portion of the Brahmana; but the introductory verses which generally precede his works are here wanting, and the last two or three folia of the MS. being missing, it is difficult to make out the author. The last eight chapters of the Bráhmaṇa, constitute the Chhándogya Upanishad.

४९१। छान्दोग्यभाष्यं।

ग्रन्थकारः——?

विवरणं। प्रायः शुद्धं प्राचीनञ्च। प० २०। पङ्क्ति० ६। श्लो० ९५०। अ० वङ्गीय। आ० तुलटकागजः। का०—?। स्था० कलिकातास्था एसियाटिक् सोसाइटी।

प्रा० वाक्यं। शङ्कराय नमस्तस्मै भक्तानां यत्प्रसादतः।

सूक्ष्मान्तर्हितदूरस्था भावा भान्ति यथायतः॥

स्थाणुरिव भारहाराः किलाद्रूदधीत्य वेदं (?)।

न विजानाति योर्थं तत्र न स्वतनकिमेति (?)॥

अतो मन्त्रार्थज्ञाने यतितव्यम्। इत्यादि।

समाप्तिवा०। खण्डितत्वात् परिसमाप्तिवाक्यं न लिखितं।

विषयः। वैदिकमन्त्रार्थविवरणं।

No. CCCCXCII.

Padártha-dharma-sañgraha. A Vaisheshika treatise on matter and its attributes. Anonymous.

४९२। पदार्थधर्म्मसङ्ग्रहः।

ग्रन्थकारः——?

विवरणं। प्रायः शुद्धं प्राचीनञ्च। प० १०। पङ्क्ति० ५। श्लो० १२५। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः।

पदार्थधर्म्मसङ्ग्रहः प्रवक्ष्यते महोदयः॥

द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसहेतुः। तच्चेश्वरदेशनाभिव्यक्ताद्धर्मादेव।

अथ के ते द्रव्यादयः पदार्थाः, किञ्च तेषां साधर्म्यं वैधर्म्यञ्चेति।

समाप्तिवा०। खण्डितत्वात् परिसमाप्तिवाक्यं न लिखितं।

विषयः। द्रव्यादिषट्पदार्थसाधर्म्यवैधर्म्यविवरणं।

No. CCCCXCIII.

Vyávasthárṇava. Judicial astrology, principally devoted to the ascertainment of auspicious and inauspicious stellar conjunctions for civil undertakings. By Raghunátha Sárvabhauma. I. O. 638.

४९३। व्यवस्थार्णवः।

ग्रन्थकारः रघुनाथसार्वभौमः।

विवरणं। प्रायः परिशुद्धं। प० ४३। पङ्क्ति० ७। श्लो० १८००। अ० वङ्गीयं। आ० तुलटकागजः। का० शकाब्दाः १५१३। स्था० भारतवर्षीयगवर्णमेण्टः।

प्रा० वाक्यं। नत्वा श्रीरघुनाथ ईश्वरपदाम्भोजं गुरूंश्चादरान्
मन्वादिस्मृतिसङ्ग्रहार्थमवधार्य्याचार्य्यवाक्येन च।
बालानां पटुताविधायकममुं स्मार्त्तव्यवस्थार्णवं
रायश्रीयुतराघवस्य नृपतेरादेशतो निर्ममे॥
तिथिसङ्क्रान्त्यशौचेषु द्रव्यशुद्ध्यधिकारिणः।
प्रायश्चित्तोद्वाहदायेष्वपि वाच्योत्र निर्णयः॥ तत्रादौ तिथिव्यवस्था।

समाप्तिवा०। शाकेऽग्निमङ्गलहरास्यकलानिधाने
Beginning. अथ कुमारीपूजा। एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती।
त्रिवर्षा च त्रिधामूर्त्तिः चतुर्वर्षा च कालिका ॥
शुभगा पञ्चवर्षा च षड्वर्षा च उमा भवेत्।
सप्तभिर्मालिनी साक्षात् अष्टवर्षा च कुब्जिका ॥
नवभिः कालसन्दर्भा दशभिश्चापराजिता।
त्रयोदशे महालक्ष्मीर्द्विसप्ता पीठनायिका ॥
क्षेत्रज्ञा पञ्चदशभिः षोड़शे चाम्बिका भवेत् ॥ अथ पूजाक्रमः।

End. हस्ते वलयं धारयेत्। परिसमाप्तिवाक्यं नास्ति।

विषयः। कुमार्य्या अवस्थाभेदेनाभिधानान्तरकथनं, तदीयपूजानुष्ठानप्रतिपादनञ्च।

No. 637. दत्तकनिर्णयः।

Substance, country yellow paper. Folia, 2. Lines, 3—5 on a page. Extent, 40 s'lokas. Character, Bengali. Date ? Place of deposit, Krishnanagar, Pandit Nímachandra S'iromani. Appearance, old. Verse and prose. Generally correct.

Dattaka-nirnaya. An exposition of the law of adoption. By S'úlapáni. This work forms a part of the author's great digest of the Hindu Law, the *Smritiviveka.* Nearly the whole of it has been printed in Professor Bharatachandra S'iromani's *Dattaka s'iromani.*

Beginning. अथ दत्तकविवेकः। याज्ञवल्क्यः।
दद्यात् माता पिता वायं स्वपुत्रो दत्तको भवेत्। इति।

End. अथ देया तु कन्या स्यात्तद्दर्णस्य युधिष्ठिर।

Colophon. इति श्रीशूलपाणिमहामहोपाध्यायकृतदत्तकनिर्णयः समाप्तः ॥

विषयः। दत्तकपुत्रकरणविचारः।

No. 638. चिकित्सासङ्ग्रहः।

Substance, country yellow paper. Folia, 71. Lines, 6—7 on a page. Extent, 1810 s'lokas. Character, Bengali. Date ? Place of deposit, Krishnanagar, Rámakrishna Majumdár. Appearance, old. Verse. Incorrect.

Chikitsá-sañgraha alias *Gúḍhavákyabodhaka.* A treatise on Hindu medicine and therapeutics. By Chakrapáṇi Datta. The author, though modern, has considerable reputation and wrote several works on medicine. Vide ante p. 25.

Beginning. गुणत्रयविभेदेन मूर्त्तित्रयमुपेयुषे। त्रयीशाय त्रिनेत्राय त्रिलोकीपतये नमः॥
नानायुर्वेदविख्यातसद्वैद्यचक्रपाणिना।
क्रियते सङ्ग्रहो गूढवाक्यबोधकराचरः॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधं।
ततः कर्म्म भिषक् पश्चात् ज्ञानपूर्व्वं समाचरेत्॥

End. चतुः स्नेहे * * भावान। इतः खण्डितम्।

विषयः। षडङ्गपानीयं, सर्व्वज्वरः, पैत्तिकज्वरः, चातुर्भद्रिकावलेहिका, नवाङ्गं, वातपित्ताधिकारप्रभृतयो निरूपिताः।

No. 639. काव्यचन्द्रिका।

Substance, country yellow paper. Folia, 8. Lines, 4—5 on a page. Extent, 180 s'lokas. Character, Bengali. Date ? Place of deposit, Kṛishṇanagar, Rájá Satis'achandra Ráya. Appearance, old. Verse. Correct.

Kávya-chandriká alias *Gunálañkára-dosha.* An elementary treatise on rhetoric, embracing a summary of the ornaments and defects, of literary compositions, as also a classification of poetical writings. By Nyáyavágís'a, son of Vidyánidhi.

Beginning. सगुणा सालङ्कारा रसभावा दोषपरीहारा।
जगदनुरञ्जनशीला कविक्षतलीला सरस्वती जयति॥
विद्यानिधितनुजेन न्यायवागीशधीमता।
गुणालङ्कारदोषाख्या क्रियते काव्यचन्द्रिका॥

End. अलङ्कारमहाशास्त्रं समुद्रं रससागरं।
बालकस्य प्रबोधाय रचितं कतिचित् पदैः॥ परिसमाप्तिसूचकं वाक्यं नास्ति।

विषयः। काव्यप्रभेदरसदोषगुणालङ्कारादिनिरूपणं।

No. 640. तोषणी ।

Substance, country yellow paper. Folia, 13. Lines, 5 on a page. Extent, 186 s'lokas. Character, Bengali. Date ? Place of deposit, Krishnanagar, Rájá Satis'achandra Ráya. Appearance, old. Verse. Incorrect.

Toshaní. A Tántric compilation, on mystical rites called *Kulluká-setu*, *Mahá-setu* and *Nirvána-setu.* Anonymous.

Beginning. अथातो मया कुल्लुकासेतुश्चैर्म्महासेतुनिर्व्वाणयुक्तः सुगुप्तः ।
अनेकेषु तन्त्रेषु मन्त्रप्रदीपे मतां तोषणी वच्यते भुक्तिमुक्तौ (?) ॥
कुल्लुकां मूर्ध्नि सञ्जप्य हृदि सेतुं विचिन्तयेत् ।
महासेतुं विशुद्धौ तु सहस्रारे समुद्धरेत् ॥

End. कण्ठे दीपशिखाकारं घण्टां वैदूर्य्यसन्निभं ।
नैष्ठिके चन्द्रविम्बाभं भ्रूमध्ये रत्नवद्रुचिः ॥ परिसमाप्तिसूचकं वाक्यं नास्ति ।

विषयः । कुल्लुका-सेतु-महासेतु-निर्व्वाणादिकथनं ।

No. 641. अमरुशतकं ।

Substance, country yellow paper. Folia, 12. Lines, 2—6 on a page. Extent, 222 s'lokas. Character, Bengali. Date ? Place of deposit, Krishnanagar, Pandit Táráprasanná Bhattáchárjyá. Appearance, old. Verse. Incorrect.

Amarus'ataka. A collection of miscellaneous mostly amatory poetical pieces by Amaru. The author is held in high esteem as one of the greatest poets of mediæval times. A Bengali translation of this work has lately been published in Calcutta.

Beginning. ज्याकृष्टिवद्धखटकामुखपाणिपृष्ठ-प्रेङ्खन्नखांशुचयसम्वलितोऽम्बिकायाः ।
त्वां पातु मञ्जरितपल्लवकर्णपूर-लोभभ्रमद्भ्रमरविभ्रमभृत् कटाक्षः ॥ १ ॥

End. शृङ्गारसारपरमं रसदं कवीनां काव्यं मनोजमनवद्यमिति प्रसादम् ।
चक्रेऽमरुः कविगुरुः सुविचार्य्य सन्तः सन्तोषसन्ततिसुधाप्रकरं पिवन्तु ॥ १०१ ॥
इत्यमरुशतकं समाप्तम् ॥

विषयः । रसभावादिप्रोद्बोधकाश्लेषरहस्यार्थप्रतिपादनं ।

No. 642. महातन्त्रराजः ।

Substance, country yellow papar. Folia, 9. Lines, 6 on a page. Extent, 243 s'lokas. Character, Bengali. Date ? Place of deposit, Krishṇanagar, Paṇḍit Táráprasanna Bhaṭṭáchárya. Appearance, old. Verse. Incorrect.

Mahátantrarája. The essence of the Vedánta doctrine of salvation discussed from a Tántric stand-point.

Beginning. कैलासशिखरासीनं देवदेवं जगद्गुरुं ।
इच्छत्येवमुमा देवी ब्रह्मज्ञानं महेश्वरं ॥
कुतः सृष्टिर्भवेद् देव ! कुतः सृष्टिर्विनश्यति ।
ब्रह्मज्ञानं कथं देव सृष्टिसंहारवर्ज्जितं ॥

End. पुण्याख्यानमिदं देवि विचार्य्य ब्रह्मविद्भवेत् ।
निन्दया यान्ति नरकं नाहं चापि (?) महेश्वरि ॥

Colophon. इति पार्व्वतीशिवसंवादे ब्रह्मज्ञानमहातन्त्रराजे पञ्चमः पटलः । समाप्तश्चायं ॥

विषयः । तान्त्रिकसम्मतब्रह्मविद्या ।

No. 643. तन्त्रोक्तचिकित्सा ।

Substance, country yellow paper. Folia, 23. Lines, 6 on a page. Extent, 448 s'lokas. Character, Bengali. Date ? Place of deposit, Krishṇanagar, Paṇḍit Táráprasanna Bhaṭṭáchárya. Appearance, old. Verse. Incorrect.

Tantrokta-chikitsá. A Tántric compilation on medicine, charms, &c. Contents: medicinal herbs; treatment of fevers; do. of diabetes; do. of pthisis; do. of dysentery; do. of diseases of the mouth; do. of diseases of the nostrils; do. of dryness of the mouth; do. of diseases of the teeth; do. of colic; do. of boils; sleep; generative organs; conception, and diseases incident to that condition; conjugal love; sweetness of breath; charms for subjugating mankind; aphrodisiacs; means for promoting corpulency; antidotes to snake poison; cure for barrenness, &c.

Beginning. देव्युवाच । ज्ञातं भवत्प्रसादेन यथा कालस्य वञ्चनं ।
मन्त्रस्य सारसम्भूतमिदानीमौषधं वद ॥
येन सिद्ध्यन्ति देहानि सर्व्वकामप्रदानि च ।
जरारोगहरं कल्पं तद्वद त्रिपुरान्तक ॥

सन्त्यौषधान्यनेकानि मनुष्याणां हिताय च ।
पूर्व्वं तु यत् त्वया प्रोक्तं प्रत्यक्षं कथयस्व मे ॥

End. ॐ ह्रीं रक्ष चामुण्डे कुरु २ अमुकी । इतः खण्डिता ।

विषयः । औषधौषधिकथनम्, ज्वरचिकित्सा, बहुमूत्रचिकित्सा, कासचिकित्सा, रक्तातीसारचिकित्सा, मुखचिकित्सा, नासारोगचिकित्सा, मुखशुष्कताचिकित्सा, दन्तचिकित्सा, शूलचिकित्सा, व्रणविस्फोटकचिकित्सा, निद्राचिकित्सा, मैथुनचिकित्सा, गर्भोत्पादनं, गर्भचिकित्सा, दम्पतीप्रणयः, मुखवासः, जगद्वशीकरणं, वीर्य्यकरणं, स्थूलीकरणं, सर्पविषहरणं, स्त्रीवन्ध्यात्वहरणप्रभृतयः ।

No. 644. विवाहादिपद्धतिः ।

Substance, country yellow paper. Folia, 72. Lines, 5—6 on a page. Extent, 888 s'lokas. Character, Bengali. Date ? Place of deposit, Krishnanagar, Paṇḍit Táráprasanna Bhaṭṭácharya. Appearance, new. Prose. Incorrect.

Viváhádipaddhati. A manual of domestic rites. By Rámadatta. Contents : *S'ráddha* before an auspucious occasion, such as marriage &c. ; marriage ; first religious rites on the third month after conception ; second religious rites on the fourth month after conception ; a purificatory rite observed on the seventh month of pregnancy ; do. on the 8th month, rites after birth ; naming ; rite of bringing a child out of the house on the 4th month after birth to see the sun ; first feeding with rice ; tonsure ; puncture of the lobes of the ear ; putting on the sacrificial thread ; commencement of education ; return home from the tutor after the completion of religious education.

Beginning. अथ यजुषामाभ्युदयिकश्राद्धं । तत्र प्रातःस्नानादिकं कृत्वा कृतनित्यक्रियः सुप्रक्षालितपाणिपादः कृताचमनो गोमयोपलिप्तदेशे आसने उपविश्य दीपं प्रज्वाल्य प्राङ्मुखः शालग्रामे घटे वा विष्णुं सम्पूज्य स्वस्तिवाचनं कृत्वा एते गन्धपुष्पे ॐ आदित्यादिनवग्रहेभ्यो नम इत्यनेन सम्पूज्य सङ्कल्पं कुर्य्यात् ।

End. गुरवे वृषं तन्मूल्योपकल्पितं वा दक्षिणां दद्यात् ।

Colophon. इति श्रीराजपण्डितरामदत्तविरचितविवाहादिपद्धतिः समाप्ता ।

विषयः । १, आभ्युदयिकश्राद्धं । २, विवाहः । ३, चतुर्थीकर्म्म । ४, पुंसवनं । ५, सीमन्तकर्म्म । ६, नस्तःकरणं । ७, जातकर्म्म । ८, नामकरणं । ९, निष्क्रामणं । १०, अन्नप्राशनं । ११, चूडाकरणं । १२, कर्णवेधः । १३, उपनयनं । १४, विद्यारम्भः । १५, समावर्त्तनं ।

No. 645. देवीमाहात्म्यटीका ।

Substance, country yellow paper. Folia, 41. Lines, 7—9 on a page. Extent, 1645 s'lokas. Character, Bengali. Date ? Place of deposit, Krishṇanagar, Paṇḍit Táráprasanna Bhaṭṭáchárya. Appearance, old. Prose. Incorrect.

Devímáhátmya Ṭíká. A commentary on the Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Gadádhara Tarkáchárya. Vide ante, p. 202.

Beginning. अथ चण्डीविवरणम्। चण्डी चिग्रक्तिरूपा च्छ्यादिषु थक्ता पूजापद्धतौ च त्रीणि ध्यानानि सात्विकादीनि । वाच्यवाचकयोरैक्या चण्डीति । चण्ड्याः शतादिपाठेनेत्यादि यश्चण्डीपाठनियत इत्यादि ज्ञेयं। रुद्रचण्डी चास्ति तत्राप्यस्या नाम ।

End. मन्वन्तराधिप इत्यर्थः ।

Colophon. इति गदाधरतर्काचार्य्यकृता देवीमाहात्म्यटीका समाप्ता ।

विषयः । मार्कण्डेयपुराणान्तर्गतचण्डीस्तोत्रतात्पर्य्यार्थविवरणं ।

No. 646. प्रेतकृत्यादिनिर्णयः ।

Substance, country yellow paper. Folia, 15. Lines, 6 on a page. Extent, 303 s'lokas. Character, Bengali. Date ? Place of deposit, Krishṇanagar, Paṇḍit Táráprasanna Bhaṭṭáchárya. Appearance, old. Prose. Incorrect.

Pretakrityádinirṇaya. Funeral rites, mourning and s'ráddhas. The MS. is incomplete.

Beginning. संसारकारानिःसारकेतवे धर्म्मसेतवे ।
प्रणम्य विष्णवे वच्मि प्रेतकृत्यादि निर्णयं ॥
तत्र प्रकरणानुक्रमणिका । प्रेतक्रियाशौचधर्म्मा जाते शौचं मृते तथा ।
अशौचसङ्करश्चैव गर्भस्रावे ततः परं ॥

End. सा तिथिः सकला ज्ञेया दानाध्ययनकर्म्मसु ।
एतयोरुद । इत्यतः खण्डितः ।

विषयः । मरणोत्तरकर्त्तव्योदकपिण्डदानादिव्यवस्थापनं ।

No. 647. स्मृतिसारः ।

Substance, country yellow paper. Folia, 49. Lines, 6—7 on a page. Extent, 1359 s'lokas. Character, Bengali. Date ? Place of deposit, Krishnanagar, Paṇḍit Táráprasanna Bhaṭṭáchárya. Appearance, old. Prose. Incorrect.

Smṛiti-sára. Rites proper to be observed on the different lunations. By Kes'ava S'armá.

Beginning. जगतीहेतुं नत्वा श्रीकेशवशर्म्मणा लिखितञ्चैतत् ।
स्मृतिसारं मणिहारं कुरु तारं स्मृतिसारं पारं यत् ॥
वृद्धयाज्ञवल्क्यः । कर्म्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
तया कर्म्माणि कुर्व्वीत ह्रासवृद्धी न कारणं ॥
ह्रासवृद्धी शुक्लकृष्णपक्षौ तत्र पक्षभेदेन व्यवस्था इत्यर्थः । तत्कालः श्रुतिः ।

End. विष्णुः । अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः । इत्यतः खण्डितः ।

विषयः । तिथ्यादिविचारः, प्रतिपदादितिथिकर्त्तव्यदेवकृत्यादिनिरूपणञ्च ।

No. 648. स्मार्त्तव्यवस्थार्णवः ।

Substance, country yellow paper. Folia, 7. Lines, 9 on a page. Extent, 332 s'lokas. Character, Bengali. Date ? Place of deposit, Krishnanagar, Paṇḍit Táráprasanna Bháṭṭáchárya. Appearance, old. Prose. Incorrect.

Smártavyavasthárṇava. A Smṛiti treatise. By (?) Sárvabhauma. Contents: The origin of the four principal castes; origin of the mixed castes; impropriety of marrying before an elder brother; forbidden relationships in marriage; collateral relations; collateral relations on the father's side; collateral relations on the mother's side; gotras, &c. This is apparently different from No. 320.

Beginning. आदौ प्रजापतिमुखाज् जाता विप्रा * * * ।
बाह्वोश्च क्षत्रिया जाता ऊर्व्वोर्वैश्या बभूविरे ॥
पादाच्छूद्राश्च सम्भूतास्त्रिवर्णस्य हि सेवकाः ।
सत्यत्रेताद्वापरेषु वर्णाश्चत्वार एव च ॥

End. इति प्रशस्तं उचिता कन्या विवाहकार्य्ये लिखितात्र सप्तमः (?) ।

Colophon. स्मार्त्तव्यवस्थार्णव उत्तराङ्गः श्रीसार्वभौमेन कृते समाप्तः ।

विषयः । वर्णपरिचयः, वर्णसंस्कारोत्पत्तिः, विवाहे परिवेदनादोषः, वैवाहिकसम्बन्ध-निर्णयः, बन्धुसन्निपातव्यवस्था, पितृबन्धुसन्निपातः, मातृबन्धुसन्निपातः, गोत्र-विचारप्रभृतयः ।

No. 649. उद्वाहव्यवस्था ।

Substance, country yellow paper. Folia, 13. Lines, 5—6 on a page. Extent, 351 s'lokas. Character, Bengali. Date ? Place of deposit, Krishnanagar, Pandit Táráprasanna Bháttáchárya. Appearance, old. Prose. Corrupt.

Udváhavyavasthá. A dissertation on the laws relating to marriage. Anonymous. The MS. is incomplete.

Beginning. तत्रोद्वाहलक्षणं । भार्य्यात्वसम्पादकग्रहणं विवाहः । तच्च ग्रहणं उत्सर्गानन्तरं वरस्य ममेयमिति ज्ञानरूपं । तस्य समवायविषयताभ्यां वरकन्ययोः सत्वात् वरकन्ययोर्विवाह इति प्रतीतिरुपपद्यते । भार्य्यात्वस्य स्वरूपविशेषणहेतुना-न्योन्याश्रयः । स च विवाहोऽष्टविधो भवति ।

End. अर्थपरिष्कारपूर्वकं पञ्चमं निरस्यति न चेति । इत्यतः खण्डिता ।

विषयः । विवाहलक्षणतत्प्रभेदादिविचारः ।

No. 650. धर्म्मदीपिका ।

Substance, country yellow paper. Folia, 11. Lines, 6—7 on a page. Extent, 250 s'lokas. Character, Bengali. Date ? Place of deposit, Krishnanagar, Pandit Táráprasanna Bhattácharya. Appearance, old. Prose. Incorrect.

Dharmadipiká. Reconciliations of discordant opinions on points of law. By Chandras'ekhara Váchaspati.

Beginning. नत्वा शिवपदद्वन्द्वं तातनतातसेवितं ।
तत्प्रभा वर्द्धिताऽस्माभिः क्रियते धर्म्मदीपिका ॥
विद्याभूषणविख्यातः षड्दर्शनमते सुधीः ।
तत्सुतस्तादृशो धीमांस्ततोऽधीती च तत्सुतः ॥

श्रीचन्द्रशेखरो नाम्ना ख्यातो वाचस्पतिः चितौ ।
सुतौनाञ्च प्रकाशार्थं तनोतीमां प्रदीपिकां ॥
तच मीमांसातर्क एव वेदः, तन्मूलकशास्त्रार्थप्रकाशकः ।

End. एषामेकत्र प्रशक्ता पूर्व्वा द्रष्टव्यः, यतोऽ । इत्यतः खण्डिता ।

विषयः । विविधव्यवस्थानिर्णयेन नानावचनमीमांसासङ्ग्रहः ।

No. 651. सारसङ्ग्रहः ।

Substance, country yellow paper. Folia, 149. Lines, 6—7 on a page. Extent, 4581 s'lokas. Character, Bengali. Date ? Place of deposit, Krishṇanagar, Bábu Vámácharana Datta. Appearance, old. Prose. Incorrect.

Sárasañgraha. Practice of medicine and therapeutics. The MS. is imperfect.

Beginning. संसारसिन्धुतरणप्लवमद्रिकन्यावक्राप्रफुल्लसरसीरुहसद्द्विरेफं ।
कन्दर्पदर्पपरिदर्पविदर्पताचं वन्दे सदा त्रिपुरमेकगतिं महेशम् ॥
आलोक्य बहुतन्त्राणि सारं समाहृत्यान्यतः ।
लोकानामुपकाराय क्रियते सारसङ्ग्रहः ॥
प्रायश्चित्तं चिकित्साञ्च ज्योतिषं धर्म्मनिर्णयं ।
विना शास्त्रेण यो ब्रूयात् तमाहुर्ब्रह्मघातकं ॥
कुचेलः कर्कशोऽलुब्धः कुग्रामी स्वयमागतः ।
पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा यदि ॥

End. दुर्व्वानिशायुतो लेपः कण्डुपामाविनाशनः ।
क्रमिदद्रुहरश्चैव (इत्यतः खण्डितः)

विषयः । ज्वरादिनानाविधरोगानां तदुपशमकौषधादीनाञ्च व्यवस्थापनं ।

No. 652. ब्राह्मणसर्व्वस्वं ।

Substance, country yellow paper. Folia, 124. Lines, 6—7 on a page. Extent, 5750 s'lokas. Character, Bengali. Date ? Place of deposit. Krishṇanagar, Paṇḍit Nímchandra S'iromaṇi. Appearance, new. Prose and verse. Incorrect.

Bráhmaṇa-sarvasva. On the duties of Bráhmaṇas, from the commencement of their religious study to funeral. By Haláyudha, minister of justice of Lakshmaṇa Sena of Bengal. He is the author of several works of great repute, including among others the *Mímáñsá-sarvasva,* or a summary of the Mimáñsá philosophy; the *Vaishṇava-sarvasva,* or the duties of Vaishṇavas; the *S'iva-sarvasva,* or the whole circle of duties of S'aivas; the *Paṇḍita-sarvasva,* or the duty of the learned; the *Muni-sarvasva,* or the duty of ascetics; the *Nyáya-sarvasva,* or a summary of Nyáya philosophy; the *Matsyasukata Tantra,* or theology; the *Abidhána ratnamálá,* or a vocabulary of Sanskrit words; the *Kavi-rahasya,* (No. 639); and the *Mrita-sanjivani* (No. 1). The brother of the author, Pashupati, was the prime minister of Lakshmaṇa Sena, and several works of great repute are attributed to him. The work under notice treats of seventy-six subjects, the Sanskrit names of which are noted below. It quotes largely from the Kalpa and the Gṛihya Sútras of Kátyáyana, Baudháyana, Ásvaláyana, Gobhila and Páraskara, as also from Manu, and most of the leading Puráṇas.

Beginning. दीपवत् द्योतयति यो भूर्भुवःस्वर्जगत्त्रयं ।
सवितुस्तं वयं भर्गमपवर्गकरं स्तुमः ॥
दधानं चतुराम्नायपूतां मुखचतुष्टयीं ।
मुनिमाद्यं नमामस्तं पङ्कजोटजवासिनं ॥
त्रिदिवाभरणं कालत्रयहेतुस्त्रयीमयः ।
त्रिवर्गप्राप्तिसरणिस्तरणिः श्रेयसेऽस्तु नः ॥
त्रिलोकपूज्यां रमति त्रिसन्ध्यायां त्रिलोचनः ।
त्रिवेदीफलनिर्म्मात्रीं गायत्रीं तामुपास्महे ॥

End. ब्रह्मणे वरदानं, ब्राह्मणभोजनं, अच्छिद्रावधारणञ्च शतपरिमिताध्यसनं कुर्य्यात् । इत्यावसथिकमहाधर्माध्यक्षहलायुधकृतौ ब्राह्मणसर्वस्वाभिधानपुस्तकं समाप्तम् ।

Colophon. इत्यावसथिकमहाधर्म्माधिकृतश्रीहलायुधकृते ब्राह्मणसर्वस्वे अग्न्याधानादि अन्त्येष्ट्यन्तं कर्म्म समाप्तं ।

विषयः । १, वेदाध्ययनं । २, वेदार्थावगमनं । ३, ऋष्यादिज्ञानं । ४, दन्तधावनं । ५, प्राभातिकस्नानं । ६, प्रातःस्नानमन्त्राः । ७, प्रातःसन्ध्या । ८, ॐकार-माहात्म्यं । ९, प्राणायामः । १०, गायत्र्यर्थव्याख्या । ११, प्राणायामप्रकारः । १२, पूरकादिप्राणायामभेदाः । १३, काम्यप्राणायामाः । १४, प्राणायाममाहात्म्यं ।

१५, प्रणवादिजपफलं। १६, गायत्रीमाहात्म्यं। १७, प्राणयामान्तराचमनं तन्मन्त्रादिश्च। १८, द्रुपदादिमन्त्रार्थः। १९, सूर्योपस्थानमन्त्रार्थः। २०, गायत्रीजपानुष्ठानं। २१, गायत्रीमाहात्म्यं। २२, गायत्रीव्याख्या। २३, गायत्रीस्वरूपं। २४, गायत्रीजपफलं। २५, अक्षमाला। २६, वृषभमन्त्रव्याख्या। २७, जपयज्ञादि। २८, मध्याह्नस्नानविधिः। २९, मध्याह्नस्नानमन्त्राः। ३०, तत्र विष्णुमन्त्रादयः। ३१, सूर्यार्घ्यदानं। ३२, नवग्रहमन्त्रार्थः। ३३, पुरुषसूक्तव्याख्या। ३४, सहस्रशीर्षाव्याख्या। ३५, त्र्यम्बकमन्त्रार्थः। ३६, चण्डीपूजामन्त्राः। ३७, निरग्नेर्वैश्वदेवः। ३८, शान्त्यध्यायः। ३९, शान्त्यध्यायव्याख्या। ४०, अतिथिपूजामन्त्राः। ४१, श्राद्धमन्त्रव्याख्या। ४२, पार्वणश्राद्धमन्त्राः। ४३, वृद्धिश्राद्धमन्त्राः। ४४, भोजनविधिः। ४५, पुंसवनं। ४६, सीमन्तोन्नयनं। ४७, जातकमन्त्राः। ४८, बालग्रहशान्तिः। ४९, नामकरणमन्त्राः। ५०, निष्क्रामणमन्त्राः। ५१, अन्नप्राशनविधिः। ५२, चूडाकरणं। ५३, उपनयनमन्त्राः। ५४, समावर्त्तनमन्त्रार्थः। ५५, विवाहमन्त्रार्थः। ५६, दशकर्ममन्त्रार्थः। ५७, आवसथ्याधानमन्त्राः, अग्न्याधानमन्त्राश्च। ५८, अरण्यादिनिर्माणं। ५९, कुण्डनिर्माणं, दक्षिणाग्निश्च। ६०, पितृयज्ञः, वृद्धिश्राद्धञ्च। ६१, कुण्डसंस्कारादिः। ६२, मणिकाधानं। ६३, वैश्वदेवविधिः। ६४, सायंप्रातर्होमादि। ६५, पश्वादिकर्म। ६६, पाकयज्ञादिः। ६७, पुनराधाननिमित्तानि। ६८, अशौचं। ६९, अशौचे निषेधविधी। ७०, अस्थिसञ्चयनं। ७१, अन्त्येष्टिकर्मनिबन्धः। ७२, आवसथ्याद्यन्त्येष्टिकर्मणां मन्त्राः। ७३, नवान्नप्राशनमन्त्राः। ७४, गृहोपस्थानं। ७५, आवसथ्याधानपद्धतिश्च।

No. 653. गङ्गाष्टकं।

Substance, country yellow paper. Folium, 1. Lines, 9 on the first page and 5 on the second. Extent, 25 s'lokas. Character, Bengali. Date ? Place of deposit, Krishnanagar, Paṇḍit Nímchandra Síromaṇi. Appearance, old. Verse. Incorrect.

Gañgáshṭaka. Eight stanzas in praise of the river Ganges. By Kálidása. Two other hymns of this class have already been noticed. Ante, Nos. 455. and 458.

Beginning. कत्यत्रोणि करोटयः कति कति द्वीपिद्विपानां त्वचः
काकोलाः कति पन्नगाः कति सुधाम्भस्य (?) खण्डाः कति।
मातस्त्वञ्च कति त्रिलोकजनि त्वद्वारिपूरोदरे
मज्जज्जन्तुकदम्बकं समुदयत्येकैकमादाय यत्॥

End. स्रेष्मश्लेष्मकुले गले हतविले कामाकुले व्याकुले
कण्ठे घर्घरघेरिघोषमिलिते काये च मर्म्मीलिते ।
यां ध्यायन्नपि भारभङ्गरतया प्राप्नोति मुक्तिः सरः
सा मे चेतसि जाह्नवी निवसतां संसारसन्तापहृत् ॥ ८ ॥

Colophon. इति श्रीकालिदासविरचितं गङ्गाष्टकं समाप्तम् ।

विषयः । गङ्गास्तुतिः ।

No. 654. कल्पसूत्रम् ।

Substance, country paper, 7 × 4 inches. Folia, 64. Lines, 10 on a page. Extent, 1275 s'lokas. Character, Nágara. Date ? Place of deposit, Queen's College, Benares. Appearance, old. Prose. Remarkably correct.

Kalpa Sútra. The rituals of the Sáma Veda in eleven chapters, (Adhyáyas). The author's name is not given in the text, but the work is evidently a complete text of the Másaka Sútra noticed under No. 113. Contents: 1. Práyaṇi and other ishṭis; 2. Abhijit, Svarasáma and Maháۣvrata ceremonies; 3. Vis'vajit, Vrátyastoma, &c.; 4. Vais'vadevika, Váruna, Praghára, Sákamedha, Sunásirá, &c.; 5. Punastoma, Sarvastoma, Upachiti, Indrastoma, &c. 6. Garga-trirátra, As'vamedha-trirátа, Chhandoga-pavamána-trirátra, &c.; 7. Chaturviráha, Jámadagnyáha, Jáhnaváha, Vás'ishṭáha, Panchasáradíya, Saptarátra, &c.; 8. Kakuvadas'arátráha, Vis'vajitatirátra-navamáha, Kusuruvindapancharátra, Chhandoga-das'arátra, &c.; 9. Trayodas'a rátra and other vidhṛitis; 10. Madhye-prishṭhyáha, Chhandoga das'áha, &c.; 11. Purastát-prishṭya, Chhandoga-prathamáha, &c.

Beginning. क्लृप्ता ज्योतिष्टोमोऽतिरात्रोऽषोडशिकः पवस्व वाचो अग्रियः पवस्वेन्दो वृषासुत उपास्मै गायता नर इत्यादि ।

End. क्लृप्तं विश्वसृजामयनं ज्योतिष्टोमेन वा क्लृप्तेन ज्योतिष्टोमेन वा यथास्तोमक्लृप्तेन यथास्तोमक्लृप्तेन ॥ १० ॥
इति विषुवानथैते एव पूर्वे अहनी आहत्ते ताभ्यामाहत्ताभ्यामुत्तरान् षण्मासा॰ꣳस्तेषामेकान्नत्रिꣳशी प्रथमस्त्रिसंवत्सरं प्रजापतेः सहस्रसंवत्सरं विश्वसृजामयनमिति सत्राणि ।

Colophon. इति कल्पसूत्रेष्वेकादशः प्रपाठकोऽध्यायश्च। समाप्तोऽयं ग्रन्थः।

विषयः। १ प्रपाठके, प्रायणभिप्लवाह-पृष्ठ्यषडहकथनं। २, अभिजितस्वरसाम-महाव्रतोक्तिः। ३, विश्वजिद्-व्रात्यस्तोमादिकथनं। ४, वैश्वदेविकाह-वारुणप्रघासिकाह-शाकमेध-शुनासीर्य्योपहव्याभिषेचनीय-दशपेयादिकथनं। ५, पुनस्तोम-सर्वस्तोमोपचितीन्द्रस्तोमादिकथनं। ६, गर्गत्रिरात्राह्वोऽश्वमेधत्रिरात्र-वैदत्रिरात्र-छन्दोगपवमानत्रिरात्रादिकथनं। ७, चतुर्वीराह-जामदग्न्याह-जाह्नवाह-वासिष्ठाहादिपञ्चशारदीयव्रत-सप्तरात्रादिकथनं। ८, ककुबदशरात्राह-विश्वजिदतिरात्र-नवमाहकुसुरुविन्द-पञ्चरात्र-छन्दोगदशरात्रादिकथनं। ९, त्रयोदशरात्र-विशालाहादि-विधृत्यादिकथनं। १०, मध्ये पृष्ठ्याह-छन्दोगदशाहादिकथनं। ११, पुरस्तात्पृष्ठ्य-छन्दोगप्रथमाहादि-सारस्वतत्रयादि-निर्देशश्च।

No. 655. शुल्वसूत्रम्, बोधायनीयम्।

Substance, country paper, 8½ × 3½ inches. Folia, 8. Lines, 14 on a page. Extent, 329 s'lokas. Character, Nágara. Date ? Place of deposit, Queen's College, Benares. Appearance, old. Prose. Generally correct.

S'ulva Sútra, Bodháyaníya. Bodháyana's aphorisms on the formation of various kinds of fire altars, and the positions which the priests and sacrificers are to occupy around them. The work embraces eight chapters (Paṭalas.) The MS. is imperfect, the latter portion of the 4th and the beginning of the 5th chapters being wanting. Contents: 1, Area meet for the altar; 2, the number of bricks necessary for the altar, and the proper places for the different priests around it; 3, the receptacle for the fire to be made of bricks in the form of a hawk; 4 and 5, formation of the altar like the nave of a wheel &c.; 6, formation of the altar like the wheel of a chariot; 7, formation of quadrangular altars; 8, altars for burning grounds.

Beginning. अथेमेऽग्निचयास्तेषां भूमेः परिमाणविहारान् व्याख्यास्यामः। अथाङ्गुलिप्रमाणं चतुर्दशाणवश्चतुस्त्रिंशत्तिला इत्यपरं दशाङ्गुलमित्यादि।

End. द्वादशेनेष्टकाः कारयेत्तासामर्ध्याः पाद्याश्चास्वैविकस्याग्नेः पुरुषाभ्यासो नारत्नि-प्रादेशानां प्रकृतो वा त्रिगुणस्त्विस्तावोऽग्निर्भवत्येकविंशोऽग्निर्भवतीति तदुभयं ब्राह्मणमुभयं ब्राह्मणमिति। अष्टमः पटलः।

Colophon. बोधायनीयशुल्वाध्यायः ।

विषयः । १ पटलेऽग्निविहारप्रमाणनिर्देशादि । २, वेद्यां इष्टकाभिचयनं, होत्रादिस्थानविभागादिकथनं च । ३, इष्टकाभिः श्येनाकृत्यग्निचितिनिर्माणप्रकारादि । ४, वक्रपुच्छश्येनाकृत्यग्निचितिनिर्माणप्रकारादि । (चतुर्थशेषः पञ्चमादिर्न प्राप्तः) । रथेषासंयोगस्थानाकृत्यग्निचितिनिर्माणप्रकारादि । ६, रथचक्राकाराग्निचितिस्थाननिर्माणप्रकारादि । ७, चतुरस्राद्याकृत्यग्निचितिस्थाननिर्माणप्रकारः । ८, श्मशानचितिकर्मचित्याद्यग्निचयनस्थाननिर्देशः ।

No. 656. शुल्वसूत्रदीपिका, बोधायनीया ।

Substance, country paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 58. Lines, 12—13 on a page. Extent, 1533 s'lokas. Character, Nágara. Date, S. 1666. Place of deposit, Queen's College, Benares. Appearance, old. Prose. Generally correct.

S'ulva-sútra-dípiká. A gloss on the last by Dvárkánáṭha, son of Ṭíká Bhaṭṭa.

Beginning. बोधायनीयशुल्वस्य प्रव्याख्याः प्रेक्ष्य यत्नतः ।
टीका भट्टात्मजेनेयं क्रियते शुल्वदीपिका ॥
अथेमेऽग्निचयाः । अथ गृह्यानन्तरमग्निचयग्रहणं वेद्या अप्युपलक्षणार्थम् ।
इत्यादि ।

End. उभयस्यापि ब्राह्मणार्थत्वादुभयमनुष्ठेयमिति भावः । वीप्सा समाप्तिख्यापनार्था ।

Colophon. टीकाभट्टात्मजस्य द्वारकानाथस्य कृता शुल्वसूत्रदीपिका समाप्ता ।

विषयः । बोधायनीयशुल्वसूत्रार्थविवरणं ।

No. 657. शुल्वसूत्रभाष्यम्, आपस्तम्बीयं ।

Substance, country paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 42. Lines, 10 on a page. Extent, 1260 s'lokas. Character, Nágara. Date, S. 1885. Place of deposit, Queen's College, Benares. Appearance, old. Prose. Generally correct.

S'ulva-sútra-bháshya. A commentary on Ápastamba's aphorisms on the formation of fire altars. By Kapardí S'vámí. The work comprises six paṭalas.

Beginning. उक्ता यज्ञसेषामायतनानि नियतप्रमाणानि नियतदेशानि तेषामायामविस्तारान् वक्तुकाम आह । विहारयोगान् व्याख्यास्यामः । विह्रियन्तेऽस्मिन्नग्नय इति विहाराः प्राग्वंशादरो गार्हपत्यादयसेत्यादि ।

End. नारत्निप्रदेशानां, तत्र श्लोकः, विषे नरः
* * * * * प्रोक्ताविस्तावति विभावसोः (?) ।
एकविंशे ततो न्यूनं तिलानाचैव सप्ततिः ॥
द्विरत्निर्मङ्गलार्थो । षष्ठः षटलः ।

Colophon. इत्यापस्तम्बीयशुल्वभाष्यं कपर्द्दिस्वामिकृतं समाप्तम् ।

विषयः । आपस्तम्बीयशुल्वसूत्रार्थव्याख्यानं ।

No. 658. गृह्यसूत्रं, कात्यायनीयं ।

Substance, country paper, 10 × 4½ inches. Folia, 36. Lines, 10 on a page. Extent, 720 s'lokas. Character, Nágara. Date, S. 1724. Place of deposit, Queen's College, Benares. Appearance, old. Prose. Generally correct.

Gṛíhya Sútra. Aphorisms on the rites and ceremonies appropriate for householders. By Kátyáyana. Contents: 1. Cooking of rice as a ceremonial rite at marriage, conception, quickening, birth, first eating of rice, and tonsure; 2. Observances at the time of investiture with the sacred thread, and after it; 3. Observances on return home from the tutor; 4. Mensual and first anniversary s'ráddhas, offering of water to the manes, agriculture; 5,6. Rites for overcoming evils at the consecration of tanks, lakes, gardens, &c.

Beginning. अथातः पाकयज्ञान् व्याख्यास्यामोऽभिसमावर्त्तमाने यत्रान्त्यां समिधमभ्यादध्यात्तमग्निमिन्धीत वैदाद्यं वाद्यायेत्यादि ।

End. सर्वस्मात् स्वस्ति देवऋषिभ्यश्च ब्रह्म सत्यञ्च पातु मामिति ब्रह्म सत्यञ्च पातु मामिति ।

Colophon. इति षष्ठाध्यायः । समाप्तमिदं गृह्यसूत्रम् ॥

विषयः । अत्र षडध्यायाः । तत्र १ अध्याये, विवाह-गर्भाधान-सीमन्तोन्नयन-जातकर्म्मान्नप्राशन-चूडादि कर्त्तव्यचरुपाकयज्ञकर्म्मकथनं । २, उपनयनोपनीतकर्त्तव्यकथनं । ३, गुरुकुलात्समावर्त्तन कर्त्तव्यकर्म्मकथनं । ४, मासिकश्राद्धसपिण्डीकरण-तर्पणकृषिकर्म्मादिकथनं । ५, ६, पुष्करिणी-तडागारामाद्भुतशान्त्यादिकर्म्मकथनं । (२४ पत्रं नास्ति)

No. 659. श्रौतसूत्रं, बोधायनीयं ।

Substance, country paper, 11 × 5 inches. Folia, 79. Lines, 11 on a page. Extent, 1896 s'lokas. Character, Nágara. Date, S. 1646. Place of deposit, Queen's College, Benares. Appearance, old. Prose. Incorrect.

Srauta Sútra. This is an incomplete MS. of the aphorisms of Bodháyana on the rites of the Yajur Veda. It includes the Agnishṭoma, Pravargya and the Mahávira rites.

Beginning. अग्निष्टोमेन यक्ष्यमाणो भवति स उपकल्पयते कृष्णाजिनञ्च कृष्णविषाणञ्च वासश्च मेखला चेत्यादि ।

End. श्रोणन्ते तिष्ठन्नग्निमभिसंश्रत्यग्निरसि वैश्वानरोऽसीत्येतेनानुवाकेनाचाध्वर्यवेऽग्नि-दक्षिणां ददाति शतᳫं सहस्र * * * * कं वा ॥ १० ॥ (समाप्तिवाक्यं नास्ति)

विषयः । अग्निष्टोमप्रवर्ग्यमहावीरादिकर्मकथनं ।

No. 660. पितृमेधसूत्रं ।

Substance, country paper, 9 × 5 inches. Folia, 7. Lines, 9—10 on a page. Extent, 130 s'lokas. Character, Nágara. Date ? Place of deposit, Queen's College, Benares. Appearance, old. Prose. Generally correct.

Pitṛimedha Sútra. This is a mere fragment of either Bodháyana's or Bharadvája's aphorisms on the ceremony of cremation. I have not the necessary MSS. at hand to identify the work.

Beginning. अथ पितृमेधं व्याख्यास्यामो दहननिधानदेशपरिहवाणि निधानकाल इति ब्राह्मणोक्तं दुर्बलीभवन्तं शालाहणेषु दर्भानास्तीर्य स्योनासीभव * वरोहनिति मन्त्रोक्तावनुमन्त्रयते ।

End. पालाशं परिददाति शतञ्च मिहतत्यमासीत्यनुमन्त्रयते चूपालोहितस्र— । (इतःपरं खण्डितत्वात् समाप्तिवाक्यं नास्ति)

विषयः । शवदाहनाद्यन्त्येष्टिकृत्यकथनं ।

No. 661. प्रवर्ग्यप्रश्नः ।

Substance, country paper, 10 × 3½ inches. Folia, 16. Lines, 8 on a page. Extent, 360 s'lokas. Character, Nágara. Date ? Place of deposit, Queen's College, Benares. Appearance, old. Prose. Correct.

Pravargya-pras'na. The ninth chapter of the Srauta Sútra of Bodháyana, (No. 659), and contains the rules regarding the Pravargya ceremony.

Beginning. प्रवर्ग्यं सम्भरिष्यन्नुकल्पयते खादिरीमौदुम्बरीं कङ्कतीं वा अभ्रिं व्याममात्रीं वोभयतस्तीक्ष्णां स्फ्यञ्च भावितां, इत्यादि ।

End. उदुत्यं चित्रमित्यथाहवनीयमुपतिष्ठते, इममूषु त्वं नवीयांसं वोच इत्यथाग्निप्रदेशं गत्वाऽग्नीध्रदेश उत्तरां शान्तिमुपयन्ति, शन्नो वातः पवता मातरिश्वेति । इति बौधायनसूत्रे नवमः प्रवर्ग्यप्रश्नः ॥

विषयः । प्रवर्ग्यविधिः ।

No. 662. गार्ह्यकर्मप्रयोगः, आपस्तम्बीयः ।

Substance, country paper, 11 × 3½ inches. Folia, 46. Lines, 10 on a page. Extent, 1150 s'lokas. Character, Nágara. Date ? Place of deposit, Queen's College, Benares. Appearance, old. Verse. Generally correct.

Gárhya-karma-prayoga. A manual for the performance of the domestic rites enjoined in the Gṛihya Sútra of A'pastamba. The rites are nearly the same as those noticed under No. 658.

Beginning. हरेःपदाम्बुजं नत्वा कपर्द्यादिभिरीडितं ।
आपस्तम्बगार्ह्यकर्मप्रयोगः प्रवितन्यते ॥

End. अमुकाद्भुतनिमित्तं शान्तिं करिष्ये इत्यर्थः । अमुकोत्पातनिमित्तमित्युत्पातेषु सर्वतः ॥ (इतःपरं खण्डितं)

विषयः । विवाहोपनयनगर्भाधानजातकर्मादीनां श्राद्धाद्भुतशान्त्योश्च कथनं ।

No. 663. भाषिकसूत्रं ।

Substance, country paper, 10½ × 4½ inches. Folia, 3. Lines, 9 on a page. Extent, 45 s'lokas. Character, Nágara. Date ? Place of deposit, Queen's College, Benares. Appearance, old. Prose. Generally correct.

Bháshika Sútra. Vedic phonetics. Anonymous.

Beginning. अथ ब्राह्मणस्वरसंस्कारनियमः । उदात्तानुदात्तौ भाषिकस्तत्स्थिः । आप्रपूर्वं आख्यातपरो न ।

End. क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते ।
त्रीनत्र पुरुषान् वक्ति कालतस्तु विशिष्यते ॥
इति भाषिकसूत्रं समाप्तम् ।

विषयः । वैदिकवाक्येषु उदात्तादिस्वरप्रयोगविधिः ।

No. 664. कल्पसूत्रव्याख्या, वरदराजीया ।

Substance, country paper, 10 × 4 inches. Folia, 225. Lines, 10 on a page. Extent, 4500 s'lokas. Character, Nágara. Date ? Place of deposit, Queen's College, Benares. Appearance, old. Prose. Incorrect.

Kalpa-sútra-vyákhyá. A commentary on the Kalpa Sútra of Másaka, (No. 654). By Varadarája. The MS. is incomplete, and the author's name does not occur, except in the title of the work as given on the cover.

Beginning. अथार्षयकल्पो व्याख्यातव्यस्तस्य त्र्यचः सर्वक्रतुप्रकृतिभूतस्य त्रिसुपर्णो ज्योतिष्टोमस्य सर्वाह्गणप्रकृतिभूतस्य च व्यूढद्वादशाहस्य ब्राह्मणेनैव क्लृप्तिरुक्तेति तदुपजीवनेन कृतवन्तराण्येव कल्पितानि अस्माभिस्तस्य प्रबन्धस्य कार्त्स्न्यार्थं तयोस्तावत् प्रयोगः सूत्रब्राह्मणानुसारेण प्रदर्श्यते ।

End. तत्र विशेषमाह । राथन्तरेणाह्ना त्रिष्ट * * पद्यते । वार्हतेन पञ्चदशरात्राद्राथान्तरेण सप्तदशान् वार्हतेनैकविंशानिति * * * * । आरभत इत्यर्थः । एतदुक्तं भवति । विधृति——— । (इतःपरं खण्डितम्)

विषयः । ज्योतिष्टोमाग्निष्टोमादिश्रौतकर्मविनियोज्यानां साम्नां तेषामृषिदैवतादीनां च प्रख्यापकस्य कल्पसूत्रस्य व्याख्यानम् ।

No. 665. कल्पसूत्रभाष्यम्, शाङ्खायनीयं ।

Substance, country paper, 11 × 4¼ inches. Folia, 110. Lines, 10 on a page. Extent, 3368 s'lokas. Character, Nágara. Date, S. 1645 Place of deposit, Queen's College, Benares. Appearance, old. Prose. Generally correct.

Kalpa-sútra-bháshya. A commentary on the Kalpa Sútra of Sáñkháyana, by Anartiya, son of Varadatta. Contents : (1) Dars'a, (2) Paurṇamása, (3) Saumika, (4) Yajamána, ceremonies.

Beginning. पुरुषस्य बुद्धिपूर्वकारिणोऽभ्युदयनिःश्रेयससमुपादित्सितं । तच्च विशिष्टं क्रियासाध्यं । सा च वैदिकी क्रिया नान्या या काचित् । कुत एव तत् ।

End. कूर्चादीनि यथाकालमर्घ्यायार्घप्रदो वेदयेत् । तिस्रो वेदयेदिति तन्त्रान्तरात् । द्विरभ्यासोऽध्यायपरिसमाप्तौ शिष्टाचारसदाचरणं चायुष्यमिति ॥ इति शाङ्खायनसूत्रभाष्ये चतुर्थोऽध्यायः समाप्तः ।

(इतोपि सप्तपङ्क्त्यात्मकः पाठोस्ति, तस्याद्यः)

शाङ्खायनसूत्रस्य सर्वं शिष्यहितेच्छया । वरदत्तसुतो भाष्यमानर्तीयोऽकरोन्नवम् ॥

(तस्यान्त्यः)

चतुरः सर्वान् वा चतुरो महर्त्विजो वृणीते सर्वान्वा । सदस्यसप्तदशानुतया(?) शाखान्तरात् । चन्द्रमा मे दैवो ब्रह्मेत्युपांशु त्वं मानुष इत्युच्चैश्चन्द्रमा मेदैवो ब्रह्मा एतदुपांशु च ।

(खण्डितमिति भाति)

विषयः । चतुरध्यायनिबद्धस्य दर्शपौर्णमाससौमिकयाजमानादिकर्मबोधकस्य शाङ्खायनसूत्रस्य व्याख्यानम् ।

No. 666. कात्यायनसूत्रपद्धतिः ।

Substance, country paper. 9½ by 4 inches. Folia 205, lines, 7 on a page. Extent, 2870 s'lokas. Character Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Kátyáyana-sútra-paddhati. This is a very imperfect MS. of Yájnikadeva's summary of Kátyáyana's aphorisms on the ceremonials of the White Yajur Veda. The MS. comprehends the concluding portion of

the VI only, and Chapters VII, XVI, and XVIII, complete. The 7th treats of the S'atarudríya homa; the 16th, of expiations in connection with the collection of fire for a Soma sacrifice; and the 18th of the sacrifice of the horse and other animals. The author was the son of Prajápati, and celebrated as a great sacrificer of his time. The work is in great repute, but scarce.

Beginning. प्रारम्भे खण्डितं। अत्र ७,१६,१८ अध्यायाः सन्तिः, इतोधिकं ७, पत्रावधि ९२, पत्रपर्य्यन्तमन्य एको भागोस्ति। अत्राध्यायसङ्ख्या नास्ति। तत्र ७ अध्यायारम्भे, अथ शतरुद्रियहोमसञ्ज्ञो जुहोतिरुच्यते। तत्र सङ्ग्रामात्रग्रादिषु (?) तिष्ठत्सु परिश्रित्सु अग्न्यन्वाधानम्।

१६ अध्यायारम्भे, अथ सोमाङ्गभूतस्याग्निचयनस्य पद्धतिर्लिख्यते, तदग्निचयनं सोमयागमात्रे विकल्पेन भवति।

१८ अध्यायारम्भे, अथ गवामयनस्य पद्धतिर्लिख्यते। तत्र दीक्षा द्वादश। द्वादशोपसदः। अपरस्य आद्यन्तखण्डितत्वात्प्रारम्भसमाप्तिवाक्ये न स्तः।

End. ७ अध्यायसमाप्तौ। अत्र केवलैर्हिरण्यशकलैः प्रोक्षणासम्भवादुदकवति पूर्णपात्रे द्वे शते हिरण्यहिरण्यशकलानां प्रक्षिप्योदकमिश्रितैः प्रोक्षणं कर्त्तव्यम्। इति सम्राट्स्थपतित्रिरग्निचिन्महायाज्ञिकश्रीप्रजापतिसुतेन याज्ञिकदेवेन कृतायां कात्यायनसूत्रपद्धतौ सप्तदशोध्यायः समाप्तः।

१६ अध्यायसमाप्तौ, अत एवैकैकप्रकारस्यावृत्तिः कर्त्तुं शक्यते, क्रमनियमाभावादिति। इति श्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतेन याज्ञिकदेवेन कृतायां कात्यायनसूत्रपद्धतौ षोडशोध्यायः।

---

१८ अध्यायसमाप्तौ। * * * मैत्रावरुणाः पयस्याया उपांशुत्वं देवसूहविषां क्रमश्चाध्वर्युस्तु * यत् अव * * *। इति श्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतेन याज्ञिकदेवेन कृतायां कात्यायनसूत्रपद्धतौ अष्टादशोध्यायः।

विषयः। ७ अध्याये, शतरुद्रियपुरश्चरणाङ्गीभूतहोमप्रकारः। १६, सोमाङ्गीभूताग्निचयनस्य तत्र विकल्पाङ्गप्रायश्चित्तस्य चोक्तिः। १८, द्वादशाहीय-गवामयनेष्ट्यङ्गीभूतत्रिशतसूत्येष्टिप्रकारकथनादि।

No. 667. साधनपञ्चकं, सटीकं ।

Substance, country yellow paper. Folia, 4. Lines, 26—27 on a page. Extent,—s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose and Verse. Generally correct.

Sádhana-panchaka. Five stanzas, by S'añkara A'chárya, on the duties of a Vedánta neophyte, with a commentary by Bhúdhara.

Beginning. वेदो नित्यमधीयतां तदुदितं कर्म्म स्वनुष्ठीयतां तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यतां । पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयतामात्मेच्छा व्यवसीयतां निजगृहात् तूर्णं विनिर्गम्यतां ॥ १ ॥

(टी०)

करं धूनयन्तं मुखं खादयन्तं स्वतेजोभिभूताविवर्गं गणेशं । स्वभक्तेष्टदातारमाद्यं सुराणां गणेशानमीशानमहं नमामि ॥ १ ॥

श्रीशङ्कराचार्य्यविनिर्म्मितस्य करोम्यहं साधनपञ्चकस्य ।

टीकां मनोज्ञां बुधमोदवीजां सुयुक्तियुक्तां किल भूधराख्यः ॥

इह खलु परमकारुणिका भगवान् सकललोकहितावतारो भवभयनिकिरदुस्तरसमुद्रनिजमूर्त्तितारणे कैवर्त्तको द्रविडावंशरत्नाकरचन्द्रमाः श्रीमच्छङ्कराचार्य्यः स्वदेहमुत्सिसृक्षुः शिष्यान प्रति उपदिशति वेदो नित्यमित्यादि ॥

End. यः श्लोकपञ्चकमिमं पठते मनुष्यः सञ्चिन्तयत्यनुदिनं स्थिरतामुपेत्य । तस्याशु संसृतिदवानलतीव्रघोरतापः प्रशान्तिमुपयाति चितिप्रसादात् ॥ ६ ॥

साधनपञ्चकं सम्पूर्णं ॥ ० ॥

(टी०)

अधुना श्लोकपञ्चकपठने फलं दर्शयति, यः इति । यः मनुष्यः इमं श्लोकपञ्चकं पठति, स अनुदिनं स्थिरतामुपेत्य सञ्चिन्तयति, तस्याशु शीघ्रं संसृतिदवानलतीव्रघोरतापश्चितिप्रसादात् शान्तिमुपयातीत्यन्वयः ॥ ६ ॥

विषयः । श्रीमच्छङ्कराचार्य्येण स्वशिष्याय पञ्चभिः श्लोकैः साधनोपदेशः कृतः ।

No. 668. तत्त्वसारः ।

Substance, country yellow paper. Folia, 17. Lines, 11—14 on a page. Extent, 773 s'lokas. Character, Bengali. Date ? Place of deposit, Vasur Bazar, Dháká, Dínabandhu Gos'vámí. Appearance, old. Prose. Generally correct.

Tattvasára. A concise epitome of the philosophy of the Bhágavat Puráṇa. By Rádhámohana S'armá.

Beginning. श्रीकृष्णचरणाम्भोजे परानन्दामृताम्बुधौ ।
मनो मधुव्रतो नित्यं रमतां ममताङ्कितः ॥
श्रीकृष्णभावलुब्धेन राधामोहनशर्म्मणा ।
श्रीमद्भागवतस्यायं तत्त्वसारः प्रकाश्यते ॥
अथ द्वापरे ज्ञानवैकल्ये पुनर्ज्ञानरत्नप्रदर्शनाय ब्रह्मादिदेवतैरर्थितो भगवान नारायणो व्यासत्वेनावततार। ततश्च वेदान् बहुधा विभज्यापि तज्ज्ञानशक्तिविहीनमन्दबुद्धिजना अल्पायुषो कलौ भविष्यन्तीति निश्चित्य स्त्रीशूद्रद्विजबन्धूनामपि निःश्रेयसाय च भारतपुराणान्तराणि कृत्वेत्यादि ।

End. मुनीनां मननशीलानां मुक्तस्यापि शुकस्य श्रीमद्भागवत—इत्यतः खण्डितः ।

विषयः । भागवतसारार्थवर्णनं ।

No. 669. अवधूतगीता ।

Substance, country yellow paper. Folia, 21. Lines, 6 on a page. Extent, 362 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Verse. Generally correct.

Avadhútagítá. A poem inculcating dispassion, and the Vedanta scheme of salvation. By Dattátreya.

Beginning. अस्य श्रीअवधूतगीतामालामन्त्रस्य अवधूत ऋषिरनुष्टुप्छन्दः श्रीभगवान् निरञ्जनो देवता निरञ्जनप्रीत्यर्थं जपे विनियोगः ।
ईश्वरानुग्रहादेव पुंसामत्येति वासना ।
महाभयपरित्राणा धिषणा चोपजायते ॥
येनेदं पूरितं सर्वं आत्मनेवात्मनात्मनि ।
निराकारं कथं वन्दे ह्यभिन्नं शिवमव्ययम् ॥

End. चिन्ताक्रान्तं धातुबद्धं शरीरं नष्टे चित्ते धातवो यान्ति नाशं ।
तस्मात् चित्तं सर्व्वतो रक्षणीयं सुस्थे चित्ते बुद्धयः सम्भवन्ति ॥
इति श्रीदत्तात्रेयविरचितायामवधूतगीतायां स्वात्मशान्त्युपदेशे अष्टमप्रकरणं समाप्तम् ॥

विषयः । आत्मज्ञानोपदेशः ।

No. 670. पुण्डरीकोपनिषत्।

Substance, country yellow paper. Folia, 4. Lines, 16 on a page. Extent, 80 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Verse. Correct.

Puṇḍaríka Upanishad. Pippaláyana's instructions to Puṇḍaríka on the knowledge of Brahma.

Beginning. ॐ अथ हैनमेत्य तत्त्वज्ञं महर्षिं पिप्पलायनं।
प्रश्रयावनतः शान्तः पुण्डरीको बभाष ह॥
पुण्डरीक उवाच।
किं स्वित् ब्रह्म क उ आत्मा किं ज्ञेयं ध्येयमप्युत।
किं भयं वाभयं किं स्वित् कस्माच्चैतन्निवर्त्तते॥
को बन्धः कस्य वै मोक्षः ब्रूहि निःश्रेयसाय मे।

End. य इदं पठते नित्यं श्रद्धावान् संयतेन्द्रियः।
मुच्यते स हि पापेभ्यो यो विष्णुं नाभ्यसूयति॥
इति पुण्डरीकोपनिषत् समाप्ता॥

विषयः महर्षिपिप्पलायनेन पुण्डरीकायाध्यात्मविद्योपदेशः, विशेषतस्तु ब्रह्मोपदेशः कृतः।

No. 671. वैखानसीयोपनिषत्।

Substance, country yellow paper. Folia, 8. Lines, 8 on a page. Extent, 72 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Verse. Correct.

Vaikhánasíya Upanishad. An apocryphal Upanishad of the Atharva Veda on the divinity of Krishṇa. It is alleged to have been first expounded by Nárada to Vádaráyaṇa.

Beginning. ॐ सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्म्मणे।
स्वात्मज्योतिःप्रकाशाय विश्वरूपाय वै नमः॥
अथ वादरायणो ह वै भगवन्तं नारदमनुससार। कः परमो देवः किंस्विद् ब्रह्म कस्मिन्नोतं प्रोतञ्च सर्व्वं। तस्मै स होवाच कृष्णो वै परमं दैवतं ब्रह्मेति। तन्महिमानमामनन्ति तस्मिन्नोतं प्रोतञ्च सर्व्वं॥

End. तदेच्छासनं वैखानसं पवित्रं शिष्येभ्यः प्रदेयं दीक्षितेभ्यो विप्रेभ्यः। नाशिष्येभ्यो-नापुत्त्रेभ्यो न हेतुकेभ्यः पशुभ्यः। ॐ तत सदिति।

विषयः। श्रीकृष्णमाहात्म्यकथनं, यन्माहात्म्यं नारदेन बादरायणाय कथितं।

No. 672. पिशाचभाष्यं।

Substance, country yellow paper. Folia, 38. Lines, 17—18 on a page. Extent, 2588 s'lokas. Character, Bengali, well written. Date ? Place of deposit, Mánakara, Bardhamána, Bábú Hitalála Mis'ra. Appearance, new. Prose. Very incorrect.

Pís'achabháshya. A commentary on the Bhagavad Gítá, attributed to a demon of the name of Pís'ácha.

Beginning. सर्व्वं रसं गुढरविद्वरासभा नागामरा वेगरवीश्मन्नरा (?)।
वेल्लासरोतीरकराजहंसा स्तोकाम्हतं सन्नमतेन पूरितं (?)॥
प्रपन्नपारिजाताय स्तात्रवेत्रैकपाणये।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः॥

End. किं बहुना यत्र मम यस्मिन् पक्षे योगेश्वरः कृष्णः स्थितः यत्र पार्थः धनुर्द्धरः उद्यद्गाण्डीवस्तत्र तस्मिन् पक्षे श्रीर्देवता विजयार्थं विजयः शत्रूणां धर्षणं भूतिर्नीतिर्नयः प्रज्ञा जयसाधिका इति। इत्थं मतिर्निश्चयः। इतिकरणं गीताशास्त्रपरिसमाप्त्यर्थं॥ इति पैशाचभाष्ये अष्टादशोऽध्यायः॥

विषयः। श्रीमद्भगवद्गीताया व्याख्येयं।

No 673. राधातापनी।

Substance, country yellow paper. Folia, 2. Lines, 7—21 on a page. Extent, 47 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Rádhá Tápaní. An apocryphal Upanishad on the divinity of Rádhá, a mistress of Krishna. Though running over very much the same subject, the work is distinct from No. CXIV.

Beginning. ॐ आसीन्नियमानन्दं स ब्रह्म यद्दृष्टमस्पृष्टमव्यक्तमव्यवहार्य्यमग्राह्यमवाच्य-मव्ययमवज्ञेयमतर्क्यमबोध्यमचिन्त्यमसङ्गमेकं न तमो न गन्धवती नोष्टं न शून्यं

न वायुर्न नाग्निर्नापो न पृथ्वी न तत्त्वं, तत् केवलं सिद्धं शुद्धं बुद्धं स ईशः स कालः स सुखद आदिर्गुरुरनादिनिधनः शिवः पिता स्वयम्भूः स होद्यः कृष्णधाम त्रिगुणात् परः। इत्यत्र श्लोका भवन्ति,

ज्ञाने सरस्वतीनिष्ठं सकामे रुक्मिणीप्रियं।

लीलारूपं राधिकायाः सिद्धं सद्ग्राममुत्तमं॥

End. वशिष्ठश्च बृहस्पत्यं चार्व्वाकमध्यापयन्ति यजमानस्य वार्हस्पत्यं, ॐ नमः ॐ नमो मूलधात्रै।

Colophon. इत्याद्यष्टोत्तरभागे रहस्यवर्णने राधोत्तरतापनीयोपनिषत् समाप्ता।

विषयः। श्रीराधिकायास्तत्त्वरहस्यवर्णनं।

No. 674. गीताभूषणभाष्यं।

Substance, country yellow paper. Folia, 101. Lines, 11—12 on a page, Extent, 5188 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Gítábhushaṇa Bháshya. A commentary on the Bhagavadgítá. By Baladeva Vidyábhushaṇa.

Beginning. सत्यानन्ताचिन्त्यशक्त्येकपक्षे सर्वाध्यक्षे भक्तरक्षातिदक्षे।

श्रीगोविन्दे विश्वसर्गादिकन्दे पूर्णानन्दे नित्यमास्तां मतिर्नः॥

अज्ञाननीरधिरुपैति यया विशोषं भक्तिः परा विभजते परिपोषमुच्चैः।

तत्त्वं परं स्फुरति दुर्गममप्यजस्रं षाड्गुण्यभृत्सरुचितां (?) प्रणमामि गीतां॥

अथ सुखचिद्घनः स्वयं भगवान् अचिन्त्यशक्तिः पुरुषोत्तमः स्वसङ्कल्पायत्त विचित्रजगदुदयादिर्विरिञ्चिचिन्त्यचरणः स्वजन्मादिलीलया स्वतुल्यान् सदाविर्भूतान् पारिषदान् प्रहर्षयन् तथैव जीवान् बहून् अविद्येत्यादि।

End. श्रीमद्गीताभूषणनामभाष्यं यत्नात् विद्याभूषणेनोपचीर्णं। श्रीगोविन्दप्रेममाधुर्य्यलुब्धाः कारुण्यार्द्राः साधवः शोधयध्वं।

Colophon. इति श्रीभगवद्गीतोपनिषद्भाष्ये अष्टादशोऽध्यायः॥

विषयः। श्रीमद्भगवद्गीताया व्याख्येयं।

No. 675. निरालम्बोपनिषत् ।

Substance, country yellow paper. Folia, 4. Lines, 16 on a page, Extent, 64 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Nirálamba Upanishad. An elementary treatise on the Vedánta doctrine, comprising thirty questions, such as: Who is Brahma? who the Creator? who I's'vara? what is duty? &c., &c., propounded by Bharadvája, and their appropriate answers by Brahmá.

Beginning. भरद्वाज उवाच । १ प्रश्नः । किं ब्रह्मेति । ब्रह्मोवाच । उत्तरं । अचिन्त्योपाधिविनिर्म्मुक्तमनाद्यन्तं शुद्धं शान्तं निर्गुणं निरवयवं नित्यानन्दमखण्डैकरसमद्वितीयं चैतन्यं ब्रह्म ॥ २ प्रश्नः । किं सकलं ब्रह्म । २ उत्तरं । अव्यक्तात्ममहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशात्मकं । तेन हदरूपेणाण्डकोषेण कर्म्मज्ञानार्थरूपतया भासमानं सकलशक्त्युपबृंहितं सकलं ब्रह्म । ३० प्रश्नः । को ब्राह्मणः । ३० उत्तरं । ब्रह्मवित् स एव ब्राह्मणः ।

End. इति निरालम्बोपनिषत् समाप्ता ॥

विषयः । १, किं ब्रह्म । २, किं सकलं ब्रह्म । ३, क ईश्वरः । ४, को जीवः । ५, का प्रकृतिः । ६, कः परमात्मा । ७, के ब्रह्माद्याः । ८, का जातिः । ९, किमकर्म्म । १०, किं कर्म्म । ११, किं तपः । १२, किमासुरं । १३, किं ज्ञानं । १४, किमज्ञानं । १५, कः संसारः । १६, को बन्धः । १७, को मोक्षः । १८, किं सुखं । १९, किं दुःखं । २०, कः स्वर्गः । २१, को नरकः । २२, किं परमपदं । २३, क उपास्यः । २४, को विद्वान् । २५, को मूढः । २६, कः सन्न्यासी । २७, किं ग्राह्यं । २८, किमग्राह्यं । २९, कः समाधिः । ३०, को ब्राह्मणः । भरद्वाजपृष्टानामेतत्त्रिंशत्प्रश्नानामुत्तरवर्णनं ।

No. 676. पञ्चीकरणमहावाक्यार्थबोधप्रकारः ।

Substance, country yellow paper. Folia, 16. Lines, 12—14 on a page. Extent, 353 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Prose. Incorrect.

Panchikarana-mahávákyártha-bodha-prakára. A Vedánta treatise founded on the *Panchikaranaprakriyá* of S'añkara A'chárya. From its abrupt commencement I suspect the MS. is imperfect, and does not contain the beginning of the work.

Beginning. अथ शिष्येण सप्त प्रश्नाः कृताः। ते कथं, ततः प्रोवाच। शिष्यस्तु ब्रह्मशब्देन
शब्दितो जीवशब्देन च, तया क उक्तः स्यात्, तदुच्यतां।
माया वा कस्य शक्तिः स्यात् तत्स्वरूपञ्च कीदृशं।
अविद्यायाः कथं रीतिः किमात्मासौ तथा भवेत्॥

End. महावाक्यप्रबन्धो हि सारात् सारतरं महत्।
श्रवणान्मुच्यते जन्तुर्मृत्युसंसारसागरात्॥

Colophon. इति वेदान्तसारासारपञ्चीकरणमहावाक्यबोधः समाप्तः।

विषयः। गुरुशिष्ययोः कथोपकथनच्छलेनाध्यात्मविद्योपदेशः।

No. 677. स्वानुभवादर्शः, सटीकः।

Substance, country yellow paper. Folia, 72. Lines, 10 on a page. Extent, 2193 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Verse and prose. Generally correct.

Svánubhavádars'a. Dissertation on the dualistic or Vaishnava form of the Vedánta; the text in verse with a commentary in prose. Both anonymous.

Beginning. (मू॰ प्रा॰) यस्मात् परं किमपि नास्ति नमोऽस्तु तस्मै
सच्चित्सुखाय विभवे पुरुषोत्तमाय।
नो यत्र वागपि मनो न विरोधनाय
कृष्णाय पूर्णमहसे यदुनन्दनाय॥
अतिदूरतरं निजं स्वयं गुरुशास्त्राण्यविचार्य्यते यदि।
निकटं गुरुशास्त्रबोधनात् प्रकटं स्यात् वत नैरवयं (?) हि तत्॥
(टी॰ प्रा॰) चिकीर्षितस्य, ग्रन्थस्य निर्व्विघ्नपरिसमाप्तिप्रचयगमनशिष्टाचार-परिपालनकालं, विशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं स्वेष्टदेवतान-मस्कारात्मकं मङ्गलमाचरन् प्रकरणप्रतिपाद्यमर्थं सङ्क्षेपेण दर्शयति यस्मा-दित्यादि।



End. पूर्वाचार्य्यैर्ह्रिष्टलेशोऽयमुक्तो बुद्धिस्तोत्र स्वस्य न प्रौढ़िवादः ।
विद्वांसो येऽनुग्राह्यार्थं समर्थाः तेभ्यो भक्त्या मे प्रणामोऽयमस्तु ॥ २१५ ॥
इति श्रीमन्नारायणाश्रमशिष्यमाधवाश्रमविरचितं स्वानुभवादर्शाख्यं प्रकरणं समाप्तं ॥
इदानीं ग्रन्थकर्तृत्वाभिमानपरिहारपूर्व्वं सम्प्रदायकर्त्राचार्य्यनमस्काररूपं मङ्गलमाचरति पूर्वाचार्य्यैरिति । स्पष्टार्थः ।

Colophon. इति (परिसमाप्तिसूचकवाक्यं नास्ति) ।

विषयः । आत्मतत्त्वानुभवकथनं ।

No. 678. अज्ञानबोधिनी ।

Substance, country yellow paper. Folia, 20. Lines, 12 on a page. Extent, 375 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Prose. Generally correct.

Ajnána-bodhiní, alias *Adhyátma-vidyopades'a-vidhi*, alias *Sañkshipta-vedánta-s'ástra-prakriyá*. A commentary on the *A'tmabodha*, a metrical summary of the Vedánta doctrine. By Sañkara Achárya. Hall's *Contributions*, 105.

Beginning. चित्सदानन्दरूपाय सर्वधीवृत्तिसाक्षिणे ।
नमो वेदान्तवेद्याय ब्रह्मणेऽनन्तरूपिणे ॥
यदज्ञानादिदं भाति यज्ज्ञानाद्‌ विनिवर्त्तते ।
नमस्तस्मै चिदानन्दवपुषे परमात्मने ॥
अथाध्यात्मविद्योपदेशविधिं व्याख्यास्यामः । मुमुक्षवे, श्रद्धधानाय ।

End. क्रियाद्वैतं न कर्त्तव्यं भावाद्वैतं सदा कुरु ।
अद्वैतं त्रिषु लोकेषु नाद्वैतं गुरुणा सह ॥

Colophon. इति सङ्क्षिप्तवेदान्तशास्त्रप्रक्रिया । इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्करकृतौ वह्निर्मुखान्तःप्रकरणमज्ञानबोधिनी समाप्ता ।

विषयः । वेदान्ततात्पर्य्यस्वरूपात्मबोधार्थविवरणं ।

No. 679. विन्दुसन्दीपनं ।

Substance, country yellow paper. Folia, 40. Lines, 13—15 on a page. Extent, 2233 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Vindusandípana. A commentary on the *Siddhánta-vindu* of Madhusúdana Sarasvatí. By Purusottama Sarasvatí, pupil of Madhusúdana Sarasvatí and S'rídhara Sarasvatí. The *Siddhánta-vindu*, otherwise called *Siddhánta-tattva-vindu*, is itself a commentary on the *Das'as'loki*, a metrical abstract of the Vedánta in ten stanzas, by S'ankara Áchárya. Hall's *Contributions*, 108.

Beginning. यद्बोधादिदं भाति शुक्तिकारजतं यथा ।
यद्बोधादस्तमायाति न चोदेति तदस्म्यहं ॥
श्रीरामं मुकुरानम्य वक्ति श्रीपुरुषोत्तमः ।
सिद्धान्तविन्दौ तत्त्वार्थसाधकं किमपि स्फुटम् ॥

End. मद्व्याख्याननिरस्तदोषमचिरादुल्लङ्घमानं बुधै-
र्यत्सिद्धान्तदुरन्तसिन्धुमकरोदाहृत्य विन्दूपमं ।
सम्यग्लब्धसुदर्शनाय विलसद्वाणीप्रणीतश्रिये
निर्व्याजं मधुसूदनाय गुरवे तस्मै परस्मै नमः ॥
अलमन्याम्बुधिर्भ्रान्तिर्यदृच्छ्यतां विबुधैरिह ।
विन्दुसन्दीपनाभ्यासे युक्तिमौक्तिकपङ्क्तयः ॥

Colophon. इति श्रीमधुसूदनसरस्वतीश्रीधरसरस्वतीपूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीपुरुषोत्तमसरस्वतीविरचितो विन्दुसन्दीपनाख्यो ग्रन्थः समाप्तः ।

विषयः । श्रीमधुसूदनसरस्वतीकृतसिद्धान्तविन्दुव्याख्यानं ।

No. 680. भावार्थदीपिका ।

Substance, country yellow paper. Folia, 84. Lines, 12—13 on a page, Extent, s'lokas. Character, Bengali. Date S. 1909. Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Bhávártha-dípiká. A commentary on the *Bhagavad-gítá.* By Mukunda Dása.

Beginning. श्रीमुकुन्दं नमस्कृत्य तद्दासेन विनिर्म्मिता।
गीतायाः शास्त्रसारायाः भावार्थस्य प्रदीपिका॥
वितनुतां सतां मोदं साधकानां विमुक्तिदा।
यस्य देवस्य दासोऽहं स एव शरणं मम॥
युद्धार्थं कुरुक्षेत्रं गतानां कौरवपाण्डवानां वृत्तं व्यासप्रसादेन लब्धदिव्यदृष्टिं स्वसूतं सञ्जयं प्रति धृतराष्ट्रः पृष्टवानिति जनमेजयं प्रति वैशम्पायनो दर्शयति, धृतराष्ट्र उवाचेति।

End. शरणागतदीनार्त्तपरित्राणपरायणः।
यः प्रसिद्धः स एवास्तु मम त्राणपरायणः॥

Colophon. इति श्रीमुकुन्दविरचितायां भगवद्गीताया भावार्थदीपिकायामष्टादशोऽध्यायः।

विषयः। श्रीमद्भगवद्गीताया व्याख्येयं।

No. 681. भागवतप्रकाशः।

Substance, English paper. Folia, 14. Lines, 10 on a page. Extent, 296 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Poetry. Incorrect.

Bhágavataprakás'a. An exposition of the doctrine of faith as an element of devotion, as elaborated in the Bhágavata Puráṇa. By Priyádása.

Beginning. वन्दे सुवृन्दारकवृन्दवन्द्यं वृन्दाटवीकुञ्जविराजमानं।
वेदैश्च सर्व्वैरनुगीयमानं श्रीराधिकावल्लभमिष्टदेवं॥
हृदब्जं स्वीयानां विकसति समन्ताद्यदुदयान्निशा-
तुल्या माया कुहकवदना याति शमनं।
कुमार्गस्यालोको भवति तमसुं व्यासतनयं
नमामो भास्वन्तं सकलहितरूपं गुरुवरं॥
नत्वा मुहुर्भागवताङ्घ्रिरेणून् पुंसः समस्तार्थसुसिद्धिहेतून्।
कुतर्कमायावरणं निवार्य्य करोम्यहं भागवतप्रकाशं॥

अथ खलु भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भयसीत्यादिश्रुतिवाक्येभ्यो भक्त्या मामभिजानातीत्यादि ।

End. अयं सदा भागवतप्रकाशः प्रकाशतां श्रीहरिभक्तिमार्गं ।
धुनोतु धान्यां (?) हृदयान्धकारं तनोतु साधुषु सुखं सदैव ॥

Colophon. इति श्रीमद्भागवतरसरसिकहृदयहृद्दानन्दकन्दश्री+सदपदारविन्दामन्दमकरन्दमधुव्रतानुव्रतप्रियादासकृतः श्रीभागवतप्रकाशः सम्पूर्णः ।

विषयः । श्रीमद्भागवतगूढार्थविवरणं ।

No. 682. मण्डलब्राह्मणोपनिषत् ।

Substance, country yellow paper. Folia, 4. Lines, 16 on a page. Extent, 76 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Correct.

Satyopákhyána. The MS. examined is incomplete, and embraces only a portion of the work (chapters 50 to 79), which has the distinctive title of *Rámarahasya khanda.* Apparently the work is a compilation from one of the Puránas. The contents of the fragment examined are as follow : L. A musical entertainment in Vaikuntha, laws of dancing, origin of the names of Ráma, Krishna, &c. LI. Birth and early life of S'itá, preparations for her marriage. LII. Festal hall of Janaka where many princes arrive in hopes of securing the hands of S'itá. LIII. Vis'vámitra deputed to bring Ráma to the place. LIV. Ráma's arrival at the coart of Janaka, LV. Janaka's hospitality to his guests. LVII. Ráma's breaking the monster bow. LVIII. Das'aratha's arrival at the coart of Janaka. LIX. Reception given him. LXI. LX. Marriage of Ráma and Lakshmana. Heavenly damsels pay their respects to the newly married couple. LXI. Ráma's return home. LXIII. His reception at Kos'ala. LXIV. Nárada's interview with Ráma, LXIV. Reception of Sitá. LXVI. A feast given to Vas'istha and other sages by S'itá. LXVII. Ráma's cruise on the Sarayu. LXVIII. He visits Pávakasara, a sacred pool. A picnic there. LXIX. He is roused from his sleep. LXX. Sports with Guhaka. LXXI. A trip to the banks of the Manoramá River. LXXII. A visit to the temple of Vilvahari. LXXIII. A trip to the Ramanaka forest. LXXIV to LXXVIII. Ráma and S'itá's recreations. LXXIX. Description of Ayodhyá.

Beginning. शौनक उवाच। सूत सूत महाबुद्धे श्रीरामचरितं वद।
यस्य श्रवणमात्रेण भवेन्मुक्तो न संशयः॥
उत्पन्ना च कथं सीता साचाज्ञच्मोः चितेस्तलात्।
कारणं वद मे विद्वन् रामेणोद्वाहिता पुनः॥

End. इदन्तु चरितं रम्यं सीताराघवयोः शुभम्।
श्रुत्वा व्यासान्मया तुभ्यं शौनकेदं प्रकीर्त्तितं॥
धन्यं यशस्यमायुष्यं पुण्यं वंशविवर्द्धनं।

सदैव शृखतां लोके मङ्गलप्रदमुत्तमं ॥
चतुर्वर्गप्रदं ह्येतच्छ्रोतृणां मुदकारकम्।
यश्चैतच्छृणुयाद्वापि वाचयेद्वा समाहितः ॥
उभौ तौ सुखमेधेते व्यासवाक्यमिदं शुभं।
वाचकस्य यथाशक्ति पूजां कुर्यान्महामनाः ॥
मङ्गलानि प्रजाभ्यस्तु न्टपेभ्यस्तु सदैव हि।
साधुगोविप्रभूमिभ्यः श्रीशो दिशतु मङ्गलम् ॥

Colophon. इति श्रीसत्योपाख्याने सूतशौनकसंवादे रामबालचरित्रे एकोनाशी०—
(इतः परं पाठो नास्ति।)

विषयः। ५० अध्याये, शौनकस्य सूतं प्रति श्रीरामचरित्रप्रश्नः, वैकुण्ठवर्णनं, महालक्ष्म्या अग्रतो वासन्तिकाया अप्सरसो नर्त्तनं, नाट्यधर्म्मोक्तिः, लक्ष्म्याः सकाशात् तस्या अप्सरसो वरप्राप्तिः, भुवि अवतरिष्यमाणानां रामकृष्णादीनां नामनिर्देशश्च। ५१, जनकयज्ञशालातो जानक्युत्पत्तिविवरणं, श्रुतकीर्त्तिमाण्डव्याद्युत्पत्तिविवरणं, जानक्या बाल्यलीलादिवर्णनं, सीताविवाहदाने चिन्तायुक्तं जनकं प्रति स्वप्ने महादेवोपदेशः, सीतास्वयम्बरसभानिर्माणादि, तत्सभायां भूपादीनां समागमनं, सीतादर्शनजातभूपति-नानाचेष्टावर्णनञ्च। ५२, धनुर्भङ्गार्थं गतानां भूभुजां वैमुख्यकथनादि, रावणाय सीताप्रदानविषये प्रहस्तस्य जनकेन कथोपकथनञ्च। ५३, सीतावैवाहिकोत्सवे रामस्यानयनार्थं विश्वामित्रमुनेरयोध्यायां गमनादि, रामलक्ष्मणौ नीत्वा विश्वामित्रस्य प्रत्यागमनादि, रामलक्ष्मणरूपलावण्यं दृष्ट्वा विश्वामित्रं प्रति पौरजनप्रश्नादि, ताड़कारूपवर्णनं, रामकर्त्तृकतद्वधादिकथनञ्च। ५४, विश्वामित्रनिकटे जनकदूतागमनादि, रामपादरजःस्पर्शादहल्यामोक्षः, सरामलक्ष्मणेन ऋषिवृन्देन सह विश्वामित्रस्य जनकालयगमनादि, परस्परं कुशलप्रश्नानन्तरं रामलक्ष्मणयो रूपवेशादिवर्णनं, कस्येमौ कुमारावित्यादिजनकप्रश्नस्य विश्वामित्रकर्त्तृकोत्तरदानादि च। ५५, रामादिसमागमे जनकस्य शिष्टाचारवाक्यादि। ५६, भोजनार्थं निमन्त्रितस्य सरामलक्ष्मणमुनिवृन्दस्य विश्वामित्रस्य जनकगृहे गमनं, रामलक्ष्मणवेशभूषादिवर्णनञ्च। ५७, धनुर्भङ्गोत्सववर्णनादि। ५८, दशरथानयनार्थं दूतप्रेरणानन्तरं दशरथस्य जनकालये ससज्जमागमनादि। ५९, दशरथानयनार्थं जनकस्य स्वपुरान्निर्गमनम्, उभयसमागमे परस्परं यथाविहितशिष्टाचारकरणादि। ६०, रामलक्ष्मणादिविवाहोत्सववर्णनादि। ६१, सीतासहितरामदर्शनार्थं ब्रह्माणादीनामागमनादि, यौतुकदानादि च।

६२, रामलक्ष्मणादिभिः सह दशरथस्य स्वपुर आगमनं। ६३, रामाद्यागमने अयोध्यापुरवासिप्रभृतिकृतमङ्गलोत्सवकथनादि। ६४, इन्द्रप्रेषितनारदस्याप्सरः-प्रभृतीनाञ्चायोध्यायामागमनं, रामस्य पुरतो नारदस्याप्सरसञ्च नर्त्तनादिकथ-नञ्च। ६५, पुरस्त्रीणां सीतादर्शनार्थमागमनं, रामसीतारहस्यकथावर्णनञ्च। ६६, जानकीकृतपाकेन वशिष्ठादिद्विजादीनां भोजनं। ६७, रामलक्ष्मणा-दीनां सपरिवाराणां ससैनिकादीनाञ्च सरय्वां नौकासु गमनादि। ६८, ततो रामस्य सैनिकादिसहितस्य पार्वतीसरोदर्शनार्थगमनादि, रामादीनां वन-विहारादिवृत्तान्तकथनं च। ६९, रामनिद्राभङ्गानन्तर वनभ्रमणादि। ७०, रामादीनां गुहेन सह वनविहारादिवृत्तान्तकथनादि। ७१, मनोरमा-नदीप्रदेशे रामादीनां गमनादि। ७२, रामादीनां विल्वहरिसमीपे गमना-दिवृत्तान्तकथनं। ७३, रामादीनां रमणकवनगमनादिवृत्तान्तकथनं। ७४, ७५, ७६, ७७, ७८, सीतारामयो रहस्यकेलिवृत्तान्तकथनं। ७९, अयोध्या-वर्णनादि॥

No. 715. वेदान्तविज्ञाननौका।

Substance, country yellow paper. Folia, 3. Lines, 2—9 on a page. Extent, 25 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Verse. Generally correct.

Vedánta-vijñána-nauká. The essence of the Vedánta in nine stanzas. By S'añkara Áchárya.

Beginning. तपोयज्ञदानादिभिः शुद्धबुद्धिर्विरक्तो नृपादौ पदे तुच्छबुद्ध्या।
परित्यज्य सर्वं यदाप्नोति तत्त्वं परं ब्रह्म नित्यं तदेवाहमस्मि॥ १॥
दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं समाराध्य भक्त्या विचार्य्यस्वरूपं।
यदाप्नोति तत्त्वं निदिध्यास्य विद्वान् परं ब्रह्म नित्यं तदेवाहमस्मि॥ २॥
दयानन्दरूपं प्रकाशस्वरूपं निरस्तप्रपञ्चं परिच्छेदशून्यं।
अहं ब्रह्मवित्त्येकगम्यं तुरीयं परं ब्रह्म नित्यं तदेवाहमस्मि॥ ३॥

End. स्वरूपानुसन्धानरूपां स्तुतिं यः पठेदादराद् भक्तिभावान्मनुष्यः।
शृणोतीह वा नित्यमुयुक्तचित्तो भवेद् विष्णुरत्रैव वेदप्रमाणात्॥ ९॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्कराचार्य्यविरचितं वेदान्तविज्ञान-नौकाख्यं प्रकरणं सम्पूर्णम्॥

विषयः। ब्रह्मतत्त्वविषयकाः श्लोका एव॥

No. 716. लघुशब्देन्दुशेखरं ।

Substance, country paper, 9¾ × 4¼ inches. Folia, 475. Lines, 10 on a page. Extent, 11520 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

Laghus'abdendu-s'ekhara. A commentary on the *Siddhánta Kaumudí* of Bhaṭṭojí Dikshita. By Náges'a, son of S'iva Bhaṭṭa and Satí Deví. The MS. is incomplete.

Beginning. पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः ।
शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः ॥
याचकानां कल्पतरोररिकक्षहुताशनात् ।
शृङ्गवेरपुराधीशाद्रामतो लब्धजीविकः ॥
नत्वा फणीशं नागेशस्तनुतेऽर्थप्रकाशकं ।
मनोरमोमार्द्धदेहं लघुशब्देन्दुशेखरम् ॥

End. खण्डितत्वात् शेषवाक्यं नास्ति ।

विषयः । सिद्धान्तकौमुदीस्थानां सन्ध्यादिकृदन्तपर्यन्तानां प्रकरणानां व्याख्यानं । अत्र प्रायशस्तत्तत्प्रकरणानां व्याख्यानं न सम्पूर्णं, पत्राण्यपि नैकतः क्रमशः संलग्नानि ।

No. 717. पद्यत्रयीव्याख्यानं, सटीकम् ।

Substance, country paper, 12½ × 5 inches. Folia, 38. Lines, 14 on a page. Extent, 1400 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Correct.

Padyatrayivyákhyána. A dissertation in verse on the first three stanzas of the *Bhágavata Purána*, designed to establish the divinity of Krishṇa and the preeminence of the Bhakti doctrine. By Sadánanda. Attached to the text is a prose commentary by an unknown author.

Beginning. (टीका०) सकलरसनिवासं सर्वसौन्दर्यसारं मधुरमधुरमूर्त्तिं सर्वदा प्रेमगम्यम् ।
रतिमतिगतिशान्तिश्रीजयाशक्तिसेव्यं व्रजपतिसुतमेकं कृष्णमेव श्रयेहम् ॥
श्रीमद्भागवताद्यपद्यत्रयीं व्याख्यातुकामो मङ्गलमाचरति ।

(मू०) नत्वा श्रीमाधवं भक्त्या सुखबोधाय सन्नृणाम्।
श्रीमद्भागवते पद्यत्रयव्याख्यां करोम्यहम्॥

End. (टीका०) पुमर्थ इति तत्प्रवृत्तिहये न पृथक् यतितव्यमिति अभिप्रायः।
कृतं पद्यत्रयव्याख्यानं भगवति समर्पयति श्रीमदिति त्रिभिः।
इति श्रीमन्मुकुन्दपदारविन्दरसाभिलाषिसदानन्दविरचितं पद्यत्रयीव्याख्यानं समाप्तिमगमत्।
(मू०) श्रीमद्भागवतं पुराणमतुलं तस्याद्यपद्यत्रयं
सारांशो निखिलोऽत्र सूचित इतः काण्डत्रये सम्मतः।
व्याख्यातं तत एतदेव विमलैः पद्यैरुदारत्रणै-

Colophon. रेतेनैव हरिः कृपानिधिरसौ प्रीणातु सद्भक्तिदः॥ ४५॥

विषयः। जन्माद्यस्येत्यादीनां भागवताद्यपद्यत्रयाणां पद्यैर्व्याख्यानम्।

No. 718 आत्मषट्कभाष्यटीका, वा ऐतरेयभाष्यटीका।

Substance, country paper, 10 × 4½ inches. Folia, 57. Lines, 11 on a page. Extent, 1200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Correct.

A'tmashaṭka-bháshya Ṭiká. A gloss on S'ankara's commentary on the Aitareya Upanishad. By Abhinava-naráyanendra.

Beginning. ॐ आत्मा वा इदमित्यादिना केवलात्मविद्यारम्भस्यावसरं वक्तुं वृत्तं कीर्त्तयति।
परिसमाप्तमिति। इत्यादि।

End. अवतु वक्तारमित्यभ्यासोऽध्यायपरिसमाप्त्यर्थो द्वितीयारण्यकपरिसमाप्त्यर्थश्च।
हरिः ॐ।

Colophon. इति श्रीमदभिनवनारायणेन्द्रविरचितात्मषट्कभाष्यटीका समाप्ता।

विषयः। ऐतरेयभाष्यतत्तत्स्थलार्थविवरणम्॥

No. 719. तन्त्ररत्नम्।

Substance, country paper, 10½ × 4½ inches. Folia, 622. Lines, 11 on a page. Extent, 18,650 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Tantra-ratna alias *Ṭup Ṭíká*. A commentary on the Mímáñsá Sútras of Jaimini. By Pártha sárathi Mis'ra. The MS. is imperfect, and contains only Chapters IV, V, VI, VII, IX and X of the work. This work, in common with four others, bears the generic name of *Vártika*. Hall's *Contributions*, 170-180.

Beginning. (चतुर्थाध्यायस्य प्रथमपत्रं नास्ति, द्वितीयपत्रस्यादौ लिखितं, यथा—)
र्थ इति वेदितव्यं । पदाङ्क इत्येवमादिष्वप्येवं योज्यमित्यादि ।

End. (दशमाध्यायस्य शेषवाक्यं, यथा—)
श्रूयते यस्त्वसौ कालः सौगमेतस्य कर्मणः ।
स च तत्रापि नापेतो यत्राग्नेयोऽस्ति केवलः ॥
तस्मात् तत्राप्यवैगुण्याद्बाधो नोपांशुकर्म्मणः ॥

Colophon. इति श्रीपार्थसारथिमिश्रविरचिते तन्त्ररत्ने दशमाध्यायस्याष्टमः पादः ।
समाप्तो दशमः ।

विषयः । जैमिनीयमीमांसासूत्रार्थविवरणं । मूलसूत्रग्रन्थे १२ अध्यायाः सन्ति । तत्र प्रत्यध्यायविषयस्तु न्यायमाला १५ सूचीपत्रे उक्तः । अस्य तन्त्ररत्नस्य ४, ५, ६, ७, ९, १० एते अध्यायाः वर्त्तन्ते, अन्ये १, २, ३, ८, ११, १२ एते अध्याया न सन्ति । (अतः खण्डितं) ।

No. 720. शारीरकन्यायरक्षामणिः ।

Substance, country paper, 10 × 5 inches. Folia, 132. Lines, 12—13 on a page. Extent, 2500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'áríraka-nyáya-rakshámaṇi. A gloss on the commentary of S'añkara Áchárya, on the Vedánta aphorisms of Vyása. By Apya Dikshita. The MS. is incomplete, containing only the second and the fourth chapters. Hall's *Contributions*, p. 90.

Beginning. (चतुष्पादावच्छिन्नोऽयं ग्रन्थः, तत्रास्माभिरस्य द्वितीय-चतुर्थपादौ प्राप्तौ, तत्र द्वितीयस्याद्यन्तवाक्यानि,) प्रथमे पादे स्पष्टं ब्रह्मलिङ्गानि वाक्यानि निर्णीतानि, अथास्य ब्रह्मलिङ्गानि वाक्यानि निर्णेतुं पादान्तरारम्भः । इदञ्च तत्र तत्र स्फुटीकरिष्यते इत्यादि ।

(चतुर्थस्यादिवाक्यादि०)। आनुमानिकमप्येकेषामिति चेन्न शरीररूपविन्यस्त-गृहीतेर्दर्शयति च, इत्यादि।

End. आदेशमात्रत्वाश्रवणेनोपासकमूर्धादिरूपषंहृतत्वप्रतीतेर्वैदिवर्हिगार्हपत्यादिकल्पनप्रतिनिरूढत्वाच्चास्पष्टता।

Colophon. इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभ-श्रीमदद्वैतविद्याचार्य-श्रीविश्वजिच्छ्रीरङ्गराजाध्वरिवरसूनोरप्पदीक्षितस्य कृतौ शारीरकन्यायरक्षामणौ प्रथमाध्यायस्य द्वितीयः पादः।

तस्मात्सिद्धं ब्रह्मजगतो निमित्तमुपादानञ्चेति युक्तं ब्रह्मण उपलक्षणम्।

इति न्यायरक्षामणौ चतुर्थः पादः।

विषयः। द्वितीये ब्रह्मणो जत्कारणत्वं तदाक्षिप्तं सर्वज्ञत्वं सर्वात्मत्वं व्यापित्वं नित्यत्वमित्येवमादिधर्म्मात्मकानां स्पष्टब्रह्मलिङ्गवाक्यानां निर्णयः।

चतुर्थे, ब्रह्मप्राधान्यत्वप्रतिपादकवेदान्तवाक्योत्पन्नशङ्कानिरासपूर्वकप्रसाधितसमन्वयदृढीकरणम्।

No. 721. कठवल्लीभाष्यविवरणं।

Substance, country paper, 11 × $4\frac{3}{4}$ inches. Folia, 34. Lines, 16 on a page. Extent, 1500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Correct.

Kaṭhavallíbháshya-vivaraṇa. A gloss on the commentary of S'ankara Áchárya, on the Kaṭha Upanishad. By Gopála Yogí.

Beginning. ब्रह्माद्वयं परानन्दं धर्म्मादीनामगोचरं।
कार्यकारणनिर्मुक्तं शिवं परमुपास्महे॥
नत्वा देवमुमाजानिं स्मृत्वा गुरुपदाम्बुजम्।
ध्यात्वा गौरीमहं कुर्वे कठभाष्यविवेचनम्॥

End. ॐ शब्दो मङ्गलप्रयोजनः कठोपनिषदर्थस्मारकः। इतिशब्दो भाष्यसमाप्तिद्योतनप्रयोजन इति बोध्यम्।
कठवल्लीभाष्यटीका कृता गोपालयोगिना।
अनया प्रीयतां देवो दक्षिणाशामुखः शिवः॥

Colophon. इति कठवल्लीभाष्यविवरणेऽन्तिमा वल्ली समाप्ता।

विषयः। षट्कठवल्लीभाष्यतत्तत्स्थलविशेषार्थव्याख्यानम्।

No. 722. सुकृत्यप्रकाशः ।

Substance, country paper, 11 × 4¾ inches. Folia, 48. Lines, 11 on a page. Extent, 1200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Sukṛitya-prakás'a alias *Kritya-prakás'a.* A Smṛiti compilation. By Jválánạtha Mis'ra. Contents : I *Achára*, or the daily duties of washing the face, bathing, morning, noon and evening prayers, charity, sacrifices. II. *As'aucha*, or impurities resulting from death, birth, &c., among different castes and orders. III. *Sráddha*, or offerings to the manes. IV. *Asatpratigraha*, or receipt of gifts from persons not religiously qualified to make them. The work in its complete form probably includes several other chapters.

Beginning. वन्देऽहं पदपङ्कजं रसभरं नित्यं विभुं श्रीप्रदं
विघ्नध्वंसपटीयसस्तव विभो देवाग्रपूजाग्रहम् ।
जुष्टं विद्वदुपासकैः प्रतिदिनं मुक्तिक्रमान्वेषिभि-
स्तुष्टेत्यकलं मनोभिलषितं पूर्णं फलं दास्यति ॥ इत्यादि ।

End. यस्मै केवलज्योतिषं स्वर्पितं हि स्वं यान्ति जातं सता
तस्मै सर्वसुसाक्षिणे नम इति कुर्वे सुकृत्यार्पणम् ।

Colophon. इति ज्वालानाथमिश्रकृतधर्मशास्त्रे सुकृत्यप्रकाशे असत्प्रतिग्रहप्रकरणम् ।

विषयः । १, आचारप्रकरणे आचारनिर्णयः, तत्प्रशंसा । दन्तधावन-स्नानसन्ध्यादि-तर्पण-बलिकर्मातिथिपूजाभोजन-दारागमनादिव्यवस्था च । २, अशौचप्रकरणे, सार्ववर्णिकमृताशौचनिर्णयः । ३, श्राद्धप्रकरणे, नानाविधश्राद्धलक्षणविधि-नियमादिकथनं । ४, असत्प्रतिग्रहप्रकरणे, मृतकमृतकग्रहणादौ प्रतिग्रह-निषेधः ।

No. 723. लक्ष्मीनिवासाभिधानं ।

Substance, country paper, 10¾ × 4¼ inches. Folia, 26. Lines, 8 on a page. Extent, 650 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Correct.

Lakshminivásábhidhána. A Sanskrit vocabulary, in verse, of words formed with the Unádi affixes. By Sivaráma, son of Kṛishṇaráma, and grandson of Trilokachandra. The first seven folia of the MS. are wanting.

Beginning. (प्रथमतः सप्तपत्राणि न सन्ति) ।

End. काव्यानि पञ्च नुतयो युगसम्मिताश्च टीकाद्वयोदश तथैष उणादिकोषः ।
भूपालभूषणमयो रसरत्नहारो विद्याविलास इनपूर्वफलाङ्किरब्दे ॥ २१ ॥
ग्रन्थान्मया विरचितान् परिशीलयन्तु शीलान्विताः सुमनसो मनसो मुदे मे ।
यद्वङ्किशाधितमनल्परुचा समेतं जाम्बूनदं भवति मूल्यविशेषलभ्यं ॥ २२ ॥
परिश्रमो व्याकणे काव्यादावपि यः कृतः ।
दिगियं दर्शिता तस्य शिवरामेण सन्मुदे ॥ २३ ॥
लक्ष्मीःकीर्त्तिरसा मध्ये (?) शिवरामप्रसादतः ।
कुरुतां वसतिं शक्रतुल्यभूपालपालिते ॥ २४ ॥
शिवरामकृतौ कोष उणादन्तैकसङ्ग्रहः ।
लक्ष्मीनिवासे सम्पूर्णः पादोऽयं पञ्चमोभवत् ॥

Colophon. इति श्रीमत्त्रिपाठ्युपनामकत्रिलोकचन्द्रात्मजकृष्णरामकृतौ लक्ष्मीनिवासाभिधाने उणादिप्रत्ययान्तशब्दकोषे पञ्चमः पादः ।

विषयः । उणादिप्रत्ययान्तशब्दानां पञ्चभिः पादैर्नामलिङ्गाद्यनुशासनम् ।

No. 724. माधवानलकथा ।

Substance, country paper, 7¾ × 3½ inches. Folia, 20. Lines, 8—9 on a page. Extent, 323 s'lokas. Character, Nágara. Date, S. 1587. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Mádhavánala-kathá. The amours of Madhávánala, and Kámakandalá, a tale. The lovers are said to have resided at Pushpavati, in the neighbourhood of the palace of King Govinda Chandra. Fol. 3rd, 4th, 7th and 12th wanting.

Beginning. प्रणम्य परया भक्त्या हंसयानां सरस्वतीम् ।
तस्याः प्रसादमासाद्य करिष्यामि कथामिमाम् ॥

End. राजा सहर्षो जातः । उक्तञ्च ।
विजेतव्या लङ्का चरणतरणीयो जलनिधिर्विपक्षः
पौलस्त्यो रणभुवि सहायाश्च कपयः ॥
तथाप्येको रामः सकलमवधीद्राक्षसकुलं
क्रिया सिद्धिः सत्त्वे वसति महतां नोपकरणे ॥
ततो राजा माधवानलस्य कामकन्दला जाता ॥ ७ ॥

Colophon. इति माधवानलकथा समाप्ता ।

विषयः । पुष्पावतीनगरीश्वरस्य गोविन्दचन्द्रस्य राज्ञो गृहवर्त्तिनो माधवानलस्य ब्राह्मण-वटोः कामकन्दलावेश्यायाश्च वृत्तान्तविशेषकथनं । अत्र तृतीय-चतुर्थ-सप्तम-द्वादशपत्राणि न सन्ति । अतः खण्डितम् ।

No. 725 मुण्डकभाष्यटिप्पणं ।

Substance, country paper, 10 × 4½ inches. Folia, 11. Lines, 13 on a page. Extent, 400 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Muṇḍaka-bháshya-ṭippaṇa. A gloss on S'aṅkara's commentary on the Muṇḍaka Upanishad. Anonymous.

Beginning. यदक्षरं परं ब्रह्म विद्यागम्यमितीरितं ।
यस्मिन् ज्ञाते भवेज् ज्ञातं सर्वं तत्स्याममंशयम् ॥
ब्रह्मोपनिषद्गर्भोपनिषदाद्या अथर्वणवेदस्य बह्व्य उपनिषदः सन्ति । तासां शारीरके अनुपयोगित्वेनाव्याचिख्यासितत्वादृहश्यत्वादिगुणको धर्मोक्तेरित्याद्यधिकरणोपयोगितया मुण्डकस्य व्याचिख्यासितस्य प्रतीकमादत्ते, ब्रह्मा देवानां इत्यादि ।

End. ग्रन्थद्वारेण विद्यायाः प्रकृतत्वसम्भवात् न सर्वत्र ब्रह्मविद्याप्रदानमिति सूचयन्नाह, एतां ब्रह्मविद्यां वदेतेति ।

Colophon. इति मुण्डकभाष्यटिप्पणं ।

विषयः । मुण्डकभाष्यतत्तत्स्थलविशेषार्थविवरणं ।

No. 726. श्यामापूजापद्धतिः ।

Substance, country paper, 9½ × 3¼ inches. Folia, 19. Lines, 6 on a page. Extent, 250 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'yámápújá Paddhati. A manual for the worship of Dakshiṇákálí. Anonymous.

Beginning. अथ श्यामापूजापद्धतिः। पादौ प्रक्षाल्याचम्य मन्त्राचमनं कुर्यात्। तद्यथा, क्रीमिति त्रिर्जलं पीत्वा, इत्यादि।

End. ततो मूलमन्त्रेण पूर्णाहुतिं दत्वा संहारमुद्रया स्वेष्टदेवतां हृदये समानीय क्षमस्वेति विसृज्य दक्षिणां दत्वाच्छिद्रावधारणं कुर्यात्।

Colophon. इति सङ्क्षेपहोमपद्धतिः॥

विषयः। दक्षिणकालिकापूजनाद्यङ्गीभूतविधिकथनं।

No. 727. न्यायसारः।

Substance, country paper, 10 × $3\frac{1}{2}$ inches. Folia, 18. Lines, 9 on a page. Extent, 370 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Nyáya-sára. An elementary treatise on the Nyáya. By Bhásarvajña. Dr. Hall notices a commentary on this work by Bhaṭṭa Rághava, *Contributions*, 26.

Beginning. प्रणम्य शम्भुं जगतः पतिं परं समस्ततत्त्वार्थविदं स्वभावतः।
शिशुप्रबोधाय मयाभिधास्यते प्रमाणतद्भेदतदन्यलक्षणम्।
सम्यगनुभवसाधनं प्रमाणम्। इत्यादि।

End. तत्सिद्धमेतत्। नित्यसंवेद्यसुखे न विशेषः। आत्यन्तिकी दुःखनिवृत्तिः पुरुषस्य मोक्ष इति।

Colophon. इति श्रीभासर्वज्ञविरचिते न्यायसारे तृतीयः परिच्छेदः। समाप्तोयं न्यायसारः॥

विषयः। प्रमाणप्रमेयानुमानजात्यादिकतिपयपदार्थानां नैयायिकनयेन सङ्क्षिप्तलक्षणकथनं।

No. 728. नारायणप्रबोधोत्सवः वा प्रबोधोत्सवः।

Substance, country paper, $9\frac{1}{2}$ × $4\frac{1}{4}$ inches. Folia, 8. Lines, 10 on a page. Extent, 200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct.

Náráyaṇa-prabodhotsava. Rules for the celebration of a feast on the 12th of the waxing moon in the month of Kártika, that is on the day after the close of the *Cháturmásyá* fast, which commences on the 11th of the waxing moon in the month of Áshádha, and lasts for four months, terminating on the 11th of the waxing moon in Kártika. The first day is called *S'ayana ekádas'í* or the day on which Vishṇu, according to the Puráṇas, falls asleep, and the last, *Utthána ekádas'í* or the day of his waking. This is evidently a Hindu adaptation of the Buddhist *Vassá*, which lasted for four months of the rainy season, during which the monks were permitted to reside in hermitages and cells, and to abstain from peregrination and begging. There is every reason to believe that the Buddhists copied it from the Vedic ceremony of *Cháturmásya*, which lasted for four months, but not always during the rains. The most prominent features of the fast as now observed are continence, abstinence from certain rich articles of food, bedding, shaving and other luxuries, eating on the bare earth, and other privations; each devotee fixing his own course of observances. The feast which the MS. describes, is intended to mark the termination of the fast by rejoicing, like the *Rámzán* of the Muhammadans, or the last day of the Lent among Roman Catholic Christians. Annexed to the work is a ritual for the celebration of the marriage of Náráyaṇa with the Tulasí plant on the day preceding the feast. Anonymous.

Beginning. अथ कार्त्तिकशुक्लद्वादश्यां पारणाविचारस्तथा प्रबोधोत्सवश्च विचार्य्यते ।
कार्त्तिकशुक्लद्वादश्यां रेवतीयोगरहितायां पारणं कार्य्यम् ।

End. चातुर्मास्यव्रतसमाप्तिरप्येवेति केचित् । कार्त्तिकमासव्रतोद्यापनं चातुर्मास्यव्रतोद्यापनं च चतुर्दश्यां पूर्णिमायां वेत्यपरे ।

Colophon. इति श्रीनारायणप्रबोधोत्सवो व्रतनिवेदनं सङ्क्षेपतस्तुलसीविवाहप्रयोगश्च समाप्तः ।

विषयः । हरिप्रबोधनाङ्गीभूतकर्त्तव्यानुष्ठानकथनादि, तुलसी विवाहप्रयोगकथनं च ।

No. 729. व्रतोद्यापनविधिः, शालग्रामदानविधिः ।

Substance, country paper, 11 × 5 inches. Folia, 45. Lines, 11 on a page. Extent, 1125 s'lokas. Character, Nágara. Date, S. 1890, SK. 1755. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Vratodyápanavidhi. Rituals to be observed on the last or concluding day of certain prescribed penances, as also what are to be gone through on the occasion of giving away an ammonite stone (*s'álagráma*).

Beginning. अथ सङ्क्षेपतो व्रतार्कोक्तानि व्रतोद्यापनानि प्रयोगरीत्या उच्यन्ते। तत्रादौ सर्वतोभद्रकारिका ।

End. (खण्डितत्वात्परिसमाप्तिवाक्यादिकं नास्ति) ।

विषयः । सर्वतोभद्रादिचक्रनिर्माणविधिः । सङ्कटचतुर्थीनागपञ्चमीजन्माष्टम्यादिविविध-व्रतोद्यापनविधिः । शालग्रामदानविधिश्च । (इतःपरं खण्डितं) ।

No. 730. आचारमयूखः ।

Substance, country paper, 11 × 4¾ inches. Folia, 80. Lines, 9 on a page. Extent, 1800 s'lokas. Character, Nágara. Date, S. K. 1729. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

A'cháramayúkha. A compendium of diurnal religious duties which should be observed by all strict Hindus. By Nílakantha Bhatta, son of S'ankara Bhatta. The author has treated of the whole circle of the Smriti, in separate compendia under the generic title of *Mayúkha* or the Mirror, and this is one of them.

Beginning. पादौ दिवाकरस्याद्यमवलम्बे मुहुर्मुहुः ।
यत्पादालम्बितं पद्मं पद्मारोहति सम्प्रति ॥
श्रुतीः स्मृतीर्वीच्य पुराणजातं तन्निबन्धानपि सन्निबन्धान् ।
चिरन्तनाचारचयं च बध्नात्यथाह्निकं सम्प्रति नीलकण्ठः ॥

End. अनेन विधिना यस्तु शान्तिं कुर्वीत शक्तितः ।
तस्य वर्षशतायुष्यं भवत्येव न संशयः ॥ १४ ॥

Colophon. इति श्रीमीमांसापारावारपरीणधुरीणभट्टशङ्करसूनोर्भट्टनीलकण्ठस्य कृता आचारमयूखः समाप्तः ।

विषयः । शयनादुत्थाय प्रातःस्मरणदन्तधावनमलमूत्रत्यागस्नानसन्ध्यातर्पणपूजनबलिवैश्वदेवादिदैनन्दिनाचारानुष्ठानव्यवस्थाकथनं ।

No. 731. विश्वकर्मीयशिल्पं ।

Substance, English paper, $9\frac{3}{4} \times 7\frac{1}{2}$ inches: a 4to. volume. Folia, 63. Lines, 20 on a page. Extent, 1224 s'lokas. Character, Nágara. Date, 1872. A. D. Place of deposit, Calcutta, Bábu Rájendralála Mitra. Appearance, new. Verse. Incorrect, and corrupt.

Vis'vakarmíya S'ilpa. A treatise on the manual arts attributed to Vis'vakarmá, the divine architect; but apparently a compilation, as it is written in the Tántric style, having S'iva for its narrator. The MS. has been copied for me from an old Codex in the Library of the Rájá of Tanjore. There are in it many lacunæ and several Tamil words which, I understand from Mr. Burnell, through whose kind aid I have got the copy, have crept in, owing to the circumstance of the original, in the Halakánáḍá character, having short notes interspersed in the Tamil language. This peculiarity characterises almost all the S'ilpa MSS. in the Tanjore Library. None of the MSS. examined by Mr. Burnell is perfect, or even tolerably correct. Contents: I. Origin of Vis'vakarma; derivation of the words *Takshaka* (carpenter) *vardhaki* (sculptor) &c. II. Height of man in different ages of the world; wood and stone for the formation of images. III. Sacraments for sculptors and carpenters. IV. Halls for the consecration of S'iva and other gods. V. Proportions of images of the planets and lingams. VI. Formation of cars. VII. Consecration of cars. VIII. Forms of Bráhmi, Mahes'vari and other goddesses. IX. Sacrificial or Brahmanical thread. X. Sacrificial threads of gold, silver, and munja fibre; the different sides where images of gods and goddesses are to be placed; qualities of a kind of stone called *Hemas'ilá* or "golden stone" to be found to the south of the Meru mountain. XI. Images of Indra, Máhes'vari, and other gods and goddesses. XII.—XIII. Crowns, crests and other head ornaments. XIV. Movable and fixed thrones for images; crests and other ornaments for the head; repairs of temples. XV. Proportions of doors of temples for lingams. XVI. Proportion, of doors for other temples. XVII. Temples for Vighnes'a. Most of these chapters appear imperfect and fragmentary, and the work is obviously incomplete.

Beginning. कैलासशिखरे रम्ये नानारत्नसमाकुले ।
नानाम्टगसमाकीर्णे नानाद्दच्चसमाकुल ॥

नानाप्सरोभिरुषिते नानासुरगणावृते ।
नानारक्षोभिराकीर्णे नानागन्धर्वसेविते ॥
नानामुनिगणाकीर्णे नानापुष्पसमाकुले ।
किन्नरैर्नारदेनापि स्तुते तुम्बुरुभिः सह ॥
दिव्याङ्गनासमागीते सर्वदा देवसन्निधौ ।
आकाशगङ्गासलिलैः शीतलैरुपशोभिते ॥
श्रुतिस्मृतिपुराणाद्यैरितिहासैः सुविश्वलैः (?) ।
स्तूयमानैस्तु ऋषिभिः सनन्दसनकादिभिः ॥
+सयवसप्तद्वीपा च समुद्राश्च विनीयते (?) ।
एतषान्तु समाकर्त्तुं समर्थस्तन्मनाः शिशवः (?) ॥
इत्युक्तो देवदेवेशो भुवनाधिपतिः शिवः ।
समीक्ष्य विश्वकर्माणं तस्य मे स्रजतीश्वरः (?) ॥ इत्यादि ।

End. द्वारस्तम्भस्य दैर्घ्येण दशनवाष्टभागतः ।
एवं भागशिरोत्सेधं द्वारस्तम्भस्य योजयेत् ॥

Colophon. शिवमयं शिल्पग्रन्थः सम्पूर्णः ॥

विषयः । १, अध्याये विश्वकर्मोत्पत्तिः, कर्मविशेषभेदेन व्यवहृततत्तकवर्द्धक्यादिशब्दव्युत्पत्तिश्च । २, सत्यादियुगजातनरोच्चताप्रमाणं, यज्ञीयकाष्ठेन प्रस्तरेण, वा देवप्रतिमानिर्माणे मानादि । ३, तत्तकस्य गर्भाधानादि संस्कारकथनं, गर्भोत्पत्तिकथनादि च । ४, शिवलिङ्गादिप्रतिष्ठार्थं सभानिर्माणादि । ५, ग्रहप्रतिमानिर्माणप्रमाणं, लिङ्गपीठनिर्माणप्रमाणादि च । ६, रथनिर्माणविधेः कथनं । ७, रथप्रतिष्ठाविधिः । ८, ब्राह्मीमाहेश्वर्यादीनां स्वरूपादिवर्णनादि । ९, यज्ञोपवीतलक्षणं । १०, सुवर्णरजतमौञ्ज्यादिनिर्मितयज्ञोपवीतकथनं, दिग्भेदेन देवस्थापनप्रकारादि, मेरुदक्षिणस्थितहेमशिलाकथनादि च । ११, लक्ष्मीब्राह्मीमाहेश्वर्यादिदेवीन्द्रादिदिक्पालग्रहादिमूर्त्तिनिर्माणप्रकारः । १२, १३, मुकुटकिरीटजटामुकुटादिनिर्माणप्रकारादि । १४, स्थावरास्थावरसिंहासननिर्माणप्रकारादि । पुनर्विशेषेण किरीटललाटपट्टिकादिनिर्माणप्रकारः । देवताया मन्दिरस्य च जीर्णोद्धारप्रकारः । १५, लिङ्गमूर्त्तिमन्दिरद्वारादिकथनं । १६, प्रतिमामूर्त्तिमन्दिरद्वारादिकथनं । १७, विघ्नेशमूर्त्तिमन्दिरादिनिर्माणादिविधिः ।

No. 732. सामयाचारिकसूत्रं ।

Substance, country paper, 11 × 4¾ inches. Folia, 24. Lines, 11—12 on a page. Extent, 840 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old: Prose. Correct.

Sámayáchárika Sútra. This is a fragment of the S'rauta Sútra of Ápastamba of which it forms, according to Mr. Burnell, chapters XXVI and XXVII. It treats of *Upanayana*, or the investiture of the sacrificial thread; *Brahmacharya*, or the study of the Vedas by a tutor, including the duties of the teacher and the taught; proper and improper food; the domestic duties of the four orders; and funeral. An excellent edition of this work has been published by Professor Buhler of Bombay.

Beginning. अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामः ॥ १ ॥ धर्मज्ञसमयः प्रमाणम् । वेदाश्चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः । इत्यादि ।

End. पाणिग्रहणादार्थोजात्यायेन भिक्षणे सवर्णा सह विलयन (?) चत्वारो व्याख्याताः । क्षेत्रसेकादश ।

Colophon. इति द्वितीयः प्रश्नः ।

विषयः । १, पटले वर्णाश्रमधर्मः । उपनयनं । उपनीतधर्माः । उपनयनकालः । काल अनुपनीते प्रायश्चित्तादि । आचार्यकुलवासकालनिर्द्धारणं । त्रैवर्णिकब्रह्मचर्यविधिः । त्रैवर्णिकभैक्ष्यचर्य्याः । भोजनविधिः । समिदाद्याहरणादि । २, तपःकरणाकरणफलादि । त्रैवर्णिकाभिवादनं । अध्ययननियमादि । गुरुस्थापनविधिः । स्वप्नयनविधिः । आचार्योपासना । ब्रह्मचारिनियमाः । गुरुदक्षिणादि । आत्मप्रशंसावर्जनादि । आचरणनियमादि । शिष्यं प्रत्याचार्यकर्त्तव्यता । ३, उपाकर्मकृत्यम् । अनध्यायः । वपनादि । पुनरनध्यायादि । ४, स्वाध्यायनियमादि । महायज्ञब्रह्मयज्ञकर्त्तव्यादि । मातृपित्रादिगुरुजनशुश्रूषादि । भूतबलिप्रभृति । अभिवादनयोग्यादि । कुशलप्रश्नादि । ५, कर्मविशेषेषु उपवीतिभवनं । आचमननियमादि । भोजनपात्रनिर्देशः । भोज्यान्नशाकादि । मद्यपाननिषेधः । पेयापेयक्षीरादि । करञ्जपलाण्ड्वाद्यभक्ष्यमूलादि । भक्ष्याभक्ष्यपशुपमत्स्यादि । ६, भोज्याभोज्यान्नादिकथनं । ७, धर्माधर्मविचारः, अशुचिकरपदार्थादि । ८, आध्यात्मिकयोगानुष्ठानादि । ९, क्षत्रियादिहननप्रायश्चित्तकथनादि । १०, पतितापतितादिकथनं । ११, मूत्रपुरीषादिविधिः ।

(इति प्रथमप्रश्नस्य)। द्वितीयप्रथमपटले ग्टहमेधिव्रतायुक्तिः। २, बलिवैश्व-देवादिकर्मकथनं। ३, अतिथिपूजनादिकथनं। ४, मधुपर्कादिकथनादि। ५, त्रैवर्णिककर्त्तव्याध्ययनाध्यापनादिकर्मोपदेशादि। ६, दायार्हपुत्रादिकथनं। ७, पितृमेधादि। ८, नित्यश्राद्धभोजननियमादि। ९, चतुराश्रमादिकीर्त्तनादि। १०, ११, राज्ञो विशेषधर्मकथनादि। (इति द्वितीयप्रश्नः)।

No. 733. शारदातिलकं।

Substance, country paper, 9½ × 4½ inches. Folia, 134. Lines, 14 on a page. Extent, 3100 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Bábu Rájendralála Mitra. Appearance, old. Verse. Generally correct.

S'áradátilaka. A Tántric compilation of great repute in Bengal. By Lakshmaṇa Des'ikendra, son of S'ríkṛishṇa, and grandson of Vijaya Ácháryа, of the Várendra clan. The work comprises 25 chapters. Contents: 1. Víjamantras of different divinities; 2, different divinities and their appropriate S'aktís; 3, 4, initiation in mystic mantras; 5, eighteen appropriate Sańskáras or sacraments for neophytes; 6, caste; 7, 42 letters of the alphabet; 8, worship with mystic mantras; 9, mantra and adoration of Jagaddhátrí; 10, do. of Tvaritá Deví; 11, do. of Durgá; 12, do. of Tripurá; 13, do. of Gaṇes'a; 14, do. of Chandramá; 15, do. of Vishṇu; 16, do. of Nṛisiṅha; 17, do. of Purushottama; 18, do. of Mahes'a; 19, mystic mantra for the attainment of every desirable object; 20, do. of Aghora; 21, Gáyatrí as a mystic mantra, and the mode of adoring with it; 22, mystic mantra of Atidurgá; 23, do. of Traiyambaka; 24, mystic diagrams; 25, various forms of Yoga meditation.

Beginning. नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमा-
व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत्।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कसदनं वाचामधीशं महः॥
अन्तस्मितोल्लसितमिन्दुकलावतंसमिन्दीवरोदरसहोदरनेत्रशोभि।
हेतुस्त्रिलोकविभवस्य नवेन्दुमौलेरन्तः परं दिशतु मङ्गलमादरान्नः॥
संसारसिन्धोस्तरणैकहेतून् वन्दे गुरून् मूर्द्ध्नि शिवस्वरूपान्।
रजांसि येषां पदपङ्कजानां तीर्थाभिषेकश्रियमावहन्ति॥

सारं वक्ष्यामि तन्त्राणां शारदातिलकं शुभम्।
धर्मार्थकाममोक्षाणां प्राप्तेः प्रथमकारणम्॥

End. महाबलाय प्रणतोऽस्मि तस्मै संविन्नतालिङ्गनशीतलाय।
येनार्पितं मुक्तिफलं विपक्वमाम्नायशाखाभिरुपाश्रितेभ्यः॥
तस्मादभूदखिलदेशिकवारणेन्द्रः षट्कर्म्मसागरविहारविनोदशीलः।
यस्य त्रिलोकविततं विजयाभिधानमाचार्यपण्डित इति प्रथयन्ति सन्तः॥
तन्नन्दनो देशिकदेशिकोऽभूच्छ्रीकृष्ण इत्यभ्युदितप्रभावः।
यत्पादकारुण्यसुधाभिषेकाल्लक्ष्मीं परामश्नुवते कृतार्थाः॥
आचार्यविद्याविभवस्य तस्य जातः प्रभोर्लक्ष्मणदेशिकेन्द्रः।
विद्यास्वशेषासु कलासु सर्वास्वपि प्रथां यो महतीं प्रपेदे॥
आदाय सारमखिलं निखिलागमेभ्यः श्रीशारदातिलकनाम चकार तन्त्रं।
प्राज्ञः स एष पटलैरिह तत्त्व (२५) सङ्ख्यैः प्रीतिप्रदानविषये विदुषां चिराय॥
अनाद्यन्ता शम्भोर्वपुषि कलितार्द्धेन वपुषा
जगद्रूपं शश्वत् सृजति महनीयामपि गिरम्।
सदर्था शब्दार्थस्तनभरनता शङ्करवधू-
र्भवद्भूत्यै भूयाद्भवजनितदुःखौघशमनी।

Colophon. इति श्रीशारदातिलके पञ्चविंशतितमः पटलः।

विषयः। १ पटले देवदेवीनां पृथङ्मन्त्राक्षरसङ्ख्यानिर्देशादि। २, देवतच्छक्तीनां नाम्नां मन्त्राणाञ्च कथनादि। ३, दीक्षाङ्गकर्म्मकथनादि। ४, दीक्षाकरणप्रकारादि। ५, साधकस्याष्टादशसंस्कारकथनादि। ६, वर्णतत्त्वादिकथनादि। ७, द्विचत्वारिंशदक्षरकभूतलिपिकथनादि। ८, श्रीमन्त्रतज्जपध्यानपूजनादिकथनादि। ९, जगद्धात्रीमन्त्रतज्जपध्यानपूजनादिकथनादि। १०, त्वरितादेवीमन्त्रतज्जप०कथनादि। ११, दुर्गामन्त्रतज्जप०कथनादि। १२, त्रिपुरामन्त्रतज्जप०कथनादि। १३, गणपतिमन्त्रतज्जप०कथनादि। १४, चन्द्रसोमन्त्रतज्जप०कथनादि। १५, विष्णुमहामन्त्रतज्जप०कथनादि। १६, नृसिंहमन्त्रतज्जप०कथनादि। १७, श्रीपुरुषोत्तममन्त्रतज्जप०कथनादि। १८, महेशमन्त्रतज्जप०कथनादि। १९, समस्तपुरुषार्थदमन्त्रतज्जप०कथनादि। २०, अघोरमन्त्रतज्जप०कथनादि। २१, गायत्रीरूपमन्त्रतज्जप०कथनादि। २२, त्वरितदुर्गामन्त्रतज्जप०कथनादि। २३, त्रैयम्बकमन्त्रतज्जप०कथनादि। २४, शान्तभद्रकथनादि। २५, योगसाधनप्रकारादि।

No. 734. श्राद्धचन्द्रिकाप्रकाशः, अनुक्रमणिकासहितः।

Substance, country paper, 9¾ × 4½ inches. Folia, 125. Lines, 9 on a page. Extent, 2233 s'lokas. Character, Nágara. Date, S. 1866, SK. 1731. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse and prose. Correct.

S'ráddha-chandriká-prakás'a. A dissertation on S'ráddhas or offerings of the funeral cake to the manes at stated times, the merit thereof, the persons who should make the offerings, the proper times when they should be made, and general rules for making them. By Divákara Bhatta, son of Mahádeva, and grandson of Bálakrishna. Appended to the work is a short index by the author's son, Vaidyanátha.

Beginning. जानकीनयनयुग्मगोचरं मानिनां नयनयोरगोचरं।
नीलमेघरुचिरच्छविं सदा भावयेन्मनसि राघवं मुदा॥
यत्कीर्त्या धवलीकृतं त्रिभुवनं नाम्ना जगत्पावितं
यन्मूर्त्त्या विनिवारितं बहुतरं पापं महापापिनाम्।
यद्ग्रन्थैः कठिनं जगाम कृशतां द्वैतं व्रतादिस्थले
तस्याहं शिरसा नमामि चरणौ श्रीनीलकण्ठप्रभोः॥
नत्वा साम्बं तथा तातं जननीं गुरूनपि।
दिवाकरेण विदुषा तन्यते श्राद्धचन्द्रिका॥
तत्रादौ श्राद्धप्रशंसा हेमाद्रौ कूर्मपुराणे। (इत्यादि)

End. भारद्वाजकुलोद्भवो समभवच्छ्रीबालकृष्णाभिधः
सोमो लाञ्छनवर्जितः प्रतिदिनं सन्तोषकृद्विद्वतां।
तत्सूनुः प्रथमो महामणिरिव प्रख्यातकीर्त्तिर्गुणै-
राशीच्छात्रवने मृगेन्द्ररचनो नाम्ना महादेवकः॥
तत्पुत्रेण दिवाकरेण विदुषा निष्पादिता चन्द्रिका
त्यक्त्वाहङ्कृतिमुन्नतां सुमनसः सम्पश्यतां हे बुधाः॥
यद्यस्ति स्वयमेतदीयकृतिनो वाच्यः कथं निर्णय-
स्तर्ह्येवं निपुणं विभाव्य हृदये दूष्यं वचो मामकं।
उक्तं नात्र मया स्वयं स्वरचितं यद्रुद्रपादादिभिः
प्रोक्तः श्राद्धविनिर्णये तदखिलं स्पष्टं परं ज्ञप्तये॥
सन्दिष्टं गुरुदत्तमन्त्रकृपया शार्दूलविक्रीडितं
तेन श्रीरविमण्डलान्तरगतो नारायणः प्रीयताम्॥

Colophon. इति श्रीभारद्वाजमहादेवभट्टात्मजदिवाकरविरचिते धर्मशास्त्रसुधानिधौ श्राद्धचन्द्रिकाप्रकाशः समाप्तिमगात्। (इतः परं पत्रचतुष्टयात्मकः पाठ एतद्ग्रन्थानुक्रमणिकाभूतो दिवाकरात्मजवैद्यनाथविरचितोऽस्ति।)

विषयः। पितृद्देशेन कर्त्तव्यस्य श्राद्धकर्मणः प्रशंसालक्षणाधिकारिदेशकालपात्रादीनां निर्णयकथनं।

No. 735. विख्यादपुराणं।

Substance, country paper, 10 × 4¼ inches. Folia, 47. Lines, 9 on a page. Extent, 1100 s'lokas. Character, Nágara. Date, S. 1775. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Vikhyáda Puráṇa. I suspect this to be a Tántric compilation. In it Mahádeva, in reply to a query of Kártika, describes the journey of the pious from India to the region of S'iva. The MS. is apparently incomplete, and comprises only 14 chapters.—Contents: 1. Praise of those who desire to follow the great journey *Maháprasthána;* the terminus of that journey. 2. Proceeding northwards the traveller first sees the Hemavat Linga and its temple, and there attains perfect juvenescence. 3. Rivers, hermitages, and mansions to the north thereof. 4—5. Next, a mountain named Aprasáda, and certain villages around it, 6—7. Next, Chandravegá River, and certain temples of Kedára, Nandís'vara, Hemastamba, &c. 8. Next, a mansion containing several forms of Mahádeva. 9. Next, Mandákiní River and the foot of the Kailás'a mountain. 10. The road to the north of it branches into three, leading respectively to the regions of Brahmá, Vishṇu, and S'iva; praise of those three regions. 11. Arrival at the peak of the Kailása mountain. 12 to 14. The sights to be seen there, and the blessings which S'iva bestows on the traveller.

Beginning. कार्त्तिकेय उवाच। अहं इच्छामि देवेश साधकानां हिताय च।
महाप्रस्थेन पश्यन्ति कथं मत्यश्च मानवाः॥
तस्यार्थं च फलं ब्रूहि सत्यं देव सदाशिव।
गच्छन्ति साधकाः सर्वे स्वयं देहेन शङ्कर॥

End. पश्चिमे च दिग्भागे उदयं शशिभास्करौ।
वह्निवाहिमघायान्ति नैव कल्प च नान्यथा(?)॥

Colophon. इति श्रीविश्वाद्पुराणे शम्भुस्कन्दसंवादे स्वर्गवासो नाम चतुर्दशः पटलः। (इतः परमेकपत्रात्मकः पाठोऽस्ति। अतः खण्डितमिदमित्यनुमीयते)।

विषयः। साधकस्य शिवलोकगमनस्य पन्थैव महापन्थेत्युच्यते। तत्र मार्गे यानि यानि वस्तूनि दृश्यन्ते तेषां शिवस्कन्दसंवादच्छलेन चतुर्दशपटलेषु प्रपञ्चः। तत्र १, पटले महापन्थगामिसाधकप्रशंसा, महापन्थं गच्छन्ति तत् कुत्र महापन्थोऽस्तीति कार्त्तिकप्रश्नोत्तरञ्च। २, शिवलोकं गन्तुमुत्तरतो गच्छता प्रथमं हेमवल्लिङ्गो यो दृश्यते ततो या पुरी दृश्यते यथा च शरीरकल्पो भवति, इत्यादेर्वर्णनं। ३, ततोऽप्युत्तरं गते यद्वनद्याश्रमपुरादिदर्शनं भवति, तद्वर्णनादि। ४, ५, ततोऽप्युत्तरं गते अप्रसादनामकमहागिरेः पुरादेर्दर्शनं भवति, तद्वर्णनादि। ६, ७, ततोऽप्युत्तरं गते यच्चन्द्रवेगातटस्थदिव्यर्षिपुरीकेदारनन्दीश्वरहेमस्तम्भादिदर्शनं भवति, तद्वर्णनादि। ८, ततोऽप्युत्तरं गते यत् पुरीत्रिनेत्रदशभुजमहादेवादिदर्शनं जायते, तद्वर्णनादि। ९, ततोऽप्युत्तरं गते मन्दाकिनीगङ्गाकैलासपर्वतादि यद्दृश्यते, तद्वर्णनादि। १०, ततोऽप्युत्तरं गते दृष्टस्य मार्गत्रयस्य शिवब्रह्मविष्णुलोकभोगादेश्च वर्णनं। ११, साधकस्य कैलासप्राप्तिः, कैलासवर्णनं, महादेवकर्त्तृकं साधकाय वरदानमेवमादि। १२, १३, १४, साधकानां यमेन्द्रब्रह्मविष्णुलोकदर्शनादि, तत्तल्लोकवर्णनं च। १४ पटलात्परं सिद्धिदायकमन्त्रकथनं। (ततः पटलसमाप्तिर्नास्तीति खण्डितमेतदित्यनुमीयते)।

No. 736. प्रेमामृतं।

Substance, Palm leaf. Folia, 18. Lines, 2—3 on a page. Extent, 223 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalakhaṇḍa, Vikramapura, Ḍháká, Vaikunṭhanátha Chakravartí. Appearance, old. Prose and Verse. Generally correct.

Premámṛita. This is a miscellany in prose and verse, on the early career of Kṛishṇa, and on love for him, or the highest manifestation of faith in the divinity. The work is written in the form of a Chámpu, and is attributed to Chaitanya Deva, the great Vaishṇavite reformer of Nadiyá.

Beginning. यं ब्रह्मा वरुणेन्द्ररुद्रमरुतस्तन्वन्ति दिव्यैः स्तवैः
वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः।

ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

अपि च । जयति जननिवासो देवकीजन्मवादो
यदुवरपरिषद्भिर्दोर्भिरस्यन्नधर्मं ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन
व्रजपुरवनितानां वर्द्धयन् कामदेवम् ॥

End. ततस्तत्र विविधमन्मथक्रीड़ामनुभूय द्विजभवनगमनं चक्र ।
राधा सखीजनैः सह भावमादाय मथुरां गतवती ॥ इति दानखण्डः ॥

Colophon. इति चैतन्यदेवविरचितं प्रेमामृतं समाप्तम् ।

विषयः । गद्येन पद्येन च श्रीकृष्णस्य कतिपयलीलारसभावा वर्णिताः ।

No. 737. धातुरहस्यं ।

Substance, yellow country paper. Folia, 82. Lines, 6 on a page. Extent, 1322 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalakhanda, Vikramapura, Ḍháká, Vaikunṭhanátha Chakravartí. Appearance, old. Prose. Correct.

Dháturahasya. An elementary treatise on Sanskrit roots and the class of grammatical affixes called *Krit.* By Rámakánta. The MS. is incomplete, and the work is rare, but of no great importance.

Beginning. नत्वा गुरुपदद्वन्द्वं रामकान्तेन यत्नतः ।
बालावबुद्धये धातुरहस्यं सङ्गृह्यते ॥
वाच्याभ्यासा दशेहादौ इनन्तासाः पुनश्च ते(?) ।
कृदन्ताश्च ततो वाच्यमखिलं चर्करीतकं(?) ॥
वाच्यः कर्त्रादिभेदेन त्यासुत्पत्तिर्विनिर्णयः(?) ।
उक्तानुक्तविचारश्च कृतिषष्ठाश्च निर्णयः(?) ॥

End. यथा जाज्वनीति सङ्गृहे न जा घटो(?) ।

Colophon. इत्यतः खण्डितम् ।

विषयः । कृदादिप्रत्ययविवरणं ।

No. 738. गुप्तसाधनतन्त्रं ।

Substance, yellow country paper. Folia, 21. Lines, 6—7 on a page. Extent, 484 s'lokas. Date ? Place of deposit, Maṇḍalakhaṇḍa, Vikramapura, Ḍháká, Kálíkumára Bhaṭṭácharya. Appearance, old. Verse. Generally correct.

Guptasádhana Tantra. An original Tantra on the esoteric, secret adoration of S'aktí, according to the Kaula cult. The MS. examined comprises twelve chapters, but the work in its entirety is probably much larger.

Beginning. कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
तं कदाचित् सुखासीनं भगवन्तं त्रिलोचनं ॥
पप्रच्छ परया भक्त्या देवी लोकहिताय वै ।
देव्युवाच । देव देव महादेव लोकानुग्रहकारक ।
कुलाचारस्य माहात्म्यं पूर्वं वै सूचितं मया ॥
तत् कथं गोपितं देव मम प्राणेश्वर प्रभो ।
कथयस्व महाभाग यद्यहं तव वल्लभा ॥

End. नित्यं नित्य महेशानि यः स्पृशेन् (?) मन्त्रमुत्तमं ।
स पूतः सर्वपापेभ्यः सदाशिवसमो भवेत् ॥

Colophon. इति गुप्तसाधनतन्त्रे द्वादशः पटलः ।

विषयः । १, पटले । कुलाचारतत्साधनकथनं। २, ३, पञ्चाङ्गोपासनादि । ४, आत्मसिद्धुपायः । ५, मासिकजपविवरणं . ६, दक्षिणायाः प्रकारादि । ७, मन्त्रोद्धारप्रभृति ।

No. 739. जातिमाला ।

Substance, yellow country paper. Folia, 2. Lines, 8 on a page. Extent 67 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalakhaṇḍa, Vikramapura, Dháká, Bábu Vaikuṇṭhanátha Chakravartí. Appearance, old. Verse. Generally correct.

Játimálá. An account of the origin of the different Hindu castes, differing in some respects from the well-known work of this name which forms a part of the *Rudra Yámala Tantra.* The MS. is imperfect and the author's name cannot be ascertained.

Beginning. ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णाश्चतुर्विधाः ।
वर्णानां सङ्करोत्पत्तिं निशामय महामुने ॥
आदौ विष्णोर्मुखाज्जाता ब्राह्मणा वेदपारगाः ।
तद्बाह्वोः क्षत्रिया जाता ऊर्व्वोर्वैश्या धनान्विताः ॥

End. तैलङ्गाय ततो देयं ततस्तु चर्म्मकारिणे(?) ।
नाथलाय प्रदातव्यं चाण्डालाय ततः परम् (?) ॥ इत्यतः खण्डितः ॥

विषयः । जातिनिर्णयकथनं ॥

No. 740. मुण्डमालातन्त्रम् ।

Substance, country yellow paper. Folia, 15. Lines, 5—8 on a page. Extent, 416 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalakhanda. Vikramapura, Dháká. Bábu Vaikunthanátha Chakravartí. Appearance, old. Verse. Generally correct.

Mundamálá Tantra. This is one of the original Tantras of the Kaula class, but the MS. is incomplete, and contains only the first six chapters. Contents: 1. The science of one syllable, or a mystic mantra of one syllable with which Indra worshipped the Devi. 2. The alphabet. 3. Places most appropriate for worship. 4. Articles of offering. 5. Initiation. 6. Mystic diagrams for worship.

Beginning. सर्वानन्दमयीं नित्यां सर्वाम्नायनमस्कृतां ।
सर्वसिद्धिप्रदां देवीं नमामि सकलेश्वरीं ॥
देव्युवाच । देव देव महादेव परमानन्दनन्दन ।
प्रसीद गुह्यवक्त्रान्तः(?) कथयस्व प्रियंवद ॥

End. इह लोके सुखं सर्वं देवो गणमतन्यत(?) ।
गोप्तव्यं तत् प्रयत्नेन यस्मै कस्मै न विश्वसेत् ॥

Colophon. इति मुण्डमालातन्त्रे षष्ठः पटलः समाप्तः ॥

विषयः । १ पटले, एकाक्षरीविद्या, या च देवराजेन साधिता पूर्व्वं । २, अक्षमालाया नामानि फलानि च । ३, साधनस्थानानि । ४, निवेद्यवस्तूनि, बलिदानि च । ५, दीक्षाविधिः, गुरुलक्षणानि च । ६, पूजायन्त्रप्रभृतयः । पुस्तकमिदं समाप्तिं न प्राप्तम् । प्रथमपटलात् षष्ठपटलपर्य्यन्तं विद्यते ॥

No. 741. मृतवत्सा-चिकित्सा ।

Substance, palm leaf. Folia, 11. Lines, 4—5 on a page. Extent, 241 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalkhaṇḍa, Vikramapura, Ḍháká, Bábu Vaikuṇṭhanátha Chakravartí. Appearance, old. Prose. Generally correct.

Mṛitavatsá chikitsá. Treatment of women who miscarry, or suffer abortion, or whose children die soon after birth. Anonymous.

Beginning. गर्भस्थमृतं जातमृतं वा पञ्चान्मासार्द्धवत्सरात् ।
मियते चिद्विवर्षे वा यस्याः सा मृतवत्सिका ॥

End. इत्यनेन वंशपत्रे लिखित्वा शिरसि बाहौ वा रक्तवस्त्रेण बध्वा धारयेत् ।

विषयः । मृतवत्सात्वप्रशमनोपायः ।

No. 742. दशकर्म्मदीपिकीया विवाहपद्धतिः ।

Substance, palm leaf. Folia, 20. Lines, 3 on a page. Extent, 285 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalkhaṇḍa, Vikramapura, Ḍháká, Bábu Vaikuṇṭhanátha Chakravartí. Appearance, old. Prose. Generally correct.

Viváhapaddhati. A treatise on marriage, forming a part of a large work on the ten principal sacraments or Sañskáras, and entitled *Das'a-karma-dípiká.* By Pas'upati, the elder brother of Haláyudha, who lived in the court of Lakshmaṇa Sena of Bengal.

Beginning. प्रथमं स्वस्तिवाचनपूर्वकं सूर्य्यः सोम इति पठित्वा । इत्यादि ।

End. ततः शान्तिं कृत्वात्मानमभिषिच्याच्छिद्रावधारणं कुर्य्यात् ।

Colophon. इति राजपण्डितपशुपतिकृतायां दशकर्म्मदीपिकायां विवाहपद्धतिः समाप्ता ।

विषयः । यजुषां वैवाहिककर्म्मप्रयोगकथनं ।

No. 743. भुवनेश्वरीसहस्रनामस्तोत्रम्।

Substance, country yellow paper. Folia, 10. Lines, 5—6 on a page. Extent, 179 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalkhanda. Vikramapura, Ḍháká, Vaikunṭhanátha Chakravartí. Appearance, old. Verse. Generally correct.

Bhuvanes'varí-sahasranáma-stotra. A hymn to Bhuvanes'varí, a form of Durgá, in which a thousand epithets are strung together in her praise. The work is acknowledged to be a section of the Meruviraha Tantra.

Beginning. श्रीपार्वत्युवाच। देवदेव महादेव सर्वशास्त्रविशारद।
कपालखट्वाङ्गधर चिताभस्माङ्गलेपक॥
या आद्या प्रकृतिर्नित्या सर्वशास्त्रेषु गोपिता।
अस्याः श्रीभुवनेश्वर्य्या नामाष्टकसहस्रकम्॥

End. भयमपि मधुसिक्तैः कुङ्कुमाद्यैर्विशेषात्॥

Colophon. इति शिवपार्वतीसंवादे मेरुविरहतन्त्रे श्रीभुवनेश्वरीसहस्रनामस्तोत्रं समाप्तम्॥

विषयः। भुवनेश्वरीसहस्रनामकथनादि।

No. 744. त्रिपुरसुन्दरीमन्त्रनामसहस्रम्।

Substance, country yellow paper. Folia, 13. Lines, 3—5 on a page. Extent, 201 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalkhaṇḍa., Vikramapura, Ḍháká, Bábu Vaikunṭhanátha Chakravarti. Appearance, old. Correct.

Tripurasúndarí-mantra-námasahasra. A hymn, similar to the last, in praise of Tripurasundarí, another form of Durgá. It is an extract from the Vámakes'vara Tantra of Púrṇánanda Paramahaṅsa.

Beginning. कैलासशिखरे रम्ये नानारत्नोपशोभिते।
कल्पपादपमध्यस्थे सिद्धगन्धर्वसेविते॥
मणिमण्डपमध्यस्थे नानापुष्पोपशोभिते।
तं कदाचित् सुखासीनं भगवन्तं जगद्गुरुं॥

End. देहान्ते परमं स्थानं यत् सुरैरपि दुर्लभं।
स यास्यति न सन्देहः स्तवराजस्य कीर्त्तनात्॥

Colophon. इति वामकेश्वरतन्त्रे पूर्णानन्दपरमहंसविरचिते श्रीकार्त्तिकेयशिवसंवादे श्री-
महात्रिपुरसुन्दरीमन्त्रनामसहस्रं समाप्तम् ॥

विषयः । त्रिपुरसुन्दर्याः सहस्रनामस्तवकथनं ।

No. 745. व्यवस्थासारसङ्ग्रहः ।

Substance, country yellow paper. Folia, 17. Lines, 5—6 on a page. Extent, 307 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalkhaṇḍa, Vikramapura, Ḍháká, Vaikunṭhanátha Chakravarti. Appearance, old. Prose. Generally correct.

Vyavasthá-sára saṅgraha. Dissertations on the ages of the moon and astral conjunctions favorable for particular ceremonial observances. The MS. is incomplete, and the author's name is not ascertainable.

Beginning. गुरोः पादयुगं नत्वा रामगोविन्दशर्म्मणा ।
क्रियते बालबोधाय व्यवस्थासारसङ्ग्रः ॥
तत्रादौ तिथिव्यवस्था निरूप्यते ।

End. वचनात् सौरमाद्रे उभयोरपि पक्षयोश्चतुर्थीतिथिमात्रे चन्द्रो नेक्षितव्यः ।
इत्यतः खण्डितः ॥

विषयः । तिथ्यादिव्यवस्थानिरूपणं ।

No. 746. पराभिधानं, अथवा अनेकार्थध्वनिमञ्जरी ।

Substance, country yellow paper. Folia 7. Lines 6, on a page. Extent, 139 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalkhaṇḍa, Vikrampur, Ḍháká, Vaikunṭhanátha Chakravarti. Appearance, old. Verse. Generally correct.

Parábhidhána alias *Nánártha-dhvanimañjari.* A Sanskrit vocabulary of words having various meanings, compiled from the works of Amara, Rudra, and Gaṅgádhara, and the Dharaní Kosha and Ratra Kosha. By Gada Siṅha. The work is sometimes called Nánárthadhvanimañjarí.

Beginning. शब्दाम्भोधिर्यतोऽनन्तो यतो व्याख्या प्रवर्त्तते ।
गुरवे शम्भवे तस्मै नित्यं वागात्मने नमः ॥

End. अमररुद्रगङ्गाधरधरणीरत्नकोषानालोक्य सङ्क्षेपात् ।
नानार्थध्वनिमञ्जरीयमभिहिता श्रीगदसिंहेन परमयत्नात् ॥

Colophon. इति श्रीगदसिंहविरचिता अनेकार्थध्वनिमञ्जरी समाप्ता ।

विषयः । नानार्थशब्दकथनं ।

No. 747. मन्त्रप्रदीपः ।

Substance, country yellow paper. Folia, 71. Lines, 6 on a page. Extent, 1207 s'lokas Character, Bengali. Date ? Place of deposit, Mandalagad, Vikramapura, Ḍháká, Vaikunṭhanátha Chakravarti. Appearance, old. Verse. Generally correct.

Mantra-pradípa. A dissertation on mystic mantras, their derivations, meanings, and uses, as also the uses of mystic diagrams in the adoration of S'ákta divinities. By Kás'ínátha Bhaṭṭácharya.

Beginning. यामासाद्य विधीयते विधिबलिध्वंसीशदेवादिभिः
स्वीयं स्वीयमतीव दुष्करतरं कर्म्म चणाल्लीलया ।
सा दुर्गा भवदुर्गदुर्गतिहरा सर्वान्तरस्थायिनी
पूर्णं वो विदधातु सर्वमनिशं चेतोगतं यद्भवेत् ॥
वार्द्धक्यादिति सर्वभूधरधवो मेना तु शैत्यादिति
प्रोवाच स्मरशासनादिति पुनर्मैनाकसीमन्तिनी ।
इत्थं संशयकोटिभिः कवलितः कोऽप्येष कल्पः कवेः
शम्भोः शैलसुताकरप्रणयने भूयाद्दिवं भक्तये ॥

End. पश्वभावात् परो भावो नास्ति चास्मिन् कलौ युगे ।
तस्मात् सर्वं परित्यज्य अनाश्वासं विभावय ॥

Colophon. इति काशीनाथभट्टाचार्य्यविरचिते मन्त्रप्रदीपे वामाचारनिरूपणं नाम चतुर्थः परिच्छेदः ।

विषयः । मन्त्रार्थमन्त्रचैतन्यकरणयोनिमुद्रानिरूपणप्रभृतयः ॥

No. 748. शब्दमाला ।

Substance, country yellow paper. Folia, 61. Lines, 6—7 on a page. Extent, 1666 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalgaḍa, Vikramapura, Ḍháká, Vaikunthanáth Chakravarti. Appearance, old. Verse. Correct.

S'abdamálá. A Sanskrit vocabulary. By Gopínátha S'armá. A work of this name by Rámesvara Sarmá is noticed by Wilson, which he describes as "a work of limited extent and value, and is little better than a supplement to the Amarakosha." He takes its date to be prior to that of the *Mediní.* Essays III, 231.

Beginning. अमन्दानन्दवृन्दारवृन्दारकशिरोमणि,—
सेव्यमानमहं वन्दे भवान्याश्चरणाम्बुजम् ॥
प्रणम्य चरणाम्भोजं भवान्या बालबोधिनी ।
क्रियते शब्दमाला वै श्रीगोपीनाथशर्म्मणा ॥
पुंस्त्रीनपुंसकान् शब्दान् वाच्यलिङ्गांश्च वाचकान् ।
यथाप्रज्ञं प्रवक्ष्यामि समासांश्च समासतः ॥

End. शब्दवत्साधनं लिङ्गत्रये (इत्यतः खण्डिता)

विषयः । शब्दानां वाच्यलिङ्गाद्यनुशासनं ।

No. 749. वटाश्वत्थविवाहः ।

Substance, country yellow paper. Folia, 4. Lines, 5—6 on a page. Extent, 65 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalagaḍa, Vikramapura, Ḍháká, Vaikunthanátha Chakravarti. Appearance, old. Prose. Generally correct.

Vaṭás'vattha-viváha. A manual for the celebration of marriage between the *Ficus religiosa* and the *Ficus indicá*, a religious ceremony of some merit in the estimation of modern Hindus. Anonymous.

Beginning. तत्र विवाहपूर्वदिने सायं संयम्य कृतनित्यक्रियः सुहृद्भिः सहितः अश्वत्थवटयोः समीपं गत्वा घटं संस्थाप्य स्वस्तिवाचनं कृत्वा सङ्कल्पं कुर्य्यात् ।
विष्णुरों तत्सत अद्येत्यादि ।

End. वटमूले हस्तं दत्वा पठेत् । वटवृक्ष महाभाग सर्वप्राणिहितो भव ।
पुत्रायुर्धनवृद्ध्यर्थं तुभ्यं नित्यं नमो नमः ॥ (परिसमाप्तिसूचकं वाक्यं नास्ति) ।

विषयः । वटाश्वत्थयोर्विवाहदानप्रकारः ।

No. 750. आनन्दलहरीतत्त्वदीपिका ।

Substance, country yellow paper. Folia, 8. Lines, 8 on a page. Extent, 276 s'lokas. Character, Bengali. Date ? Place of deposit. Mandalagada, Vikramapura, Dháká, Vaikunthanátha Chakravarti. Appearance, old. Correct.

A'nandalahari-tattvadípiká. A commentary on the *A'nandalahari*, a hymn in praise of S'iva, by S'ankara A'chárya.—By Gangahari.

Beginning. नत्वा गुरुं गणपतिं देवीं त्रिपुरसुन्दरीं ।
तन्त्राण्यथ समालोक्य ज्ञात्वा गुरुमतं तथा ॥
युक्त्या च स्वयमारोप्य श्रीगङ्गहरिधीमता ।
आनन्दलहरीतत्त्वदीपिका क्रियते मुदा ॥
इह खलु शक्तिखण्डनं कुर्वतः श्रीशङ्कराचार्य्यस्य सर्वाण्येन्द्रियाणि विकुण्ठितानि आसन् पुनरपि इत्यादि ।

End. सर्वदेवमयं ब्रह्म सर्ववेदमयं तथा ।
सर्वयोगमयं तद्धि सर्वज्ञानमयं तथा ॥ इत्यतः खण्डिता ।

विषयः । आनन्दलहरीवाक्यार्थव्याख्यानं ।

No. 751. धीररञ्जिका ।

Substance, country yellow paper. Folia 35. Lines, 6—8 on a page. Extent, 1054 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalagad, Vikramapura, Dháká, Vaikunthanátha Chakravarti. Appearance, old. Prose. Incorrect.

Dhíraranjiká. A commentary on the *Kumára sambhava* of Kálidása. By Govindaráma S'armá.

Beginning. यल्लीलया स्मरहरोऽपि बभव मुग्धा योगीन्द्रवृन्दपरिवन्द्यपदारविन्दं ।
तस्या गिरीन्द्रदुहितुः पदपद्मयुग्ममातिष्ठतां हृदि सतां चिदशौघसेव्यम् ॥
सानन्दं चरणाभिवन्दनभवत्प्रोद्गाढहर्षाश्रुभिः
संश्लिष्टाननभूरिगद्गदवचा देवेन्द्रवृन्दार्चितं ।
पादाब्जं परिवन्द्य शङ्करविभोर्गोविन्दरामो द्विजः
व्याख्यातं वितनोति पण्डितमुदे यत्नात् कुमारीयकम् ॥

End. घटजलरूपसन्यदानवर्द्धितत्वादित्यपि पुत्रवत् वत्सलाः ॥ इत्यतः खण्डिता ।

विषयः । कुमारसम्भवस्य व्याख्यानं ।

No. 752. वाजपेयपद्धतिः, वा वाजपेयक्रतौद्गातृप्रयोगः ।

Substance, country paper, 9½ × 4 inches. Folia, 34. Lines, 9 on a page. Extent, 900 s'lokas. Character, Nágara. Date, S. M. 1846. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Vájapeya-paddhati. A manual for the performance of a ceremony called *Vájapeya*, in which spirituous libations form the most important offerings. The work describes the duties of the Udgátri priest.

Beginning. उद्यत्कोटिसहस्ररश्मिकिरणन्यक्कारकारिच्छवि-
प्रध्वस्ताखिलभक्तमानसगुहाज्ञानान्धकारावलिः ।
यो वृन्दारकवृन्दवन्दनशिरःसङ्घट्टनस्वीकृता-
लक्तस्वच्छपदाम्बुजद्वयतलो विघ्नेश्वरोऽव्यात्स नः ॥
अथ वाजपेयक्रतौद्गातृप्रयोगो लिख्यते ।

End. प्रस्तोता उदवसानीये प्रधानयागकाले गायन्ति त्वत्युद्व ँ शीयं सामतृचं गायेत् । उद्व ँ शीय ऋषिः अनुष्टुप्छन्दः इन्द्रो देवता उदवसानीयायं सामगाने विनियोगः ।

Colophon. इति वाजपेयस्य पद्धतिः समाप्ता ।

विषयः । वाजपेययज्ञानुष्ठानप्रयोगः ।

No. 753. शुल्वसूत्रविवरण कात्यायनीयं ।

Substance, country paper, 9¾ × 4¾ inches. Folia, 32. Lines, 10 on a page. Extent, 700 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'ulvasútravivarana. A commentary on the *S'ulvasútra* of Kátyázana. The work treats of the formation of altars. By Mahidhara, who says he compiled it in the Samvat year 1846, in compliance with an order to that effect of his tutor Ratnes'vara Mis'ra.

Beginning. यस्य लीलावशेनेदं जन्मस्थितिलयं व्रजत्।
आनन्दैकरसं वन्दे तमुमासहितं शिवम्॥
श्रीनृसिंहं नमस्कृत्य रमेशं भक्तवत्सलं।
शुल्वस्य विवृतिं वच्मि भाष्यवृत्त्यनुसारिणीम्॥
श्रीमान् कात्यायनः पञ्चदशशाखासाधारणं कल्पसूत्रं विरच्य तत्र कथित-वेद्यादिमानोपयोगितया शुल्वं परिशिष्टं चिकीर्षुः प्रतिजानीते। रज्जुसमासं वक्ष्यामः।

End. तत्र दोषदरिद्रस्य गूढमन्त्रमधीयता।
समाप्तेयं क्रिया शौल्वा कात्यायनमहात्मनः॥
इत्यादयोऽन्येऽपि श्लोका द्रष्टव्याः।

Colophon. इति शौल्वे विवरणे महीधरविनिर्मिते वेदीष्टकाम्ना इवा षष्ठीयं कण्डिकागमत्। समाप्तं शुल्वसूत्रविवरणं॥
रसवेदाङ्कभूवर्षे (१८४६) मास्यन्त्ये धवले दले।
त्रयोदश्यां रवेर्वारे वाराणस्यां महीधरः॥
श्रीरत्नेश्वरमिश्रस्य गुरोः केशवजन्मनः।
आज्ञया विवृतिं शौल्वीं भाष्यवृत्त्यनुसारिणीं॥
विदुषां सुखबोधाय यथाबुद्ध्यनुसारतः।
भाष्यं रामकृतां वृत्तिं सूत्राण्यालोच्य तत्त्वतः॥
नीलकण्ठो रामनाथः सिताभश्चन्द्रशेखरः।
भैरवेशः कृपासिन्धुस्तेन तुष्येन्न केशरी॥
इति श्रीमन्महीधरविरचितं शुल्वसूत्रविवरणं समाप्तम्॥

विषयः। १ कण्डिकायां, शालावेदीनिर्माणार्थं शङ्कुनिखातपूर्वकं प्राच्यादिदिक्साधनं। २, चतुरस्रादिकथनं। ३, दीर्घचतुरस्रसमचतुरस्रादिभेदः। ४, वेद्युत्तर-श्रोण्यादिभागमानं। ५, वेदिभागविशेषेषु एकद्व्यादिपुरुषप्रमाणं। ६, वेद्यामि-ष्टकाचयनादि॥

No. 754. दर्शपूर्णमासः।

Substance, country paper, 9½ × 4 inches. Folia, 61. Lines, 8—9 on a page. Extent, 1000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally corrrect.

Darsapúrṇamása. Directions for the performance of the Darsa Paurṇamása rites according to the rules of As'valáyana and Apastamba.

Beginning. अथातो दर्शपूर्णमासौ व्याख्यास्यामः। प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य दर्शेन यक्ष्ये पूर्णमासेन यक्ष्ये इति सङ्कल्प्य।

End. भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवः सुवः स्वाहा। इत्यापस्तम्बशाखायां दर्शपूर्णमासौ समाप्तौ॥

विषयः। आश्वलायनापस्तम्बानुयायी दर्शपूर्णमासेष्टिप्रयोगः।

No. 755. समयाचारतन्त्रं।

Substance, country yellow paper, 9½ × 4 inches. Folia, 16. Lines, 9 on a page. Extent, 300 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Samayáchára Tantra. An original Tantra treating the details of the Kaula cult. Contents: meaning of the word *Samayáchára*; a mantra of Sarasvatí; a hymn to Vijayá; Tántric duties, and the necessity of observing them; the fourteen articles of offering necessary for S'ákta worship, and their purification; the five daily prayers; various kinds of gesticulation for effecting pacification, subjugation, paralysis, disputes, absence of mind, and destruction; eastern, western, northern and southern sects of Kaulas, their special divinities, and their rosaries; various kinds of seats for worship with special objects; places meet for counting the rosaries; sacraments for mantras; two classes of Kaulas, the Vámáchára and the Dakshiṇáchára; enumeration of Tantras and Yámalas; the five essentials of Tantra worship—fish, flesh, gesticulation, wine, and female society; procedure for acquiring influence over S'aktí; places sacred to S'aktí; sacrifices; special mantras; special sacraments for mantras, on their birth, vivification, &c.; females to be accepted as S'aktí and males as S'iva; wet and dry forms of worship.

Beginning. श्रीपार्वत्युवाच। भगवंस्त्वं गुणाधार सर्वज्ञ करुणानिधे।
इदानीं श्रोतुमिच्छामि समयाचारमुत्तमम्॥
यः पुरा समयाचारः पूर्वाम्नायेषु कीर्त्तितः।
तं पुनः श्रोतुमिच्छामि षडाम्नायेषु यद्भवेत्॥

End. षडाम्नायेषु कथितं तन्त्रं सर्वत्र दुर्लभं ।
तथा गोप्यञ्च सुभगे मातृजारपदं यथा ॥ ७१ ॥
यदि चेद्दे वरारोहे मया तुभ्यं प्रकाशितं ।
अतस्तद्गापयेन्नित्यं यतस्त्वं मम वल्लभा ॥

Colophon. इति श्रीउमामहेश्वरसंवादे समयाचारतन्त्रं समाप्तम् ॥

विषयः । समयाचारशब्दार्थः । वागवादिनीमन्त्रः । विजयास्तोत्रं । तन्त्रोक्तकर्म्मणो यथोक्तकाले कर्त्तव्यत्वोक्तिः । क्षीरदधितक्रादिचतुर्दशद्रव्योक्तिः । तच्छोधनप्रकारः । प्रातर्मध्याह्नादिपञ्चजपकालः । शान्तिवश्यस्तम्भनद्वेषणोच्चाटनमारणादिषट्कर्म्मानुकूलमुद्राकथनादि । पूर्वदक्षिणपश्चिमोत्तराद्याम्नायकथनं । पूर्वादितत्तदाम्नायदेवताकथनं । उक्ताम्नायमालाभेदः । शान्त्यादिकर्मसु आसनभेदः । जपस्थानं । मन्त्राणां पुन्नपुंसकादिकथनं । वामदक्षिणाचारादि । तन्त्रयामलादिपरिसङ्ख्याकथनं । मत्स्यमांसमुद्रामैथुनमद्यादिपञ्चमकारकथनादि । शक्तिसाधनादि । पीठस्थानकथनादि । सात्त्विकराजसादिबलिः । मन्त्रविशेषाः । मन्त्राणां जननजीवनताडनबोधनादिसंस्काराः । स्त्रीपुरुषादौ शक्तिशिवभावनादि । आर्द्रशुष्काचारकथनादि ।

No. 756. कात्यायनप्रयोगसारः ।

Substance, country yellow paper, 9½ × 4 inches. Folia, 91. Lines, 9 on a page. Extent, 1500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Kátyáyana prayogasára. Easy rules for the performance of the ceremonies recommended in the Kalpa Sútra of Kátyáyana. By Devabhadra Páṭhaka, son of Balabhadra and Bhágírathí. The author says that he has followed the Karkabháshya and the Daivabhásya, with their Paddhatis, by Ananta, Ráma, and Padmanábha. The MS. is incomplete.

Beginning. श्रीविघ्नेशं याज्ञवल्क्यं मुनिं कात्यायनं गुरुम् ।
अस्मद्वृद्धजनानां सद्गुरुञ्च हरिशङ्करम् ॥
गङ्गाधरं पाठकञ्च यागकालविवेचकम् ।
भागीरथीं मातरञ्च पितरं बलभद्रकम् ॥

पितृभूतिं भर्तृयज्ञं वासुदेवञ्च शङ्करं ।
गर्गं कर्कमनन्तञ्च श्रीहरिस्वामिमाधवौ ॥
सम्प्रदायप्रणेतृंश्च रामं शुल्वप्रकाशकम् ।
यज्ञविद्याप्रणेतारं परमं वेदयाज्ञिकम् ॥
दीक्षितं श्रीधरं रेणुं पद्मनाभं गदाधरम् ।
महादेवं हरिहरमित्यादीन् पूर्वयाज्ञिकान् ॥
प्रणम्य मनसा वाचा कर्मणापि च भक्तितः ।
सूत्रं कातीयं तद्भाष्यं कार्कं दैवं सपद्धतिं ॥
अनन्तकृतं रामपद्धतिं याज्ञिकप्रियाम् ।
अन्यर्षिं पद्मनाभं सम्प्रदायाख्यपद्धतिम् ॥
ग्रन्थानेतान् सुसङ्गृह्य निजबुद्ध्या विमृश्य च ।
ततोऽपि याज्ञिकानाञ्च सम्प्रदायो यथाधुना ॥
तथा कर्कानुसारेण ज्योतिष्टोमक्रतोर्ऋजुः ।
प्रयोगसारनामासौ प्रयोगो रच्यते यतः ॥
सूत्रवाक्यं समुल्लिख्य प्रयोगलेखनं न हि ।
कृतं पूर्वैरतस्तस्य लेखनं क्रियते मया ॥

End. (खण्डितत्वाच्छेषवाक्यादिकं नास्ति ।)

विषयः । (अथ शुक्लैकादशीकृत्यं, तत्र) सोमेष्टिविचारः । अग्निषोमीयपशुः । वपायागः । विमितादिमानार्थं शालारज्जुप्रमाणकथनादि । दीक्षादिकालः । दीक्षाप्रयोगः । दीक्षणीयेष्टिः । कृष्णाजिनदीक्षा । प्रवर्ग्यं महावीरसम्भारः । यूपच्छेदनादि । (अथ द्वादशीकृत्यं, तत्र) प्रायणीयेष्टिः । सोमक्रयः । इडान्तातिथ्येष्टिः । अवान्तरदीक्षा । प्रवर्ग्यप्रचरः । उपसदिष्टिः । (अथ त्रयोदशीकृत्यं,) द्वितीयोपसदिष्टिः । (अथ चतुर्दशीकृत्यं, तत्र) तृतीयोपसदिष्टिः । अग्निषोमीयपशुः । पशुपुरोडाशनिर्णयः । अवदानलक्षणादि । (खण्डितत्वान्न सर्वविषयः प्राप्तः)

No. 757. वैयाकरणसिद्धान्तमञ्जूषा ।

Substance, country yellow paper, 12 × 5 inches. Folia, 380. Lines, 9 on a page. Extent, 8360 s'lokas. Character, Nágara. Date, Sm. 1906. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Vaiyákaraṇa-siddhánta-manjúshá. A dissertation on the Syntax of Sanskrit Grammar. By Nages'a Bhaṭṭa, son of S'iva Bhaṭṭa and Satí Deví. This work enjoys a high and well-deserved repute.

Beginning. नागेशभट्टविदुषा नत्वा साम्बशिवं लघु ।
वैयाकरणसिद्धान्तमञ्जूषेषा विरच्यते ॥
तत्र वाक्यस्फोटो मुख्यः । लोके तस्यैवार्थबोधकत्वात् ।

End. अधीत्य फणिभाष्याब्धिं सुधीन्द्रहरिदीक्षितात् ।
न्यायतन्त्रं रामरामाद्वादिरक्षोघरामतः ? ॥
याचकानां कल्पतरोररिकक्षहुताशनात् ।
शृङ्गवेरपुराधीशाद्रामतो लब्धजीविकः ॥
वैयाकरणनागेशः स्फोटायनऋषेर्मतम् ।
परिष्कृ (चिं) त्योक्तवांस्तेन प्रीयतामुमया शिवः ॥
कृतस्तर्कोऽस्य नाभ्यास इति चिन्त्यं न पण्डितैः ।
दृषदोऽपि हि सन्तीर्णा पयोधौ रामयोगतः ॥

Colophon. इति श्रीमदुपाध्यायोपनामकसतीगर्भजशिवभट्टसुतनागेशकृतौ वैयाकरणसिद्धान्तमञ्जूषाख्यस्फोटकः ॥

विषयः । शक्तिलक्षणाव्यञ्जनात्मिकशब्दबोधजनिकवृत्तेर्विचारादि । वर्णध्वन्यात्मकशब्दविचारादि । जातिस्फोटनिष्कर्षः । धातुनिपातार्थनिर्णयः । तिङर्थविचारः । कृदर्थविचारः । प्रातिपदिकार्थनिरूपणम् । प्रथमादिविभक्त्यर्थनिरूपणम् । समस्यमानशब्दार्थविचारादि च ।

No. 758. बौधायनाग्न्याधानं ।

Substance, country yellow paper, 10 × 4½ inches. Folia, 39. Lines, 9 on a page. Extent, 780 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Baudháyanágnyádhána. A guide to the Agnyádhána ceremony according to the rules of Bodháyana. Contents: Proper times for the ceremony; Madhuparka; altar; auspicious days; mantras to be muttered by the Adhvaryu and others; rites for the manes and cattle; Brahmodana rite; Paramána rite; Agnihotra homa; Anvárambhaníya ishṭi.

Beginning. अथाग्न्याधानं निरूप्यते। तस्य कालः शिशिरवसन्तग्रीष्मर्त्तवः।

End. यथादैवतमुञ्जितिवाचनं(?) यजमानभागप्राशने प्रजापतेरित्येतस्य स्थाने भद्रान्न० स्योनः। ब्राह्मणतर्पणान्तं समानं। सन्तिष्ठते व्रीह्याग्रयणं। (समाप्तिवाक्यं नास्तीत्यतः खण्डितमनुमीयते)

विषयः। आधानोपयोगिमासतिथिनक्षत्रादिकथनं। मधुपर्ककथनं। अग्न्यायतनं। पुण्याहवाचनं। अध्वर्युप्रभृतिजपः। गोपितृयज्ञः। ब्रह्मौदनादि। पवमानेष्टिः। अग्निहोत्रहोमः। अन्वारम्भणीयेष्ट्यादि।

No. 759. जगच्चन्द्रिका, वृहज्जातकमूलसहिता।

Substance, country yellow paper, 9 × 3¾ inches. Folia, 321. Lines, 9 on a page. Extent, 5451 s'lokas. Character, Nágara. Date, Sm. 1531. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Jagachchandriká. A commentary on the Brihajjátaka, a treatise on astronomy and astrology. By Bhaṭṭotpala. The work was completed by the author, on Thursday the 5th of the waxing moon, in the month of Chaitra. Saka year 788.

Beginning. ब्रह्माजशङ्कररवीन्दुकुजज्ञजीवशुक्रार्कपुत्रगणनाथगुरून् प्रणम्य।
यः सङ्ग्रहोर्कवरलाभविवृद्धबुद्धेरावन्तिकस्य तमहं विवृणोमि कृत्स्नं॥
यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्योतिषं
तस्योच्छित्तिभयात् पुनः कलियुगे संश्रित्य यो भूतलं।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-
दित्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वत॥
वराहमिहिराब्धौ सुबह्वभेदतोयाकुले
ग्रहर्क्षगणयादसि प्रचुरयुक्तिरत्नाकरे।
भ्रमन्ति परितो यतो लघुधियोऽर्थलुब्धास्ततः
करोमि विवृतिप्लवं निजधियाऽहमुत्पलः॥

End. दिनकरोऽर्कः, तदादिकाः सर्वे एव ग्रहाः, मुनयो वशिष्ठादयः, गुरवादिदासः, तेषां चरणप्रणिपातकरणेन पादपादं नमस्कारकरणेन यः कृतप्रसादोऽनुग्रहः तेन मतिर्बुद्धिर्यस्य तेन दिनकरमुनिगुरुचरणप्रणिपातसततप्रसादभागिना मयेदं

शास्त्रमुपसंहृतं सङ्क्षिप्तं कृतं। तस्मात् प्रणेतृभ्यः पूर्वशास्त्रकारिभ्यो नमस्करणेन यः कृतप्रसादः।

Colophon. इति श्रीभट्टोत्पलविरचितायां जगच्चन्द्रिकाभिधानायां वृहज्जातकविवृतौ उपसंहाराध्यायः षड्विंशः॥

पुरा विहितकर्मपाकभवसन्दर्शने जनोपचारितिप्रविगथ सर्वविपध्वामसहिमिपादृध्यै(?)।

अर्थिनामुत्पलं(?) चक्रे वृत्तये विवृतिस्तवम्।

चिन्तामणीति विख्याता टीकेयं शास्त्रवल्लभा॥

सप्तसार्द्धसहस्राणि मानमस्या ह्यनुष्टुभाम्।

प्रीतिदिष्टैः(?) परित्यज्य टीकाः सम्यक् विचार्य च॥

उपयोगेश्वरे शास्त्रे चेत्सङ्ख्याः कृतेपराधतः।

व्याख्येयं यन्मया त्यक्तं यच्च युक्तिविवर्जितं।

भ्रान्त्या च लिखितं यच्च तत्सर्वं सह्यतां न यत्॥

चैत्रमासस्य पञ्चम्यां सितायां गुरुवासरे।

वस्वष्टाश्वमिते शाके कृतेयं विवृतिर्मया॥

विधाय टीकां शास्त्रेऽस्मिन् यत् क्वचित् पुण्यमर्जितम्।

तेन निर्मत्सरो भूयात् सौजन्यालङ्कृतो जनः॥

विषयः। १ अध्याये, राशिप्रभेदः। २, ग्रहयोनिभेदः। ३, तिर्यक्पक्षिस्थावरादीनामुत्पत्तिः। ४, गर्भाधानकालः। ५, जन्मविधिः। ६, सद्योमरणारिष्टयोगः। ७, आयुर्गणना। ८, दशाविभागः। ९, तनुधनसहजाद्यष्टस्थानविशेषस्थितग्रहशुभाशुभकथनं। १०, कर्मविशेषेण जीविका। ११, राजयोगकथनं। १२, ग्रहयोगविशेषादिकथनं। १३, सुनफादिचन्द्रयोगाः। १४, द्विग्रहयोगाः। १५, प्रव्रज्यायोगाः। १६, राश्यनुसारिशीलादिकथनं। १७, ग्रहदृष्टिफलम्। १८, तन्वादिभावस्थरव्यादिप्रत्येकग्रहफलकथनं। १९, मिश्रफलविचारः। २०, राशिक्षेत्रस्थानादिभिर्ग्रहाणां प्रकीर्णभावविचारः। २१, अनिष्टयोगः। २२, स्त्रीजातकनिर्णयादि। २३, मृत्युयोगाः। २४, नष्टजातकप्रकारः। २५, द्रेक्काणविचारः। २६, प्रश्नतिथिबलाबलादिकथनं।

No. 760. अद्वैतब्रह्मसिद्धिः ।

Substance, country yellow paper, 10 × 4½ inches. Folia, 182. Lines, 10 on a page. Extent, 8500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Advaita-brahma-siddhi. An essay on the non-dual Vedánta theory, designed to establish the identity of the human and the divine souls. By Madhusúdana Sarasvatí pupil of Náráyana Áchárya. The MS. is incomplete. It is, I believe, a portion of the work which is described in Dr. Hall's catalogue under the name of *Advaita-siddhi. Contributions,* p. 157.

Beginning. ॐ नमामि सद्गुरुं शान्तं ब्रह्मानन्दमुनीश्वरं ।
यत्कृपालवलेशेन सत्तर्कस्फुरणं मम ॥
श्रीमन्नारायणाचार्यं सनातनशिवं सदा ।
वन्देऽहं वाङ्मनःकायैर्द्वैतध्वान्तनिवृत्तये ॥
श्रुतिसिद्धञ्च यद् ब्रह्म सच्चिदानन्दमद्वयम् ।
तदत्र चिन्त्यते तर्कैर्मनोमलनिवृत्तये ॥

End. (खण्डितत्वाच्छेषवाक्यं नास्ति)

विषयः । १ मुद्गर, द्वैतत्वनिरूपणादि । २, नास्तिकषड्दर्शनमतखण्डनम् । ३, जीवतत्त्वशोधनच्छलेन सत्याद्यवान्तरवाक्याखण्डार्थतोपपत्तिः । ४, सत्यं ज्ञानमनन्तं ब्रह्मेत्यवान्तरवाक्याखण्डार्थतोपपत्तिः । ५, तत्त्वमस्यादिमहावाक्याखण्डार्थतोपपत्तिः । ६, ब्रह्मणो निर्गुणत्वोपपत्तिः । ७, ब्रह्मणो निर्गुणत्वे प्रमाणोपपत्तिः । ८, ब्रह्मणो निराकारत्वसिद्धिः । ९, ब्रह्मणो ज्ञानत्वानन्दत्वाद्वितीयत्वनित्यत्वसाक्षित्वोपपत्तिः । १०, ब्रह्मणो जगदुपादानत्वोपपत्तिः । ११, ब्रह्मणो जगन्निमित्तत्वोपपत्तिः । १२, ब्रह्मणो जगदुपादानत्वे प्रमाणत्वोपपत्तिः । १३, स्वप्रकाशलक्षणोपपत्तिः । १४, स्वप्रकाशत्वोपपत्तिः । १५, आत्मनः स्वप्रकाशत्वोपपत्तिः । १६, ब्रह्मणः शब्दावाच्यत्वं । १७, सामान्यतो भेदखण्डनं । १८, विशेषतो भेदखण्डनं । १९, भेदप्रतिनिधिविशेषखण्डनं । २०, भेदपक्षके प्रत्यक्षभङ्गः । २१, जीवब्रह्मभेदानुमानभङ्गः । २२, जीवभेदानुमानभङ्गः । २३, जीवभेदानुकूलतर्कभङ्गः । २४, भेदपक्षकेऽनुमानभङ्गः । २५, २६, भेदश्रुतेरनुवादकत्वादि । २७, भेदश्रुतेः षड्विधतात्पर्यलिङ्गभङ्गः । २८, ऐक्यस्वरूपोपपत्तिः । २९, जीव-

ब्रह्माभेदे प्रमाणं । १०, एकश्रुतेरपजीवबाधाभावः । ११, तत्त्वमसिवाक्यार्थ-निरूपणम् । १२, अहं ब्रह्मास्मीत्याद्यनेकश्रुतिस्मृत्यर्थकथनं । १३, जीवब्रह्मा-भेदानुमानं । १४, बिम्बप्रतिबिम्बन्यायेनैक्यसिद्धिः । १५, खण्डितत्वान्नान्ये विषया लिखिताः ॥

No. 761. दानमयूखः ।

Substance, country yellow paper, 11 × 4 inches. Folia, 44. Lines, 13 on a page. Extent, 1200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Verse and prose. Generally correct.

Dánamayúkha. On the sixteen great religious gifts. By Níla-kaṇṭha, son of S'aṅkara Bhaṭṭa. Contents: (1) gift of silver of the weight of the donor; (2) gift of a golden globe, (3) gift of a thousand heads of cattle; (4) gift of a cow made of gold; (5) gift of a horse made of gold; (6) gift of a horse attached to a golden car; (7) gift of a golden elephant attached to a similar car; (8) gift of five ploughs, with bullocks and an area of land in which the same may be used; (9) gift of gold and land; (10) gift of a golden wheel; (11) gift of a jewelled creeper; (12) gift of seven rats made of gold; (13) gift of a jewelled cow; (14) gift of a golden jar decorated with jewels; (15) gift of the five elements represented by golden images; (16) gift of golden flights of steps. The advantages of making the above gifts and the ceremonial rites to be observed in giving them away are also described in detail. For another work of this author, vide No. 730.

Beginning. अथ तुलादानपुरुषप्रकारः । अथ तुलापुरुषदानप्रयोगः । तत्राधिवासनात् पूर्वदिने कृतैकभक्तादिरधिवासनदिने यजमानो देशकालौ सङ्कीर्त्य ब्रह्म-हत्यादिसर्वपापनाशपूर्वकसर्वमन्वन्तरकालावच्छिन्नसर्वलोकपालस्थानाधिकरण-कवासोत्तर—इत्यादि ।

End. विभागस्तु तुलापुरुषवधात्ततः पुण्याहवाचन-ब्रह्मादिपूजनविसर्जनमण्डपादि-प्रतिपादन-ब्राह्मणभोजनाशीर्वादग्रहण-मङ्गलाचारादीनि । इति महाभूत-घटदानं ।

Colophon. इति श्रीमीमांसकशङ्करभट्टात्मजभट्टनीलकण्ठकृते दानमयूखे षोडशमहादानानि समाप्तानि ॥

विषयः । तुलापुरुष—रजतादिमयतुला—हिरण्यगर्भ—सुवर्णादिनिर्मितब्रह्माण्ड—सुवर्णनिर्मितकल्पवृक्ष—गोसहस्र—हिरण्यनिर्मितकामधेनु—हिरण्यनिर्मिताश्व—हिरण्यनिर्मिताश्वयुक्तरथ—हेमनिर्मितहस्तियुक्तरथ—सहस्रसारदारुमयपञ्चलाङ्गलसहितभूमि—सुवर्णमयभूमि—सुवर्णमयषोड़शारविश्वचक्र—चामीकरनिर्मितकल्पलता—काञ्चननिर्मितप्रादेशमात्रसप्तकुण्ड—रत्नमयीधेनु—रत्नयुक्तकाञ्चनघट—सुवर्णमयमहाभूतघटादिषोड़षमहादानफलविधिप्रयोगकथनं ।

No. 762. भुवनदीपकटीका ।

Substance, country paper, 11 × 5 inches. Folia, 31. Lines, 10 on a page. Extent, 1100 s'lokas. Character, Nágara. Date, Sm. 1816. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Incorrect.

Bhuvanadípakaṭíká. A commentary on the Bhuvanadípaka, a treatise on astronomy and astrology.

Beginning. सारस्वतमित्यादि । व्या० । सरस्वत्याः सम्बन्धि सारस्वतं तच्च तत् महश्च तन्नमस्कृत्य मया ज्ञानमुच्यते प्रकटीक्रियते ।

End. शीघ्र एकराशौ तथा दृष्टि(?) प्रागवज्ञातभवद्योगो मध्यो मुसरिकाभिधः ।
मिथो दृश विना खेटा द्वायान्तः(?) शीघ्रगो ग्रहः ॥

Colophon. इति श्रीभुवनदीपकस्य टीका समाप्ता ।

विषयः । भुवनदीपके वक्ष्यमाणानि २६ द्वाराणि सन्ति, तद्व्याख्यानं । तत्र द्वाराणि यथा, १ द्वारे, मेषादिलग्नाधिपाः । २, उच्चनीचविचारः । ३, ग्रहाणां परस्परं मित्रशत्रुत्वादिविचारः । ४, राहोरुच्चनीचगृहाणि । ५, राहुतः सप्तमस्थस्य केतोर्विचारः । ६, ग्रहस्वरूपस्वभावादि । ७, द्वादशस्वपि भावेषु कुत्र किं विचार्यं । ८, अभीष्टकालनिर्णयः । ९. लग्नाधिपादिविचारः । १०, विनष्टो ग्रहः कीदृश उच्यते । ११, राजयोगचतुष्टयं । १२, लाभालाभविचारः । १३, लग्नेशावतिस्थितिसद्भावफलं । १४, अस्य गर्भस्य क्षेममस्ति वा न वा । १५, गर्भिण्याः प्रसवकालादिविचारः । १६, युगलबालकस्य प्रसवज्ञानं । १७, गर्भस्य माससङ्ख्या । १८, विवाहिताऽविवाहितापरीक्षा । १९, विषस्वरूपकन्यालक्षणं । २०, भावविशेषस्थग्रहफलं । २१, विवाहादिविचारणा । २२, वादिप्रतिवादिविवादादौ जयपराजयविचारः । २३, ग्रहसङ्कीर्णभावादिनिर्णयः । २४, विदेशस्थपृच्छादि । २५, पथिकस्य आगमनपृच्छा । २६, मृत्यु-

योगः २७, दुर्गभङ्गः। २८, चौर्यकर्मविचारः। २९, महर्घविचारः। ३०, नौकागमनकुशलतादि। ३१, इष्टलाभालाभादिविचारः। ३२, लग्नपतेः सकाशात् कस्मिन् मासि लाभः। ३३, द्रेःकाणादिफलं। ३४, अद्भुतदोषज्ञानं। ३५, राजादीनां कस्मिन् दिने किं भवतीति। ३६, अस्मिन् गर्भे पुत्रपुत्रिकासीत्यादि॥ (प्रश्नग्रन्थोयम्)

No. 763. मल्लारिमाहात्म्यं, ब्रह्माण्डपुराणान्तर्गतक्षेत्रखण्डीयं।

Substance, country yellow paper, 9¾ × 4½ inches. Folia, 63. Lines, 9 on a page. Extent, 550 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance old. Verse. Generally correct.

Mallárimáhátmya. Legendary account of a place of pilgrimage called Mallári. This professes to be an episode of the *Khetra Khaṇḍa* of the Brahmáṇḍa Puráṇa. Contents : 1. A hermitage assailed by a demon of the name of Malla. 2. The sages of the hermitage repair to Indra for aid. 3. Thence they go to Vaikunṭha; thence to Kailása. 4. Description of Kaílása. 5. Description of the court of S'ambhu. 6. Description of the person of S'iva. 7. The sages relate to S'iva their grievance. 8. The army of S'iva. 9. The encampment of the demon. 10. Defeat of the demon's forces. 11. Destruction of Khadgadaṅshṭrá by Saḍánana. 12. Destruction of Ulkámukha and Kuṇtaloma by Nandi. 13. Destruction of Manikásúra by Mártaṇḍa Bhairava. 14. Vishṇu's embassy to Malla. 15. Combat between Malla and Ghritamárí. 16. Overthrow of Malla by S'ambhu. 17. Prayer of Malla to S'iva. 18. Praise of S'iva by the Devas. 19-20. Kapila and other places of pilgrimage described. 21. Directions for worshipping the image of S'iva at Mallári. 22. Speech of the Enemy of Mallári (S'iva) to the sages. 23. Mantras of Mallári.

Beginning. वाग्वल्लीपल्लवोल्लासरागकरभासुरं।
गजास्यं सुन्दरं वन्दे वृन्दारकगणार्चितं॥
विघ्नेशचरणाम्भोजमकरन्दोदविन्दवः।
सिञ्चन्तु भारतीं वल्लीं नतानां वदनालये॥
कैलासाचलचूडाग्रे मणिसुन्दरमन्दिरे।

पप्रच्छ पार्वती कान्तं रहस्यानन्दसुन्दरं ॥
श्रीपार्वत्युवाच । प्रियं किं दुर्लभं लोके किमाश्चर्यकरं परम् ।
क्षेत्रं तीर्थं सदा नृणां भुक्तिमुक्तिफलप्रदम् ॥
अवतारेण केन त्वं सर्वेषां सुलभः सदा ।
कैर्वैस्त्वं समाराध्यः कथयाशु मम प्रभो ॥

End. नित्यं नमामि भवसागरतारणाय मल्लारिपादयुगलं परमार्थरूपम् ।
इन्द्रादिवन्दितमशेषसुखप्रदेयं चिन्तामणिं सकलमङ्गलकामधेनुम् ॥

Colophon. इति श्रीब्रह्माण्डपुराणे क्षेत्रखण्डे मल्लारिमाहात्म्ये त्रयोविंशतितमोऽध्यायः ॥ २३ ॥

विषयः । १ अध्याये, मल्लाख्यदैत्यकृतधर्माश्रमपीडनं । २, दैत्यभयभीतानां ऋषीणां शक्रभवने गमनादि । ३, ऋषीणां वैकुण्ठे गमनादि । ४, कैलासवर्णनं । ५, शम्भुसभावर्णनं । ६, शिवमूर्त्तिवर्णनं । ७, शिवस्य निकटे मणिकमल्लाख्ययोर्दैत्ययोरुपद्रवनिवेदनं । ८, शिवसैन्यवर्णनं । ९, दैत्यचमूवर्णनं । १०, मार्त्तण्डभैरवसैन्यकर्त्तृकमल्लासुरसैन्यवधः । ११, षडाननकर्त्तृकखड्गदंष्ट्रवधः । १२, जयनन्दिकर्त्तृकोल्कामुखकुन्तलोमदैत्यवधः । १३, मार्त्तण्डभैरवकर्त्तृकमणिकासुरवधः। १४, युद्धनिवृत्तौ प्रबोधनार्थं मल्लदैत्यनिकटे शिवकर्त्तृकं विष्णुप्रेरणादि । १५, मल्लदैत्येन सह घृतमारीयुद्धं । १६, शम्भुकर्त्तृकमल्लासुरवधः । १७, किञ्चिज्जीवितशेषमल्लदैत्यकृतशिवस्तुतिः । १८, देवकृतशिवस्तुत्यादि । १९, २०, कपिलतीर्थादिकतिपयप्रधानतीर्थकथनं । २१, मल्लारिशिवपूजनविधिः । २२, ऋषीन् प्रति मल्लारिवाक्यं । २३, मल्लारिमन्त्रकथनादि ।

No. 764. अग्निष्टोमपद्धतिः, कात्यायनसूत्रपद्धत्यन्तर्गता ।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 28. Lines, 10 on a page. Extent, 580 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Agnishṭomapaddhati. Directions for the performance of the Agnishṭoma sacrifice, according to the rules of Kátyáyana, founded on the Mádhyndini S'ákhá of the White Yajur Veda. By Yájñika Deva, son of Prajápati. The work is a fragment of the author's *Kátyáyana-sútra-paddhati.*

Beginning. अथ माध्यन्दिनसवनमुच्यते, तत्र पूर्वमाग्नीध्रीयस्य पश्चादुदङ्मुखोपविष्टस्य यजमानस्य लोकद्वारीयसामगानं(?) होमश्च। ततः सर्वे ऋत्विजः सयजमानाः स्नाताः सवनवह्निस्थोपस्थानादिधिष्ण्याभिमन्त्रणान्तं समर्पणं कुर्वन्ति।

End. तदानीमेव पुनरुद्धृत्य स्वयमेवाग्निहोत्रहोमः। प्रातर्होमस्तु स्वकाल एव। अत ऊर्द्ध्वं सन्ध्यातर्पणवैश्वदेवक्रिया नातः प्राक्।

Colophon. इति श्रीचिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ अग्निष्टोमपद्धतिः।

विषयः। आग्निष्टोमीयमाध्यन्दिनसवनप्रयोगकथनम्।

No. 765. वाराणसीदर्पणकारिकाप्रकाशिका, वा दर्पणप्रकाशिका।

Substance, country paper, 12 × 5 inches. Folia, 45. Lines, 10 on a page. Extent, 1000 s'lokas. Character, Nágara. Date, Sm. 1898. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Váráṇasídarpaṇ-kás'ikáaprakás'iká, alias *Darpaṇaprakás'iká*. A commentary on his poem in eleven cantos on Benares. By Vatsarája, son of Rághava Tripáṭhí, and grandson of Gaṇesa Agnihotrí.

Beginning. भट्टोजिदीक्षितं नत्वा रामाश्रमगुरुं पुनः।
वत्सराजः करोत्येतां काशीदर्पणकाशिकां॥
गुरुपादरजःपूरस्फुरत्तेजःस्रजः स्रजः।
राजन्ते वत्सराजस्य मानसे सच्छिरःस्रजः॥
वाराणसी दर्पणकाशिकाञ्च प्रकाशिकाख्यां प्रतनोति धीमान्।
श्रीवत्सराजः किल विश्वनाथकृपाकटाक्षाङ्कुरितप्रसादः॥

End. चरमप्रसादसमाप्तिं ज्ञापयन्नाह। श्रीति। प्रत्यक्षभावसमुद्रे। एकादशरुद्राः, तत्सङ्ख्याक इति यावत्। कालेशः, रुद्रः, तस्य यः कण्ठः, तस्य रुचिरिव रुचिर्यस्य सः। दर्पणस्य श्यामप्रभत्वादित्यर्थः। शोभा कान्तिर्द्युतिरित्यमरः। प्रसादात्मकस्य महारुद्रस्य नाम विश्वेश इति सर्वेषु एकादशसु अन्तिमः। एकादशरुद्रात्मकोऽयं ग्रन्थः॥ १६॥ ग्रन्थसमाप्त्युत्तरं संवत्सरादिकं निबध्नन्नाह। विश्वेशोत्तमेति। अष्टमूर्त्तिर्महादेवः। ताभिर्गणिते चाब्दे संवत्सरे। अङ्कानां वामतो गतिरित्यष्टाङ्कः। देव्याः, महः, उत्सवः, तस्य भावः, तया। [दिव्ये-

द्विवसैः । मद्दस्तु सहस्रासद्देति विश्वः । नवद्विवसा इति नवाङ्कः । रसाः षट् षडङ्कः। विश्वनाथ एक एवेत्येकाङ्कः। अन्यत् स्पष्टम्। संवत् षोडषाष्टनवतिमिते वर्षे इति फलितोऽर्थः । अङ्कतोऽपि १६९८ ।

Colophon. इति श्रीमद्वाराणसीवासित्रिपाठिकुलतिलकसामवेदोपाध्यायश्रीगणेशाग्निहोत्रिसूनुसूरित्रिपाठिश्रीमद्राघवसूनुश्रीवत्सराजकृते प्रकाशस्वरमः कामं समाप्तिमगाच्छुभम्॥

विषयः। मङ्गलाचरणं, शिववर्णनं, नारदविश्वेश्वरकथोपकथनं, विश्वनाथकर्तृकदेवताभ्यो वरदानं, शिवस्य मन्दराचलेन सह साक्षात्कारः, मन्दरकर्तृकशिवस्थापनं दिवोदासस्य विश्वनाथसाक्षात्कारः, काशीमाहात्म्यं, वाराणसीवर्णनं, दिवोदासराज्यस्थापनप्रपञ्चः, शृङ्गारादिवर्णनं इत्यादिविषयगर्भितस्यैकादशप्रकाशपरिच्छिन्नस्य वाराणसीदर्पणकाव्यस्य व्याख्यानं ।

No. 766. हठदीपिका ।

Substance, country paper, $9\frac{3}{4} \times 4$ inches. Folia, 20. Lines, 20 on a page. Extent 500 s'lokas. Character, Nágara. Date, Sм. 1689. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Verse. Generally correct.

Haṭhadípiká alias *Haṭhapradípiká.* An essay on a peculiar form of Yoga meditation called *Haṭhayoga.* By Svátmaráma. Contents: 1. Introduction; Yoga teachers; importance of the Yoga proved; place for its performance; the mode of sitting; rules regarding food. 2. Use of the Práṇáyáma; six ways of washing and purifying the guts. 3. Various forms of gesticulation and diverse postures. 4. Procedure for Samádhi. Signs of perfection, &c. Hall's *Contributions*, p. 15. This is a more complete and correct text than No. 250.

Beginning. नमामि त्रैपुरं धाम । अथादिनाथाय नमोस्तु तस्मै येनोपदिष्टा हठयोगविद्या ।
विराजते प्रोन्नतराजयोगमारोढुमिच्छोरधिरोहणीव ॥
प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण योगिना ।
केवलं राजयोगाय हठयोगोऽनुदिश्यते ॥

End. विद्यातीर्थे जगति विबुधाः साधवः सत्यतीर्थे
गङ्गातीर्थे मलिनमनसो योगिनो ज्ञानतीर्थे ।

राधानीर्थे(?) धरणिपतयो दानतीर्थे धनाढ्या
लज्जातीर्थे कुलयुवतयः पातकं चालयन्ति ॥

Colophon. इति श्रीस्वात्मारामविरचितायां हठदीपिकायां चतुर्थोऽध्यायः ॥

विषयः । १ अध्याये, हठयोगेन संसिद्धानां गोरक्षनाथादीनां कथनं, हठयोगसाधनस्थलनिर्देशः, हठयोगप्रथमाङ्गीभूतस्वस्तिकाद्यासनोक्तिः, आहारनियमस्च । २, प्राणायामाभ्यासप्रकारकथनं, नाडीशोधकधौतीवस्तिनेतित्राटकनौलिककपालभस्त्रीतिषट्कर्मकथनं, प्राणायामाभ्यासारम्भः, पूरककुम्भकादिफलोक्तिश्च । ३, खेचर्यादिनानाविधमुद्राबन्धादिकथनं, शुक्रादिस्तम्भफलकथनं, कुण्डलिन्यादियोगिशक्तिकथनादि च । ४, समाधिक्रमकथनं, लयप्रकारः, नादानुसन्धानादि च ॥

No. 767. श्राद्धसूत्रपद्धतिः, कातीया ।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 41. Lines, 7 on a page. Extent, 500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

S'ráddhasútra paddhati. Directions for performing Párvaṇa s'rádhha according to the rules of Kátyáyana. The MS. is incomplete, and the author's name is unknown.

Beginning. शिवञ्च विघ्नहर्त्तारं गुरुंश्च वामनं तथा ।
अम्बिकां शारदां चापि वन्दे विघ्नोपशान्तये ॥
कात्यायनकृते श्राद्धसूत्रे व्याख्यापुरःसरम् ।
प्रयोगपद्धतिं कुर्वे याज्ञवल्क्यादिसम्मताम् ॥

End. (खण्डितत्वात् समाप्तिवाक्यं नास्ति ।)

विषयः । पार्वणश्राद्धप्रयोगविधायककातीयसूत्रव्याख्यानं ।

No. 768. आश्वलायनब्राह्मणपञ्जिका ।

Substance, country paper, $10 \times 5\frac{1}{2}$ inches. Folia, 27. Lines, 10 on a page. Extent, 574 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

A's'valáyana-brahmana-pañchiká, alias *Aitareya Bráhmana.* This is an imperfect MS. containing only the 5th Book. Professor Haug has published an edition of the text together with an English translation.

Beginning. विश्वे वै देवा देवतास्तृतीमहर्वहन्ति सप्तदशस्तोमो वै रूपं साम जगतीच्छन्दो यथादेवतमेतेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति ।

End. यज्ञस्य देवता मैन्द्रमेव तदुद्गीथं करोतीन्द्रो वै यज्ञ इन्द्रो यज्ञ इन्द्रान्मानागादिन्द्रवन्तष्टुभ्यमित्येवैनं तदाह तदाह ।

Colophon. इत्याश्वलायनब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमोऽध्यायः । पञ्चमपञ्चिका समाप्ता ।

विषयः । १ अध्याये, द्वादशाहस्य तृतीयचतुर्थाहकर्त्तव्यसूचनं । २, पञ्चमषष्ठाहकर्त्तव्योक्तिः । ३, सप्तमाष्टमाहकृत्यसूचनं । ४, नवमाहकृत्यद्वादशाहकाण्डत्यादिकथनं । ५, प्रायश्चित्तहोमकथनं ॥

No. 769. आश्वलायनगृह्यकारिका ।

Substance, country paper, 9½ × 4½ inches. Folia, 26. Lines, 11 on a page. Extent, 780 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

A's'valáyana-grihya-káriká. Memorial verses containing the rules of the Grihya Sútra of A's'valáyana. The MS. is defective at the end and the author's name cannot be ascertained. Contents: Technical terms; sthálipáka; the rites after conception, &c.; sacrifice to Vaísvadeva; the sandhyá prayers; *Upákarma* or putting on of new sacrificial thread, &c. in the month of S'rávaña; offerings to the manes; vástuhoma, &c.

Beginning. आश्वलायनमाचार्यं नत्वा तद्गृह्यकर्मणाम् ।
प्रयोगं वच्मि केषाञ्चिद् वृत्तिकारादिभाषितं ॥

End. (खण्डितत्वात् शेषवाक्यं नास्ति) ।

विषयः । सर्वकर्मसाधारणपरिभाषा, स्थालीपाककथनं, गर्भाधानादिसंस्कारोक्तिः, बलिवैश्वदेवादिकथनं, सन्ध्योपासनोपाकर्मादिकथनं, पितृयज्ञः, क्षेत्रकर्षणवास्तुकर्मादिकथनञ्च ॥

No. 770. ब्रह्मसिद्धान्तं वा ब्रह्मसिद्धान्तपद्धतिः ।

Substance, country paper, 10 × 4 inches. Folia, 61. Lines, 5 on a page. Extent, 500 s'lokas. Character, Nágara. Date, Sm. 1806. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Brahma-siddhánta alias *Brahma-siddhánta-paddhati*. A Tántric miscellany on theology, metaphysics, cosmogony, &c. Contents: Brahma a void, its character; the cosmic mass, its character; generation from that mass of S'iva, from him of Bhairava, and from him of S'ríkaṇtha, &c. The origin of Prakṛití consisting of the five primary elements from the last; the organic and sensuous faculties—sleep, dreaming, and waking; will and the other four sensuous faculties; their agency in the creation of the world. Iḍá, piṅgalá, and other arterial paths to those faculties; thirteen vital airs, including Práṇa, samána, &c.; growth of the different members of the body; the essential elements of the body; the principal receptacles in the body; the proper mode of performing *práṇáyáma* and the advantage thereof; praise of Yógis.

Beginning. ————————त्रिविधं गर्भसम्भवेत् (?) ।
यदा नास्ति स्वयं कर्त्ता कारणं न कुलाकुलं ।
अव्यक्तपरमं तत्त्वमनामा विद्यते तदा ॥

End. वैद्यो रोगिणे तुर्वादिद्रिद्रशूरोभीरुधार्म्मिका । पापकारी ज्ञानी रागी तत्त्ववि-
कर्मशीलोपायेन ते दास्यकामे वयान्विति(?) ॥

Colophon. इति योगशास्त्रब्रह्मसिद्धान्तपद्धतिः सम्पूर्णम् (?) ।

विषयः । शून्यब्रह्मनिरूपणं, तस्य गुणाः, ब्रह्माण्डपिण्डस्य तद्गुणानाञ्च कथनं, तत्पिण्डात् शिवस्य तस्माद् भैरवस्य तस्मात् श्रीकण्ठादीनामुत्पत्तिः, ततः पञ्चतत्त्वात्मक-प्रकृतिपिण्डोत्पत्तिः, चुट्टयादिकथनं, अन्तःकरणस्य तद्गुणानाञ्च कीर्त्तनं, सत्त्वरजस्तमो महाकालजीवात्मकपञ्चकुलस्य तद्गुणानाञ्च कीर्त्तनं, जाग्रत्-स्वप्नसुषुप्त्याद्यवस्थाकथनं, इच्छाक्रियादिशक्तिपञ्चकस्य प्रत्यकस्य पञ्चपञ्चगुणकथनं, कर्म्मकामचन्द्रसूर्य्याग्निस्वरूपप्रत्यक्षाचरणपञ्चकस्य तद्गुणानां कलानाञ्च कीर्त्तनं, इडापिङ्गलादिनाडीनां तद्द्वारस्य च कथनं, प्राणसमानादिदशवायुकथनं, शरीराङ्गप्रत्यङ्गोत्पत्तिकथनं, शुक्रमज्जादीनां प्रमाणं, आधारस्वाधिष्ठानादिचक्र कथनं, प्राणायामप्रकारस्तत्फलकथनादि, अवधूतलक्षणयोगमार्गप्रसंशादि-कथनं ।

No. 771. कोशलागमः ।

Substance, country paper, 10 × 4½ inches. Folia, 28. Lines, 10 on a page. Extent, 500 s'lokas. Character, Nágara. Date, Sm. 1816. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Kos'alágama. This is a very defective MS. wanting both the beginning and end. It supplies a series of diagrams, and gives directions how to calculate therefrom the probable good and evil effects, and astrological influences under particular circumstances, of villages, houses, vehicles, dwellings, wells, wheels, commencement of journeys, &c.

Beginning. गजस्वरर्त्तयुगाश्वमहीगुणा द्विसहिता मघवा द्विशि क्रमात् ।
गृहपतेरभिधा पुरदिङ्मितो वसुहृता भवनस्य दशा च सा ॥
अथ ग्रामवासचक्रम् ।

End. इष्टलयस्त्रिं२२शद्युतास्ततो भक्ताः पञ्च१५५शद्शेषास्तत्कालघटी फल । व्यय-वित्तसुखोत्साह भो ५त्तेशा९ जयो मृत्यु ८ जयः ९ सुखं १० । नन्दा च शिलाभः १२ सुखं १४ दुःखं १४ क्रमात् ।

Colophon. इति गृहप्रकारं समाप्तम् । (अस्य नाम्नि प्रारम्भे च सन्देहः । प्रारम्भे प्रतिज्ञा-वाक्यं नास्ति, खण्डितत्वात् समाप्तिवाक्यञ्च नास्ति ।)

विषयः । ग्रामवास-वाहन-वास्तु-कूपचक्र-यात्रानिनाडीचक्र-सेवाचक्रादिकतिपयचक्रा-दिद्वारा शुभाशुभगणना ।

No. 772. चन्द्रालोकः ।

Substance, country paper, 9 × 4 inches. Folia, 20. Lines, 9 on a page. Extent, 360 s'lokas. Character, Nágara. Date, Sm. 1733. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

Chandráloka. A treatise on Rhetoric in ten chapters. By Jayadeva, son of Mahádeva. The work is held in high repute by Vaishṇavas, but it is rare.

Beginning. उच्चैरस्यति मन्दतामरमतां जाग्रत्कलङ्कैरव-
ध्वंसं हन्मयते च यासु मनसामुल्लासिनो मानसे ।

दुष्टाद्यन्मद्नाशनश्चिरमलालोकत्रयीदर्शिका
सा नेत्रवितयीव खण्डपरशोर्वाग्देवता दीव्यतु ॥
हंहो चिन्मयचित्तचन्द्रमणयः संवर्द्धयध्वं रसान्
रे रे स्वैरिणि निर्विचारवनिते मास्मत्प्रकाशीभव ।
उल्लासाय विचारवीचिनिचयालङ्कारवारां निधे-
श्चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती ॥

End. पीयूषवर्षप्रभवं चन्द्रालोकमनोहरं ।
सुधानिधानमासाद्य श्रयध्वं विबुधा मुदम् ॥
जयन्ति याजकश्रीमन्महादेवाङ्गजन्मनः ।
सूक्तपीयूषवर्षस्य जयदेवकवेर्गिरः ॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रातद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
प्रणीतस्तेनासौ सुकविजयदेवेन दशभि-
श्चिरं चन्द्रालोकः सुखयतु मयूखैर्दशदिशः ।

Colophon. इति श्रीपीयूषवर्षपण्डितश्रीजयदेवविरचिते चन्द्रालोकालङ्कारे अभिधास्वरूपाभिधानो नाम दशमो मयूखः ॥

विषयः । १मयूखे, शब्दवाक्यप्रकारकथनं । २, शब्दवाक्यादिगतदूषणनिर्णयः । ३, काव्यलक्षणोक्तिः । ४, आलङ्कारिकगुणोक्तिः । ५, श्लेषोपमापरिकरादिविविधालङ्काराणां लक्षणोदाहरणयोः कथनं । ६, करुणादिरसस्य वैदर्भ्यादिरीतेश्च कथनं । ७, ८, वस्त्वलङ्काराणां भेदकथनं । ९, लक्षणनिरूपणं । १०, नामनिर्देशादिकथनं ।

No. 773. धर्मसिन्धुसारः, अनुक्रमणिकासहितः ।

Substance, country paper, $9\frac{3}{4} \times 5\frac{1}{2}$ inches. some of the leaves are yellow. Folia, 467. Lines, 12—14 on a page. Extent, 12575 s'lokas. Character, Nágara. Date, Sᴀᴍ. 1910, Sᴋ. 1775. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Dharmasindhusára. A compendium of modern ceremonial rites on the model of the *Nirṇayasíndhu.* By Kás'ínátha Upádhyáya, son of Ananta Upádhyáya, who was the younger brother of Yajñes'vara Upádhyáya, and son of Kás'í Upádhyáya Súri.—The work comprises

three books, of which the last is divided into two parts. Contents: I. Calculations of proper times for ceremonies. II. Calendar of ceremonies for the twelve months of the year beginning with Chaitra; diurnal duties of religious people; imperative duties; Stháliipáka, Balivais'vya homa; consecration of wells, tanks, &c.; consecration of rosaries; consecration of images of gods; coronation; starting on journeys; influence of planets on mortals; pacification of adverse supernatural influences. III. Duties of persons whose parents are living; persons who should perform s'ráddhas; time meet for s'ráddhas; ritual for s'ráddhas; mourning; cremation; expiatory rites; duties of hermits.

Beginning. श्रीविट्ठलं सुकरुणार्णवमाप्ततोषं दीनेष्टपोषमघसंहतिसिन्धुशोषम्।
श्रीरुक्मिणीमतिसुखं पुरुषं परं तं वन्दे दुरन्तचरितं हृदि सञ्चरन्तम्॥
वन्दे प्रतिघ्नन्तमघानि शङ्करं यत्तां स मे मूर्द्ध्नि दिवानिशं करं।
शिवाञ्च विघ्नेशमथो पितामहं सरस्वतीमाशु भजेऽपि तामहम्॥
श्रीलक्ष्मीं गरुडं सहस्रशिरसं प्रद्युम्नमीशं कपिं
श्रीसूर्यं विधुभौमविद्गुरुकविच्छायासुतान् षण्मुखं।
इन्द्राद्यान् विबुधान् गुरूंश्च जननीं तातं त्वनन्ताभिधं
नत्वार्थान् वितनोमि माधवमुखान् धर्माब्धिसारं मितं॥
दृष्ट्वा पूर्वनिबन्धान्निर्णयसिन्धुक्रमेण सिद्धार्थान्।
प्रायेण मूलवचनान्युज्झित्य लिखामि बालबोधाय॥
तत्र कालः षड्विधः। वत्सरः, अयनं, ऋतुः, मासः, पक्षः, दिवस इति।

End. मूलभूतानि पद्यानि विकृतानि क्वचित् क्वचित्।
निर्विकाराण्यपि नवान्यप्युक्तान्यत्र कानिचित्॥
मीमांसाधर्मशास्त्रज्ञाः सुधियोऽनलसा बुधाः।
कृतकार्याः प्राङ्निबन्धैस्तदर्थं नायमुद्यमः॥
य पुनर्मन्दमतयोऽलसा अज्ञाश्च निर्णयम्।
धर्मं वेदितुमिच्छन्ति रचितस्तदपेक्षया॥
निबन्धोऽयं धर्मसिन्धुसारनामा सुबोधनः।
अमुना प्रीयतां श्रीमद्विट्ठलो भक्तवत्सलः॥
प्रेम्णा सद्भिर्ग्रन्थः सेव्यः शब्दार्थतः सदोषोऽपि।
संशोध्य(?) वापि हरिणा सुदाममुनिसतुषपृथुकमुष्टिरिव॥
श्रीकाश्युपाध्यायवरो महात्मा बभूव विद्वद्द्विजराजराजः।

तस्मादुपाध्यायकुलावतंसो यज्ञेश्वरोऽनन्त इमावभूतां ॥
यज्ञेश्वरो यज्ञविधानदक्षो देवज्ञवेदाङ्गसुशास्त्रमिश्चः ।
भक्तोत्तमोऽनन्तगुणैकधामानन्ताह्वयोऽनन्तकलावतारः ॥
एषोऽत्यजज्जन्मभुवं स्वकीयां तां कोङ्कणाख्यां सुविरक्तशाली ।
श्रीपाण्डुरङ्गे वसतिं विधाय भीमातटे मुक्तिमगात्सुभक्त्या ॥
तस्यानन्ताभिधानस्योपाध्यायस्य सुतः कृती ।
काशीनाथाभिधो धर्मसिन्धुसारं समातनोत् ॥

Colophon. श्रीमत्काश्युपाध्यायसूरिसूनुयज्ञेश्वरोपाध्यायानुजानन्तोपाध्यायसूरिसुतकाशीनाथोपाध्यायविरचिते धर्मसिन्धुसारे तृतीयपरिच्छेदोत्तरार्द्धं समाप्तम् ॥

विषयः । १ परिच्छेदे, काल-सङ्क्रान्ति-व्रत-तिथीष्टि-याग-श्राद्ध-ग्रहणादिनिर्णयः । २, तृतीयाचतुर्थ्यादितिथिव्रतविशेषमन्वादि-दशावतारजयन्ती-दमनोत्सव-चैत्रवैशाखादिद्वादशमासकृत्य-प्रकीर्णकनिर्णयः । ३, पूर्वार्द्धे, गर्भाधानाद्युद्वाहान्तसंस्कारदन्तधावनस्नानहोमादिनित्यकृत्य-स्थालीपाक-बलिवैश्वदेवादि-वापीकूपतडागाद्युत्सर्ग-मालासंस्कार-स्थिरदेवप्रतिष्ठादि-राजाभिषेक-यात्रा-गोचरफलाङ्कुतशांत्यादिनिर्णयः । ४ उत्तरार्द्धे, जीवत्पितृकर्त्तव्यकर्म-श्राद्धाधिकारिश्राद्धकाल-श्राद्धपद्धति-मृतकान्त्येष्टि-प्रायश्चित्त-सन्यासग्रहणादिनिर्णयः ॥

No. 774. प्रयोगरत्नीयचरकसौत्रामणी, वा बोधायनचरकसौत्रामणी ।

Substance, country paper, 10 × 4¾ inches. Folia, 3. Lines, 16 on a page. Extent, 150 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Prayogaratníya-charaka-sautrámaṇi alias *Bodháyana-charakasautrámaṇi.* This is a chapter of a comprehensive work called *Prayogaratna,* or a manual for the performance of religious rites. The chapter under notice treats of the ceremony named *Sautrámaṇi,* in which the principal offering is a spirituous liquor made from rice, *i. e.,* a kind of arrack. By S'eshanáráyaṇa. The author follows the rules of Bodháyana.

Beginning. सौत्रामणीं व्याख्यास्यामः । पूर्वेद्युर्नान्दीश्राद्धाद्यपरेद्युः स्नानादिनिविष्टमित्यन्ते चरकसौत्रामण्या यजे इत्युपव्याहरणम् ।

End. इति पूर्णाहुतिं हुत्वा समारोप्यायतने मथित्वा विहृत्य मनस्वतीं हुत्वा सायमग्निहोत्रं जुहोति । सन्तिष्ठते सौत्रामणी ।

Colophon. इति श्रीम० शेषनारायणोक्ते प्रयोगरत्ने चतुर्थः।

इति बोधायनचरकसौत्रामणी समाप्ता ॥

विषयः। सौत्रामणीष्टिप्रयोगः ॥

No. 775. अग्निप्रयोगः।

Substance, country paper, 10¼ × 4½ inches. Folia, 29. Lines, 11 on a page. Extent, 750 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Agniprayoga. A manual for the performance of the Agnishṭoma rite, according to the rules of Bodháyana. Anonymous.

Beginning. बोधायनं नमस्कृत्य व्याख्यातॄंश्च पुरातनान्।

अग्निप्रयोगं वक्ष्यामि विष्णुवृद्धान्वयोऽग्निचित्॥

उक्तः सर्वप्रकृतिभूतो ज्योतिष्टोमोऽग्निष्टोमः। अथेदानीं सर्वप्रकृतिविकृतिसाधारणमग्निष्टोमेन सह व्याख्यातुमारभते।

End. (खण्डितत्वाच्छेषवाक्यादिकं नास्ति)।

विषयः। अग्निष्टोमप्रयोगः॥

No. 776. रसहेमः, वा कङ्कालीरसहेमः।

Substance, country paper, 12 × 5 inches. Folia, 16. Lines, 20 on a page. Extent, 1200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Rasahema alias *Kaṅkálirasahema.* A pharmacopœia of mercurial and other metallic preparations. The MS. is incomplete. It gives receipts for upwards of two hundred kinds of metallic compounds.

Beginning. श्रीभैरवं प्रणम्यादौ सर्वज्ञं त्रिजगत्प्रभुम्।

श्रीभारतीञ्च विघ्नेशं वन्दे प्रत्यूहशान्तये॥

अथ ध्यायन् समायातः श्रीकङ्कालीययोगिनः।

हविष्यान्नं भवि खाप्यं हविष्यञ्चापि भोजनम्॥

क्रियाभ्रष्टे न सिध्यन्ति तपोनिष्ठे फलन्ति हि ।
स्तदोषांस्ततः शुद्धिं संस्कारान् प्राग् वदाम्यहम् ॥

End. (खण्डितत्वात्परिसमाप्तिवाक्यादि नास्ति ।)

विषयः । पारदलौहादिद्रव्यद्वारा नानाविधरसायनौषधनिर्माणप्रकारः ।

No. 777. उपग्रन्थसूत्रम् ।

Substance, country paper, $10\frac{1}{2} \times 4$ inches. Folia, 36. Lines, 7—8 on a page. Extent, 1600 s'lokas. Character, Nágara. Date, Sm. 1642. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Incorrect.

Upagrantha Sútra. A sútra work treating of expiations and details in connexion with various Kalpa rites.

Beginning. अथ सम्पत्सिद्धिरनादेशे स्तोत्रीयातः शते विशेषसङ्ख्यासमस्ताख्ये प्रत्येकमच्छोद्विनियमो ज्योतिष्टोमेन वतमुक्थे त्रिपञ्चाशे—इत्यादि(?) ।

End. पुरीषपदशेषाणि निधानान्याचार्याः स्वरितान्तानि यथाधीतं वा तेषु रीपाश्च विश्वश्चेदाधिकाराद्वागन्तोवागतः(?) ॥ १३ ॥

Colophon. इत्युपग्रन्थसूत्रे चतुर्थः प्रपाठकः । इत्युपग्रन्थसूत्रं समाप्तम् ॥

विषयः । १ प्रपाठके, गायत्र्यादिच्छन्दःकथनं, यज्ञत्रुटिनिमित्तकप्रायश्चित्तोक्तिः; सत्राय दीक्षितेन कर्त्तव्यादि च । २, अक्रीतसोमापहरणप्रायश्चित्तं, सोमकलशे भग्ने प्रायश्चित्तादि, सोमे दग्धे प्रायश्चित्तं, दृष्टानुकल्पादि च । ३, वैश्यवर्णकल्पोक्तिः प्रवर्ग्यसंशये कर्त्तव्यम्, एकाहस्तोत्राणि, षड्हकृत्यं, द्वादशाह-दृहदथन्तरदृष्ट-स्तोत्रीयादिकथनं, गानेचरदृद्धिर्लोपश्च तन्न्यायसमुद्देशव्याख्यादि । ४, प्रतिहारोदाहरणकथनादि ॥

No. 778. उत्सर्गमयूखः ।

Substance, country paper, 10×5 inches. Folia, 26. Lines, 8—9 on a page. Extent, 520 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Utsarga Mayúkha. Directions for consecrating tanks, wells, &c., and purifying them should they happen to be polluted by the death of a monkey, or a cat, or by other cause. By Nílakaṇṭha Bhaṭṭa. *Vide* No. 761 for another work of this author.

Beginning. उक्त्वा दानविधिन्नाम राममाराध्य भास्करं ।
उत्सर्गविषये भट्टनीलकण्ठो वदत्यथ ॥ तत्र जलाशयोत्सर्गप्रशंसा विष्णुधर्मोत्तरे ।

End. ततोऽभिषेकग्रहपूजाग्निपजाविसर्जनशय्यादानमण्डपाद्युपस्करप्रतिपत्तिविप्रभोजनभूयसीदानकर्मेश्वरार्पणानि जलाशयोत्सर्गवत् ॥

Colophon. इति श्रीमीमांसकभट्टनीलकण्ठकृते भास्करे जलाशयारामोत्सर्गमयूखः ।
इति उत्सर्गमयूखः समाप्तः ॥

विषयः । वापीकूपतड़ागाद्युत्सर्गस्य विधिः प्रयोगश्च, वाप्यादिषु मार्जारवानरादिस्तनकाद्युपघाते तत्प्रायश्चित्तकथनं च ।

No. 779. मोमहणविलासः, व्याख्यासहितः ।

Substance, country paper, 9¾ × 5¼ inches. Folia, 160. Lines, 9—10 on a page. Extent, 8000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Momahaṇavilása. A treatise on the diseases peculiar to women and children, and on aphrodisiacs. By Momahaṇa, son of Prayágadása, a Kshatríya of Kálpi. The work was completed on Saturday, the 4th of the month of Chaitra, 1468, during the reign of Muhammad Sháh, son of Firuz Sháh.

Beginning. यं स्मृत्वा ललितां प्रजापतिरिमां सृष्टिं व्यधान्मानवीं
श्रीकण्ठस्त्रिपुरकान्यदनुजश्रेणीं जघान द्रुतम् ।
चक्रे रणमर्दुर्हृदा सुरचा चक्रे च्युतस्वञ्जयं (?)
तं प्रत्यूहनिहत्तये गणपतिं वन्देऽहमिष्टप्रदं ॥
यत्कर्णतालपवनादुड्डता(?) वारिराशयः सप्त ।
एकीयन्ति युगान्ते तमहं वन्दे गणेशानं ॥
यत्रान्वये वीहलगोत्रजन्मा प्रख्यातकीर्त्तिः किल वाघलाख्यः ।
आसीद्यदाख्यां विभराम्बभूवुस्तद्वंशजाः सन्ति हि वाघलाख्याः ॥
यद्वंशजानां भूत्यर्थं बभूव कुलदेवताः ।

मरोद्भवाभिनी देवी सर्वदुर्हनिकृन्तनी ॥
तस्य कुलेऽतिथिभक्तः प्रसिद्धनामा बभूव हरिवाघलः ।
यस्य दानस्य तुलायां लघुतां भजतीह कर्णदानमपि ॥
तस्यात्मजोऽभूदभिरामकान्तिः प्रयागदासो गुणवान् वदान्यः ॥
विरुदावली यस्य बभूव मह्यां मर्यादमेरुर्महिमसमुद्रः ।
तदङ्गजो सोमहणः प्रसिद्धो गुरुद्विजन्मातिथिदेवभक्तः ॥
बभूव यस्यार्थिजनाः प्रशंसां कुर्वन्ति सर्वत्र बहुप्रदस्य ।
सोमहणः कुतुकादिह सोमहणविलासनामानं ।
सकलजनहृदयद्रापितं(?) चकार सद्योगसङ्ग्रहं रम्यम् ॥

End. अब्दे नागरसश्रुतीन्दुरचिते १४६८ पक्षेऽसिते चैत्रके
हेरम्बस्य तिथौ विकर्त्तनसुतस्याह्नि न्यलोक(?) वै प्रजानां पतेः ।
अचे सोमहणो व्यधाद्गुजजनुः सद्योगचूडामणिं
ग्रन्थं सद्भिषजां मतानि च बहून्यालोक्य वैद्यागमान् ॥
कालिन्द्या रुचिरे सुदक्षिणतटे सद्रत्नविद्युद्युता
नाम्नाभूत् किल कालपीतिनगरी ख्याता धरामण्डले ।
तस्यां कालपिदैवतं निवसति प्रायः स्वयं सर्वदा
लोकानामभिलाषदं सुरजनैः संसेवितं सत्प्रभं ॥
भूपालो महमूदसाहिरभवत्पीरोजाषानात्मजः
सार्द्धं योद्धुमलं न हिन्दुकजनास्तेनाभवन् सङ्गरे ।
तस्योर्जस्करिदृन्दबृंहितमिहाश्वानाञ्च ह्रेषारवं
श्रुत्वा यान्त्यरयो ध्रुवं जलनिधेः पारस्य तीरे ध्रुवं ॥

Colophon. इति कालपीग्रामवस्तव्यक्षत्रियप्रयागदासात्मजसोमहणविरचिते महमूदसाहिराज्ये सोमहणविलासनामग्रन्थः समाप्तः ।

विषयः । १ प्रथमे अधिकारे, शुक्रवृद्धिकरौषधादिकथनं । २, शुक्रस्तम्भकौषधकथनं । ३, लिङ्गवृद्धिदार्ढ्यकथनं, स्त्रीकुचनितम्बवृद्धिकथनञ्च । ४, लिङ्गस्तब्धकारकौषधकथनं । ५, षण्ढत्वनाशकौषधकथनं । ६, बन्ध्यात्वनाशकौषधकथनं, गर्भरक्षार्थं मन्त्रौषधप्रयोगः, भगसङ्कोचविधिः, स्त्रीरोगचिकित्सादि च । ७, बालरोगचिकित्सोपयोग्यौषधमन्त्रादिकथनं । ८, बालग्रहचिकित्साप्रकारः । ९, १०, डाकिनीचिकित्सादिप्रकारः । ११, बालग्रहादिनिवारणार्थं कतिपयमन्त्रोक्तिः, माहेश्वरादिधूपनिर्माणविधिश्च ॥

No. 780. कात्यायनसूत्रपद्धतिः।

Substance, country paper, 12 × $4\frac{3}{4}$ inches. Folia, 55. Lines, 14 on a page. Extent, 3000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Kátyáyana-Sútra-Paddhati. A guide to the performance of the ceremonies described in the Kalpa Sútra of Kátyáyana. By Deva-yájñika, son of Prajápati. The MS. is incomplete and contains only the first portion of the work. The first two folia are wanting.

Beginning. (प्रथमतः पत्रद्वयं खण्डितं)।

End. प्रातर्होमस्तु स्वकाल एव। अत ऊर्द्ध्वं सन्ध्यातर्पणवैश्वदेवादिनित्यक्रियायामधिकारः। नातः प्राग् भवतीति शिवम्।

Colophon. इति श्रीनिरग्निचिन्महायाज्ञिकश्रीप्रजापतिसुतश्रीदेवयाज्ञिककृतायां कात्यायनसूत्रपद्धतावग्निष्टोमः समाप्तः।

विषयः। दीक्षितकर्त्तव्येष्टिः, अवभृथपर्य्यन्तदीक्षितनियमाः, महावीरसम्भरणं, प्रायणीयेष्टिः, आतिथ्येष्टिः, प्रवर्ग्यचरणं, प्रैषमन्त्रविशेषाः, अध्वर्य्योर्गोदोहनार्थं, गमनादि, प्रवर्ग्यकरणे घर्महोमः, उपसदिष्टिः, प्रवर्ग्यशान्तिः हविर्धाननिष्पादनं, उपरवखननं, सदःकरणं, सदोमानादि, अग्निस्थाननिष्पादनं, आग्नीध्रीयादिस्थानकरणं, अग्नीषोमीयेष्टिः, अभिषवेष्टिः, प्रातःसवनं, माध्यन्दिनसवनं, तृतीयसवनं, अवभृथेष्टिः, उदयनीयेष्टिः, अनुबन्ध्येष्टिः, पयस्येष्टिः, इत्यादीनां विवरणम्॥

No. 781. अनुमानमणिदीधितिव्याख्या, शिरोमणिमूलसहिता।

Substance, country paper, 13 × $5\frac{1}{4}$ inches; some of the leaves are yellow. Folia, 460. Lines, 12-14 on a page. Extent, 18,130 s'lokas. Character, Nágara. Date, Sm. 1828. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Anumána-maṇi-dídhiti-vyákhyá. A commentary on Raghunátha S'iromaṇi's *Anumána-maṇi-dídhiti.* By Bhavánanda Siddhántavágís'a. *Vide* ante I, p. 285.

Beginning. श्रीगोविन्दपदाम्भोजनखचन्द्रमरीचयः ।
सद्वरिष्णोस्तमस्यन्मे मम सन्त्ववलम्बनम् ॥
नमस्कृत्य गुरून् सर्वान् निगूढं मणिदीधितौ ।
श्रीभवानन्दसिद्धान्तवागीशेन प्रकाशिता ॥

शिरोम०प्रा० ॐ नमः सर्वभूतानि विष्टभ्यपरितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥ १ ॥
अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणां ।
दीधितिमधिचिन्तामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥

मू०प्रा० प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते ।

End. नीलविशिष्टे धूमेऽपि विशेष्यत्वस्योपाधेः सत्त्वेन निरुपाधित्वं साधनव्यापकत्वादिति विशेष्यत्वयाटस्य(?) प्रामाणिकत्वात्तदपेक्षितं भट्टाचार्यशिरोमणिभिरिति ।

Colophon. इति श्रीमहामहोपाध्यायसिद्धान्तवागीशभवानन्दविरचितानुमानमणिदीधितिव्याख्या समाप्तिं पफाण ।

शि० स० तथापि जन्यत्वशरीरजन्यत्वावच्छिन्नप्रतियोगिताकावतिरिक्तावेवाभावाविति न तत्र बहुत्वभावसम्भव इत्यत्र तात्पर्यम् ।
इति श्रीमन्महामहोपाध्यायशिरोमणिकृतानुमानमणिदीधितिः सम्पूर्णा ।

मू० स० एकवृत्तित्वात् अवच्छेदेन वृत्तिरत्रापि तुल्या तत्र देशभेदेनात्र समयभेद इति ॥

विषयः । अनुमानमणिदीधितिव्याख्यानम् ।

No. 782. राक्षसकाव्यं, सटीकं ।

Substance, country paper, 9¼ × 4¼ inches. Folia, 6. Lines, 13—14 on a page. Extent, 175 s'lokas. Character, Nágara, Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct.

Rákshasa-kávya. A poem of 20 stanzas in which a forester describes various pastoral objects for the gratification of his mistress. By Vararuchi Kavindra. The author is said to be the same person who formed one of the "nine jewels" of Vikramáditya. The MS. is in the *trivallí* form, and has a running commentary on the text.

Beginning. टीका॰ कश्चिद्दित्यनिर्दिष्टनामा पुरुषः इमां वक्ष्यमाणां गां वाचं वनितां बभाष उक्तवान्। किं कुर्वन् वनं काननं विचरन्। इत्यादि।

मूल॰ कश्चिद्वनं बहुवनं विचरन् वयस्थो वश्यां वनात्मवद्वानां वनितां वनाङ्गीम्। इत्यादि।

End. टीका॰। एतमवच उक्तं कथमपि त्वां भयः किं कृत्वा दिनं दिवसं तया प्रियया सह रमित्वा, कथम्भूतः अभीक्ष्णः पुष्टाङ्ग इत्यर्थः। ह्येति पादपूरणे ॥ १० ॥

Colophon. इति श्रीवररुचिकवीन्द्रेण विरचितेन(?) राक्षसकाव्यं समाप्तं। शुभं। टीका समाप्ता।

मू॰ एतावदुक्तमवचः सुमनाः स उक्त्वा रन्त्वा दिनं सह तया प्रियया ह्यभीक्ष्णम्। युक्तश्चतुर्भिरनडुद्भिरदीनवद्भिरारुह्य यानमथ सम्प्रययौ स्वगेहे ॥ २० ॥

टीका॰ इति श्रीवररुचिकवीन्द्रेण कृतं राक्षसकाव्यं समाप्तम्।

विषयः। कश्चिद्वयस्थो वनस्थः पुरुषो विचरन् वनजान् वृक्षादीन् प्रदर्शयन् तद्वर्णनं वनितां श्रावयति।

No. 783. यज्ञप्रायश्चित्तविवरणं।

Substance, country paper, 9¼ × 4 inches. Folia, 42. Lines, 13 on a page. Extent, 1250 s'lokas. Character, Nágara. Date, Sm. 1783. Place of deposit, Calcutta, Government of India. Appearance, old. Prose, Generally correct.

६ अध्यायसमा० । हिरण्यशब्दाद्विहितस्य मयटो मशब्दलोपो निपात्यते हिरण्ययः ।

इति काशिकायां वृत्तौ षष्ठाध्यायस्य तुरीयचरणः समाप्तः ।

७ अध्यायसमा० । ई च गणः । गणेरभ्यासस्य ईकारादेशो भवति चङ्परे णौ परतः । चकारादत् । अजीगणत् अजगणत् ९७ ।

इति वामनकाशिकायां वृत्तौ सप्तमाध्यायस्य चतुर्थः पादः । समाप्तः सप्तमोऽध्यायः ।

८ अध्यायसमा० । उदात्त उदयो यस्य स उदात्तोदयः उदात्तपर इत्यर्थः । एवं प्रत्यापद्यते ।

इति वामनकाशिकायां वृत्तौ अष्टमाध्यायस्य चतुर्थः पादः समाप्तः ।

विषयः । पाणिनिकृताया अष्टाध्यायाः पञ्चमाध्यायगतानां 'प्राक्क्रीताच्छः' इत्यादि-सूत्राणां व्याख्या ।

तस्या एवाष्टाध्याय्याः षष्ठाध्यायगतानां "एकाचो द्वे प्रथमस्य" इत्यादि-सूत्राणां व्याख्या ।

तस्या एवाष्टाध्याय्याः सप्तमाध्यायगतानां "युवोरनाकौ" इत्यादिसूत्राणां व्याख्यानं ।

तस्या एवाष्टाध्याय्या अष्टमाध्यायगतानां 'सर्वस्य द्वे' इत्यादिसूत्राणां व्याख्यानं ।

No. 815. कवीन्द्रचन्द्रोदयः ।

Substance, country paper, 11½ × 4 inches. Folia 31. Lines 10 on a page. Extent, 900 s'lokas. Character, Nágara. Date S. 1734. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and Verse. Incorrect.

Kavíndra-chandrodaya. A miscellany in prose and verse, containing notices of nearly a hundred different poets of the middle ages. By Vidyánidhi Kavíndra.

Beginning. पुण्डरीकाक्षचण्डांशुचण्डीं चण्डीश्वरं तथा ।
वेतण्डतुण्डमानम्य निबन्धोऽयं निबध्यते ॥ १ ॥
तमस्तमःसङ्गविघातकारी समस्तविद्वत्परितापहारी ।
कवीन्द्रचन्द्रोदयनामधारी प्रबन्ध एषोऽस्तु जगत्प्रचारी ॥ २ ॥
विद्यानुकृतफणीन्द्रो विजितमतीन्द्रो यतीन्द्रो यः ।
स्ववशीकृतपृथिवीन्द्रो जयति कवीन्द्रो यतिर्जगति ॥ ३ ॥

गोदातीरनिवासी पश्चाद्येनाश्रिता काशी ।
ऋगवेदीयाभ्यस्ता साङ्गा शाखाश्वलायनी शस्ता ॥ ४ ॥
निःस्पृहता विषयेभ्यः परनिजजनताभिमानेभ्यः ।
प्राप्ता शैशवसमये विश्वेशानुग्रहहृदये ॥ ५ ॥
लघुवयसा गततमसा * * लाधिक्याद्भिद्रवद्रजसा ।
यन च विद्या तरसा तपसा सर्वा वशीकृतैव रमा ॥ ६ ॥
बुद्धा विबुधाधिकृतां दत्ता यस्मै कवीन्द्रसत्पदवी ।
यवनकरग्रहणाब्धौ मग्ना येनोद्धृता पृथिवी ॥ ७ ॥
विजितमहीतल तस्मै (?) दत्तं विद्यानिधानपदमस्मै ।
आचार्याक्षयसहितं यतिबुधवृन्दैर्महीतले महितं ॥ ८ ॥ इति कवीचन्द्रवर्णनं ।
श्रीमत्काशिविकाशिभिः सुकविभिस्तद्वत्प्रयागागमिभिः(?)
नानादेशनिवासिभिश्च रचिता विद्यागणोल्लासिभिः ।
श्रीकृष्णेन सरस्वतीपदयुताचार्योपनामश्रित-
श्रीविद्यानिधिसत्कवीन्द्रविषया पद्यावली लिख्यते ॥ १ ॥ तत्रादौ कवीन्द्राष्टकं ।

End. प्रयागतः स्नानपुण्याम्बुपूरैः समुत्पाद्य सत्कीर्त्तिवल्लीमतल्लीः ।
पवित्रोरुगोत्रा सुरत्राणकारी सदाकीन्द्रसंसत्कविन्द्रो(?) विभाति ॥
* * सद्रसालङ्कृतिरुद्रससन्ती वसत्प्रमदारलीलयैव (?) वाणी ।
कवीन्द्रस्य मुनेः कवीन्द्रशिरोमणेरेति शिरोमणित्वं ॥ ९ ॥
दैत्या * वोपचितोचितश्रीसुखाय यो दक्षिणसन्मुखस्थः ।
दूनांनिके(?)प्युत्कटकायकान्तिर्जीयात्कवीन्द्रः कविरद्भुतोऽयम् ॥१०॥
एते रघुनाथभट्टगुर्जरस्य ।

Colophon. श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीकवीन्द्रचन्द्रोदयपुस्तकं ।

विषयः । क्षेमराजमिश्र—माधवभट्ट—खडगमिश्र—रघुनाथदीक्षित—क्षमानन्दवाजपेयि—भय्याभट्ट—केशवमिश्र—मीमांसकहिडेश्वरभट्ट—चक्रपाणिपण्डित—गणेशभट्टधर्माधिकारि—परमेश्वराचार्य—रामकृष्णनागर—मैथिलोपाध्यायविश्वम्भर—जगदीशजानि—श्रीरामेश्वरपञ्चाननभट्टाचार्य—जयकृष्णोपाध्याय—गौरीपतिमिश्र—दामोदरभट्टकालोपनामका—ऽग्निहोत्रिधर्मेश्वर—व्रजभूषणकवि—कृष्णचन्द्रभट्टा—ऽनिरुद्धमिश्र—बालकृष्णज्योतिर्वित्—पूर्णानन्दब्रह्मचारि—कालिदासमिश्रपौत्रमुरलीधर—कृष्णाचार्य—पट्टवर्द्धनमहादेवभट्ट - दाक्षिणात्यलीलाधरभट्ट—मैथिलवदरीनाथोपाध्याय—हीरारामकवि—गणेशभट्ट—मौनिविश्वेश्वरभट्ट—श्रीमहीपत्युपाध्याय—शिवदत्तमिश्र—कविशेखर—रघुनाथोपाध्याय—तिलभाण्डेश्वर—ब्र-

न्द्रसरस्वती—ब्रह्मेन्द्रस्वामि—नारायणचतुर्वेदि—गङ्गाराममिश्र—जगन्नाथपञ्चाननाचार्य—मैथिलकायस्थ—दयालमिश्र—वीरेश्वरभट्ट—कमलनयनदीक्षित—परमेश्वराचार्य—त्वरितगतिकवि—रामभद्रवाजपेयि—दिवाकरभट्ट—रघुनाथभट्टगुर्जरप्रभृतिभिः कृतानां श्रीसर्वविद्यानिधानकवीन्द्राचार्यप्रशंसापराणां गद्यपद्यानां सङ्ग्रहः ।

No. 816. सङ्क्षिप्तप्रयोगः ।

Substance, country paper, 9¾ × 4¼ inches. Folia, 78. Lines 9 on a page. Extent, 1200 s'lokas. Character, Nágara. Date, Sk. 1871. Place of deposit, Calcutta, Government of India. Appearance, soiled and old. Prose. Generally correct.

Sañkshipta Prayoga. A manual of sacramentary rites from conception to marriage, founded on the rules of Ás'valáyana. Anonymous.

Beginning. श्रीरामं सपरीवारं गणेशं च सरस्वतीम् ।
आश्वलायन-तच्छिष्यान् प्रणम्य पितरं गुरुम् ॥
अथ किञ्चित् सङ्क्षेपेण प्रयोगमात्रमुच्यते ।

End. ततो गृहप्रवेशनीयहोमः कार्यः । ततः शुभदिने स्वस्त्यादि वाचयित्वा स्वलङ्कृतः स्वलङ्कृतां रात्रावुपगच्छेत् ।

Colophon. इति वधूसहितस्य गृहप्रवेशविधिः ।

विषयः । दुष्टप्रथमरजोदर्शनशान्तिविधिः । गर्भाधानविधिः । पुंसवन-सीमन्तोन्नयनविधिः । जातकर्मनामकरणादिविधिः । चूडाकर्मोपनयनविवाहवधूप्रवेशादिकर्मविधिश्च ।

No. 817. ऋषितर्पणं ।

Substance, country paper, 9 × 4 inches. Folia, 27. Lines 9 on a page. Extent, 500 s'lokas. Character, Nágara. Date Sm. 1802. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Ṛishitarpaṇa. Directions for offering water to the first seven saintly progenitors of the human race, now identified with the stars

of Ursa Major. The names of the sages are Maríchi, Atri, Ângiras, Pulastya, Pulaha, Kratu, and Vasishṭha.—Anonymous.

Beginning. अथ ऋषीणामावाहनप्रतिष्ठाषोडशोपचारैः पञ्चामृतेन पूजातर्पणं । आच० प्रा० अद्याद्य० सप्तर्षीणां प्रीत्यर्थं छन्दसां सामसञ्चिकानां यातयामत्वनिरुत्त्यर्थं वेदस्याध्यापननिमित्तमुपाकर्मोत्सर्गकर्माहं करिष्ये इत्यादि ।

End. अद्य पूर्वो० वेदस्याध्यापननिमित्तमृषीणां पूजनतर्पणकर्मणा यन्न्यूनातिरिक्तं तत्सर्वं भवतां ब्राह्मणानां वचनात् तीर्थविष्णोः प्रसादात् सर्वं परिपूर्णमस्तु उत्तरे कर्मणि निर्विघ्नमस्तु बहुपुत्र० वाञ्छितार्थफलप्राप्तिरस्तु ।

विषयः । सप्तर्षीणां पूजनतर्पणादिकथनं ।

No. 818. बालतन्त्रं ।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 43. Lines 10 on a page. Extent, 900. s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearauce, soiled and old. Verse. Generally correct.

Bála Tántra. A treatise on the diseases of women and children, founded on the *Prayogas'ara*, and other Tantras. By Kalyána, son of Mahidhara, and grandson of Rámadása. The author was born in Ahichhatrá, but the work was completed at Benares on Sunday the full moon of Srávana in the S'aka year 644.=A. D. 720. Contents I—III. Treatment of barrenness. IV. Treatment of females during pregnancy. V. Prevention of miscarriage and abortion. VI. Means for promoting easy delivery. VII—XI. Directions for rearing children. XII. Infantile fevers. XIII. Infantile piles, cough, convulsions and boils. Treatment of diseases in the eyes, nostrils, head and other organs of children.

Beginning. विघ्नव्रततिविध्वंसकारिणं विघ्नहारिणं ।
कल्याणोऽहं नमस्कुर्वे विघ्नेशं ग्रन्थसिद्धये ॥ १ ॥
प्रयोगसारप्रमुखागमेषु प्रोक्तेषु शास्त्रेषु च सुश्रुताद्यैः ।
यदुक्तमेकत्र निबध्यतेऽस्मिन् ग्रन्थे मया तत् खलु बालतन्त्रे ॥ २ ॥

End. पश्चान् विलोक्य प्रचुरप्रयोगान् पद्यैः स्वकीयैः कतिचित् प्रदोषैः ।
प्रोक्ता चिकित्सा रुचिरा शिशूनां सदृशकालादिसमीक्ष्य कुर्यात्॥ २७ ॥

अच्छिन्नाञ्च यो जातः पण्डितैकशिरोमणिः ।
रामचन्द्रार्चनरतो रामदासः सतां प्रियः ॥ २८ ॥
विद्वज्जनाह्लादकरोऽतिमानी महीधरः सर्वजनाभिवन्द्यः ।
लक्ष्मीन्द्रसिंहाङ्घ्रिसरोजभृङ्गस्तदात्मजोऽभूद्विदितागमार्थः । २९ ॥
कल्याण इत्युक्तत्वात् (?) नामधेयस्तदात्मजो ग्रन्थवरान् विलोक्य ।
परोपकाराय प्रबन्धतन्त्रं सतां समालोकनयोग्यमेतत् ॥ ३० ॥
युगवेदरसाकाशमिते वर्षे नभे रवौ ।
पौर्णिमायां चकारेदं लिलेख च शिवालये ॥ ३१ ॥
स्वभावात् कृशकायो यः स्वभावादल्पपावकः ।
स्वभावादबलो यस्य तस्य नास्ति चिकित्सितम् ॥ ३२ ॥

Colophon. इति श्रीकल्याणेन कृते बालतन्त्रे नानाप्रयोगकथनं नाम चतुर्दशः पटलः ।

विषयः । १ पटले, बन्ध्यात्वप्रतीकारः । २, साधारणासाधारणबन्ध्यात्वनिवारकौषधकथनं । ३. पुरुषवीर्यनिरोधनं । ४, गर्भाधानदिवसीयस्त्रीकर्तव्यस्नानविधिः । ५, गर्भरक्षाप्रकारः । ६, सुखप्रसवोपायः । ७, ८, ९, १०, ११, नानाविधबालग्रहनिवारणादिप्रकारः । १२, बालकज्वरचिकित्सा । १३, अर्शकाशमूर्च्छा विस्फोटकादिबालरोगचिकित्सा । १४, बालकनेत्रनासिकाशिरःप्रभृतिषु जातरोगचिकित्सा ।

No. 819. जैमिनिसंहिता, मध्यमखण्डात्मिका ।

Substance, country paper, 11 × 6 inches. Folia, 234. Lines 11 on a page. Extent, 5000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Incorrect.

Jaimini Sañhitá. The name of this MS. is doubtful. At the ends of the 2nd and the 3rd chapters, it is called Brahmáṇḍa Puráṇa, and the colophon at the end of the work likewise has the same name, but it is in a different handwriting from that of the body of the text. The epigraph of the first chapter calls the chapter "the first of the middle part *(madhya bhága)* of the Jaimini Sañhita, a Mahá Puraṇa of 50,000 s'lokas." *Ityádi mahápuráṇe pañchás'ítí sáhasrikáyám jaimini-sañhitáyám madhyabhágé prathamodhyáyah.* The epigraphs of the other chapters have only *iti s'rí* and the numbers of the chapters. According

to the Nárada Puráṇa, the Brahmáṇḍa P. contains only 12,000 verses, whereas the MS. under notice in its entirety should embrace 50,000 verses. The Brahmaṇḍa P. is divided into three parts; but the contents of its 2nd part, as given in the Nárada P. appears to be different from those of the MS. I am disposed therefore to take it as a part of the Jaimini Sañhitá, and not that of the Brahmáṇḍa P. It should be added, however, that the middle part of the latter has no where yet been found, and according to Wilson (*Vishṇu Puráṇa*, p. liv) the entire work " is considered to be in much the same predicament as the Skánda, no longer procurable in a collective body, but represented by a variety of Khaṇḍas and Máhátmyas, professing to be derived from it," and this may be one of them.

Contents, I. Description of Ayodhyá and the genealogy of the Iksh//áku race. II. Account of Nahusa, Yajáti &c., III. Story of Bhadras'renya and Urvasí. IV to XIV wanting in the MS. XV. Story of Kás'íraja. XVI to XVIII. Do of Tálajañgha. XIX. Do of Garuḍa. XX—XXI. Sagara's establishment of a kingdom in Ayodhyá. XXII. Nárada's visit to Náráyaṇa sleeping on the primeval waters. XXIII. Conversation of Nárada and Náráyaṇa. XXIV—XXV. Story of King Bali. XXVI. Prahláda's advice to Bali. XXVII—XXVIII. Story of Kártavírya. XXIX to XXXIII. Do of Ila Rája. XXXIV to XXXVII. Merit of dedicating lamps to the glory of various gods. XXXVIII—XIL. Do. of a saint in the court of Kártavírya. XL to XLIII. Do of Sílavatí, a chaste lady. XLIV. Birth of the sage Durbásas. XLV—XLVI. Destruction, by Rávana, of a sacrifice celebrated by Marutta, and its consequences. XLVII. Dislike of worldly pleasures by Kártavírya. XLVIII. Origin of the human frame, XIL—LII. Asita's advice to Kártavírya. LIII—LIV. Description of the court of Kártavírya. LV. Kusámba's obtaining a son by penance. LVI. Birth of Vis'vámitra. LVII—LXXXIV. Life of Paras'uráma. LXXXV—XCII. Story of Sagara. XCIII. Description of Bháratavarsha. XLIV. Parasuráma visited by certain sages.

Beginning. विश्वोत्पत्त्यादिषु गुणतया यत्कलां आस्ति मूर्त्ते-
रन्तर्व्यामोहयति सततं भक्तिलेशो यदीयः।
अस्वच्छन्तं सकलभुवनव्यापि नारायणाख्यं
प्रत्यग्ज्योतिः स्फुरतु हृदये सच्चिदानन्दरूपम्॥

हमाम्भोरुहकेसरारुणरुचामालोलदुर्वादल-
श्यामानावकरोतु (?) यास्य गतयो श्रेयांसि गात्रे त्विषाम्।
श्रीभूम्योरितरेतरव्यतिकरव्यक्तं वपुर्वो निश्चं
तल्लीनस्तनचूचुकाम्बुदर * त्यासक्तहस्तं हरेः (?) ॥
ऋषय ऊचुः। विचित्रार्थकथोपेता ब्रह्माण्डीया सुविस्तरा।
पुराणसंहिता सूत त्वया सम्यगिहोच्यते ॥
भूयोऽप्याचक्ष्व नः सम्यग् विस्तरेण महामते।
हिरण्यनाभः किं भूयो जैमिनिं पर्यपृच्छत ॥
सूत उवाच। श्रुत्वा बहुविधा रम्याः कथा मुनिमुखोद्गताः।
हिरण्यनाभो विप्रेन्द्रो जैमिनिं पुनरब्रवीत् ॥
भगवन् यन्मया पृष्टं त्वया तत्सम्यगीरितं।
महदादं हि जगतो नवधा सृष्टिलक्षणं ॥
नक्षत्राणां ग्रहाणाञ्च ज्योतिषां मरुतां तथा।
स्थितिश्चारक्रमश्चैव लोकानाञ्च सहामरैः ॥
संस्थानं द्वीपवर्षाणां पर्वतानाञ्च भूतले ॥
नदीनदसमुद्राणां नामानि च यथाक्रमम्।
कथितानि त्वया सम्यग् ब्रह्मर्षे पृच्छतो मम ॥
नानाकथामृतमिदं भवद्वक्त्रेन्दुमण्डलात्।
श्रूयमाणं श्रुतिपुटैर्न तृप्यामि पिबन्नपि ॥
सोऽहमिच्छामि भगवन् खण्डोऽयं नवमः कथम्।
चतुःशतं योजनानां सहस्रत्वमुपागतः।
खण्डानामुत्तमो ह्येष कर्मभूमिश्च कर्मिणाम् ॥
अत्रैव पुरुषार्थाश्च साध्यन्ते त्व * मानवैः।
* यं सगरपुत्रैः स (?) योजनानां चतुःशतं ॥
समुद्रो योजितः कस्मात् पश्चिमे ब्रूहि मेऽखिलं।
सगरः स महीपालः कस्य वंशसमुद्भवः ॥
तस्य पुत्रैरयं द्वीपः सङ्क्षिप्तः पयसां निधौ।
खण्डोऽयं कतिसङ्ख्यानि योजनानि विलोपितः ॥
रामेणाभूत् पुनः सृष्टं कियद्भूमेर्महामुने।
रामनामा च को यस्य समुद्रो सोरणं मतः (?) ॥
प्रभावोऽद्यापि लोकेषु कीर्त्यते तच्च मे मुदा।

सगरस्य च मे शंस जन्म कर्म च विस्तरात् ।
यन्नाम्नाद्यापि लोकेषु प्रख्यातोऽभूद्पान्निधिः ॥
जैमिनिरुवाच । शृणुष्व मत्तः सकलं यत्पृष्टोऽहमिह त्वया ।
भारतं खण्डमुद्दिश्य सगरञ्च महीपतिं ॥ इत्यादि ।

End. ततः शरभसं रामश्चापे कालानलोपमे ।
सुवर्णपुङ्खनिशितं सन्दधे शरमुत्तमम् ॥
तस्मिन्नस्त्रं महाघोरं भार्गवं वह्निदैवतं ।
युयुजे भृगुशार्दूलः समन्त्राभ्यासतत्परः ।
ततश्चचाल वसुधा सशैलवनकानना ॥

Colophon. इति ब्रह्माण्डपुराणं सम्पूर्णम् ॥

विषयः । १ अध्याये, अयोध्यावर्णनं, इक्ष्वाकुवंशवर्णनारम्भश्च । २, नहुषययात्यादिराज-वृत्तान्तकथनं । ३, भद्रश्रेण्योर्वश्यादेश्च वृत्तान्तकथनं । (४ अध्यायावधि १४ अध्यायपर्यन्तपाठो नास्तीत्यनुमीयते ।) १५, काशिराजादिवृत्तान्तः । १६, शङ्कुतालजङ्घादिराजवृत्तान्तकथनादि । १७, १८, तालजङ्घपराजितस्य सुबाहुराजस्य सभार्यस्य और्वमुनेराश्रमवासादैवनतेयस्य और्वाश्रमागमनवृत्तान्तस्य च कथनं । (अत्र सप्तदशाध्यायसमाप्तिर्नेदृश्यते । एकदैवाष्टादशाध्यायसमाप्तिः ।) १९, गरुडस्य पुनरौर्वमहर्षिनिकटे गमनादि । २०, सगरस्य अयोध्यापुरीगमनादिकथनं । २१, सगरकर्तृकराज्यशासनादि । २२. नारदस्य क्षीरसमुद्रशायिनो भगवतो निकटे गमनादि । २३, नारदभगवत्कथोपकथनादि । २४, २५, बलिप्रह्लादवृत्तान्तकथनादि । २६, २७, २८, बलिं प्रति हरिसमाराधनविषये प्रह्लादकर्तृकं व्रताद्यनुष्ठानोपायकथनं । कार्त्तवीर्यतपःकरणं, नारदकार्त्तवीर्यसंवादादिकथनञ्च । (२६ शेषभागः २७ अध्यायश्च न दृश्यते) । २९, ३०. ३१, पुत्रकामनार्थमिलराजकृतपितृयज्ञकथनं । इलस्य राज्ञः स्त्रीभावप्राप्त्यादि च । ३२, शिवप्रसादात्तस्य स्त्रीत्वमोचादि । ३३, गोकर्णतीर्थे इलस्य गमनकथनादि । ३४, ३५. ३६, केशवाराधनाङ्गीभूतदीपप्रतिष्ठाप्रकारः । ३७, भद्रदीपप्रतिष्ठाख्यव्रतविधिकथनादि । ३८, कार्त्तवीर्यदृष्टापूर्वमुनिरूपवर्णनादि । ३९, मुनिदर्शनतः कार्त्तवीर्यविस्मयभवनादिकथनं । ४०, ४१, ४२, ४३, पतिव्रतायाः शीलवत्या उपाख्यानं । ४४, रुद्रक्रोधाद्दुर्वाससो मुनेरुत्पत्तिकथनादि । ४५, रावणकृतमरुत्तराजयज्ञभङ्गो रावणमरुत्तयुद्धादि च । ४६, रावणकार्त्तवीर्ययोर्युद्धवर्णनादि । ४७, कार्त्तवीर्यस्य वैराग्योदयादिकथनं । ४८, शरीरोत्पत्तिवर्णनादि । ४९, ५०, ५१,

५२, असितमुनिः कार्त्तवीर्याय तत्त्वज्ञानमुपदिशति। ५३, विविधजनैरु-पास्यमानस्य कार्त्तवीर्यस्य राज्ञः सभावर्णनादि। ५४, सभायामागतस्य कस्य-चिद् द्विजवरस्य पूजनं परस्परकुशलप्रश्नादि च। ५५, कुशाम्बराजस्य तपस्यादिना पुत्रोत्पत्तेर्वृत्तान्तादि। ५६, विश्वामित्राद्युत्पत्तिवर्णनादि। ५७, अवधि ८४, पर्यन्तं परशुरामजन्मकर्मकथनादि। ८५, अवधि ९२, पर्यन्तं सगरजन्मकर्मादिकथनं। ९३, भारतवर्षवर्णनादि। ९४, महेन्द्राचलवासि-परशुरामदर्शनार्थं मुनीनां गमनादिवृत्तान्तवर्णनं। (असंलग्नासमाप्तवृत्तान्त-त्वात् खण्डितमिदमिति भाति। अत्र प्रायोऽसंलग्ना अध्यायाङ्काः।)

No. 820. मध्यमनोरमा, आरम्भावधिलकारार्थप्रक्रियापर्यन्ता।

Substance, country paper, first Chapter $9\frac{3}{4} \times 5\frac{1}{4}$ inches. Folia, 37. Lines 13 on a page. Second Chapter, $12\frac{1}{2} \times 5\frac{1}{4}$ inches. Folia, 85. Lines 12 on a page. Extent, 5400 s'lokas. Character, Nágara. Date Sm. 1850. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Madhyamanoramá. A commentary on the *Madhya-siddhánta-kaumudí*, an abridgment of the Sanskrit Grammar of Páṇini. By Ráma S'armá. There are three abridgments of Páṇini; the most elementary is called *Laghukaumudí*, the next *Madhya-kaumudí* alias *Madhya-siddhánta-Kaumudí* and the most elaborate, *Siddhánta-Kaumudí*, which embraces the whole of the aphorisms of Paṇini arranged in a convenient form. The first two are by Varadárája, a disciple of Bhaṭṭoji Dikshita, who compiled the last. Each of these abridgments has a host of commentators. I have heard of a fourth abridgment under the name of *Sárakaumudí*, but I have not yet seen it. Aufrecht's Bodleyan Catalogue, p. 165.

Beginning. महेश्वरं नमस्कृत्य पाणिन्यादीन् गुरूनपि।
करोमि मध्यकौमुद्या व्याख्यां मध्यमनोरमां॥
ग्रन्थारम्भे विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति, मत्वेति। वरद-राजनामा ग्रन्थकारकः पाणिनीयानां मध्यसिद्धान्तकौमुदीं करोति।

End. इत्थं शब्दन बुध्यते अत एवाह। अवस्कन्दनलवनरूपेति द्वित्वापत्तेरिति। क्रियासमभिव्याहारे द्वे वाच्ये इत्यनेनेत्यर्थः।

Colophon. इति लकारार्थप्रक्रिया । श्रीशिवानन्दभट्टानामाज्ञया रामशर्मणा व्याख्यातं मध्यसिद्धान्तकौमुद्याष्टीकाया मध्यमनारमायाः सुप्तिङन्तं समाप्तम् ॥

विषयः । मध्यसिद्धान्तकौमुद्या प्रथमत आरभ्य लकारार्थप्रक्रियापर्यन्तानां प्रकरणानां व्याख्यानम् ।

No. 821. शिवपूजापद्धतिः ।

Substance, country paper, 10½ × 4 inches. Folia, 20. Lines 10 on a page. Extent, 500 s'lokas. Character, Nágara. Date Sm. 1843. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'ivapújá-paddhati. Directions for worshipping S'iva. Anonymous.

Beginning. अथ शिव(पूजा)पद्धतिर्लिख्यते । ब्राह्मे मुहूर्त्ते चोत्थाय यामिनोचैलमुत्सृजेत् । सहस्रदलकमलमध्यस्थस्य(?) मूर्द्धि ध्यायेद् गुरुं समं ॥ ततो ध्यानं ।

End. निर्माल्यं मस्तके धारयेत् । मूलं । पादोदकं पिवेत् । नैवेद्यं तद्गताय विभजेत् । स्वयं भुक्त्वा तन्मयो विहरेत् ।

Colophon. इति शिवपूजापद्धतिः समाप्ता ।

विषयः । शिवमूर्त्तिपूजनविधिः ।

No. 822. पराशरोपपुराणं ।

Substance, country paper, 11 × 4¾ inches. Folia, 57. Lines 8 on a page. Extent, 1000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Parásara Upapuráṇa. An Upa or minor Puráṇa. Contents, 1. Descriptions of Upapuráṇas, 2. Origin of the universe. 3. Relative importance of the various objects of creation. 4. Sectarial marks. 5—6. Meaning of S'rutis. 7. Praise of Bráhmaṇs, 8. Knowledge of the Divinity. 9. Daily religious duties. 10. Occasional religious ceremonies. 11. Conduct of the sinful. 12. Forbidden food. 13 to 15. Expiations for various offences. The MS. is probably incomplete.

Beginning. सौरमण्डलमध्यस्थं साम्बं संसारभेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥ १ ॥

मरुशृङ्गे समासीनं संसारोद्धितारकं ।
शुकं प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ॥ २ ॥
पप्रच्छ परमं गुह्यं भक्त्या परमया मुदा ।
भवपाशेन बद्धानां भवपाशविमोचनं ॥ ३ ॥
पराशरोऽपि भगवान् भवानीपतिवल्लभः ।
प्राह कारुणिकः श्रीमान् ध्यात्वा साम्बं त्रिलोचनम् ॥ ४ ॥

End. अवश्यमनुभोक्तव्यं पापानां फलमाशिक ।
प्रायश्चित्तविहीनेन प्रायश्चित्तमथाचरेत् ॥ १०१ ॥
सर्वमुक्तं समासेन प्रायश्चित्तं शुकानघ ।
अश्रद्दधानस्य दातव्यं न देयं यस्य कस्यचित् ॥ १०२ ॥

Colophon. इत्युपपुराणे पाराशरे पञ्चदशोऽध्यायः ।

विषयः । १ अध्याये, मुनिकृतशिवस्तुतिः । मुनिकृतसनत्कुमार-नारसिंहाद्युपपुराणादि-रचनादि २, सृष्टिक्रमकथनं । ३, अपेक्षाकृतपदार्थाधिक्यवर्णनं । ४, उपासनानुसारेण त्रिपुण्ड्रोर्द्ध्वपुण्ड्रादिचिह्नधारणवर्णनं । ५, ६, अत्यर्थसङ्कटकथनादि । ७, ब्राह्मणवैभवकथनं । ८, ज्ञानतत्त्वकथनं । ९, प्रातःकृत्याद्याह्निककृत्यकथनं । १०, श्रुतिस्मृत्युक्तधर्मानुष्ठानकथनं । ११, पापिचरितादिकथनं । १२, अभक्ष्यान्नकथनं । १३, १४, १५, प्रायश्चित्तादिकथनं ।

No. 823. निघण्टुः ।

Substance, country paper, $7\frac{3}{4} \times 5$ inches. Folia, 78. Lines 23 on a page. Extent, 1350 s'lokas. Charaeter, Nágara. Date ? place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Incorrect.

Nighaṇṭu. A list of synonyms of medicinal drugs. Anonymous.

Beginning. नमामि धन्वन्तरिमादिदेवं सुरासुरैर्वन्दितपादपद्मं ।
लोके जरारुग्भयमृत्युनाशं धातारमीशं विविधौषधीनाम् ॥ १ ॥
अनेकदेशान्तरभाषितेषु सर्वेष्वथ प्राकृतसंस्कृतेषु ।
गूढेष्वगूढेषु च नास्ति सङ्ख्या ह्यभिधानेषु तथौषधीनां ॥ २ ॥
प्रयोजनं यस्य तु यावता स्यात् तावत्स गृह्णाति यथाम्बु कूपात् ।
तस्मान्निघण्टुस्त्वनिघेरनन्ताद् गृह्णाम्यहं किञ्चिदिहैकदेशं ॥

End. (खण्डितत्वात्समाप्तिवाक्यादिकं नास्ति ।)

विषयः । गुडूच्यादिनानौषधीनां नामानि गुणाश्चोक्ताः ।

No. 824. आह्निकप्रकाशः, वीरमित्रोदयीयः ।

Substance, country paper, 14¾ × 6 inches. Folia, 174. Lines 11 on a page. Extent, 6000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Correct.

A'hnikaprakás'a. The proper daily duties of Bráhmaṇs from sunrise to the time of retiring for rest at night. By Mitra Mis'ra, son of Paras'uráma Mis'ra, and grandson of Hañsa Paṇḍita. This is a part of the well known Smṛiti compilation called *Viramitrodaya,* which was compiled under the auspices of Vira Siñha a king of Kás'í, who belonged to the Bundelá clan. He was the son of Madhukara Sháh and grandson of Prataparudra. The part of the work which treats of inheritance is a leading authority on the subject in the North Western provinces.

Beginning. सिन्दूरारुणगण्डमण्डलगलद्दानाम्भसां धारया
सिञ्चन् पदसक्तभक्तजनताविघ्नौघधूलीरिव ।
धम्मिल्लालिमिवालिवृन्दमनिशं मूर्द्ध्ना दधानं हर-
प्रेयांसं गिरिजाङ्गजं गजमुखं वन्देऽरविन्देक्षणम् ॥ १ ॥ इत्यादि ।

End. प्रत्याशं परिवर्द्धितेऽर्थिजनता दैन्यान्धवारापहे
श्रीमद्वीरमृगेन्द्रदानजलधिर्धृद्धचन्द्रोदये ।
राज्ञादेशितमित्रमिश्रविदुषस्तस्योक्तिभिर्निर्मिते
ग्रन्थेऽस्मिन् परमाह्निकोक्तिभणितः पूर्त्तिं प्रकाशोऽगमत् ॥

Colophon. इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलश्रीमन्म-
हाराजाधिराजप्रतापरुद्रतनूजश्रीमन्महाराजमधुकरसाहसूनुश्रीमहाराजाधि-
राजचतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकरश्रीवीरसिंहदेवोद्यो-
तितश्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूनुसकलविद्यापारावारीणजगद्दारिद्र्य-
महागजपारीन्द्रविद्वज्जनजीवातुश्रीमन्मित्रश्रीमित्रकृते श्रीवीरमित्रोदयाभिधनि-
बन्धे आह्निकप्रकाशः पूर्त्तिमगात् ।

विषयः । ग्रन्थकारवंशकथनं । ब्रह्ममुहूर्त्तादिकृत्यं । स्वधर्मचिन्तनादि । गोश्रोत्रियादिमा-
ङ्गल्यदर्शनं । विण्मूत्रोत्सर्गविधिः । मृत्तिकादिशौचक्रिया । आचमनद्विराचम-
नादिकथनं । दन्तधावनस्य स्नानस्य च विधिः । एतदह्नःप्रथमभागीयकृत्यं । ततो
विद्याभ्यासस्याह्नो द्वितीयभागे कर्त्तव्यतोक्तिः । तृतीयभागे अर्थोपार्जनार्थमुपस-
र्पणं । चतुर्थभागे कात्यायनगोभिलादिमतानुयायिपृथक्पृथक्स्नानविधेः कथनं ।

स्नाननिमित्तकथनं । तिलकविधिः । सन्ध्यातदुपासनतद्देशनिरूपणादि । मार्जनप्राणायामाघमर्षणप्रकारकथनं । नृसिंहपुराणोक्तसन्ध्याकल्पकथनं । शौनकोक्तसन्ध्यावन्दनविधिः । जपविधिः । कातीयबह्वृचादिब्रह्मयज्ञस्वरूपस्वशाखोक्तवेदमन्त्रपाठविधिः । कातीयादिप्रयोगानुसारितर्पणविधिः । तर्पणोत्तरकृत्यकथनञ्च । पञ्चमभागे सोम-वनस्पत्यग्नीषोमेन्द्राग्निद्यावापृथिवीधन्वन्तरीन्द्रविश्वेदेवोद्देशेन प्रस्तुतान्नस्याग्नौ होमात्मकस्य आश्वलायनादिशाखीयवैश्वदेवकर्मणः कथनं । नित्यश्राद्धातिथ्यभोजनविधिः । भोज्याभोज्यान्नादिनिर्णयः । अभक्ष्यमांसकथनं । पशुहिंसाविधिः । अभक्ष्यपशुकथनं, अपेयमद्यकथनं, पुराणश्रवणादिभोजनोत्तरकर्त्तव्यकर्मकथनं, सायंसन्ध्याशयनविधिकथनञ्च ।

No. 825. आधानविधिप्रयोगः ।

Substance, country paper, 10 × 4 inches. Folia, 53. Lines 7—8 on a page. Extent, 1000 s'lokas. Character, Nagara. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Ádhánabidhi-prayoga. Directions for collecting and preserving the sacred household fire, or the rite of Agnyádhána, according to the rules of Ápastamba. By Tryambaka Bhaṭṭa, son of Krishṇa Bhaṭṭa. The work was composed at Benares.

Beginning. यदीक्षणादिदं विश्वं भवत्युभेत्यपैति च ।
तमक्षयमहं वन्दे वन्दे दाक्षायणीधवं ॥ १ ॥
यत्कृपालेशतोऽपि स्यान्मूको वाचस्पतिः स्वयं
तं गुरुं नौमि सर्वज्ञमाडवाशुक्लदीक्षितं ॥ २
नत्वा गणेशं प्रत्यूहमोहध्वान्तदिवाकरम् ।
समस्तवेदतत्त्वज्ञमापस्तम्बं महामुनिम् ॥ ३ ॥
मोल्हाख्यवंशास्तवारिधीन्दुश्रीकृष्णभट्टप्रवरात्मजोऽहं ।
सूत्रार्थवित् त्र्यम्बकभट्टनामा तन्वेऽमुमाधानविधिप्रयोगम् ॥ ४ ॥
अनेकग्रन्थसम्पादभीरुभिः सूरिभिस्त्वयम् ।
निर्मत्सरैर्दयोन्निद्रैराद्रीयेतेष्टमेव मे ॥ ५ ॥

End. अथारणीलक्षणं । चतुरङ्गुलोच्छ्रायः । विस्तारः षडङ्गुलः । अरत्निमात्रं दैर्घ्यं । इत्येके शाखिनः । चतुरङ्गुलोच्छ्रायः । उभयोररण्योरेकवृक्षादाहरणं । अन्यतराणि वृक्षान्तरादाहरणेनाऽन्युत्पत्तिः । इत्याधानं समाप्तं ।

इति श्रीमोल्लोपनाम्नः कृष्णभट्टस्य सूनुना त्र्यम्बकेन काश्यां कृतः प्रयोगः समाप्तः । (इतः परं सार्द्धपत्रद्वयात्मकः पाठोऽस्ति) । तदारम्भवाक्यं यथा, गङ्गाभट्टकृताधानपद्धतौ सर्वाधानसाधकं—इत्यादि । (परिसमाप्तिर्न दृश्यते)

विषयः । अग्न्याधानेऽधिकारी । अग्न्याधानकालः । आधानकर्तुरनाहिताग्नितापप्रयुक्तदोषपरिहाराय देहशुद्ध्यर्थञ्च प्रायश्चित्तकथनं । भस्ममृत्तिकापञ्चगव्यादिस्नानमन्त्राः । तर्पणधेनुदानादिकथनं । प्रायश्चित्ताङ्गीभूतकुष्माण्डहोमः । गार्हपत्याद्यग्निस्थाननिर्माणविधिः । प्रकृताग्न्याधानप्रयोगकथनं । अन्वारम्भणीयेष्टिः । पृथिवीयुक्त्इदहस्त्यादिचतुर्होतृहोमः । वपनप्रकारः । सम्भारसङ्ग्रहादिकथनं । (अत्राधानस्य कर्त्तव्यताकर्त्तव्यतादिविचारः ।)

No. 826. गूढार्थादर्शः ।

Substance, country paper, 9¾ × 4½ inches. Folia, 55. Lines 15—16 on a page. Extent, 2500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Goverment of India. Appearance. New. Prose and verse. Correct.

Gúḍhárthádars'a. A commentary on the Jñánárṇava Tantra. By Kás'inátha alias Sivânandanátha, son of Jayaráma Bhaṭṭa.

Beginning. अनन्ताख्यं गुरुं नौमि कविलप्रतिभाकरम् ।
शास्त्रवल्लीजलधरं स्फुरत्कीर्त्तिकरं परं ॥ १ ॥
नमामि कामेश्वरपादपङ्कजं करोमि कामेश्वरपूजनं सदा ।
वदामि कामेश्वरनाम निर्मलं स्मरामि कामेश्वरतत्त्वमव्ययं ॥
या विद्येत्यभिधीयते श्रुतिपथे शक्तिः सदाद्या परा
सर्वज्ञा भवबन्धभित्तिनिपुणा सर्वाश्रये संस्थिता ।
दुर्ज्ञेया सुदुरात्मभिश्च मुनिभिर्ध्यानास्पदं प्रापिता
प्रत्यक्षा भवतीह सा भगवती बुद्धिप्रदा मेऽस्तु वै ॥
अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय सरूपाय दक्षिणामूर्त्तये नमः ॥
वाराणसीमहं वन्दे सच्चिदानन्दरूपिणीं ।
मातृरूपेण सततं सहस्रारेऽखिलेष्टदां ॥
ज्ञानार्णवे महातन्त्रे गुरूणामुपदेशतः ।
गूढार्थादर्शटीकेयं काशीनाथेन तन्यते ॥

End. राजराजेश्वरो गङ्गा माधवो मणिकर्णिका ।
अन्नपूर्णा च विश्वेशो ददतां मेऽनिशं शिवं ॥
श्रीमत्त्रिपुरसुन्दर्य्याः प्रीत्यर्थं लिखिता मया ।
प्रभवाब्दे त्विषेः शुक्लपञ्चम्यां ललिताप्रये ॥
श्रीशिवानन्दनाथेन काशीनाथाख्यशर्मणा ।
कृता टीका गुरुप्रीत्यै भवन्तु सदुपासकाः ॥

Colophon. इति श्रीमच्छ्रुतिस्मृतिमतप्रमाणपारावारीणसर्वतन्त्रदक्षिणारतन्त्रधुरीणभट्टोपाख्यजयरामभट्टात्मजवाराणसीगर्भसम्भवकाशीनाथाख्यशिवानन्दनाथविरचितायां ज्ञानार्णवटीकायां त्रयोविंशतिः पटलः समाप्तः ।

विषयः । १ पटले, हे ईश किं त्वया जप्यते इत्यादि पार्वतीवाक्यस्य महादेवकर्तृकमुत्तरदानं । २, त्रिपुरामन्त्रोपासनाप्रकारादिकथनं । ३, अन्तर्यागप्रकारकथनं । ४, मन्त्रपूजाप्रकारः । ५, बलिदानप्रकारः । ६.७, पञ्चसिंहासनस्थितत्रिपुराया विवरणं । ८, त्रिपुरभैरवीवीजादिकथनं । ९, महाविद्याया वीजादिकथनं । १०, त्रिपुरात्रिविधभेदतन्मन्त्रादिकथनं, श्रीविद्याया दशभेदकथनादि च । ११, चतुर्विधषोडशीकथनं । १२, आसनशुद्ध्यर्घ्यस्थापनं, देवताभेदेन मन्त्रन्यासादिप्रकारभेदश्च । १३, नित्यपूजाप्रकारः, गुरुपूजनप्रकारः, कामेश्वर्य्यादिपूजनादि च । १४, श्रीचक्रपूजावशीकरणादिकथनं । १५, स्वर्णपुष्पकृतपूजाफलकथनादि । १६, देवतासाधनप्रकारविशेषकथनं । १७, जप-होम-नानाविधकुण्डनिर्माणादीनां विधिः । १८, होमानन्तरं कर्त्तव्यकुमारीपूजनोक्तिः । १९, २०, दूतीपूजनविधिः । २१, मन्त्रदीक्षाविधिः । २२, सुवर्णरौप्यताम्रसूत्रादिनिर्मितपवित्रपूजनविधिः । २३, दमनाख्यलतापूजनप्रकारादि ।

No. 827. होत्रप्रयोगवृत्तिः, वा आश्वलायनसूत्रप्रयोगवृत्तिः ।

Substance, country paper, $9\frac{3}{4} \times 4$ inches. Folia, 198. Lines 10 on a page. Extent, 3800 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Hotraprayoga-vritti. Directions for performing the rites mentioned in the Kalpa Sútra of A's'valáyana according to the commentary of Deva Svámí. By Tálavrintanivás'í. The MS. is incomplete, and extends only to *Paundaríkaikádas'a* rite.

Beginning. समस्तप्राणिजातस्य हृत्पद्मनिलये स्थितः ।
वेदार्थविदुषा ज्ञेयं यज्ञात्मानं नमाम्यहम् ॥
आश्वलायनसूत्रस्य देवस्वाम्यादिव्याख्यानानुसारेण प्रयोगवृत्तिः क्रियते ।

End. (यतः खण्डितं तच्छेषः) । आ नो मित्रा वरुणेति स्तोत्रियानुरूपौ, ऋजुनीति न इत्यारम्भणीया । मित्रं वयमित्यादि विश्वजिच्छस्त्रशेषः । ब्राह्मणाच्छंसिनः । सुरूपकृत्नुमूत ——

विषयः । दर्शपूर्णमासप्रयोगः । अग्निहोत्रहोमः । आहिताग्नेः प्रवासकालीनाग्न्युपस्थानम् । पिण्डपितृयज्ञः । अन्वारम्भणीयेष्टिः । पुनराधेयेष्टिप्रयोगादि । आग्रयणेष्ट्यादि । पुत्रादिकाम्यष्ट्यादि । चातुर्मास्येष्टिप्रयोगः । पशुबन्धप्रयोगः । एकादशिनां पशुगणानां देवतानां क्रमः । तत्तद्दग्देवतादिसौत्रामणीकर्म । हविर्यज्ञप्रायश्चित्तोक्तिः । सोमप्रयोगः । यज्ञशेषकृत्यं । अत्यग्निष्टोमप्रयोगः । षोडशिकर्म । विहृतषोडशी । वाजपेयप्रयोगः । अतिरात्रप्रयोगः । अप्तोर्यामस्य क्लृप्तिः । शस्त्रस्य प्रतिगरः । अतिरात्रपर्यायः । पौण्डरीकस्यैकादशप्रयोगः । (खण्डितत्वादितः परविषयो न प्राप्तः) ।

No. 828. पुरुषोत्तममाहात्म्यं ।

Substance, country paper, 10 × 4¼ inches. Folia, 59. Lines 8 on a page. Extent, 1100 s'lokas. Character, Nágara. Date, Sm. 1889. Place of deposit, Calcutta, Asiatic Society. Appearance, fresh. Verse. Generally correct.

Purushottama-máhátmya. Description of the sacred places in Purusottama or Puri. It professes to be a part of the *Khetrakáṇḍa* of the *Vishṇu rahasya* section of a work named *Mahápurushavidyá*, probably a Tantra. Though its subject is the same as that of the well known *Purushottama Máhátmya* of the Skanda Puráṇa, the treatment thereof is entirely different. The MS. is incomplete, and comprises only nine chapters as follows: I. Incarnations of Vishṇu. II. Origin of Níláchala, and the reasons why Vishṇu assumed the form of a wooden divinity. III—IV. Creation of the different regions of the universe and the guardians of Puri, (different forms of Mahádeva). V. The temples of Jagannátha, VI. The shape of Jagannátha. VII. Vyása's visit to Purí and praise of the locality. VIII. Merit of visiting Jagannátha at Puri. IX. The mantra of Jagannátha and the merit of tasting food offered to him.

Beginning. वन्देऽहं परमात्मानं नीलाचलपतिं प्रभुं ।
संसाराम्भोधिमग्नानामुद्धारणपरायणम् ॥
श्रीशौनक उवाच । सूत सूत महाभाग वेदतत्त्वार्थकोविद ।
व्यासशिष्य महाबुद्धे यत्पृच्छामि तदुच्यतां ॥
कस्माज्जातमिदं विश्वं कस्मिंश्च लयमेष्यति ।
कुत्र तिष्ठति कः कर्त्ता विश्वस्यास्य वदस्व मां ॥
संसाराम्भोधिमग्नानां कोद्धर्त्ता स्मृतिमात्रतः ।
ब्रह्मादीनां परेशानां कः प्रभुत्वं वदस्व माम् ॥
सूत उवाच । आदिमध्यान्तरहितः सच्चिदानन्दरूपवान् ।
सर्ववेदान्तसारार्थो हरिरित्यभिधीयते ॥

End. सूत उवाच । इत्युक्त्वा भगवांस्तस्मै स्वप्रसादं सुदुर्लभं ।
ददौ विनयनम्राय कृपया परया मुने ॥
लब्ध्वा प्रसादं स मुनिर्जीवन्मुक्तो बभूव ह ।
उवास सुचिरं कालं गायंस्तस्य यशोऽमलं ॥
एवं सर्वं मयाख्यातं तुभ्यं शुश्रूषवे मुदा ।
मयापि नारदादेव विशालायां श्रुतं मुने ॥

Colophon. इति श्रीमहापुरुषविद्यायां विष्णुरहस्ये क्षेत्रकाण्डे श्रीपुरुषोत्तममाहात्म्ये प्रसादवैभवं नाम नवमोऽध्यायः ।

विषयः । १ अध्याये, रामकृष्णाद्यवतारकथनं । २, नीलाचलोत्पत्तिर्विष्णोर्दारुमयविग्रहधारणप्रयोजनकथनं स्वरूपव्याख्यानञ्च । ३, ४, श्रीजगन्नाथाज्ञप्रमायास्तष्टब्रह्माण्डभूलोकादिवर्णनम्, पुरुषोत्तमक्षेत्रस्य तत्तत्स्थाने क्षेत्रपालकमहादेवदेव्यास्थितिवर्णनादि च । ५, जगन्नाथस्य प्रासादस्थितिस्थलस्य तत्पार्षदादीनां च वर्णनं । ६, जगन्नाथमूर्त्तिवर्णनादि । ७, व्यासस्य श्रीक्षेत्रस्थदेवतादर्शनार्थं गमनं । व्यासकृतजगन्नाथस्तुतिवर्णनादि । ८, जगन्नाथदर्शनाराधनमाहात्म्यकथनादि । ९, जगन्नाथमन्त्रजपफलं प्रसादमाहात्म्यवर्णनादि च ।

No. 829. साङ्ग्रहण्येष्टिः ।

Substance, country paper, 8¼ × 4¼ inches. Folia, 23. Lines 9 on a page. Extent, 400 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Sáñgrahaṇyeshṭi. A collection of the mantras required in the performance of the rite of that name. Anonymous.

Beginning. साङ्ग्रहण्येष्ट्या यजते । इमा जनताꣳ सङ्गृह्णानीति । द्वादशारत्निर्‌रशना भवति । द्वादश मासाः संवत्सरः । संवत्सरमेवावरुन्धे ।

End. साङ्ग्रहण्या, तस्मादश्वमेधयाजी यत्परिमिता यद्यज्ञमुखे यज्ञः मुखे यो दीर्घां देवानेव तेत्रय इमे लोकाः । श्रिताय प्राणापानावेवास्मिन्नस्मांद्राजन्य एकनवतिः ॥ ९१ ॥

विषयः । अश्वमेधयागविधिः ।

No. 830. अन्त्येष्टिपद्धतिः ।

Substance, country paper, 10 × $3\frac{3}{4}$ inches. Folia, 21. Lines 8 on a page. Extent, 400 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, soiled, but not old. Prose. Generally correct.

Antyeshṭi-paddhati. Funeral ceremonies meet for Bráhmans who have kept up the sacred household fire. By Anantadeva.

Beginning. अथानन्तदेवस्यान्त्येष्टिप्रयोगः । अथाहिताग्नेः कृष्णपक्षे मरणशङ्कायामुपहोमन्यायेन अतिनैकट्ये समस्यहोमन्यायेन वा अर्वाग्भट्टा होमाः कार्याः ।

End. अकृतारम्भमोमेज्यां भार्यामेवानुवर्त्तते ।
नास्ति माहेन्द्रमान्नाय्यं सन्ति सारस्वतादयः ॥
केचित्पत्युः प्रधानत्वान्नाद्रियन्ते तु योषितां ।
तेनेष्टौ स्यान्महेन्द्रेज्या न स्युः सारस्वतादयः ॥

Colophon. इत्यनन्तदेवकृतान्त्येष्टिपद्धतिः समाप्ता ।

विषयः । आहिताग्नेरन्त्येष्टिक्रियाप्रकारः ।

No. 831. विवरणतत्त्वदीपनं ।

Substance, country paper, 10 × $4\frac{1}{4}$ inches. Folia, 41. Lines 12 on each page. Extent, 1100 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Tolerably correct.

Vivaraṇa-tattva-dípana. A gloss on the *Vivaraṇa* alias the *Vártika* of Súres'varáchárya on Sañkara's great commentary—the *S'áriraka-mímámsá-bháshya.* By Akhaṇḍánanda Maṇi, disciple of Akhaṇḍánubhúti. The manuscript is defective both at the beginning and the end. Hall's *Contributions*, p. 90.

Beginning. अनुबन्धचतुष्टयं विचारप्रयोजकं तच्च सिद्धमित्युत्तरग्रन्थवैयर्थ्यमिति चेत् मैवं।
(प्रारम्भे मङ्गलाचरणाद्यभावे खण्डितमित्यनुमीयते)।

End. अनुबन्धचतुष्टयसम्भवाद्वेदान्तविचारकर्त्तव्यतायुक्तो अधिकरणार्थमुपसंहरति तस्मादिति। रमणीयमिति।

विषयः। विवरणनामकवेदान्तग्रन्थस्य व्याख्यानं।

No. 832. कात्यायनगृह्यसूत्रभाष्यं।

Substance, country paper, 9 × 5 inches. Folia, 44. Lines 10—11 on a page. Extent, 880 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old, decayed and worm-eaten. Prose. Generally correct.

Kátyáyana-gṛihya-sútra Bháshya. A commentary on the Gṛihya Sútra of Kátyáyana. By Gadádhara Dikshita, son of Vámana. The manuscript is incomplete, terminating with the 3rd chapter.

Beginning. आविर्भूतं चतुर्द्धाऽयः कपिभिः परिवारितः।
हतवान् राक्षसानीकं रामं दाशरथिं भजे॥ १॥
स्वाभिप्रायेण हि मया किञ्चिदिह विलिख्यते
किन्तु वाचनिकं सर्व्वमतो ग्राह्यञ्च निर्भयैः॥ २॥
अथातोऽधिकार इत्यादिना श्रौतानि कर्माण्युक्तानि। तदनन्तरं स्मार्त्तानि विधीयन्ते। तत्रैतत् प्रथमं सूत्रं। अथातो गृह्यस्थालीपाकानां कर्म। उच्यते इति शेषः।

End. (खण्डितत्वाच्छेषवाक्यादिकं नास्ति।)

विषयः। प्रथमकाण्डीयप्रथमकण्डिकायां स्थालीपाकः कुत्र कर्त्तव्य इत्यत्र विचारः, पञ्च भूसंस्काराः। ब्रह्माद्यासनकल्पनादि। यज्ञपात्राद्यासादनविधिः। आज्याधिश्रयणानन्तराज्यहोमादिकथनादि। २, वैवाहिकाग्न्याधानादिकर्म। अग्निन्नग्नौ निर्वाणे सति पुनराधाने शुभदिननिरूपणादि। अग्न्याधानेऽधिकारिणः।

अग्न्यानयनस्थाननिरूपणोक्तिः। अरणिप्रमाणोक्तिः। अरणिमन्थनादग्निसम्पादनोक्तिः। सूर्पोदूखलमुशलादीनां परिमाणकथनं। दृष्टिभेदेन चरुभेदकथनं। चरुहोमादिकथनं। दृष्टिभेदेन भोज्यब्राह्मणसङ्ख्याभेदश्च। २, आवसथ्याग्न्याधाने कर्त्तव्यादि। पुण्याहवाचनविधिः। नान्दीमुखश्राद्धादिकथनं। स्मार्त्ताग्न्याधानप्रकारादिकथनं। आधानकाले प्रतिबन्धके सति तत्प्रतिप्रसवादि (खण्डितत्वादितः परविषयो न प्राप्तः)।

No. 833. आधानबौधायनः।

Substance, country paper, $8\frac{3}{4} \times 4$ inches. Folia, 56. Lines 9 on a page. Extent, 1000 s'lokas. Character, Nágara. Date Sм. 1866 Sк, 1731. Place of deposit, Calcutta, Government of India. Appearance, soiled. Prose. Generally correct.

A'dhánaprayoga alias *A'dhánabaudháyana.* A treatise on the collection and preservation of the sacred household fire, founded on the rules of Baudháyana. The manuscript is imperfect and the author's name is missing. This work is more detailed than No. 825.

Beginning. अथाग्न्याधानं निरूप्यते। तस्य कालः। शिशिरवसन्तग्रीष्मर्त्तवः। पौर्णमास्यमावास्या यजनीयास्तिथयः। कृत्तिकारोहिणीपुनर्वसुपूर्वोत्तरफल्गुनीचित्रा नक्षत्राणि। मृगशीर्षविप्रोष्ठपदश्रवणानुराधा अपीति केचित्।

End. ब्रह्मविसर्जनं न कुर्यात्। पौर्णमासीयागपर्यन्तं त एवाग्नयः पौर्णमासीयागान्वाधानख(स्विष्ट)कृत्।

Colophon. इत्यन्वारम्भणीया। पौर्णमासीयागः तपदि कर्त्तव्यः। (परिसमाप्तिसूचकवाक्यादेः परमपि पाठोऽस्तीति समाप्तौ सन्देहः)।

विषयः। अग्न्याधानकालनक्षत्रादिकथनं। ऋत्विगादिवरणं। ऋत्विगादिभ्यो बौधायनमतानुयायिमधुपर्कदानं। गार्हपत्याद्यायतननिर्माणकरणं। यज्ञपात्राणामायतननिर्माणप्रमाणादेः कथनं। गापित्व्यज्ञादिकरणकथनं। राष्ट्रभृतो राज्ञो मङ्गलार्थं अमात्यनामकहोमकथनादि। गोधूमकुलित्थादिहोमकथनादि। आहवनीयगार्हपत्यकर्त्तव्यहोमविशेषकथनं। यजमानकर्त्तृकाग्न्युपस्थानं। पूर्णाहुतिदानप्रकारकथनादि। पवमानेष्टिकथनादि। पौर्णमासेष्टिकथनञ्च।

No. 834. सावित्रचयनं ।

Substance, country paper, 10 × 3¾ inches. Folia, 12. Lines 9 cn a page. Extent, 200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose, and verse. Correct.

Sávitrachayana. Rules for the collection and installation of the Sávitri fire in a household. The manuscript is incomplete, and the author's name is unascertainable.

Beginning. अथ सावित्रचयनमुच्यते। सावित्रमग्निं चेष्यमाण उपकल्पयति। पञ्चाशीत्यधिकमित्यादिशर्कराः। चतस्रः स्वयमातृणाः। दधिमधुघृतोदपात्रं सहस्रहिरण्यशकलाश्च। चतुर्दश्यां प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीन इत्यादि। विद्युद्सीत्यप उपस्पृश्य। अथाग्निमङ्कल्यः।

End. होत्रे प्रयच्छति। होतारमुपह्वयते। वाजिनभक्षः। शेषं प्रकृतिवत्। सन्तिष्ठते मैत्रावरुणामिक्षाप्रयोगः। (परिसमाप्तिसूचकवाक्याभावात् खण्डितमिदमित्यनुमीयते।)

विषयः। सावित्राग्निस्थापनादिकथनं।

No. 835. महाशान्तिपद्धतिः।

Substance, country paper, 10½ × 3¾ inches. Folia, 18. Lines 6 on a page. Extent, 260 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Mahás'ánti Paddhati. Rules for the performance of various Atharva Vedic rites for the pacification of adverse Rudras or fierce divinities. Anonymous.

Beginning. अथर्ववेदोक्त एकादशरुद्रो विशिष्टपरिशिष्टोक्तरुद्रविधानानुसारेण एकरुद्रविधिर्लिख्यते। आदौ यजमानः स्नानविधिना स्नानपूर्वकं सन्ध्यातर्पणादिकं देवतार्चनादिकं सर्वं कृत्वा आचमनप्राणायामपूर्वकं शरीरशुद्ध्यर्थं यथाशक्ति गायत्रीं जपेत्। पश्चान्मण्डपे रुद्रस्योपचारः।

End. अभयगणे अभयायां जुहुयात्। ततः पार्वण्यायुत्तरतन्त्रं। ततो दक्षिणा। ब्राह्मणे दश गा दद्यादनड्वाहं ततोऽधिकं।

भोराधिकं ततो वैश्यस्तथा प्रादेशिको द्वयम् ॥
राजा दद्याद्वरं ग्रामं समूहो राज्ञावत्तथा (?) ।
यथोक्तां दक्षिणां दद्यात्सकलं फलमश्नुते ॥

Colophon. इति श्रीमहाशान्तिपद्धतिः समाप्ता ।
चत्वरनाम्श्लोका (?) ।
बलिं रुद्रहुन्विमं देवा आदित्या वसवस्तथा ।
मरुतोऽथाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥
असुरा यातुधानाश्च पिशाचा मातरो नगाः ।
शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥
जम्भकाः सिद्धगन्धर्वा माला विद्या वराननाः ।
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥
जगतां शान्तिकर्त्तारो ब्रह्माद्याश्च महर्षयः ।
मा विघ्नो मा च मे पापं मा सन्तु परिपन्थिनः ॥
सौम्या भवन्तु तृप्ताश्च भूतप्रेतसुखावहाः ।
अस्य यागस्य निष्पत्ते (?) भवन्तोऽभ्यर्थिता मया ।
सप्रसादं प्रकर्त्तव्यं शान्तिकं विधिपूर्वकम् ॥ प्रार्थनामन्त्रः ।

विषयः । ग्रहमखरुद्रसूक्तादिभिः शान्तिकर्मानुष्ठानम् ।

No. 836. महाग्निप्रयोगः ।

Substance, country paper, 8 × 4 inches. Folia, 113. Lines 7—10 on a page. Extent, 2200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, somewhat old. Prose. Generally correct.

Mahágni-prayoga. Rules for the performance of the rite called Mahágni. By Vásudeva Dikshita, son of Mahádeva Vájapeyi, disciple of Vis'ves'vara Vájapeyi. The work was compiled under the patronage of the Chola king Sáhjí Sarabhaji Tukojí Bhoslá. The manuscript is incomplete, wanting ten leaves of the second chapter. The total number of chapters is 19.

Beginning. स्वादीं त्वा स्वादुना । तीव्रां तीव्रेण । अमृताममृतेन । मधुमतीं मधुमता । सृजामि सꣳसोमेन । सोमोऽस्यश्विभ्यां पच्यस्व । सरस्वत्यै पच्य-

स्व । इन्द्राय सुत्रामणे पच्यस्व । परीतोषिञ्चता सुतं । सोमो य उत्तमहं हविः ॥ १ ॥

End. अथ पूर्वाग्निमहं शकले समारोपयतीत्यादि अथोदवसानीयमायजत । अथ देविकाहविर्भिर्यजते । अथाग्निकानीमानि देविकाहवींषि कुर्यादिति बोधायना न कुर्यादिति शालीकिः । अथ त्रैधातवीयया यजते । अथ सौत्रामण्या यजते । चरक्या सौत्रामण्या कौकिल्या वा । संवत्सरं न कञ्चन प्रत्यवरोहति । न शीर्षमासं खादयति । न वयसां मांसं नाग्निं चित्यारामामुपेयान्नाग्निचिद्वर्षति धावेद्यदि धावेदुपावर्त्तेतान्नाद्यमेवाभ्युपावर्त्तत इति ब्राह्मणम् । विस्तारस्तु अस्मत्कृतमहाग्निसर्वस्वे सन्धेयः । एकोनविंशः ।

Colophon. इति श्रीमत्सन्ततसन्नम्यमानशेनकूर्मषोडशारस्थचक्राकाराद्यनेकगुणविराजमानमहाग्निविलसितप्रौढापरिमितमहाध्वरस्य श्रीशहजीशरभजित्तुकोजीभोसलचोलमहीपालवयामात्यधुरन्धरस्य श्रीमदानन्दरायविद्वत्सार्वभौमस्य पञ्चपुरुषीपोष्येण तदध्वर्युणा बाल्य एव तद्यानिर्वर्त्तितापरिमितमहाग्निविजृम्भितमहाध्वरेणाग्रजन्मविश्वेश्वरवाजपेययाजितो(?) लब्धविद्यावैशद्येन महादेववाजपेययाजिसुतेनान्नपूर्णागर्भजातवाराणसीवास्तव्येन वासुदेवदीक्षितविदुषा विरचितो महाग्निप्रयोगः ।

विषयः । १ प्रथमपत्रावधि १६ पत्रपर्यन्तं मन्त्रपाठः । (भिन्नमेतत्प्रकरणं ।) (द्वितीयप्रकरणस्य प्रथमावधि १० पत्राणि न सन्ति ।) २ अध्याये, वायव्यपशुयागविधिः । ४, तत इष्टकाचयनं, दीक्षाकथनं, भ्रातृव्यजननादिप्रकारः, पञ्चोदुम्बरसमिदाधानादि, यजमानार्थकृष्णाजिनास्तरणादि, उख्याग्निसमिन्धनादि च । ५, प्रयाणमीमांसादि, उख्याग्निजलनिक्षेपादि च । ६, वेदीमानसंस्कारकरणादि । ७, प्रायणेष्टिविधिकथनं । ८, महाग्निचयनविधिः । ९, १०, ११, १२, १३, १४, १५, १६, विविधदेवतोद्देशेन दिवसविशेषे वेद्यामिष्टकोपाधानं, तत्फलकथनञ्च । १७, प्रवर्ग्यहोमः । १८, अध्वरधिष्ण्यनिर्वापादि । १९, छागमेदवपावदनादिशेषकृत्यकथनं ।

No. 837. अग्निहोत्रहोमः ।

Substance, country paper, 9 × 4 inches. Folia, 66. Lines 8—9 on a page. Extent, 950 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, somewhat old. Prose. Generally correct.

Agnihotrahoma. Directions for offering oblations on the sacred perpetual household fire, the mode of establishing the fire, how to preserve it during mourning, and when away from home on business, the articles to be offered to it, &c. &c. By Rudra Deva, son of Tero-náráyana Deva.

Beginning. श्रीव्हिचं श्रिया युक्तं गणेशञ्च सरस्वतीं ।
आपस्तम्बमुखाम्नान्यान् प्रणम्य पितरं गुरुम् ॥
तारो नारायणसुतो रुद्रदेव इति श्रुतिः ।
तेनाग्निहोत्रहोमोऽयं तन्यते प्रीतये सताम् ॥

End. अथ दर्शपूर्णमासातिपत्तौ पथिकृते वैश्वानरौ च समानतन्त्रे पूर्वमेवोक्ता आग्रयणमकृत्वा नवान्नाशने वैश्वानरी । अथ यस्मै पत्न्यां गवां जायेतां तदा मारुतं त्रयोदशकपालं निर्वपेत् । ऐन्द्राग्नविकारः । आमावास्यातन्त्रं पूर्वाक्तयाज्यानुवाक्ये ।

Colophon. इत्यापस्तम्बोक्ता इष्टयः समाप्ताः ।

विषयः । अग्निहोत्रहोमप्रतिज्ञासङ्कल्पादि । अग्निहोत्रहोमकाले होमद्रव्यायुक्तिः । अग्निहोत्रद्रव्याधिश्रयणादिप्रकारः । हविःसंस्कारादि । हविर्होमः । समिद्धोमः । अग्निनमस्कारः । पर्वहोमद्रव्यकथनं । अशौचे ऋत्विजाभावे यजमानकर्त्तव्यं । पत्नहोमविधिः । सायम्प्रातर्होमादि । अग्निभिः सह प्रवासे कर्त्तव्याग्निहोत्रहवनप्रकारादि । प्रवासगमने विधिः । प्रवासादागतस्य विधिकथनादि । अग्निप्रणयनकालातिक्रमप्रायश्चित्तं । होमकालातिक्रमप्रायश्चित्तं । होमलोपप्रायश्चित्तादि । गार्हपत्यादौ हवनक्रमः । अग्निनाशप्रायश्चित्तं । केशकीटाद्युपहतहविःसंस्कारप्रकारः । हविःस्कन्नप्रायश्चित्तादि । अङ्गारस्य वह्निर्गमने प्रायश्चित्तादि । दर्शपौर्णमासेष्टितत्प्रायश्चित्तादिकथनञ्च ।

No. 838. लक्षहोमपद्धतिः ।

Substance, country paper, 8¼ × 5 inches. Folia, 16. Lines 10 on a page. Extent, 260 s'lokas. Character, Nágara. Date Sm. 1672. Place of deposit, Calcutta, Asiatic Society. Appearance, old, the writing faded. Prose. Generally correct.

Laksha-homa Paddhati. Directions for offering a hundred thousand oblations to the sacred fire. Anonymous.

Beginning. ॐ लचहोमपदार्थानुक्रमः । गणशान्तिः । यजमानाचार्य्यर्त्विजां प्राणाया-
मादिना देहशुद्धिः । मातृस्थापनम् । इत्यादि ।

End. अतिरिक्ते द्वे आहुती सूर्य्यमन्त्रेण अतिरिक्ते अन्ते निविशतीति न्यायात् ।

Colophon. इति लचहोमपद्धतिः समाप्ता ।

विषयः । लचहोमेऽनुष्ठेयप्रयोगकथनं ।

No. 839. आरण्यगानं ।

Substance, country paper, 7¾ × 8 inches. Folia, 110. Lines 6—7 on a page. Extent, 1000 s'lokas. Character, Nágara. Date Sm. 1974. Place of deposit, Calcutta, Asiatic Society. Appearance, old, some of the leaves are torn. Verse. Correct.

A'ranyagána. A collection of hymns appropriate for singing in forests, being a section of the Sáma Veda Sañhitá.

Beginning.
२। २ ३ ५
अथार्कपर्दो अङ्गो वै रूपं । यद्द्याव इ । ऊता२१ उवा२३ श्रा उताम् ।
२। ३
हा हा२१ उवा२२ । ई २३४ डा ।

End.
२ऽ ऽ ऽ १ ३ १ २ १ २ १ २ऽ
हाउ हाउ हाउ वा । सुवस्सूँ तर्पन्तः । नवे दिन्द्र वसं वसु । हाउ
ऽ ऽ १ ३ १ २ १ २
हाउ हाउ वा । सुवस्सूँ तर्पन्तः । त्वं पुष्यसि मध्य ।

Colophon. इति श्रीआरण्यगानसामसङ्ख्या २९१ ॥

विषयः । अरण्ये गीयमानानां २९१ साम्नां कीर्त्तनं ।

No. 840. तर्कपरिभाषा ।

Substance, country paper, 9¾ × 4¼ inches. Folia 32. Lines 9—10 on a page. Extent, 650 s'lokas. Character, Nágara. Date Sm. 1682. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Tarkaparibháshá. The categories of the Nyáyá Philosophy. By Kes'ava Mis'ra. Hall's *Contributions*, page 22. Aufrecht's Bodleyan Catalogue, p. 244.

Beginning. बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलमश्रुतेन ।
सङ्क्षिप्तयुक्त्यन्वितर्कभाषा प्रकाश्यते तस्य कृते मयैषा ॥
प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वा-
भासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्यादिमं
सूत्रम् । अस्यार्थः । प्रमाणादिषोडशपदार्थतत्त्वज्ञानान्मोक्षप्राप्तिर्भवतीति ।

End. इति ह्यत्यन्तमनुपयुक्तानां स्वरूपभेदप्रतिपादकानामनतिप्रयोजनानां लक्ष-
णाद्यभिमानदोषाय । एतावतैव बालव्युत्पत्तिसिद्धेः ।

Colophon. इति श्रीकेशवमिश्रविरचिता तर्कपरिभाषा समाप्ता ।

विषयः । प्रमाणप्रमेयादिषोडशपदार्थविवरणं ।

No. 841. ऋषितर्पणं, मैत्रायणीयशाखीयं ।

Substance, country paper, $8\frac{1}{4} \times 4\frac{1}{2}$ inches. Folia, 23. Lines, 7 on a page. Extent, 290 s'lokas. Character, Nágara. Date, Sm. 1827. Place of deposit, Calcutta, Government of India. Appearance, somewhat old. Prose. Generally correct.

Rishi Tarpana. Directions for worshipping the seven patriarchs identified with the seven stars of Ursa Major, according to the Maitráyani Sákhá of the Rig Veda. Anonymous.

Beginning. अथ मैत्रायणीयशाखायामृषितर्पणं लिख्यते । तत्र प्रथमं गृहात् सर्वां सामग्रीं
गृहीत्वा ऋषितर्पणार्थं गच्छेयुः । तत्र निकटवर्त्तिनि तीर्थे जाते सति उदेन
मुक्तोन्नैयेति शान्तिः पठनीया। तीर्थे गत्वा दर्भानानीय दर्भविष्टरं कृत्वा
सप्तर्षिपटबन्धनं । तत्र क्रमः ।

End. स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

Colophon. इति अन्तरकल्पं सम्पूर्णं ।

विषयः । सप्तर्षिपूजनतर्पणादिकथनं ।

---

2 K

No. 842. लघुशौनकी ।

Substance, country paper, 8 × 4 inches. Folia, 29. Lines, 7 on a page. Extent, 350 s'lokas. Character, Nágaɪa. Date, Sm. 1730. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Laghus'aunaki. An abridgement of S'aunaka's astrology. The subject of the work is the adoration of the planets when they affect injuriously the destiny of man. The rules for the adoration are given in detail, and the author gives the heads of his topics at the end. Anonymous.

Beginning. नत्वा शौनकमाचार्य्यं तदुक्तस्य यथाविधि ।
नवग्रहमखस्याहं प्रयोगं वच्मि दीपवत् ॥ १ ॥
ग्रहताराबलं लब्ध्वा शुभलग्नं विलोकयेत् ।
नापविघ्ना न च व्याधिर्नाधिपीडा दरिद्रता ॥ २ ॥
नारिभिर्जीयते नित्यं कल्मषं स्वर्गमोक्षदं ।
विवाहोत्सवमाङ्गल्यैः शुभैश्चान्यैः प्रयोजकैः ॥ ३ ॥
प्रथमं शान्तिकं कुर्यात् पश्चात कर्म समाचरेत् ।
ग्रहकर्म विना यज्ञं करोति भुवि मानवः ॥ ४ ॥
सत्सर्वं निष्फलं याति कृतघ्ने सुकृतं यथा ।
वर्षे वर्षे प्रकर्त्तव्यं श्रीमद्भिः शुभकाङ्क्षिभिः ॥ ५ ॥

End. नवग्रहमखे कार्ये मण्डपः कुण्डमेव च ।
स्थण्डिलं रुद्रकलशस्त्विजां वरणादिकं ॥ १ ॥
कुशण्डीभूमिसंस्कारपूर्वाधिश्रयणान्तिका ।
स्थापनं नवग्रहादीनां पूजा सङ्क्षेपतस्ततः ॥ २ ॥
घृताभिघारणाद्याज्यभागान्ता च कुशण्डिका ।
समिदाज्यचरूणाञ्च होमस्तिलयवैः क्रमात् ॥ ३ ॥
पश्चाञ्च रुद्रजपनं तद्धोमश्च दशांशकः ।
ग्रहपूजार्घ्यदानञ्च प्रार्थनार्चनकल्पनं ॥ ४ ॥
वह्निपूजा बलेर्दानं पूर्णाहुतिरतः परं ।
स्विष्टकृत्पूर्विकावर्हिर्होमान्ता च कुशण्डिका ॥ ५ ॥
होमश्च दक्षिणानाञ्च भूयस्यायेव कल्पनं ।

अभिषेकादिमाङ्गल्यं भार्यापुत्रान्वितस्य च ॥ ६ ॥
प्रणीतानां विमोकादि शान्त्यन्ता च कुशण्डिका ।
विसर्जनं ग्रहादीनां पदार्थानामयं क्रमः ॥ ७ ॥
वशिष्ठः सर्वकल्याणं नवग्रहमखं तथा ।
शान्तिदं राज्यदं श्रीदमायुरारोग्यवृद्धिदं ॥ ८ ॥
अभिषेकं वृद्धिहोमं माङ्गल्यं स्वस्तिवाचनं ।
आशीर्वादान् क्रतोः प्रैषान्नूर्द्ध्वस्यैव कारयेत् ॥ ९ ॥
व्रीहितण्डुलसम्पूर्णं दूर्वाङ्कुरशमीयुतं ।
कांस्यपात्रं सताम्बूलमाडम्बद्दपिनं बुधाः (?) ॥ १० ॥
समिदाधानमेतेषां ग्रहयज्ञे विधीयते ।
दक्षिणादानमेतेषां तेषां ब्राह्मणभोजनं ॥ ११ ॥
यज्ञे शान्तिककल्याणे मृगी हंसी च कीर्त्तिता ।
अभिचारे तथा प्रेते शूकरी कथ्यते बुधैः ॥ १२ ॥
मुष्ट्या कनिष्ठतर्जन्या हंसी मुक्तकनिष्ठिका ।
शूकरी करसङ्कोचो मुद्रात्रयमुदाहृतम् ॥ १३ ॥
आवाहनस्थापनसन्निधापनसन्निरोधनसम्मुखीकरणसकलीकरणावगुण्ठनकरणा-
मृतीकरणपरमीकरणप्रार्थनमुद्राः प्रदर्श्य ॥

Colophon. इति श्रीलघुशौनकी समाप्ता ।

विषयः । कुण्डमण्डपस्थण्डिलकरण—कलशस्थापन—ऋत्विग्वरण—कुशण्डिका—ग्रहस्थापन-पूजन—हविरभिघारण—समिदाज्यचरुतिलयवहोम—पञ्चाङ्गरुद्रजप—तद्-शांशहोम—ग्रहपूजार्घ्यदानप्रार्थना—वह्निपूजा—बलिदान—पूर्णाहुतिस्विष्टकृद्-वृद्धिहोमादिकर्मणामनुष्ठानप्रयोगः ।

No. 843. रुद्रजपः ।

Substance, country paper, 9¾ × 4½ inches. Folia, 19. Lines, 7 on a page. Extent, 259 s'lokas. Character, Nágara. Date, Sм. 1897. Place of deposit, Calcutta, Government of India. Appearance, old; some of the leaves are torn. Prose. Generally correct.

Rudrajapa. Certain verses from the Vedas in praise of Rudra, arranged in the order in which they should be repeated. Anonymous.

Beginning. ॐ भाजाः २ भाजा ३१ उधार अग्न आयूष्कृषि पवेस आसुवार्जमित्यचनः आरे बाधख दुघाटाम् भाजा २ भाजा ३१ उवा २ खभाज ३ आन्नाज ३। (इत्यादि)।

End. खस्ति न इन्द्रो वृद्धश्रवाः खस्ति नः पूषा विश्ववेदाः। खस्ति नस्तार्च्यो अरिष्टनेमिः खस्ति नो बृहस्पतिर्दधातु ॐ खस्ति नो बृहस्पतिर्दधातु।

Colophon. इति रुद्रजपः सम्पूर्णः।

विषयः। रुद्रादिमाहात्म्यद्योतककतिपयसाम्नां पाठक्रमः।

No. 844. हौत्रकल्पद्रुमः।

Substance, country paper, 11 × 4¾ inches. Folia, 149. Lines, 9—10 on a page. Extent, 4500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old; some of the leaves are torn. Prose. Correct.

Hautrakalpadruma. Directions for performing Homas. Compiled under orders of Bhávasiñha Deva of the Bághel clan, by Lakshmaṇa Bhaṭṭa, son of Náráyaṇa Bhaṭṭa. Contents; Dars'a and Paurṇamása homas, according to the rules of A's'valáyana. 2 A'dhána, A'grayana, Anvárambhaníya, Kámya, Cháturmásya, Varunapraghása, Sáyáhnagrahamedhíya, Kṛilaniya, and Máhendri Ishṭis. The concluding portion of the second chapter, and the whole of the 3rd and 4th chapters wanting in the MS. Then follow directions for performing the Pasubandha, Soma, Agnisomíya and other rites.

Beginning. नत्वा हेरम्बमीशं गिरिवरतनयां क्षेमहेतू गुरू तौ
लक्ष्मीनारायणाख्यावपि निजपितरौ लक्ष्मणः शस्तदर्शी।
प्रीत्यर्थं होत्रकल्पद्रुममिह विवुधस्वान्तवृत्तेर्विधत्ते
लब्धानुज्ञां वघेलान्वयजलधिविधोर्भावसिंहस्य राज्ञः॥
प्रणम्य शारदां देवीं पितृव्यचरणौ तथा।
विचार्य सूत्रवृत्त्यादि कुर्वे हौत्रस्य सङ्ग्रहम्॥

End. यत्र मन्थनस्यार्थसिद्धस्य पुनर्वचनात् स एवोदवसानीयया यष्टव्ये प्राप्तेऽग्निहोत्रकाले तेनोदवसानीयायाः सोमाङ्गत्वादिष्टिं समाप्यैव सायमग्निहोत्रं होतव्यमिति सिद्धं॥

Colophon. इति श्रीमद्बघेलवंशावतंससिद्धिश्रीभावसिंहदेवकारिते षड्दर्शनिनारायणभट्टात्मजलक्ष्मणभट्टकृते हौत्रकल्पद्रुमे अग्निष्टोमे सुत्याकाण्डं नाम पञ्चमं कुसुमम्।

विषयः। १ प्रथमकुसुमे, आश्वलायनसूत्रानुसारिदर्शपौर्णमासहौत्रप्रयोगकथनं। २, आधानेष्टिः, आग्रयणेष्टिः, अन्वारम्भणीयेष्टिः, कतिपयकाम्येष्टिः, चातुर्मास्येष्टिः, वरुणप्रघासेष्टिः, सायाह्ने गृहमेधीयेष्टिः, क्रीलनीयेष्टिः, माहेन्द्रीष्टिः, पित्र्येष्टिः। (४४ पत्रे पित्र्येष्ट्यारम्भः। ततः पत्राणि न सन्ति।) पुनरपरखण्डस्यैकादशपत्राणि न सन्ति। (द्वादशपत्रावधि विषयः। द्वितीयकुसुमस्य शेषस्तृतीयचतुर्थौ पञ्चमारम्भश्च नास्ति।) आश्वलायनसूत्रानुसारिपशुबन्धप्रयोगकथनं, सोमप्रयोगकथनं, दीक्षिणीयेष्ट्यादि। अग्नीषोमीयपशुप्रयोगस्य कथनं, सौत्याहप्रयोगस्य तदन्तर्गतानां प्रातःसवनमाध्यन्दिनसवनादीनाञ्च कथनं।

No. 845. आख्यातवादटीका।

Substance, country paper, 12 × 5¼ inches. Folia, 38. Lines, 9—10 on a page. Extent, 1180 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

A'khyátaváda Ṭíká. A commentary on the *A'khyátaváda* or *A'khyátaviveka* of Raghunátha S'iromaṇi, a work on the logical powers of the Sanskrit affixes. By Jayaráma Nyáyapañchánana. Dr. Hall gives two aliases for the name of the work, *A'khyátaváda ṭippaní* and *A'khyátaváda-vyákhyá-sudhá*, noticed in MSS. examined by him. Contributions, 59.

Beginning. न्यायपञ्चाननः श्रीमान् जयरामः समासतः।
आख्यातवादव्याख्यानमातनोति मनोरमं॥ ०॥
अनुकूलव्यापारत्वमाख्यातशक्यतावच्छेदकमिति केचित्। अनुकूलत्वस्य संसर्गत्वात् व्यापारत्वमात्रं तथेत्येके।

End. तत्र चैत्रः पचति सुन्दरः पचतीत्यादौ मण्डनमतदूषणेनैवैतन्मतं दूषितप्रायमित्यस्मत्कृतशब्दालोकरहस्ये विस्तरः।
अपूरि जयरामेण विबुधानन्ददायिनी।
आख्यातवादव्याख्यानसुधा कण्ठे निधीयताम्॥

Colophon. इति श्रीजयरामन्यायपञ्चाननकृत आख्यातवादटीका समाप्ता।

विषयः। धातुतिबादीनां शक्यार्थनिष्पत्तिविचारः।

No. 846. बुधमनोहरा, अमरकोषटीका ।

Substance, country paper, 10 × 4¾ inches. Folia 97. Lines, 10—12 on a page. Extent, 2800 s'lokas. Character, Nágara. Date, Sm. 1802. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct.

Budhamanohará Ṭíká. A commentary on the Amarakosha. By Mahádeva, a disciple of Svayamprakás'a Tírtha. The MS. is incomplete, and contains only the 3rd Book.

Beginning. टीकाप्रा० । सामान्ये काण्डद्वयोक्तसाधारणात्सामान्यकाण्डेऽस्मिन् विशेष्यनिघ्नादिभिः पञ्चभिरुपलक्षिता वर्गा उच्यन्त इति शेषः । विशेष्यनिघ्नैर्विशेषणैः । लिङ्गादीत्यत्र आदिशब्दः प्रकार इति स्वामी । कीदृशा वर्गाः । वर्गान् अवान्तरवर्गान् संश्रयन्ति तथा । यथा, विशेष्यनिघ्नवर्गे प्राणिवर्गः । नानार्थवर्गे कान्तादिवर्गाः । अव्ययवर्गे अनेकार्थैकार्थवर्गौ । लिङ्गसङ्ग्रहवर्गे स्त्रीलिङ्गादिवर्गाः । वर्गसङ्ग्रह इति केचित् पठन्ति । सामान्यकाण्डे ये पञ्च वर्गाः स वर्गसङ्ग्रह इति योजयन्ति ।

मूलप्रा० विशेष्यनिघ्नैः सङ्कीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसङ्ग्रहे वर्गाः सामान्ये वर्गसंश्रयाः ॥ १ ॥

End. टीकास० । अपां द्वादशगण्डूषैरित्यादिस्मृतेर्गण्डूषशब्दस्य पुंस्त्वमपि कलिकाकोरकः पुमानित्युक्तेऽपि कोरकानीति माघप्रयोगान्नपुंसकत्वमपि ॥ ४६ ॥ इतीति स्पष्ट ।

Colophon. इति श्रीमत्स्वयम्प्रकाशतीर्थश्रीचरणसेवासमासादितवेदान्तिमत्पदेन महादेवेन विरचितायां बुधमनोहरायाममरसिंहकृतनामलिङ्गानुशासनव्याख्यायां तृतीयकाण्डः सम्पूर्णः ।

मूलस० षट्सञ्ज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययं ।
परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥ ४६ ॥
इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
सामान्यकाण्डस्तृतीयः साङ्ग एव समर्थितः ॥ ४७ ॥

विषयः । १ प्राणिवर्गे, सुकृतादिगुणविशिष्टप्राणिनामानि । २, विशेष्यनिघ्नवर्गे विभिन्नार्थक-विशेषणशब्दादिकथनं । ३, सङ्कीर्णवर्गे सङ्कीर्णधर्मिकशब्दकथनं । ४, नानार्थवर्गे नानार्थकशब्दकथनं । ५, अव्ययवर्गे अव्ययशब्दकथनं । ६, लिङ्गादिसङ्ग्रहेऽनुक्तलिङ्गसङ्ग्रहः । (मध्ये खण्डितमिदं पुस्तकम्)

No. 847. चातुर्मास्यहौत्रं ।

Substance, country paper, 9 × 4 inches. Folia, 22. Lines, 7 on a page. Extent, 300 s'lokas. Character, Nágara. Date, Sm. 1707. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Cháturmásya-hotra. Directions for performing the quadrimensal rites which include Párjanya, Varuṇa-praghása, Sákamedha and Suná-síra ceremonies. Anonymous.

Beginning. अथ चातुर्मास्यानां हौत्रम्। अन्वारम्भणीया वैश्वानरपार्जन्येष्टिर्वा । नमः प्रवक्त्र इत्यादि। पञ्चदश सामिधेन्यः। आवाहने प्रकृतं सर्वं ।

End. आहवनीये समिदाधानान्तं। इष्टिः सन्तिष्ठते सन्तिष्ठते। सन्तिष्ठन्ते चातुर्मास्यानि।

Colophon. इति चातुर्मास्यानां हौत्रं समाप्तम्। यजुर्वेदीनां हौत्रिकं समाप्तम्।

विषयः। पार्जन्य—वरुणप्रघास—साकमेध—शुनासीरीयादीष्ट्यनुष्ठानकथनं।

No. 848. कैवल्योपनिषद्दीपिका ।

Substance, country paper, 11 × 5½ inches. Folia, 8. Lines, 11—14 on a page. Extent, 195 s'lokas. Character, Nágara. Date, Sm. 1892. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Correct.

Kaivalyopanishad Dipiká. A commentary on the Kaivalya Upanishad of the Atharva Veda. By Vidyáraṇya. This is different from the work of this name noticed under No. 54, Ante I, p. 32.

Beginning. टीकाप्रा०। कैवल्याख्योपनिषदं कैवल्यार्थावबोधिनीं।
व्याख्यास्ये केवलत्वेन कैवल्यात्मा प्रसीदतु ॥
भगवती श्रुतिर्मातेव सुखप्रतिपत्त्यर्थं कञ्चनाश्वलायनमुररीकृत्य निमित्तीकृत्य आख्यायिकामवतारयति ब्रह्मविद्यायामास्तिक्यं जनयितुं, अथ साधनचतुष्टय-सम्पत्त्यनन्तरम् आश्वालायन ऋग्वेदाचार्यो भवन्तं पूजावन्तं परमेष्ठिनं सर्वोत्कृष्टस्थाननिवासिनं परिसमेत्य शास्त्रीयेण विधिना समीपमागत्य उवाच उक्तवान्। इत्यादि।

मूलप्रा० अथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच। इत्यादि।

End. केवल्यं तत्फलं पुरुषाभिलाषविषयं सर्वपुरुषार्थसमाप्तभूतम् अश्नुते प्राप्नोति कवल्यफलं कैवल्यफलमश्नुते व्याख्यातं, पदाभ्यास उपनिषत्परिसमाप्त्यर्थः ।

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्विद्यारण्यविरचिता कैवल्योपनिषद्दीपिका समाप्ता ।

मूलम॰ तस्मादेवं विदित्वैनं कैवल्यं पदमश्नुते कैवल्यं पदमश्नुते ॥

इति कैवल्योपनिषत् समाप्ता ।

विषयः । ऋग्वेदाचार्यायाश्वलायनाय परमेष्ठी अष्टाविंशत्युपनिषद्भिर्मोक्षप्रदां ब्रह्मविद्यामुपदिशति ।

No. 849. शिरोमणिपूर्वार्द्धव्याख्या ।

Substance, country paper, 13¾ × 5½ inches. Folia, 149. Lines, 13 on a page. Extent, 8500 s'lokas. Character, Nágara. Date, Sk. 1827. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'iromani-púrvárdha-vyákhyá alias *Bhavánandi.* A commentary on Raghunátha S'iromaṇi's commentary on the Chintámaṇi of Gaṅges'a Upádhyáya. By Bhavánanda Siddhántavágís'a. Hall's Contributions, &c., p. 33.

Beginning. नमस्कृत्य गुरून् सर्वान् निगूढं मणिदीधिता ।

श्रीभवानन्दसिद्धान्तवागीशेन प्रकाश्यते ॥ १ ॥

ॐ नम इति परमात्मने नमः सर्वोत्कृष्टात्मने नमः । उत्कर्षश्च जगतः सृष्टिस्थितिप्रलयकर्तृत्वम् । एकस्य तस्य कथं सृष्ट्यादिविचित्रकार्यकारित्वं तत्र हेतुमाह । ओमिति । ब्रह्माविष्णुशिवात्मकार्थत्यर्थः । ओङ्कारघटकेकारोकारमकारैर्ब्रह्मादीनां प्रतिपादनात् । इत्यादि ।

End. सर्वस्य सामान्यलक्षणया घटत्वप्रकारकज्ञानसम्भवेऽपि घटत्वांशेऽन्याप्रकारकतादृशज्ञानासम्भवेनान्यत्वं तादृशघटत्वप्रकारकज्ञानवत्त्वव्याप्यमिति विशेषदर्शनाभावात्तादृशज्ञानस्य संशयो नानुपपन्न इति सिद्धान्ततात्पर्यमिति वयं ब्रूमः ।

Colophon. इति श्रीभवानन्दभट्टाचार्यतर्कवागीशविरचिता शिरोमणिपूर्वार्द्धव्याख्या समाप्ता ।

विषयः । शिरोमणिपूर्वव्याख्यानं ।

No. 850. भुवनदीपिका, भावबोधिका टीकासहिता।

Substance, country paper, 11 × 5¾ inches. Folia, 46. Lines, 9—10 on a page. Extent, 820 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Bhuvanadípiká. A treatise on astronomy. By Brahmaprabhu Súri. The work is written in the trivalli form, and the longer lines comprise a commentary, by Daivajña S'iromaṇi, entitled *Bhávabodhiká.* The commentary is the same which has been noticed under the name of *Bhuvanadípa-ṭíká.* No. 762, p. 169.

Beginning. अर्हदादीन् प्रणम्याथ गुरूनथास्य ते कृते (?)।
श्रीमद्भुवनदीपस्य क्रियते विवृतिर्मया ॥ १ ॥
शास्त्रकारः सम्बन्धाभिधेयपूर्वकं सर्वदर्शनसाधारणसरस्वतीदेवतास्तववाचकं प्रथमश्लोकमाह। व्याख्या (?)। सारस्वतमिति सरस्वत्याः सम्बन्धि सारस्वतं, तच्च तन्महश्च तन्नमस्कृत्य मया ज्ञानम् उन्मील्यते प्रकटीक्रियते। इत्यादि।

मूलग्रा०। सारस्वतं नमस्कृत्य महः सर्वतमोपहम्।
ग्रहभावप्रकाशेन ज्ञानमुन्मील्यते मया ॥ १ ॥

End. टीकास०। तेषां प्रकाशाय हेत्वर्थे चतुर्थी, प्रकाशनिमित्तायेत्यर्थः। अत इति जगति भुवनदीपवत् प्रकाशकत्वाद् भुवनदीपकं शास्त्रमिति लोके प्रसिद्धं भविष्यतीति सूचितम् ॥ ६२ ॥
टीका भुवनदीपस्य प्रश्नशास्त्रस्य निर्मिता।
केनापि कृतिना भावबोधिका बालबुद्धये ॥

Colophon. इत्यनेकज्योतिर्ग्रन्थतत्त्वविचारसारनिष्णातान्तःकरणदैवज्ञशिरोमणिनिर्मिता भुवनदीपिकाख्यप्रश्नग्रन्थार्थभावप्रकाशिका टीका समाप्ता।

विषयः। सूर्यादिग्रहाणामुच्चनीचस्वक्षेत्रादिभावकथनं। ग्रहाणां परस्परं मित्रामित्रभावकथनं। जलस्थलचारिग्रहनिरूपणं। ग्रहस्वरूपविशेषकथनादि। ग्रहविशेषस्य कटुतिक्तादिरसविशेषप्रियतादिकथनं। इच्छक-धातुमूलजीवचिन्ताविशेषपरिज्ञानोपायकथनं। ग्रहाणां जातिनिरूपणं। तेषां रक्तपीतादिवर्णादिकथनं। प्रश्नलग्नगतसूर्यादिग्रहफलं। चौरज्ञानप्रकारादि। धातुमूलादिचिन्तापरिज्ञानकथनं। तनुधनादिद्वादशभावस्थग्रहानुरूपशुभाशुभफलकथनादि।

ग्रहदृष्टिविचारकथनादि । कार्यसिद्धिज्ञानोपयोगिराजयोगकथनादि । गर्भादिप्रश्नविचारः । विवाहादिपृच्छाफलकथनं । देशान्तरगतादिपृच्छाफलकथनं । रोगिपृच्छाफलकथनं । दुर्गादिभङ्गपृच्छाफलकथनं । क्रयविक्रयलाभालाभपृच्छ फलकथनादि । चैरपालादिकृतपीडापरिज्ञानकथनादि । अस्मिन् गर्भे किं भविष्यतीत्यस्य विचारः । निधिप्रश्नविचारः । एककालीनकृतानेकप्रश्नविचारश्च ।

No. 851. सिद्धान्तचन्द्रोदयः ।

Substance, country paper, 10 × 4¼ inches. Folia, 45. Lines, 13—15 on a page. Extent, 1500 s'lokas. Character, Nágara. Date, ? Appearance, somewhat old. Prose. Generally correct.

Siddhánta-chandrodaya. A commentary on the Tarka-sañgraha of Annam Bhaṭṭa. By Kṛishṇadhúrjaṭi Díkshita, son of Kekaṇtes'a and S'eshí. The work was compiled in the Kali era 4875 = S'aka 1696, for the use of Mahárája Rájasiñha, son of Gajasiñha of Vikramapaṭṭana or Oujain. Hall's *Contributions*, p. 70.

Beginning. यं वेदाः सततं स्तुवन्ति नितरां ध्यायन्ति यं योगिनो
यः सृष्ट्यादिनिदानमुख्यकिरणेन्द्वग्नीक्षणो यः पुमान् ।
तस्मिन्स्वेलसुताकृतार्द्धवपुषि प्रज्ञात्मके शाश्वते
मच्चित्तं रमतां सदा भयहरे श्रीमत्परब्रह्मणि ॥ १ ॥
चित्रामान्वयसागरे हिमरुचेर्विद्वन्मणेः श्रीगुरोः
काशीनाथशुभाभिधानलसतः कारुण्यबोधाम्बुधेः ।
स्वान्तः स्वान्तगतान्धकारतरणिं श्रीपादपङ्केरुह-
द्वन्द्वं सङ्कलयामि हृद्यममलं प्रत्यक्षदेवं शुभम् ॥ २ ॥
ज्ञात्वा तन्त्रमनेकं श्रीकृष्णधूर्जटिदीक्षितः ।
तर्कसङ्ग्रहगूढार्थान् विवृणोमि यथामति ॥ ३ ॥
श्रीमद्विक्रमपट्टणाधिपमहाराजाधिराजासित-
प्रज्ञश्रीगजसिंहभूपतनयश्रीराजसिंहप्रभोः ।
सुज्ञानाय विनिर्मितोऽतिसुगमः सिद्धान्तचन्द्रोदयो
रम्यः साधु तनोतु पण्डितमनोहर्षं तरङ्गायितम् ॥

ग्रन्थादौ निर्विघ्नपरिसमाप्त्यर्थमन्नम्भट्टोपाध्यायः शिष्टाचारानुमितश्रुतिबोधित-कर्त्तव्यताकं नमस्कारात्मकं मङ्गलमाचरन् श्रोतृप्रवृत्तयेऽनुबन्धचतुष्टयं दर्शयन् शिष्याणामवधानाय चिकीर्षितग्रन्थप्रतिज्ञां कुर्वन् शिष्याणां मङ्गलप्रवृत्तये आस्तिकमार्गप्रवृत्तये वा तन्निबध्नाति । निधायेत्यादिना ।

End. एवं सति तत्त्वज्ञाने जाते शरीरपुत्रादावात्मत्वज्ञीयत्वाभिमानरूपमिथ्याज्ञानस्य नाशः। तेन दोषाभावः। तेन प्रवृत्त्यनुत्पत्तिः। तत्कालीनशरीरेण कायव्यूहेन वा भोगतत्त्वज्ञानाभ्यां सञ्चितप्रारब्धकर्मणां नाशः। ततो जन्माभावः। ततो मोक्ष इति क्रमः।

नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्।

ज्ञानी च विमलीकुर्वन्नभ्यासेन च पाचयेत्॥

अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नरः।

इत्यादिवचनात्। तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते अयनायेति श्रुतेश्च सगुणोपासना काशीमरणादेरपि तत्त्वज्ञानद्वारा मुक्तिहेतुत्वं। अतएव परमेश्वरः काश्यां तारकमुपदिशतीति सारम्।

Colophon. इति श्री० मोक्षनिरूपणं नाम दशमः परिच्छेदः॥ १०॥

सामाम्नायगकौशिकान्वयभवश्रीवेङ्कटेशात्मजः

शेषीनामसतीजनिर्द्दविड़भूः कोथंपुरीसंस्थितिः।

छलान्याचरमाद्यभावममलं सिद्धान्तचन्द्रोदयं

+ + सार्द्धसहस्रगद्यकिरणं श्रीचन्द्रचूड़ार्पणं॥

सपादशतकन्यूनशरत्पञ्चसहस्रके।

भूते कलौ च सिद्धान्तचन्द्रोदय इहोद्गतः।

इति श्रीसिद्धान्तचन्द्रोदये समाप्तिर्विलसति॥

विषयः। तर्कसङ्ग्रहव्याख्यानं।

No. 852. सुधाख्या, अमरकोषटीका।

Substance, country paper, 11½ × 5 inches. Folia, 154. Lines, 6—10 on a page. Extent, 3600 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct.

Vyákyá-sudhá alias *Amarakoshaṭíká*. A commentary on the Amarakosha. By Bhánují Díkshita, son of Bhaṭṭoji Díkshita. The work was compiled by order of Rájá Kírti Siñha Deva of the Baghelá clan, The MS. is incomplete, and comprises only one-third of the work. Dr. Wilson is of opinion that "it is the ablest commentary on the Amarakosha that has yet appeared; the interpretations are full and distinct, and the etymological analyses are founded on the most thorough acquaintance with the system of Páṇini; the commentator is also a very laborious corrector of the mistakes of his brethren, and rectifies especially the grammatical errors of his predecessor Mukuṭa." Essays III, p. 204. According to some, the commentator's title was Rámás'rama or Bhadrarámás'arma, but others take that to be the name of his tutor. In Wilson's MS. the clan of the patron is Bundellá. Dow (III, 126) calls him "Hidgar Singh, Rájá of Bundelkhand, and his father Judger Singh."

Beginning. टीकाप्रा० । बल्लवीवल्लभं नत्वा गिरं भट्टोजिदीक्षितं ।
अमरे विद्+व्याख्यां मुनित्रयमतानुगाम् ॥
प्रारीप्सितप्रत्यूहापनुत्तये कृतं मङ्गलं शिष्यशिक्षा थैमादौ निबध्नाति । यस्येति ।

मूलप्रार० । यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥

End. टीकाश० । उक्तायुगान् सङ्कलाति । उक्तामिति । क्वचिकाद्ग्वर्गाः ।

Colophon. इति श्रीवघेलवंशोद्भवश्रीमच्छ्रीपरविषयाधिपश्रीकीर्त्तिसिंहदेवाज्ञया श्रीभट्टोजिदीक्षितात्मजश्रीभानुजीदीक्षितविरचितायाममरटीकायां सुधाख्यायां प्रथमकाण्डः सम्पूर्णतामगात् ॥

विषयः । अमरकोषव्याख्यानं ।

No. 853. हरितत्त्वमुक्तावलिः ।

Substance, country paper, 8 × 4 inches. Folia, 78. Lines, 10 on a page. Extent, 1200 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old, some of the leaves are destroyed by worms. Prose and verse. Generally correct.

Haritattva-muktávalí. A commentary on a hymn, by S'añkara Acháraya, in praise of Hari. By Svayamprakás'a Yati, disciple of Brahmánanda Yogíndra.

Beginning. (प्रथमपत्रस्याभावात् प्रारम्भवाक्यं न प्राप्तम्) ।

End. इन्दूपलेन्द्रमणिसुन्दरमिन्दुचूडं वन्दारुवृन्दपरिवन्दितपादपद्मं ।
आनन्दमन्दहसितोल्लसदाननेन्दुं वन्दामहे वयममन्दमुदां विशेषं ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दयोगीन्द्रपादकमलभृङ्गायमानस्वयंप्रकाशाख्ययतिविरचिता शङ्करभगवत्पादकृतहरिस्तुतिव्याख्या हरितत्त्वमुक्तावलिसमाख्या समाप्ता ।

विषयः । हरिगुणमहिमस्वरूपादिवर्णनपराणां शङ्कराचार्यविरचितानां द्विचत्वारिंशच्छ्लोकानां व्याख्यानं ।

No. 854. ब्रह्माण्डपुराणीयोत्तरखण्डः ।

Substance, country paper, 12 × 5¾ inches. Folia, 92. Lines, 14 on a page. Extent, 3438 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, 62 pages, old, the remainder new. Verse. The first 62 pages are generally correct, the remainder incorrect.

Brahmáṇḍa Puráṇa, Uttara khaṇḍa. The last part of the Brahmánda Puráṇa. The following is Dr. Wilson's account of this work. "Copies of what profess to be the entire Brahmánda Purána are sometimes, though rarely, procurable. I met with one in two portions, the former containing one hundred and twenty-four chapters, the latter, seventy-eight; and the whole containing about the number of stanzas assigned to the Puráṇa. The first and largest portion, however, proved to be the same as the Váyu Puráṇa, with a passage occasionally slightly varied, and at the end of each chapter the common phrase 'Iti Brahmáṇḍa Puráṇe' substituted for 'Iti Váyu Puráṇe.' I do not think there was any intended fraud in the substitution. The last section of the first part of the Váyu Puráṇa is termed the Brahmáṇḍa section, giving an account of the dissolution of the universe: and a careless or ignorant transcriber might have taken this for the title of the whole. The checks to the identity of the work have been honestly preserved, both in the index, and in the frequent specification of Váyu as the teacher or narrator of it.

"The second portion of this Brahmáṇḍa is not any part of the Váyu: it is, probably, current in the Dakhin as a Sanhitá or Khaṇḍa. Agastya is represented as going to the city Khánchí (Conjeveram), where Vishṇu, as Hayagríva, appears to him, and, in answer to his inquiries, imparts to him the means of salvation, the worship of Paras'akti. In illustration of the efficacy of this form of adoration, the main subject of the work is an account of the exploits of Lalitá Deví, a form of Durgá, and her destruction of the demon Bháṇḍásura. Rules for her worship are also given, which are decidedly of a S ákta or Tántrika description; and this work cannot be admitted, therefore, to be part of a genuine Puráṇa." Works VI. p. LXXXV. The contents of the MS. under notice corresponds with the above.

Beginning. ॐ चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुङ्कुमरागशोणे ।
पुण्ड्रेक्षुपाशाङ्कुशपुष्पबाणहस्ते नमस्ते जगदेकमातः ॥ १ ॥
अस्तु नः श्रेयसे नित्यं वस्तु वामाङ्गसुन्दरं ।
यतृतीयो विदुषां तुरीयस्तु परं महः ॥
सूत उवाच । अगस्त्यो नाम देवर्षिर्वेदवेदाङ्गपारगः ।
सर्वसिद्धान्तसारज्ञो ब्रह्मानन्दरसात्मकः ॥ २ ॥
चचाराद्भुतहेतूनि तीर्थान्यायतनानि च ।
शैलारण्यापगा मुख्याः सर्वान् जनपदानपि ॥ ३ ॥
तेषु तेष्वखिलाञ्जन्तूनज्ञानतिमिरावृतान् ।
शिश्नोदरपरान्दृष्ट्वा चिन्तयामास तान् प्रति ॥ ४ ॥
तस्य चिन्तयमानस्य चरतो वसुधामिमाम् ।
प्राप्तमासीन्महापुण्यं काञ्चीनगरमुत्तमम् ॥ ५ ॥
तत्र वारणशैलेन्द्रमेकाम्रनिलयं शिवम् ।
कामाक्षीं कलिदोषघ्नामपूजयद्यथाविधि ॥ ६ ॥
तत्र कृतेऽथ तस्य चिन्तमानस्य धीमतः ।
चिरकालेन तपसा तोषितोऽभूज्जनार्दनः ॥ ७ ॥
हयग्रीवां तनुं कृत्वा साक्षाच्चिन्मात्रविग्रहाम् ।
शङ्खचक्राक्षवलयपुस्तकोज्ज्वलबाहुकाम् ॥ ८ ॥
पूरयित्री जगत् कृत्स्नं प्रभया देहजातया ।
प्रादुर्बभूव पुरतो मुनेरमिततेजसः ॥ ९ ॥
तं दृष्ट्वानन्दभरितः प्रणम्य च मुहुर्मुहुः ।

विनयावनतो भूत्वा सन्तुष्टाव जगत्पतिम् ॥ १० ॥
अथोवाच जगन्नाथ तुष्टोऽस्मि तपसा तव ।
वरं वरय भद्रं ते भविता भूसुरोत्तम ।
इति दृष्टो भगवता प्रोवाच मुनिसत्तमः ।
अगस्त्य उवाच । यदि तुष्टोऽसि भगवन्निमे पामरजन्तवः ॥ १२ ॥
केनोपायेन मुक्ताः स्युरेतन्मे वक्तुमर्हसि ।
इति दृष्टो द्विजेनाह देवदेवो जनार्दनः ॥

End. चक्रेश्वरीं हृदि न्यस्य कृत्वा चक्रसमर्पणं ।
मुद्रां प्रदर्श्य योन्याख्यां सर्वानन्दमयं न्यसेत् ।
इत्यात्मन्यस्तचक्रस्तु साक्षाद्देवी भविष्यति ॥ ११२ ॥

Colophon. इति ब्रह्माण्डपुराणे हयग्रीवागस्त्यसंवादे ललितोपाख्याने न्यासविधिर्नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

विषयः । १ अध्याये, हयग्रीवकर्तृकागस्त्यप्रश्नोत्तरदानं । २. महादेव्या आविर्भावः, देवीविविधरूपान्तरादि च । ३, हिंसकादपि विश्वासघातकादेः पापाधिक्यं, वज्राख्यचोरोपाख्यानञ्च । ४, अगम्यागमनादिदोषनिष्कृतिकथनं, लशुनादिभक्षणजन्यपापक्षालनविधिश्च । ५, केन पापेनाहं निश्रीको जात इति इन्द्रप्रश्नस्य बृहस्पतिरुत्तरं ददाति, समुद्रमन्थनविवरणादि च । ६, देवेभ्योऽमृतदानार्थं भगवतो मोहिनीरूपधारणादि । महादेवस्य मोहिनीरूपदर्शनवृत्तान्तकथनादि च । ७, कन्दर्पोत्पत्तिध्वंसवृत्तान्तं, भण्डादिदैत्योत्पत्तिकथनादि च । ८, भण्डदैत्यश्रीवृद्धिसमयकथनं, भण्डदैत्यमोहनार्थं विष्णुकर्तृकमायाप्रेषणादि, इन्द्रं प्रति नारदकर्तृकभण्डदैत्यहननोपायकथनादि च । ९, देवताकृतदेवीस्तुतिः । देवीसकाशाद्देवतानां वरप्राप्तिश्च । १०, देवीदर्शनार्थं ब्रह्मविष्णुशिवादीनामागमनञ्च । ११, शिवदेवीविवाहोत्सववर्णनं १२, भण्डदैत्यबधार्थं ललितादेव्या युद्धसज्जादि । १३, देवीसैन्यवर्णनादि । १४, १५, देव्या युद्धयात्रादि । १६, जम्भिनीमोहिन्यादिदेवीप्रकाशकथनादि १७, महेन्द्रपर्वतोपान्तस्थमहार्णवतटविराजमानभण्डपुरीवर्णनादि, भण्डासुराहङ्कारप्रकाशादि च । १८, देवीकर्तृकदुर्मदसैन्यबधः । १९, देवीकर्तृककरङ्कादिपञ्चसेनापतिबधः । २०, भण्डसप्तसेनापतिबधः । २१, विषङ्गदैत्यस्य युद्धक्षेत्रात् पलायनं । २२, भण्डदैत्यपुत्रबधादि । २३, दैत्यसैन्ये गणेशवीर्यप्रदर्शनादि । २४, विषङ्गदैत्यबधादि । २५, भण्डासुरबधः । २६, भण्डासुरसैन्यबधादि । २७, २८, ललितानिवासार्थं ललिताक्षेत्रनिर्माणकथनादि । २९, ३०, ३१, ३२,

उक्तचेतस्य स्थाने स्थाने देवताविशेषस्थापनादि। २१, मन्त्रसाधनप्रकारादि। २४, मन्त्रन्यासप्रकारादि।
(पुराणानुसारिमङ्गलाचरणं नास्त्यत्रातः किमिदं पुराणं वा न वेति सन्दिह्यते)।

No. 855. अष्टाध्यायीकाण्डं।

Substance, country paper, 11 × 5 inches. Folia, 56. Lines, 9—10 on a page. Extent, 1219 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

Ashṭádhyáyíkáṇḍa. The eleventh Book of the S'atapatha Bráhmana. It contains descriptions and legends regarding various Vedic rites. Max Müller's Ancient Sanskrit Literature, p. 354. Weber's Catalogue, p. 44.

Beginning. संवत्सरो वै यज्ञः प्रजापतिः। तस्यैतद् द्वारं यदमावास्या चन्द्रमा एव द्वारपिधानः ॥ १ ॥

End. ततो हैव स उत्समाद् कैश्निनी त्वेमा अप्येतर्हि प्रजा जायते। अयं वै यज्ञो योऽयं पवते ब्राह्मणं ॥ १५ ॥

Colophon. इति चतुर्थः प्रपाठकः समाप्तः। अष्टाध्यायीसञ्ज्ञं काण्डं समाप्तम्।

विषयः। १ प्रपाठके, अमावास्याग्न्याधानादि। पौर्णमास्येष्टिकथनादि। अग्निनिमित्तकद्वादशकपालपुरोडाशनिर्वपनादि। हिरण्यगर्भोत्पत्तिः। होमविषये देवासुरविवादकथनादि। देवाग्निवाय्वादिसृष्टिः। प्राणापानादिवायुविवरणञ्च। २, अश्वमेधकथनादि। प्रणीताप्रणयनादि। अनुयाजादिकथनं। अर्द्धमासेष्ट्यादि, अग्निहोत्रविचारादि, ब्रह्मचरिकर्त्तव्यकथनादि, इड़ाप्राशनवर्हिस्तरणादिफलकथनादि च। ३, दशहविरिष्टिकथनादि। हविर्दोषगुणकथनादि। उर्वशीपुरूरवोवृत्तान्तकथनादि। अनीकवत्यादीष्टीनां मुखादितुलनादि, त्र्यहेष्टिकथनादि, अग्निष्टोमकथनादि, पितृयज्ञादिकथनञ्च। ४, स्वाध्यायप्रशंसादि, त्रिलोकसृष्टिकथनादि, भृगुवरुणसंवादादि, अग्निहोत्रविषये पुनर्वदेहजनकयाज्ञवल्क्यप्रश्नोत्तरकथनादि, जनककृतयज्ञविवरणादि। पशुबन्धकथनादि, लोकधारणोपायकथनादि च।

No. 856. लग्नचन्द्रिका ।

Substance, country paper, 11 × 4¾ inches. Folia, 61. Lines, 9 on a page. Extent, 1000 s'lokas. Character, Nágara. Date, Sᴍ. 1918. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Generally correct.

Lagna-chandriká. An astrological treatise, describing the influence of planetary conjunctions on the destiny of man, and the most auspicious moments for marriages, &c. By Kás'ínátha. The work comprises four chapters.

Beginning. तमिस्राजगरग्रस्तं यो जीवयति भूतलं ।
तं वन्दे परमानन्दं सर्वसाक्षिणमीश्वरं ॥
तनुं धनञ्च भ्राता च सुहृत्पुत्ररिपुस्त्रियः ।
मृत्युश्च धर्मकर्मायुव्यया भावाः प्रकीर्त्तिताः ॥

End. सप्तविंशांशके शुक्रो विंशत्यंशे शनैश्चरः ।
सैंहिकेयश्च विंशांशे परमोच्चः प्रकीर्त्तितः ॥ ५२ ॥

Colophon. इति श्रीकाशीनाथकृतौ लग्नचन्द्रिकायां चतुर्थः परिच्छेदः समाप्तः ।

विषयः । १ परिच्छेदे, तनुधनादिद्वादशभावसञ्ज्ञाकरणादि । पृष्ठोदयादिराशिकथनं । उच्चनीचखरटदिग्रहनिर्णयः । राजयोगादिकथनं । स्त्रीराजयोगकथनं । लग्नादिद्वादशभावस्थितरव्यादिग्रहशुभाशुभफलं । जन्मनक्षत्रतिथिवारयोगकरणगणमासादिशुभाशुभफलं । उच्चनीचादिग्रहशुभाशुभफलं । प्रत्येकरव्यादिग्रहवद्द्वादशभावफलं । स्त्रीजन्मलग्नादिशुभाशुभफलञ्च । २ परिच्छेदे, नवग्रहाणां चक्राणि । जन्मलग्नज्ञानप्रकारः । अष्टोत्तरीदशाकथनादि । रव्यादिग्रहदशाशुभाशुभफलानि च । ३, ४, द्विव्यादिग्रहयोगफलकथनादि ।

No. 857. योगिनीदशाफलं ।

Substance, country paper, 11½ × 5 inches. Folia, 14. Lines, 9—10 on a page. Extent, 250 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Yoginí-das'á-phala. The influence of certain fairies, called Yoginis, on the destiny of man. According to Tántric astrological works there

are eight such fairies, and their names are, Mañgalá, Piñgalá, Dhanyá, Bhrámarí, Bhadriká, Ulká, Siddhá, Sañkaṭá. Their ordinary occupation is to serve as maids of honour to the great goddess Durgá, but they also exercise, by turns, control on the destiny of man, and on certain hours of every day, some of them are malevolent, others benign. Their turns are dependent on the relation of certain Nakshatras to the moon. The work is written in the Tántric style, and quotes the Ádí Yámala Tantra, as its authority. Anonymous.

Beginning. अथ योगिनीदशा लिख्यते,—

अथातः सम्प्रवक्ष्यामि यदुक्तमादियामले ।
कथयिष्याम्यतो देवि ग्रहाणाञ्चादियोगिनीम् ॥ १ ॥
तासां दशाक्रमे चैव फलं प्रत्येकसंस्थिते ।
अन्तर्दशा च सर्वासां सर्वदा परिपूजनं ॥ २ ॥
विशेषेण विरुद्धानां पूजनं तन्मनूनपि ।
नातः परतरा रक्षा कश्चित् त्रिभुवनेष्वपि ॥ ३ ॥
एतासु च विरुद्धासु न ब्रह्मा न च शङ्करः ।
न विष्णुर्न च लोकेशो ग्रहा अपि न रक्षकाः ॥ ४ ॥
तासां दशाविशेषेण कर्त्तव्यं परिपूजनं ।
विद्या कीर्त्तिधनारोग्यराज्यसौभाग्यमिच्छता ॥ ५ ॥
मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा ।
योगिन्यष्टौ समाख्याता उल्का सिद्धा च सङ्कटा ॥ ६ ॥

End. प्रथमे विंशतिः सूर्यस्तृतीये शद् चन्द्रमाः ।
चतुर्थे चाष्टभौमस्य षष्ठे बुधचतुर्थकम् ॥ २ ॥
सप्तमे शनिदिक्सङ्ख्या नवमे गुरुरष्टकम् ।
दशमे विंशती राहुः शेषाः शुक्रदशाः स्मृताः ॥ ३ ॥

Colophon. इति मासदशा समाप्ता । इति श्रीयोगिनीदशाफलं समाप्तं ।

सूर्यः	चन्द्रमाः	मङ्गल	बुधः	शनिः	गुरुः	राहुः	शुक्रः
२०	५०	२८	५६	३६	५८	४२	७०

विषयः । मङ्गलादियोगिनीदशानयनप्रकारः । मङ्गलादियोगिनीनां भोगकालनिरूपणं, तासां दशान्तर्दशामासदशादिशुभाशुभफलकथनञ्च ।

No. 858. केतूदयफलं ।

Substance, country paper, 10 × 4½ inches. Folia, 14. Lines, 7—8 on a page. Extent, 240 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Generally correct.

Ketúdayaphala. The effect of comets on the affairs of the terrestrial globe. Various kinds of comets are described, such as bow-shaped, three-tailed, twenty-five-tailed, pearly-hued, twenty-five-tailed, many-coloured, dark-hued, curved-tailed, annular and watery, mildly brilliant like diamond, three-colored and having three tails, soothing white-coloured and formed of 84 stars, similarly coloured and formed of 60 stars; one-starred with a slender tail, white-starred of great brilliancy, ditto of a bright red colour, three-tailed and three starred, flaming and many-coloured, a hundred and twenty tailed, blackish red with 77 tails placed amidst a constellation of eight stars; white-coloured with 204 tails and square; bushy like 24 bamboo tufts put together; like a headless trunk and brown coloured; thick and transparent; having three nuclei; like a smoky mass; having a tail of smoke; having 13 tails; having a tail like that of a horse; annular with tails projecting from every side; spike-shaped, &c., &c. The times when these comets appear, their durations, and their effects on the earth are detailed at great length. Anonymous.

Beginning. उदयास्तमनं केतोर्गणिते तत् प्रकाश्यते ।
ज्ञातुं खदिव्यभौमास्च यतस्ते त्रिविधा मताः ॥ १ ॥
एकोत्तरशतं त्वेके सहस्रमयुतं विदुः ।
एकस्च बहुधा भाति प्राह वै नारदो मुनिः ॥ २ ॥
यावन्त्यहानि दृश्यते तावन्मासैः फलं भवेत् ।
मासाः समास्च विज्ञेया इत्यूचुर्मुनयः किल ॥ ३ ॥
सुस्निग्धो रुचिरः सूक्ष्म ऋजुः शुक्लः शुभप्रदः ।
विपरीतस्चाशुभः केतुस्त्रिशिखेन्द्रधनुःप्रभः ॥ ४ ॥
मुक्ताकनकसङ्काशाः सशिखाः पञ्चविंशतिः ।
प्राक् परस्याञ्च तद्दृष्टाः सूर्यपुत्रा भयप्रदाः ॥ ५ ॥
बहुवर्णाग्निसङ्काशाः पञ्चविंशतिसङ्ख्यकाः ।
आग्नेय्यां दिशि सन्दृष्टास्तेऽग्निपुत्रा भयप्रदाः ॥ ६ ॥

याम्याशासंस्थिताः कृष्णरक्ता वक्रशिखास्तथा ।
तावन्तो वै मृत्युसुताः प्रजाक्षयकराः स्मृताः ॥ ७ ॥
वृत्ताकाराश्च विशिखा जलतैलसमप्रभाः ।
द्वाविंशभूमितनया दुर्भिक्षायैशदिग्गताः ॥ ८ ॥
हिमरश्मिहिरण्याभास्त्रयश्चन्द्रसुताः स्मृताः ।
उत्तरस्यां यदा दृष्टास्तदा शुभफलप्रदाः ॥ ९ ॥
क्रूरस्त्रिवर्णस्त्रिशिख एको ब्रह्मसुतः स्मृतः ।
सर्वासामाशासु सन्दृष्टो ब्रह्मदण्डक्षयावहः ॥ १० ॥
विसर्पाख्याः शुक्रसुताः सुस्निग्धाः श्वेततारकाः ।
चतुरशीतिसङ्ख्याकाः पुरोदृष्टा भयप्रदाः ॥ ११ ॥
सुस्निग्धाः सुशिखाश्चैव षष्टिश्च कनकाकयाः (?) ।
शनैश्चरसुता घोरा केतवः श्वेततारकाः ॥ १२ ॥
एकतारा महास्वल्पाः श्वेततारा महाप्रभाः ।
विशिखाश्च गुरोः पुत्राः प्रायशो दक्षिणाश्रयाः ॥ १३ ॥
नामतोधिकचा घोराःषष्टिर्यदाधिकाः स्मृताः ।
सौम्यसुताः स्तारकाख्याः सर्वदिक्प्रभवाश्च ते ॥ १४ ॥
नातिव्यक्ताश्च रुक्षाश्च श्वेतरूपा भयप्रदाः ।
एकाधिकाश्च पञ्चाशत्केतवः परिकीर्त्तिताः ॥ १५ ॥
यदि कुजात्मजा रक्ताः कौङ्कुमाः सौम्यदिग्गताः ।
त्रिशिखाश्च त्रितारा्श्च महापापफलप्रदा· ॥ १६ ॥
राहोः पुत्रास्त्रयस्त्रिंशत् ख्यातास्तमसकीलकाः ।
चन्द्रार्कमण्डलस्थास्ते लोकानां कष्टदायकाः ॥ १७ ॥
नानावर्णाग्निपुत्राश्च किरन्तोग्निं विचूडिनः ।
विंशोत्तरशतं विश्वरूपा वह्निभयप्रदाः ॥ १८ ॥
अरुणाख्या वायुपुत्रा वर्णतः श्यामलोहिताः ।
वितारासामरप्रख्या भयदाः सप्तसप्ततिः ॥ १९ ॥
प्रजापतिसुताश्चाष्टौ तारामण्डलवर्त्तिनः ।
तारापुञ्जप्रतीकाशा गणका भयदायिनः ॥ २० ॥
द्वे शते चैव चत्वारः सशिखाः श्वेतरश्मयः ।
चतुरस्रा ब्रह्मपुत्राः + + भयकरा मताः ॥ २१ ॥
वंशगुल्मसमाः प्रोक्ता द्वाविंशद्वरुणात्मजाः ।

धूम्रशिखप्रभाश्च काकाख्याः केतवः कष्टदायकाः ॥ २२ ॥
कालपुत्राः कबन्धाख्या कबन्धसदृशारुणाः ।
षण्णवतिश्च भयदा हिमरश्मिसमप्रभाः ॥ २३ ॥
विदिक्पुत्राख्यकतारा विदिक्षु च समाश्रिताः ।
नवसङ्ख्याश्च विपुला महाभयनिवेदिनः ॥ २४ ॥
उत्तरस्यां महास्थूला निर्मलाश्चापरोदयाः ।
दृष्टः करोति मरणं पश्चादन्नसमृद्धिकृत् ॥ २५ ॥
अस्ति केतुश्च चिचिक्रः + कर्कवृद्धयावहः (?) ।
दृष्टः प्राच्यां च शस्त्राख्यस्ताहक्स्निग्धश्च पापदाः ॥ २६ ॥
कपालाख्या धूम्रशिखा दृष्टा माया (?) जलापहाः ।
दृष्टाः प्राच्यां च शस्त्राख्यास्ताहक्स्निग्धाश्च पापदाः ॥ २७ ॥
प्राग्व्योमार्द्धविहारी स्यात्तथा क्षुण्मृत्युकारकः ।
प्रागग्निमार्गे स्थूलाग्रो दृष्टः स्यादरुणप्रभः ॥ २८ ॥
व्योमत्रिभागगामी च रौद्रः क्षुद्भयमोहदः ।
पश्चिमाशास्थिता यस्तु शिखास्याभ्यग्रसंस्थिता ॥ २९ ॥
यथायथो+दं परा (?) गच्छेत्तथा दैर्घ्यं प्रयाति च ।
संस्पृशत्वमुनीन् सङ्गं (?) ध्रुवं चाभिजितं तथा ॥ ३० ॥
व्योमार्द्धमात्रं गत्वा वै याम्येनास्तं प्रयाति च ।
आप्रयागादवन्तीं च पुष्करारण्यमेव च ॥ ३१ ॥
मध्यदेशमुदग्भागं देविकाख्यान्तथैव च ।
धवलाख्यं निहन्त्याशु केतुर्दुःखभयप्रदः ॥ ३२ ॥
शेषेष्वन्येषु दुर्भिक्षं दशमासावधि स्मृतं ।
धूम्राकारा शिखा यस्य कृत्तिकायां समाश्रिता ॥ ३३ ॥
दृश्यते रश्मिकेतुः स्यात् सप्राहान्यशुभप्रदः ।
त्रयोदशशिखी याम्यां दृष्टो धूमाह्वयः शिखी ॥ ३४ ॥
महाभयकरः प्रोक्तो ज्येष्ठायां वा समाश्रितः ।
सरामाशाभ्यधिको दृष्टो दशवर्षाणि दुःखदः ॥ ३५ ॥
गृहपर्वतवृक्षेषु सेनागोपुरकरेषु च ।
दिव्यन्तरिक्षभौमाख्यो धूमकेतुः प्रदृश्यते ॥ ३६ ॥
यदा तदा विनाशः स्यात् प्राणिनां भवति ध्रुवं ।
सकृद्याम्यैकदृश्च मणाषव्यः (?) सूक्ष्मतारकः ॥ ३७ ॥

शिखास्य सूक्ष्मा स्थ्वी च यदा मासान् सुभिक्षकृत्।
जलकेतुर्यदास्निग्धः शिखा यस्यापरोन्नता ॥ ३८ ॥
दृष्टः करोति शान्तिं च नवमासान् सुभिक्षकृत्।
भवकेतोश्च सुस्निग्धा हरिपुच्छोपमा शिखा ॥ ३९ ॥
सूक्ष्मैकता + प्राग् दृष्टा लोकानां शुभदा मता।
पद्मकेतुम्मृणालाभः पश्चिमस्यां प्रदृश्यते । ४० ॥
निशामेकान्तदा सप्तवर्षाणि च सुभिक्षकृत्।
आवर्त्तकः सव्यशिखो निशार्द्धे सम्प्रदृश्यते ॥ ४१ ॥
यावत् सहतारनं आवर्त्तकं सत्ताभस्तावन्मासान् (?) सुभिक्षकृत्।
सन्ध्याकाले पश्चिमायां शूलाकारो+सप्रभः ॥ ४२ ॥

End. (खण्डितत्वात् समाप्तिवाक्यादिकं नास्ति।)

विषयः। उदितधूमकेतोः स्वरूपलक्षणाद्यनुसारेण शुभाशुभफलकथनं।

No. 859. सारसङ्ग्रहः।

Substance, country paper, 10¼ × 4½ inches. Folia, 96. Lines, 7 on a page. Extent, 1200 s'lokas. Character, Nágara. Date, Sm. 1865. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Sárasañgraha. A manual for Vaishṇavas, comprising quotations from various Puráṇas, Smritis, &c., on the importance of putting on sectarial marks, of worshipping Vishṇu, of tasting water with which the feet of Vishṇu's image have been washed, or of food offered to him, of putting on beads made of tulasí wood, &c. About the end of the work there is a short note on the life of Rámá-nuja, according to which he was the son of Kes'ava Tripáṭhí and born after a Yajña performed by his father in which a child was prayed. He is said to have had in him a portion of the essence of Vishṇu, which became incarnate for the salvation of man in this sinful iron age.

Beginning. शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १ ॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परं शतं।

विघ्नं निघ्नन्ति सततं विश्वक्सेनं तमाश्रये ॥ २ ॥
वकुलाभरणं वन्दे जगदाभरणं मुनिं ।
यः श्रुतेरुत्तरं भागं चक्रे द्राविडभाषया ॥ ३ ॥
श्रीरङ्गमङ्गलमहोत्सववर्द्धनाय वेदान्तपाथपरमार्थसमर्थनाय ।
कैङ्कर्यलक्षणविलक्षणमोक्षभाजो रामानुजो विजयते यतिराजराजः ॥ ४ ॥
वेदे रामायणे चैव भारते भरतर्षभ ।
आदौ मध्ये तथा चान्ते हरिः सर्वत्र गीयते ॥ ५ ॥
श्रुतिस्मृतीतिहासाश्च पुराणं धर्मसंहिता ।
सर्वतः सारमादाय षट्पदः कुसुमाद् यथा ॥ ६ ॥
वैष्णवं नारदीयञ्च तथा भागवतं शुभम् ।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शनम् ॥ ७ ॥
ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्मंग्र राजसानि निबोध मे ॥ ८ ॥
मात्स्यं कौर्म्यन्तथा लैङ्गं शैवं स्कान्दं तथैव च ।
आग्नेयञ्च षडेतानि तामसानि निबोध मे ॥ ९ ॥
तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणान्विताः ।
सात्त्विका राजसा चैव तामसाः शुभदर्शने ॥ १० ॥
वाशिष्ठञ्चैव हारीतं व्यासं पाराशरं तथा ।
भारद्वाजं काश्यपञ्च सात्त्विका मोक्षदाः शुभाः ॥ ११ ॥
वामनं याज्ञवल्क्यञ्च आत्रेयं दाक्षमेव च ।
कात्यायनं वैष्णवञ्च राजसाः स्वर्गदाः शुभाः ॥ १२ ॥
गौतमं वार्हस्पत्यञ्च सांवर्त्तञ्च यमस्मृतं ।
शाङ्खं चौशनसं देवि तामसा निरयप्रदाः ॥ १३ ॥
सात्त्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः ।
तथैव तामसा देवि निरयप्राप्तिहेतवः ॥ १४ ॥
सात्त्विकानि पुराणानि तथैव स्मृतिरेव च ।
वैष्णवानां मुदर्थाय क्रियते सारसङ्ग्रहः ॥ १५ ॥
वैष्णवो नाम, तदुक्तं पाद्मे ।
ये कण्ठलग्नतुलसीनलिनाक्षमाला ये बाहुमूलपरिचिह्नितशङ्खचक्राः ।
ये वा ललाटपटले लसदूर्द्ध्वपुण्ड्रास्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥ १६ ॥

End. ये जनास्तान् प्रियान् विष्णोः पूजयन्ति स्मरन्त्यपि ।

ततप्रसादादहं तेषां सर्वं नष्टमभूद्भटाः ॥ ३१ ॥
यः पठेच्छृणयाद्भक्त्या सन्दर्भमिदमुत्तमम् ।
सर्वार्थसिद्धिं सम्प्राप्य लभेदन्ते हरेः पदं ॥ ३२ ॥

Colophon. इति श्रीसारसङ्ग्रहः समाप्तः ॥

विषय । १ संस्कारे, वैष्णवलक्षणकथनप्रसङ्गेन शङ्खचक्रादिधारणपरश्रुतिस्मृतिपुराणादिवचनप्रमाणकथनं, शङ्खचक्राद्यनङ्कितस्य निन्दाकथनं । २, ऊर्द्धपुण्ड्रधारणे श्रुतिस्मृत्यादिवचनप्रमाणतल्लक्षणतद्द्रव्यादिकथनं । ३, वैष्णवानां नामधेयस्थापनप्रकारः । ४, वैष्णवमन्त्रोपदेशप्रकारः । ५, वैष्णवाचरणशिक्षादिकथनं । ६, भगवदाराधनप्रकारतद्द्रव्यादिकथनं । भगवत्पादोदकमाहात्म्यं । भगवत्प्रसादमाहात्म्यादिकथनं । पूजाकाले तुलसीमालाधारणावश्यकतादिकथनं । आचमनविधिः । आश्रमधर्मादिकथनं । रामानुजोत्पत्तिकथनादि । प्रपन्नभक्तलक्षणं । भगवदाराधनमाहात्म्यकथनादि च ।

No. 860. मदनविनोदनिघण्टुः ।

Substance, country paper, 10 × 5¼ inches. Folia, 54. Lines, 13 on a page. Extent, 1620 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, old, and smudgy. Verse, Generally incorrect.

Madanavinoda-nighantu. Indian materia medica, comprising descriptions of various articles of food, drink, and medicines, and their effect on the human system. The work is of considerable repute, and includes the names of almost all medicinal substances, vegetable, animal, and mineral, that are in common use. Among articles of diet, the flesh of horses, elephants, donkeys, sparrows, parrots, &c. are mentioned, and their qualities described. The effect of air on health is also noticed at some length. By Madana Pála, a King of Kanouj.

Beginning. वीजं श्रुतीनां सुखदं मुनीनां जीवं जडानां मदादिकानां ।
आग्नेयमस्त्रं भयपातकानां किञ्चिन्महः श्यामलमाश्रयामि ॥ १ ॥
लब्ध्वा कपोलमधुवारि मधुव्रतालिः कुम्भस्थलीमधुविभूषणलोहिताङ्गी ।
माणिक्यमौलिरिव राजति यस्य मौलौ विघ्नं स धूनयतु विघ्नपतिः सदा नः॥२॥

योध्वान्तत+ + +विशालपयोधिमध्यान्निःकासयत्यशरणं भुवनं निमज्जत् ।
दत्त्वा जगत्त्रयहितः स्वकरावलम्बं वाञ्छां स नो दिनकरः सफलीकरोतु ॥ ३ ॥
मिथ्याशनादिकृतदोषचयप्रकोपनद्यम्बुवर्द्धित उपद्रवनक्रमीने ॥
रोगाम्बुधौ भवजनस्य निमज्जतो यः पीतः प्रयच्छतु शुभानि च काशिराजः ॥४॥
केचित् सन्ति निघण्टवोऽतिलघवः केचिन्महान्तः परे
केचिद् दुर्गमनामकाः कतिपये भावस्वभावाहिताः ।
तस्मान्नातिलघुर्न चातिविपुलः ख्यातादिनामा सतां
प्रीत्यै द्रव्यगुणान्वितोऽयमधुना ग्रन्थो मया लिख्यते ॥ ५ ॥
सर्वकायन (?) संसाध्यं तस्यायुःस्थितिकारणं ।
आयुर्वेदोपदेशेन कस्य न स्यात्सुखावहः ॥ ६ ॥
तत्रापि पूर्वं ज्ञातव्या द्रव्यनामगुणागुणाः ।
अतस्त एव वक्ष्यन्ते योज्ञैर्न हि क्रियाक्रमाः ॥ ७ ॥
शिवा हरीतकी पथ्या चेतकी विजया जया ।
प्रमथ्या प्रमथामोघा कायस्था प्राणदामृता ॥ ८ ॥ (इत्यादि)

End. जयति मदनपालः सर्वविद्याविशालः कृतसरसिजमित्रः कर्मधर्मैः पवित्रः ।
सुजनपिकरसालस्तुष्टगोपालबालो रुचिरतरचरित्रस्वारुचातुर्यचित्रः ॥
तेन श्रीमदनेन्द्रेण निघण्टुरयमद्भुतः ।
कृतः सुकृतिना लोकहिताय महितात्मना ॥
अनवद्यानि पद्यानि दश द्वादश वा मया ।
परेषामपि केषाञ्चिल्लिखितानीह कौतुकात् ॥

Colophon. इति श्रीमदनपालविरचिते मदनविनोदनिघण्टौ प्रशस्तिवर्गश्चतुर्दशः ॥

विषयः । १ वर्गे, हरीतक्यादिनामानि तद्गुणाश्च । २, शुण्ठ्यादिनामानि तद्गुणाश्च । ३, कर्पूरादिनामानि तद्गुणाश्च । ४, हेमादिधातूनां नामानि गुणाश्च । ५, वटवृक्षादिनामानि तद्गुणाश्च । ६, द्राक्षादिनामानि तद्गुणाश्च । ७, शाकनामानि तद्गुणाश्च । ८, पानीयनामानि तद्गुणाश्च । ९, दुग्धनामानि तद्गुणाश्च । १०, दधिनामानि तद्गुणाश्च । ११, घृतनामानि तद्गुणाश्च । विविधतैलगुणाः । नानाप्रकारमद्यगुणाः । गोमहिषमनुष्यादिमूत्रगुणाः । इक्षुगुणाः । शर्कराखण्डकादिनामानि तद्गुणाश्च । शालिनामानि तद्गुणाश्च । गोधूमयवचणकमाषमसूरतिलसर्षपादिनामानि तद्गुणाश्च । पायसशिखरिण्यादिनामानि तद्गुणाश्च । मण्डकौदनादिनामानि तद्गुणाश्च । घृतपक्वविविधभक्ष्यनामानि तद्गुणाश्च । अष्टद्रव्यगुणाः । १२, हस्तिघोटकादिपशूनां चटककपोतादिपक्षिणाञ्च नामानि

तन्मांसगुणाश्च । मत्स्यसर्पादिनामानि तन्मांसगुणाश्च । १३, पथ्यापथ्यविचारः । १४, वायुगुणादिकथनञ्च ।

No. 861. अमरकोषटीका, प्रथमकाण्डीया, द्वितीयकाण्डीया खण्डिता ।

Substance, country paper, 10 × 4 inches. Folia, 131. Lines, 9—11 on a page. Extent, 3300 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, old, decayed, and in some places obliterated. Prose. Incorrect.

Amarakosha Ṭíká. A commentary on the Amarakosha, by Ráya-mukuṭa. The MS. is incomplete, and breaks off at the middle of the second book. The following is Professor Wilson's opinion of this work. "The next in the order of antiquity is the work of *Mukuṭa* or *Ráya Mukuṭa Maṇi*, compiled, according to the author's own account, from sixteen older commentaries to which he frequently refers : they seem, however, to be in many cases original compositions, and not merely glosses on the text of Amara. The list includes the work of *Kshíra Svámí*, *Subhúti*, *Haḍḍa Chandra*, *Kaliñga*, *Konkaṭa*, *Sarvadhara*, *Rájadeva*, *Govardhana*, *Dráviḍa* and *Bhoja Rája*, and the *Vyákhyámṛita*, *Ṭíkásarvasva*, *Mádhaví*, *Madhu Mádhaví*, *Sarvánanda*, and *Abhinanda.* Mukuṭa also cites the names of the principal grammatical writers, and quotes many Koshas of which the titles are of frequent and familiar occurrence, amongst which some, as the Vis'va and Mediní, are still in existence. The commentary of Ráya Mukuṭa is full and satisfactory—it is erroneous sometimes in the etymological analysis of grammatical derivatives, but it is in general accurate, and in most of the schools is of high authority. The date of the composition is inferred from dates mentioned by the author, 1352 S'áka or A. D. 1430." Essays II, 203.

Beginning. दिश्यात्स्विवं द्वि शिवयोस्तिलकायमानं गोरोचनारुचिललाटविलोचनं नः ।
अन्योन्यगाढपरिरम्भनिपीडनेन पिण्डीभवद्द्विरिव स्फुरितोऽनुरागः ॥ १ ॥
अद्याप्यपीतमुद्रो योर्थार्थिभिरमरकोष एष बुधाः ।
उद्घाट्यते यथेच्छं टत्नौघं नामरत्नानि ॥ २ ॥
प्रकृतिप्रत्ययवाक्यैर्व्यस्तसमस्तैर्निरुक्तनिगदाभ्यां ।
इति सप्तष्टपथिभिर्नाम्नां पारायणं कुर्मः ॥ ३ ॥

(द्वितीका०प्रा०) अथ द्वितीयकाण्डे वर्गान् सङ्गृह्णीते। महान्तः, अङ्गैर्स्वर्गादिभिः, उपाङ्गैरखिलादिभिः, सह वर्त्तमानैः इथिव्यादिभिः, सम्पादितवर्गा इह वक्ष्यमाणाः काण्डे वदितुमारब्धा उदिताः।

End. अत्रानुक्तमपि प्रसक्तानुप्रसक्ततया स+++++रिति आदिशब्देन पातालस्य ग्रहणं। पातालं स्यात् स्वर्गे तु स्वर्गतुल्यत्वात्। अत एव++रकथनं।

Clophon. इति काण्डप्रस्तावः। इति महन्नापीयकविचक्रवर्त्तिराजपण्डितश्रीरायमुकुटकृतायां टीकायां प्रथमकाण्डविवरणं समाप्तम्।

(द्वितीयकाण्डटीकायाः खण्डितत्वाच्छेषवाक्यादिकं नास्ति।)

विषयः। अमरसिंहकृतामरकोषप्रथमकाण्डव्याख्यानं। द्वितीयकाण्डव्याख्या त्वसम्पूर्णा।

No. 862. दत्तगीता।

Substance, country paper, $9\frac{1}{2} \times 3\frac{3}{4}$ inches. Folia, 27. Lines, 89 on a page. Extent, 350 s'lokas. Character, Nágara. Date, Sm. 1857. Place of deposit, Calcutta, Government of India. Appearance, old, some leaves are destroyed by worms. Verse and Prose. Incorrect.

Datta-gítá. An imitation of the Bhagavadgítá, treating of the Vedánta doctrine. By Dattátreya. The work is similar in character to the Avadhúta-gítá noticed under No. 669.

Beginning. ॐ अस्य श्रीअवधूतगीतामालामन्त्रस्य योगीश्वरो ऋषिः श्रीदत्तात्रेयपरमपुरुषो देवता येनेदं पूरितं सर्वमात्मनैवात्मनीति वीजं ज्ञानामृतं समरसं गगनोपमोऽहमिति शक्तिर्गायत्र्यादीनि छन्दांसि किमरोदसि (?) मानससर्वसममिति कीलकं स्वरूपनिर्वाणमनामयोऽहं विधकं (?) योगमोक्षयोः स्वनिष्ठायाः परिपाकमित्यर्थं जपे विनियोगः।

End. विन्दति विन्दति नहि नहि मन्त्रो नहि नहि तन्त्रं लक्षणच्छन्दः।
समरसमग्नो भावितपूतः प्रलपति चैतत्परमवधूतः॥ २०॥

Colophon. इति श्रीदत्तात्रेयविरचिता दत्तगीता समाप्ता। प्रकरणमष्टमम्।

विषयः। १, २ प्रकरणे, आत्मज्ञानोपदेशः। ३, एतत्प्रकरणोक्तपद्यैर्ज्ञानस्यामृतत्वप्रतिपादनं। ४, ५, आत्मनो निर्वाणत्वादिभावप्रतिपादनं। ६, सङ्क्षेपेण वेदान्तिकसारवाक्यकथनं। ७, नित्यानित्यकतिपयपदार्थालोचकवाक्यविन्दूपदेशः। ८, देहादिमायिकपदार्थेषु हेयत्वासारत्वज्ञानकथनादि।

No. 863. शाकलसंहिता, प्रत्यध्यायानुक्रमणिकासहिता ।

Substance, country paper, $8\frac{3}{4} \times 4\frac{1}{4}$ inches. Folia, 54. Lines, 7 on a page. Extent, 800 s'lokas. Character, Nágara. Date, Sm. 1856. Place of deposit, Calcutta, Government of India. Appearance, modern. Prose. Generally correct.

S'ákala Sañhitá. The hymns of the Rig Veda according to the S'ákala school. The MS. is imperfect and contains only the last five chapters of the seventh book of the work. Every chapter has its Anukramaṇi attached to it.

Beginning. असर्जि कश्यपः परिस्रुवानः साकमुक्षः पञ्च नोधा अभि यत् कण्वः कनिक्रन्ति प्रस्कण्वः प्रसेनानीश्चतुर्विंशतिर्दिवोदासिः प्रतर्दनोऽसप्रेषाष्टा पञ्चाशद्दाद्यं त्वचं वशिष्ठोऽपश्यद्युत्तरान्ततव इथ्मवशिष्ठा इन्द्रप्रमतिर्वृषगणो मन्युरुपमन्युर्व्याघ्रपच्छक्तिः कर्णश्रुन्मृडीको वसुक्र इति चतुर्दशपराशरोऽन्त्याः कुत्सोभिनो द्वादशांवरीषऋजिश्वा चानुष्टुभं इहत्युपान्त्या हर्यतायाष्टौ रेभसूनुकाश्यपौ इहत्याभोनवं ते नव ॥ ५१ ॥ हरिः ओम् ॥

असर्जि वक्वा रथ्ये यथा जौधिया मनोता प्रथमो मनीषी ।

End. अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मेसु वीरं ॥ २९ ॥

Colophon. इति शाकलसंहितायां सप्तमाष्टके अष्टमोऽध्यायः ॥ इति सप्तमाष्टकः समाप्तः ।

विषयः । शाकलसंहितायाः सप्तमाष्टके अष्टावध्यायाः सन्ति, तत्रात्र पुस्तके (प्रथमतोऽध्यायत्रयं नास्ति । चतुर्थाध्यायावधिकोऽष्टमाध्यायसमाप्तिपर्यन्तः पाठोऽस्ति । तत्र) ४ अध्याये २८ दशतयः । ५ ।—३३ दशतयः । ६ ।—२८ दशतयः । ७ ।—३० दशतयः । ८ ।—२९ दशतयः सन्ति ।

No. 864. सारसमुच्चयः ।

Substance, country paper, $9\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 67. Lines, 8—9 on a page. Extent, 1000 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Sára-samuchchaya alias *Yogasára Sañgraha.* A compendium of the Yoga system with details for performing various kinds of Yoga meditation. By Harisevaka Mis'ra. The work was compiled under the

patronage of Hridayaráma Deva, in the (Samvat ?) year 1770. This is different from the *Yoga-sára-sañgraha* of Vijñána Bhikshu noticed by Dr. Hall. Contributions, p. 12.

Beginning. सम्यगाराध्यतामीशं पञ्चविंशतिमप्ट्म् (?) ।
गुणातीतं विभुं वन्दे चतुर्विंशतितः परम्॥ १ ॥
श्रीयुक्तभवदेवाख्ये ग्रन्थे यो योगसङ्ग्रहः ।
तस्य सारं समुद्धृत्य कुर्वे सारसमुच्चयं ॥ २ ॥
श्रीस्वत्र (तत्र) को नाम योगः किं फलं चास्येत्यत आह ।
प्रज्ञासत्यवतीनाम्नि ग्रन्थे या ब्रह्मभावना ।
प्रोक्ता सा योगसाध्येति योगोऽत्र परिकीर्त्यते ॥
प्राधान्येन योगो नामान्तःकरणवृत्तिनिरोध एव। तदुक्तं पातञ्जले योगश्चित्तवृत्तिनिरोधः। तदा द्रष्टुः स्वरूपेणावस्थानमिति अयं भ वः

End. गगनमुनिचिरायुश्चन्द्रयुक्ते शुभेऽब्दे प्रवरसहसि मासे कृष्णपक्षे चतुर्थ्यां ।
विबुधहृदयरामैर्देचिन्तितैर्वीक्ष्य सारं रचितमखिलमेतद्योगशास्त्रे निबन्धम्॥ १ ॥
निखिलगुणनिधानो ब्रह्मविद्याभिरीशो गुरुरखिलबुधानां लोकविख्यातकीर्त्तिः।
सततनिगममर्माचारसंलग्नबुद्धिर्विबुधहृदयरामो देवपूज्योऽथ वा किम्॥ २ ॥
तस्याज्ञया श्रीहरिसेवकेन मिश्रेण योगस्य समीक्ष्य सारं ।
एकीकृतं तत्प्रविचार्य बुद्ध्या योगोक्तिविज्ञाः प्रतिशोधयन्तु ॥ ३ ॥

Colophon. इति योगसारसङ्ग्रहे समाध्युपदेशो नाम समाप्तः ।

विषयः । नानाप्रमाणद्वारा योगशब्दार्थप्रतिपादनं। योगिलक्षणतत्प्रशंसादि। ज्ञानभूमिकासप्तककथनादि। अज्ञानभूमिकासप्तककथनं। चिरञ्जीविलसाधकोपायोक्तिः। योगोपयोगिशरीररक्षादिकथनं। जरायुशरीरोत्पत्तिक्रमः। शरीरस्थचक्रकथनं। इडापिङ्गलादिनाडीकथनं। मूर्द्धहृदयादौ अयोध्यामथुरादिसप्तपुरीणां भावना। नासाग्रे प्रयागस्य, सुषुम्णायां सरस्वत्याः, अन्यनाडीषु नर्मदानदनदीनाञ्च भावना। मनोबुद्धिचित्तादौ चन्द्रचतुर्मुखवासुदेवादिदेवताविशेषभावनादि। लिङ्गमूलस्थस्वाधिष्ठाननाम्नो नाभिस्थपूरकनाम्नो हृदयस्थानाहतनाम्नः कण्ठस्थविशुद्धनाम्नो भ्रूमध्यस्थाज्ञानाम्नश्चक्रस्य मूर्द्धस्थसहस्रदलचक्रस्य च स्वरूपादिवर्णनं। त्रिंशदादिश्वासावृत्तिविशेषक्रमेण आकाशादितत्त्वाश्रयपूर्वकजीवभ्रमणोक्तिः। अहोरात्रश्वाससङ्ख्या। षड्भिः श्वासैरेकः पलः षष्ट्यधिकशतत्रयश्वासैरेका घटिका, एवं श्वासावृत्तिविशेषैरहोरात्रादिमानकथनं। अष्टप्रकारमनोवृत्तिकथनादि। आकाशादितत्त्वाश्रितजीवावस्था-

विशेषकथनं । निर्विकल्पकसमाधिस्वरूपयोगराजाष्टाङ्गकथनं । शौचसन्तोषादियोगिनियमकथनं । स्वस्तिकगोमुखपद्मवीरादिपञ्चदशासनकथनं । प्राणायामप्रकारः । प्राणायामाकृष्टवायुधारणक्रमः । सूर्यभेदनाद्यष्टविधप्राणायामकथनं । योगस्यावस्थाचतुष्टयलक्षणानि । देहशुद्ध्यर्थं धौतीवस्तिप्रभृतिषट्कर्मकथनं । महामुद्रादिदशमुद्राकथनं । इन्द्रियवृत्तिनिरोधरूपप्रत्याहारकथनादि । ध्यानलक्षणादि । पञ्चप्रकारधारणालक्षणादि । समाधिप्रकारादिकथनञ्च ।

No. 865. बौधायनचातुर्मास्यसूत्रं ।

Substance, country paper, 9¾ × 4 inches. Folia, 15. Lines, 11—12 on a page. Extent, 375 s'lokas. Character, Nágara, Date, ? Place of deposit, Calcutta, Government of India. Appearance, slightly soiled. Prose. Generally correct.

Baudháyana-Cháturmásya-sútra. A portion of the Kalpa Sútra of Baudháyana, treating of the quadrimensal fast, beginning from the full-moon of Phálguna, or Chaitra. This fast became the *Wasso* of the Buddhists, and was observed during the four months of the rainy season, beginning with the full-moon in A'shádha. In modern Hinduism, a similar fast is enjoined which commences on the eleventh of the waxing moon in A'sádha, and terminates on the eleventh of the waxing moon in Kártika, the period being sacred to Vishṇu, who is then supposed to be asleep on a fig leaf floating on the great ocean. It is known by the Vedic name of Cháturmásya.

Beginning. वैश्वदेवेन यक्ष्यमाणो भवति फाल्गुन्यां वा चैत्र्यां पौर्णमास्यां नक्षत्रयोग इत्येक आहुरुदगयने आपूर्यमाणपक्षस्य पुण्याहे प्रयुञ्जीतेति ।

End. तेन शकेयं तेन राध्यासमिति पुरस्ताद्वाग्रेऽथ दक्षिणतोऽथ पश्चादथोत्तरतोऽथोपरिष्टात् सन्तिष्ठते सुनासीरीया हवींष्यनुवत्सरीणांᳪ स्वस्तिमाशास्त इत्याशास्ते ।

Colophon. इति बौधायनचातुर्मास्यसूत्रं ।

विषयः । फाल्गुनस्य चैत्रस्य वा पौर्णमासीमारभ्य चतुर्षु मासेषु कर्त्तव्यकतिपयविधेरनुक्रमेणोल्लेखः ।

No. 866. भावविशोधिनी, कातीयश्रौतसूत्रतृतीयाध्यायस्य कर्कभाष्यटीका ।

Substance, country paper, 9¾ × 4½ inches. Folia, 42. Lines, 10—11 on a page. Extent, 1050 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Incorrect.

Bháva-vis'odhini. A gloss on the commentary of Karka Upádhyáya, on the Kalpa Sútra of Kátyáyana. By Átmaráma Bhaṭṭa, son of Jayakrishṇa Bhaṭṭa. The MS. is incomplete and comprises only the third chapter.

Beginning. होत्रासंमिश्रं कर्म द्वितीयेऽनुविधायेदानीं तत्संमिश्रमनुविधातुं तृतीयमारभते सूत्रकारः । हो० इ० । ननु होतृषदनशब्दो न गवादिवत् क्वचिद्रूढ इत्यत आह । होतेति ।

End. श्रीमदाचार्यवर्गाणां वरेण्येन विनिर्मितं ।
सूत्रे कर्केण यद्भाष्यमभाणि न्यायसंयुतम् ॥ १ ॥
तत्रात्मारामसङ्क्लृप्ता टीका भावविशोधिनी ।
तृतीये विदुषा सृष्टा सन्त्यक्ता पक्षपाततम् ॥ २ ॥
पुनर्दूष्याथवा भूष्या यथेच्छं न्यायवर्त्मनि ।
गच्छतो न्यायमार्गेण स्खलनं नैव दोषदं ॥ ३ ॥
दोष उद्भाव्यतां वात्र दोषो मे नास्ति तत्र तु ।
क्व वा नोद्भाव्यते दोषो रागद्वेषविशारदैः ॥ ४ ॥

Colophon. इति श्रीभट्टजयकृष्णात्मजभट्टात्मारामविरचितायां श्रौतकातीयसूत्रकर्कभाष्यटीकायां भावविशोधिन्यां तृतीयोऽध्यायः ।

विषयः । कातीयश्रौतसूत्रतृतीयाध्यायकर्कभाष्यार्थविवरणम् ।

No. 867. द्वैतनिर्णयसिद्धान्तसङ्ग्रहः, विधानमालासहितः ।

Substance, country paper, 9½ × 4¼ inches. Folia, 123. Lines, 8 on a page. Extent, 2000 s'lokas. Character, Nágara. Date, Sm. 1867. Place of deposit, Calcutta, Government of India. Appearance, soiled. Prose and verse. Generally correct.

Dvaitanirṇaya-siddhánta-sañgraha. An epitome founded on the Dvaitanirṇaya, a treatise on various feasts and fasts, by the author's grand-

father. By Bhánu Bhaṭṭa, son of Nílakaṇṭha Bhaṭṭa. The feasts and fasts noticed are: Navarátra, or nine nights' fast; Chaturthí, fourth of the wane; Panchamí, 5th of the waxing moon; Janmáshṭamí, birthday of Kṛishṇa; Ekádas'í, fast on the eleventh of the moon; S'rávaṇa-s'ukla-chaturdas'í, tying of a thread on the arm on the 14th of the waxing moon in S'rávaṇa; Nrisiṅha-chaturdasí, a fast in honor of the man-lion incarnation; Siva-rátri, fast of S'iva; S'rávaṇa-s'ukla-púrṇimá; Holi; Sávitri-vrata, a fast in celebration of the constancy of a celebrated female; Saṅkrāṇti, or conjunctions of months; duties during eclipses; mourning; impurity to relations caused by birth; S'ráddhas; Sapindikaraṇa; sacred fires at s'ráddhas; duty on the death of both parents on the same day; concremation; Agnyádhána; Nityahoma; adoption; pilgrimage; persons bound to offer the funeral cake; flesh meat for Brahmaṇs; gifts; expiations; various kinds of weights and measures, &c. Annexed to the work is a short abstract entitled Vidhánamálá, &c.

Beginning. लक्ष्मीनारायणं नत्वा सीतया सहितं रघुं ।
गङ्गायुतं नीलकण्ठं गुरोः पादाम्बुजं तथा ॥ १ ॥
पितामहकृतद्वैतनिर्णयार्थस्य सङ्ग्रहः ।
नीलकण्ठात्मजेनेह क्रियते भानुनाधुना ॥ २ ॥
तत्रादौ नवरात्रसिद्धान्तः ।

विधान०प्रा०। अथ द्वादशाब्दानवलोकनविधिर्वक्ष्यते ।
दम्पती पितृपुत्रौ च स्वसारौ भ्रातरौ तथा ।
पितृव्यमातुलादौ च दौहित्रो भागिनेयकः ॥
पुत्रिका पितरौ चैव भगिनी भ्रातरौ तथा ।
द्वादशाब्दे व्यतीते तु दूरदेशं गते यदि ।
एतेषामेकमेकोपि नान्योन्यमवलोकयेत् ॥

End. अपरे तु अग्निस्थापनानन्तरमेवाचार्यकुण्डादन्यकुण्डेषु अग्निप्रणयनं कार्यं ततश्च प्रतिकुण्डं पूर्वोत्तराङ्गाणां भेदेनानुष्ठानमित्याहुः। अत्र मध्यकुण्डात् प्रणयनं कार्यमिति केचित्। अन्ये तु नैर्ऋतकुण्डादित्याहुः ।

Colophon. इति श्रीमन्मीमांसकभट्टनीलकण्ठात्मजभट्टभानुकृते द्वैतनिर्णयसिद्धान्तसङ्ग्रहे कोटिलक्षायुतहोमनिर्णयः समाप्तः ।

विधान०स०। पूर्वावलोकितानान्तु विधिरेष उदाहृतः ।
न चैवापूर्वदृष्टानामिति प्राहुर्मनीषिणः ॥
इति विधानमालायां स्वबन्धुजनानां द्वादशान्तरितावलोकनविधिः समाप्तः ।

विषयः । १ प्रकरणे, नवरात्रनिर्णयः । २, नवरात्रपारणाप्रकारः । ३, चतुर्थीपञ्चमीव्रतकथनादि । ४, जन्माष्टमीनिर्णयः । ५, जन्माष्टमीपारणानिर्णयः । ६, एकादशीवेधनिर्णयः । ७, श्रावणशुक्लचतुर्दशीनिर्णयः । ८, वैशाखशुक्लपञ्चमीयनृसिंहचतुर्दशीनिर्णयः । ९, शिवरात्रिनिर्णयः । १०, सावित्रीव्रतनिर्णयः । ११, श्रावणशुक्लपौर्णमासीकर्त्तव्योपाकर्मसिद्धान्तकथनं । १२, फाल्गुनशुक्लपौर्णमासीकर्त्तव्यहोलिकोत्सवनिर्णयः । १३, सङ्क्रान्तिनिर्णयः । १४, ग्रहणोपवासनिर्णयः । १५, १६, १७, मृताशौचविशेषनिर्णयः । १८, दत्तकपुत्रमरणाशौचनिर्णयः । १९, देशान्तरमृताशौचनिर्णयः । २०, अशौचसङ्करनिर्णयः । २१, जननाशौचनिर्णयः । २२, संसर्गाशौचनिर्णयः । २३, श्राद्धाधिकारिणः । २४, मासिकादिश्राद्धनिर्णयः । २५, सपिण्डीकरणकालः । २६, सपिण्डीकरणकर्तृनिर्णयः । २७, सपिण्डाशौचनिर्णयादि । २८, पितामहपिण्डाशननिर्णयः । २९, अग्नौ करणेऽग्निनिर्णयः । ३०, मातापित्रोः चयाहसन्निपाते निर्णयः । ३१, सहमृताश्राद्धनिर्णयः । ३२, मातामहश्राद्धं भाद्रशुक्लपौर्णमास्यां कार्यं न वेत्यस्य निर्णयः । ३३, नान्दीश्राद्धनिर्णयः । ३४, अग्न्याधाननिर्णयादि । ३५, आधानेऽधिकारिनिर्णयः । ३६, नित्यहोमविध्यादि । ३७, दत्तकपुत्रग्रहणविधिः । ३८, तीर्थयात्रानिर्णयः । ३९, सापिण्ड्यनिर्णयादि । ४०, ब्राह्मणस्य मांसभक्षण विचारः । ४१, दत्ताप्रदाननिर्णयादि । ४२, कर्तुः पत्न्यां रजस्वलायां चयाहश्राद्धनिर्णयः । ४३, स्तेयान्यमहापातके प्रायश्चित्तं । ४४, यवपलमाषादिमानद्रव्यनिर्णयः । ४५, कोटिहोमादिनिर्णयश्च ।

No. 868. मुक्तावलीप्रकाशः ।

Colophon. पञ्चमः पादः ।

विषयः । ऋग्दैवमन्त्रभेदनिर्णयः । (सप्तमाध्यायावध्यस्य प्रारम्भः अतः प्रारम्भखण्डितमिदं ।)

No. 909. सौभाग्यतन्त्रं ।

Substance, country paper, 9½ × 4 inches. Folia, 10. Lines, 10 on a page. Extent, 300 s'lokas. Character, Nágara, Date, Sm. 1850. Place of deposit, Varáhanagara, 24-Parganás, Bábu S'ambhuchandra Mukhopádhyáya. Appearance, old; the leaves are worm-eaten. Verse. Incorrect.

Saubhágya Tantra. A Tántric compilation, containing directions for formal recitation (*Páráyana*) of certain *víja mantras* under specified conditions. The word *páráyana* is employed to indicate all formal readings, whether of víja mantras or of particular works, within stated times, or under specified restrictions. The practice is said to have originated since the time of Parikshit, the grandson of Arjuna, who heard the Mahábhárata recited in course of seven days. He was cursed by a Bráhman to be bitten by a serpent in seven days, and, knowing the curse to be infallible, he devoted those days to hearing the mighty deeds of his ancestors as described in the great epic. Portions of the Vedas, the Puráṇas, and the Rámáyaṇa, are now frequently made the subject of páráyaṇa. The time extends from three days to three months. The other conditions are fasting and abstinence of various kinds. In the case of víja mantras the number of times they are to be

repeated within a given time, and in particular postures are the principal conditions. Contents: 1, Time meet for repeating víja mantras. 2, General conditions for repeating mantras. 3, Sixteen primary conditions. 4, Different kinds of Páráyaṇa. 5, Páráyaṇa of the mantras sacred to the Vídyás (forms of Durgá). 6, Páráyaṇa of the name of a god or goddess. 7, A form of Páráyaṇa called *Tattva;* 8, Ditto called *Hañsa.* 9, Ditto called *chakra.* 10, Ditto called *Ramá.* 11, Ditto called *Ámnáya.*

Beginning. अथ + कटसानन्दनिष्यन्दाम्नतविग्रहां ।
चिन्मात्ररूपिणीं विद्यां वन्दे स्वानन्दसुन्दरीं ॥
अथ वक्ष्ये विस्तरेण पारायणविधिं परं ।
यस्य विज्ञानमात्रेण साक्षात्परशिवो भवेत् ॥

End. एवं यः कुरुते भक्त्या पारायणक्रमाज्जपः ।
मानुषे वर्त्तमानोपि साक्षात्परशिवः परः ॥

Colophon. इति श्रीमत्सौभाग्यतन्त्रे पारायणविधौ आम्नायपारायणनिरूपणं नामैकादशः पटलः ।

विषयः । १ पटले, जपकालः ; २, मन्त्रपारायणलक्षणं । ३, षोड़शाङ्गविधानोक्तबीजतत्त्वकथनादि । ४, पारायणभेदाः । ५, विद्यामन्त्रपारायणकथनादि । ६, नामपारायणकथनं । ७, तत्त्वपारायणकथनादि । ८, हंसपारायणलक्षणकथनादि । ९, चक्रपारायणलक्षणकथनादि । १०, रमापारायणलक्षणकथनादि । ११, आम्नायपारायणलक्षणकथनादि ।

No. 910. रससङ्केतकलिका ।

Substance, country paper, $12\frac{3}{4} \times 6\frac{1}{2}$ inches. Folia, 14. Lines, 11 on a page. Extent, 357 s'lokas. Character, Nágara. Date. ? Place of deposit, Varáhanagara, 24-Parganás, Bábu S'ambhuchandra Mukhopádhyáya. Appearance, old. Verse. Generally correct.

Rasasañketa-kaliká. A treatise on the preparation of metallic medicines. By Chámuṇḍa, a Káyastha of the Naigeya clan. The MS. is incomplete, some unknown portion of the end being wanting. Contents: 1, Mercury, its purification and oxidation; tests of perfect oxidation, virtues of its various oxides. 2. Oxidation of iron, gold, copper, &c. 3. Medicinal preparations with poisons. 4. Medicinal preparations with mercury.

Beginning. शिवं नत्वा रसाधीशं चण्डः कायस्थकुम्भभूः ।

करोति रससङ्केतकलिकाभीष्टसिद्धिदाम् ॥ अथ पारदोत्पत्तिः ।

End. (खण्डितत्वात्परिशमाप्तिवाक्यादिकं नास्ति। ग्रन्थकर्तुर्नामद्वयं प्रारम्भवाक्योक्तं, चण्ड इति, "इति नैगमकायस्थचामुण्डकृतायां रससङ्केतकलिकायां प्रथमोल्लासः, एतद्वाक्योक्तं" चामुण्ड इति । कुत्रचित् नैगमेतिविशेषणं न दृश्यते) ।

विषयः । १ उल्लासे, पारदशोधनभस्मीकरणप्रकारः । पारदभस्मपरीक्षा । पारदभस्मगुणकीर्त्तनादि । २, लौहस्वर्णरौप्यताम्रादिधातुभस्मीकरणादिकथनं। ३, विषौषधकरणप्रकारादि । ४, रसौषधकरणप्रकारादि ।

No. 911. मन्त्रचन्द्रिका ।

Substance, country paper, $10\frac{3}{4} \times 4$ inches. Folia, 36. Lines, 11 on a page. Extent, 1100 s'lokas. Character, Nágara. Date, Sm. 1855. Place of deposit, Varáhanagara, 24-Parganás, Bábu S'ambhuchandra Mukhopádhyáya. Appearance, decayed. Prose. Generally correct.

Mantra-chandriká. Víja-mantras of various gods and goddesses and the ritual appropriate for worshipping them. The work is divided into nine chapters (*prákas'as*), and embraces the names, besides those of the leading gods and goddesses, of the planets, and the demoniac attendants of Síva and Durgá.

Beginning. आरक्ताभं त्रिनेत्रं पृथुजठरतरं वेदहस्तान्दधानं

विभ्राणं मौलिदेशे हिमकरशकलं दानधाराक्तकुम्भं ।

ब्रह्मेन्द्राद्यैः समस्तैरमरपरिवृतैः सेवितं शुभ्रदन्तं

भोगीन्द्राद्यं प्रसन्नं सकलशुभकरं तं भजेहं गजास्यं ॥ १ ॥

आदौ गणपतेर्मन्त्राः शिवायास्तदनन्तरम् ।

ततः कृष्णस्य सूर्यस्य शम्भोरुक्ता यथाक्रमम् ॥ २ ॥

अथ क्रमेण गणेशादीन् स्मृत्वा तेषां मन्त्रा मन्त्रभेदाश्च लिख्यन्ते ।

End. इति विन्यस्य। ओं अग्नये हृत्। अम्बकाय शिरः। ओं त्रिनेत्राय शिखा० । ओं वशिष्ठाय कवच० । ओं चग्निवीर्याय नेत्र० । ओं रुद्रदेवतायास्त्राय फट्। इति मन्त्रैः षडङ्गं विधाय ।

Colophon. इति मन्त्रचन्द्रिकायां नवमः प्रकाशः । इति शिवप्रकरणं समाप्तम् ।

विषयः। १ प्रकाशे, गणेश—वक्रतुण्ड—वीरगणेश—लक्ष्मीगणेश—शक्तिगणेश—हरिद्रागणेश-मन्त्रादिकथनं। २, वाग्वादिनी—हंसवागीश्वरी—बाला—भैरवी—कामेश्वरी—राजमातङ्गी—मन्त्रादिकथनं। ३, भुवनेश्वरी—दुर्गा—जयदुर्गा—लक्ष्मी—अन्नपूर्णा-मन्त्रादिकथनं। ४, अश्वारूढा—गौरी—ज्येष्ठलक्ष्मी—वह्निवासिनी—शिवदूती—त्रिकण्टकी—वगलामुखी—मन्त्रादिकथनं। ५, उग्रतारा—दक्षिणकालिका—धूमावती—भद्रकाली—महाकाली—उच्छिष्टचाण्डालिनी—धनदयक्षिणी—मन्त्रादिकथनं। ६, वासुदेव—लक्ष्मीवासुदेव—हरिहर—वामन—हयग्रीव—वराह—सुदर्शन—पुरुषोत्तम—मन्त्रादिकथनं। ७, हृषीकेश—श्रीधर—नरसिंह—राम—सीता—लक्ष्मण—हनुमन्—मन्त्रादिकथनं। ८, गोपाल—कामदेव—कार्त्तवीर्यार्जुन—सूर्य—चन्द्र—भौम—बुध—बृहस्पति—शुक्र—शनैश्चर—राहु—केतु—वह्नि—मन्त्रादिकथनं। ९, शिव—दक्षिणामूर्त्ति—मृत्युञ्जय—अघोर—नीलकण्ठ—क्षेत्रपाल—वटुक—त्र्यम्बक—मन्त्रादिकथनं।

No. 912. मयशिल्पं वा प्रतिष्ठातन्त्रं।

Substance, English paper, 8 × 6 inches. Folia, 98. Lines, 19—20 on a page. Extent, 1900 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Bábu Rájendralála Mitra. Appearance, new. Verse. Incorrect and corrupt.

Maya Mata, alias *Maya S'ilpa*, alias *Pratishṭhá Tantra*. A treatise on architecture founded on the canons of Maya, a Dánava, who is reputed to have built a palace for Yudhishṭhira. The work is written in the Tántric style in anushṭup verses; but it is so full of lacunæ, and obscure terms and phrases that it is in many places unintelligible. The author's name is not given; and the last line and the colophon suggest the idea of the work being incomplete. But such as it is it is the most complete treatise on architecture that has yet come to hand, and I feel grateful to Mr. A. C. Burnell for having procured it for me from the Library of the Rájá of Tanjore. It is remarkable in being less devoted to religious ceremonies and astrological disquisitions than the Mánasára. Contents; 1, Architecture defined. 2—3, Examination and purification of the ground intended to be built upon. 4, Measurement of land. 5, Ascertainment of the points of the compass. 6, Fixing of pegs to demarcate the spots for building. 7, Offerings to gods. 8, Measure of villages and the rules for

laying them out. 9, Ditto of towns. 10, Directions for laying out squares, octagons, &c. 11, Laying the foundation and the ceremonies to be observed on the occasion. 12, Plinth. 13, Base. 14, Pillars. 15, Stone-work. 16, Joining or cementation. 17, Spires or tops of houses. 18, One-storied houses. 19—20, Two-storied houses. 21, Three, four, &c.,-storied houses. 22, Gopuras or gates. 23, Maṇḍapas. 24, Out-offices, barns, treasuries, &c. 25, *Maṇḍapa sabhás*, or open courts. 26, Linear Measure—of finger-breadths, &c.

Beginning. प्रणम्य शिरसा देवं सर्वज्ञं जगदीश्वरं ।
तं दृष्ट्वा ज्ञातत्त्वं श्रुत्वा शास्ति शास्त्रं यथाक्रमं ॥
तैतलानां मनुष्याणां वस्त्रादीनां सुखोदयम् ।
प्राज्ञो मुनिर्मयः कर्त्ता सर्वेषां वस्तुकर्मणां ॥
आदौ वास्तुप्रकारन्तु भूपरीक्षापरिग्रहम् ।
मानोपकरणं चैव शङ्कुस्थापनमार्गकं ॥
सुपदं सुरविन्यासं बलिकर्मविधिं तथा ।
ग्रामादीनाञ्च विन्यासं लक्षणं नगरादिषु ॥
भूलम्भस्य विधानं च गर्भविन्यासलक्षणं ।
उपपीठविधानं चाधिष्ठानानां च लक्षणं ॥
स्तम्भानां लक्षणं चैव प्रस्तरस्य च लक्षणं ।
सन्धिकर्मविधानं च शिखराणां तु लक्षणं ॥
एकभूमिविधानं च द्वितलस्य तु लक्षणं ।
त्रितलस्य विधानं च चतुर्भूम्यादिलक्षणं ॥
सशालपरिवाराणां गोपुराणां तु लक्षणं ।
मण्डपादिविधिं चैव शालानां चैव लक्षणं ॥
गृहविन्यासमार्गं च गृहवेशनमेव च ।
राजवेश्मविधानं च द्वारविन्यासलक्षणं ॥
यानानां शयनानां च लक्षणं लिङ्गलक्षणं ।
पीठस्य लक्षणं सम्यगनुकर्मविधिं तथा ॥
प्रतिमालक्षणं देवदेवीनां मानलक्षणं ।
चक्षुरुन्मीलनं चैव सङ्क्षिप्याहं यथाक्रमं ॥
अमर्त्यांश्चैव मर्त्यांश्च यत्र यत्र वसन्ति हि ।
तद्वतस्थिमतज्ञै(?)स्तद्भेदं च वदाम्यहं ॥

भूमिप्रासादजालं च शयनं च चतुर्विधं ।
भूरेव मुख्यवस्तुः स्यात्तत्र जातानि यानि हि ॥
प्रासादादीनि वस्तूनि वस्तुत्वाद्वसुसंश्रयात् ।
वस्तून्येव हि तान्येव प्रोक्तान्यस्मिन् पुरातनैः ॥
वर्णगन्धरसाकारा दिक्छब्दस्य शतैरपि ।
परीक्ष्यैव यथायोग्यं गृहीतावधिनिश्चिता ॥
या सा भूमिरिति ख्याता वर्णानां च विशेषतः ।
द्विविधं तत्समुद्दिष्टं गौणमङ्गीत्यनुक्रमात् ॥
ग्रामादित्येव गौणादि भवत्यङ्गी मही मता ।
सभाशालाप्रपारङ्गमण्डपं मन्दिरं तथा ॥
प्रासाद इति विख्यात+शिविका+कालयं ।
स्यन्दनं चैवमानीकं यानमित्युच्यते बुधैः ॥
पञ्चमं चण्डिकाकालपञ्जरं फलकासनं ।
पर्यङ्कं बालपर्यङ्कं शयनं चैवमादिकं ॥
चतुर्णामधिकाराणां भूरेवादौ प्रचक्ष्यते ।

End. त्रितालं किन्नराणां तु मत्स्यानां तु द्वितालकं ॥
अण्डजातं तथैकं स्यात् पिशाचानां तु विंशतिः ।
अङ्गुल्यः सम्यगाख्याताः प्रासादलक्षणं शृणु ॥
इति सुप्रभेदे प्रतिष्ठातन्त्रे क्रियापादेऽङ्गुलिविधानपटल एकोनत्रिंशः ।

विषयः । १ अध्याये, वास्तुलक्षणं । २, ३, भूपरीक्षाभूमिशोधनादि । ४, भमानप्रकारः । ५, दिक्साधनादि । ६, शङ्कुद्वारा पीठादिस्थाननिर्देशः ७, देवताबलिः । ८, ग्राममानतत्संस्थापनप्रकारः । ९, नगरमानतत्संस्थापनप्रकारः । १०, अष्टास्त्रचतुरस्रवृत्तभूमिकरणप्रकारादि । ११, भूमिमध्यस्थले चतुरस्रगर्त्तखननजलपूरणादिस्वरूपगर्भन्यासविधिकथनं । १२, उपपीठविधानं । १३, अधिष्ठानविधानं । १४, स्तम्भपरिमाणं, तन्निर्माणद्रव्यकथनं । १५, प्रस्तरकर्मकथनं । १६, सन्धिकर्मकथनं । १७, शिखरकरणादि । १८, एकभूमिगृहविधानं । १९, २०, द्वितलगृहविधानं । २१, त्रितलचतुस्तलादिविधानं । २२, गोपुरविधानं । २३, मण्डपविधानोपदेशः । २४, प्रासादशालादिविधानोपदेशः । धनधान्याद्यागाराणां स्थानदिङ्निर्णयपरिमाणलक्षणादि च । २५, मण्डपसभाविधानादि । २६, अङ्गुलिमानादिप्रकारः । (अङ्गुल्यः सम्यगाख्याताः प्रासादन्तलक्षणं शृणु, इत्युक्तत्वादसम्पूर्णमिदमित्यनुमीयते ।)

No. 913. सभातरङ्गसारः ।

Substance, English paper, 11 × 5¾ inches. Folia, 37. Lines, 10—11 on a page. Extent, 310 s'lokas. Character, Nágara. Date, Sm. 1926. Sk, 1791. Place of deposit, Varáhanagara, 24-Parganás, Bábu S'ambhuchandra Mukhupádhyáya. Appearance, new. Verse. Generally correct.

Sabhá-tarangasára. A poetical miscellany. By Jagannátha Mis'ra. Contents: 55 S'lokas in praise of greatness. 3 S. Do. grave men. 48 S. Condemnation of wicked men. 8 S. Praise of merit. 12 S. Do. liberal-mindedness. 22 S. The song of the chátaka. 11 S. The song of the Bhramora (large blackbee).. 1 S. Do. silk-cotton-tree 4 S. Do. of the Parrot. 2, Do. the good tree. 8 S. Do. of the Kokila. 5 S. Do. of the crane. 5 S. Do. of the goose. 4 S. Do. of the crow. 9 S. Do. of the elephant. 8 S. Do. of the lion. 5 S. Do. of the deer. 5 S. Do. of the sandal tree. 2 S. Do. of musk. 1 S. Do. gum tree. 8 S. On trees. 7 S. Places unfit for habitation. 8 S. Song of the firefly. 9 S. Song of the moon. 1 S. Song of water. 7 S. Song of the clouds. 4 S. Do. of the lotus. 2 S. Do. of the mountain. 2 S. Disruption of friendship. 3 S. Condemnation of bad poets. 2 S. Do. of flatterers. 8 S. Desire. 2 S. Absence of pride. 2 S. Advantage of one's own place. 3 S. The kind of wife to be divorced. 2 S. Characteristics of a good woman. 4 S. Song of the River. 2 S. Pride condemned. 8 S. Praise of valorous men. 21 S. Advantage of wealth. 22 S. Miserliness condemned. 21 S. Evils of poverty. 6 S. Evils of begging.

Beginning. नत्वा शिवं प्रथमतः प्रणिपत्य चण्डीं वाग्देवतां तदनु तातपदं गुरूंश्च ।
सङ्गृह्यते किमपि यत् सुजनास्तदत्र चेतो विधातु मुदिताः कृपया मयि स्युः ॥ १॥
जगन्नाथेन मिश्रेण तेनैव क्रियतेऽधुना ।
नाम्ना सभातरङ्गोऽयं सङ्ग्रहः सत्सुखावहः ॥ २ ॥

End. आघ्रातं परिलीनमुग्रनखरैः क्षुण्णं स्वयं चर्वितं,
क्षिप्तं यद्दत नीरसत्वकुपितेनेति व्यथां मा कृथाः ।
हे माणिक्य तवैतदेव कुशलं यद्वानरेणाग्रहा-
दन्तःसत्त्वनिरूपणाय सहसा चूर्णीकृतो नाश्मना ॥ ६ ॥

Colophon. इति श्रीसभातरङ्गसारः ।

६ २ ९ १
वीरविक्रमशकस्य वत्सरैः सम्मितैरसद्विनन्दकेवलैः। (१९२६)
१ ९ ७ १
शालिवाहनस्य तथैव धीमत एकनन्दगिरिकेवलैर्युते॥ (१७९१)
वृषराशिरविगे सितपक्षे सर्पस्वामिनि तिथौ रविवारे।
ख्यातकाशिपुरे सुरमणीये लेखितं शुभपुस्तकमेतत्॥

विषयः। ५५ पद्यैर्महद्व्यक्तिविशेषाणां प्रशंसा। त्रिभिः पद्यैर्धीरजनप्रशंसा। ४८ पद्यैर्दुर्जननिन्दा। ८ पद्यैर्गुणप्रशंसा। १२ पद्यैरुदारव्यक्तिप्रशंसा। २२ चातकान्योक्तिः ११ पद्यैर्भ्रमरान्योक्तिः। १ पद्येन शाल्मल्यन्योक्तिः। ४ पद्यैः शुकान्योक्तिः। २ पद्याभ्यां सद्वृक्षान्योक्तिः। ८ पद्यैः कोकिलान्योक्तिः। ५ पद्यैर्वकान्योक्तिः। ५ पद्यैर्हंसान्योक्तिः। ४ पद्यैः काकान्योक्तिः। ९ पद्यैर्गजान्योक्तिः। ८ पद्यैः सिंहान्योक्तिः। ५ पद्यैर्मृगान्योक्तिः। ५ पद्यैश्चन्दनान्योक्तिः। २ पद्याभ्यां कस्तूर्युक्तिः। १ पद्येन बाबुलान्योक्तिः। ८ पद्यैः सामान्यवृक्षान्योक्तिः। ७ पद्यैः परित्याज्यदेशाद्युक्तिः। ८ पद्यैः खद्योतान्योक्तिः। ९ पद्यैश्चन्द्रान्योक्तिः। १ पद्येन जलान्योक्तिः। ७ पद्यैर्मेघान्योक्तिः। ४ पद्यैः कमलान्योक्तिः। २ पद्याभ्यां पर्वतान्योक्तिः। २ पद्याभ्यां मैत्रीभङ्गहेतुकथनं। २ पद्यैः कुकविनिन्दा। २ पद्याभ्यां सेवकनिन्दा। ८ पद्यैस्तृष्णावर्णनं। २ पद्याभ्यां निरहङ्कारितावर्णनं। २ पद्याभ्यां स्थानप्रधानाधिकतावर्णनं। ३ पद्यैः परित्याज्यशीललक्षणनिरूपणं। २ पद्याभ्याम् उत्तमशीललक्षणोक्तिः। ४ पद्यैर्नृपान्योक्तिः। २ पद्याभ्यां गर्वपरिहारः। ८ पद्यैस्तेजस्विनां प्रतापवर्णनं। २१ पद्यैर्धनप्रशंसा। २२ पद्यैर्धनसञ्चयादिनिषेधः। २१ पद्यैर्दारिद्र्यनिन्दा। ६ पद्यैर्याचकनिन्दा।

No. 914. षोड़शपिण्डदानप्रयोगः।

Substance, country paper, 12½ × 3 inches. Folia, 4. Lines, 6 on a page. Extent, 45 s'lokas. Character, Bengali, Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Shodas'apinḍa-dána-prayoga. A treatise on the offering of sixteen funeral cakes to the manes at certain times. Anonymous.

Beginning. अथ षोड़शपिण्डदानप्रयोगः। तत्र संवत्सरप्रदीपे। अमावास्यान्तु(?)कन्यार्के तीर्थप्राप्तौ तथा नृपः। श्राद्धं कृत्वा विधानेन दद्यात् षोड़शपिण्डकमिति।

End. मित्राणि सख्यः पशवश्च दृचा दृष्टा ह्यदृष्टाश्च कृतोपकाराः ।
जन्मान्तरे ये मममङ्गताश्च तेभ्यः स्वधापिण्डमहं ददामि ॥
षन्नोनविंशतिपिण्डे षोड़शपिण्डकं पारिभाषिकं पश्चाभवत् ।

Colophon. इति षोड़शपिण्डदानं ।

विषयः । अमावास्यायां कन्यार्के तीर्थे च कर्त्तव्यस्य षोड़शपिण्डदानस्य विधिः।

No. 915. जकारभेदः ।

Substance, country yellow paper, 15 × 3¼ inches. Folia, 5. Lines, 6 on a page. Extent, 93 s'lokas. Character, Bengali. Date, Sk. 1661. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Jakárabheda. A vocabulary of words containing the letter ज, designed to point out what words have the letter ज and what the letter य having the sound of ज. By Purushottama.

Beginning. (प्रथमपत्राभावात प्रारम्भवाक्यादिकं नास्ति ।)

End. जयन्ती जानकी जय्या जिज्ञासा जनको विजः ।
पूजटीसुज+स्वैव तर्जन्यपि च वर्गजः ॥

Colophon. इति पुरुषोत्तमकृते जकारभेदः समाप्तः ।

विषयः । तालव्यमूर्द्धन्यदन्त्यसकारवतां मूर्द्धन्यणकारवतां वर्गीयजकारवतां च कतिपय शब्दानामत्र सङ्ग्रहः ।

No. 916. पार्थिवलिङ्गपूजनविधिः ।

Substance, country yellow paper, 11¾ × 4½ inches. Folia, 3. Lines, 8 on a page. Extent, 64 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Párthivalingapújanavidhi. An extract from one of the Tantras, containing directions for worshipping S'iva in the form of a Lingam made of earth. Anonymous.

Beginning. कथयस्व महाबाहो लोकानां प्रीतिवर्द्धिकाम् ।
इदलिङ्गशिवस्यार्चा सूचिता न प्रकाशिता ।

कथयस्व साधना देव यदि स्नेहोऽस्ति मां प्रति ।

End. सहस्रपूजनाद्देवि लभते वाञ्छितं फलम् ।

लक्षस्य पूजनाद्देवि शिवत्वं प्राप्नुयाद् ध्रुवं ॥ समाप्तश्चेदम् ।

विषयः । मृण्मयपार्थिवलिङ्गपूजनविधिकथनं ।

No. 917. दुर्गोत्सवविवेकः ।

Substance, country yellow paper, 15½ × 3 inches. Folia, 15. Lines, 6—7 on a page. Extent, 340 s'lokas. Character, Bengali. Date, Sk. 1766. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Durgotsava-viveka. A treatise on the propriety of worshipping Durgá, in spring and autumn, or the great national rite of the Durga-pujá. By S'úlapáṇi Bhaṭṭáchárya. The work forms a part of the author's great compendium of modern Hinduism, called the *Viveka.*

Beginning. नत्वेशानीपदाम्भोजं भ्रमद्भ्रमरशोभितं ।

दुर्गोत्सवविवेकस्तु क्रियते शूलपाणिना ॥

End. विशेषतस्तत्र बोधनप्रक्रिया नास्ति ।

बोधिताया बोधनासम्भवादिति प्राग् विवृतम् ।

होमादिकन्तु पूर्ववज्ज्ञेयमिति दिक् ।

Colophon. इति महामहोपाध्यायश्रीशूलपाणिभट्टाचार्यविरचितो दुर्गोत्सवविवेकः समाप्तः ।

विषयः । शरदि वसन्ते च देवीपूजा कथं कर्तव्येत्यादेर्विचारः ।

No. 918. व्रतकालविवेकः ।

Substance, country yellow paper, 15½ × 3 inches. Folia, 14. Lines, 6 on a page. Extent, 260 s'lokas. Character, Bengali. Date, Sk. 1766. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Vratakála-viveka. Times meet for performing vratas or optional fasts. By S'úlapáṇi Bhaṭṭáchárya.

Beginning. नानामुनिमतद्वैधजातसंशयकृन्तनः ।

व्रतकालविवेकोऽयं क्रियते शूलपाणिना ॥

End. कालविशेषानियन्त्रितमित्येतद्सम्भवाच्च ।
प्रतिष्ठाविधानञ्च प्रतिष्ठाविवेकेऽनुसन्धेयम् ।

Colophon. इति साङ्डियानमहामहोपाध्यायश्रीशूलपाणिविरचितः व्रतकालविवेकः समाप्तः ।

विषयः । व्रतलक्षणकथनादि । व्रतानुष्ठानादिकथनं । व्रतानुष्ठाने विहितकालः । जन्माष्टमीव्रतनिर्णयः । श्रीरामनवमीव्रतनिर्णयः । एकादशीव्रतनिर्णयः । सावित्रीचतुर्दशीव्रतनिर्णयः । शिवरात्रिव्रतनिर्णयः । सङ्क्रान्तिव्रतनिर्णयः । व्रतप्रतिष्ठाकालनिर्णयश्च ।

No. 919. सङ्क्रान्तिनिर्णयः ।

Substance, country yellow paper, $15\frac{1}{2} \times 3$ inches. Folia, 9. Lines, 6 on a page. Extent, 170 s'lokas. Character, Bengali. Date, Sk. 1766. Place of deposit, Calcutta, Government of India. Appearance, new, but soiled. Prose. Generally correct..

Sańkránti-nirṇaya. Rules for ascertaining the conjunctions of months, or the time when the sun passes from one sign of the zodiac to another, the characters of those conjunctions, what should be done at such times, and what avoided. Anonymous.

Beginning. अथ सङ्क्रान्तिव्यवस्थानिर्णयः । आदौ सङ्क्रां विनिर्णीय ततो राशिस्थनिर्णयम् ।
व्यवस्थानिर्णयं पश्चात् करिष्यामि न संशयः ॥

End. सङ्क्रान्त्यां पक्षयोरन्ते द्वादश्यां निशि सन्ध्ययोः ।
तुलसीं ये विचिन्वन्ति ते छिन्दन्ति हरेः शिरः ॥

Colophon. इति सङ्क्रान्तिनिर्णयः समाप्तः ।

विषयः । नन्दादिसप्तसङ्क्रान्तिनामकथनादि । मेषादिराशिस्थद्वादशसङ्क्रान्तिनिर्णयः । सङ्क्रान्तौ निषिद्धानिषिद्धकर्मकथनादि च ।

No. 920. शुद्धितत्त्वकारिका ।

Substance, country yellow paper, $15\frac{1}{2} \times 3$ inches. Folia, 19. Lines, 6 on a page. Extent, 360 s'lokas. Character, Bengali. Date, Sk. 1767. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Generally correct.

S'uddhitattvakáriká. Memorial verses embodying the canons of Raghunandana's S'uddhitattva, or rules for the observance of mourning, and on personal impurities. By Harináráyaṇa S'armá.

Beginning. सर्वस्वरूपं श्रीरामं प्रणम्य भक्तवत्सलं ।

कारिकां शुद्धितत्त्वस्य वितनोति यथामति ॥

End. किन्तु एकादशाहे चेत् श्राद्धं क्रियते तदा प्रेतपदोल्लेखेन ।

Colophon. इति श्रीहरिनारायणशर्मकृता शुद्धिकारिका समाप्ता ।

विषयः । जननमरणाशौचनिर्णयः ।

No. 921. अशौचमञ्जरी ।

Substance, country yellow paper, $12\frac{1}{2} \times 3\frac{3}{4}$ inches. Folia, 6. Lines, 5—6 on a page. Extent, 60 s'lokas. Character, Bengali. Date, Sk. 1770. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

As'auchamañjarí. Rules regarding mourning and the duties to be attended to during the first ten days after the death of a parent, kinsman, or other person for whom mourning has to be observed. Anonymous.

Beginning. प्रणम्य परमात्मानं नत्वा शम्भुं त्रिलोचनं ।

अशौचनिर्णयं वक्ष्ये प्रेतकर्म दशाह्निकं ॥

End. तैलौषध्यजि(नं)चैव पक्वापक्वस्वयंग्रहे ।

पण्येषु चैव सर्वेषु नाशौचं मृतसूतके ॥

Colophon. इत्यशौचमञ्जरी समाप्ता ।

विषयः । मरणाशौचनिर्णयः ।

No. 922. पदार्थकौमुदी ।

Substance, country yellow paper, $17 \times 3\frac{1}{4}$ inches. Folia, 199. Lines, 8 on a page. Extent, 7920 s'lokas. Character, Bengali. Date, Sk. 1627. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Padárthakaumudí. A commentary on the Náma-liṅgánus'ás'ana of Amara Siṅha. By Náráyaṇa Chakravartí.

Beginning. मन्दात्मजस्य कृष्णस्य साक्षाद्भगवतो मुदा ।
पदचिन्मकरन्दाय नमः संहृतिशान्तये ॥
अथ तत्त्वसारनिरूपणं ।

End. किञ्च प्रमाणवादीनां मन्त्राणामपि तत्परत्वमिति श्रीसनत्कुमारतन्त्रे व्यक्तं, त्रैलोक्यमङ्गलकवचे इति ।

Colophon. इति वस्तुतत्त्वे भगवत्तत्त्वं नाम सप्तमः परिच्छेदः ॥
ब्रह्मन्नीश हिरण्यगर्भ परमात्मन् वासुदेवाद्वय
ज्ञानश्रीलहरे स्मरेति नियतं निर्भेदतो मे नमः ।
संसारार्णवतारणैद्धयमतिः साक्षात् परं कारणं
तस्मात्सम्प्रति पण्डितः प्रतिदिनं कुर्वीत यत्नं महत् ॥
कृतानि सप्ततत्त्वानि श्रीराधाकान्तशर्मणा ।
कदाचिद्यदि वर्त्तन्ते पण्डितानां समीपतः ॥
तदा निवेदनं वक्तुः शृणुध्वं सद्विवेकिनः ।
पूर्वापरार्थदृष्ट्यैव यदि दोषोऽत्र वर्त्तते ॥
शोधितव्यः कृपावद्भिः क्षमध्वं वा दयारताः ।
लिखितं पञ्चतत्त्वं वै रामसुन्दरशर्मणा ॥
विद्यावागीशवर्य्येण श्रीमता पुण्यशालिना ।
शाके सप्तयुगाद्रिचन्द्रगणिते मासे मघौ वासरे
सूर्यस्येह महेशदिव्यनगरे कृष्णे दशम्यां तिथौ ।
ग्रन्थोयं शुभदः शुभो बहुमतः प्रातः समाप्तिं गतः
श्रीरामेश दयानिधान परमानन्दप्रभो पाहि तम् ॥
श्रीकृष्णप्रीतिमुद्दिश्य रचितो बहुयत्नतः ।
अतोऽत्र शब्ददोषोऽपि नैव दोषाय कल्पते ॥

विषयः । (अत्र सप्त परिच्छेदाः । तत्र प्रथमद्वितीयपरिच्छेदौ न स्तः, अतः खण्डितमिदम् ।) ३, परिच्छेदे मायामहत्तत्त्वादिपदार्थनिरूपणपूर्वकं सारतत्त्वनिरूपणं । ४, परमात्मतत्त्वनिरूपणं । ५, वासुदेवतत्त्वनिरूपणं । ६, निर्गुणब्रह्मतत्त्वनिरूपणं । ७, भगवत्तत्त्वनिरूपणं ।

No. 924. तान्त्रिकपूजापद्धतिः ।

Substance, country paper, 11½ × 5¼ inches. Folia, 10. Lines, 12 on a page. Extent, 250 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Tántrikapújá-paddhati. Guide to daily rituals according to the Tantras. Contents: Rules for the threefold Sandhyá worship; washing of the face on such occasions for Vaishṇavas; offering of Argha; certain manipulations called *nyása;* intellectually placing certain letters of the alphabet on fourteen different lotus-like organs of the body; *nyása* in connexion with different members of the body; intellectually placing certain deities on six different parts of the body; placing of those divinities on the organic and sensuous functions of the body; Práṇáyáma; placing of divinities in their proper places and on their respective seats; intellectual worship; arrangement of the instruments of worship; the worship of the seats of the gods; worship of the gods.

Beginning. अथ तान्त्रिकसन्ध्याप्रयोगः । आचम्य जले गङ्गे चेत्यादिना सूर्यमण्डलात्तीर्थमावाह्य मूलेन कुशेन भूमौ त्रिवारं जलं क्षिपेत् ।

End. संहारमुद्रया कृत्वा(?) तत्तेजः पुष्पैः सार्द्धं स्वहृदयमानयेत् । तत ऐशान्यां चतुष्कोणमण्डलं कृत्वा तत्र निर्माल्यशेषं ॐ विश्वक्सेनाय नम इति दद्यात् ।

Colophon. इति पूजापद्धतिः समाप्ता ।

विषयः । तान्त्रिकसन्ध्याविधिः । वैष्णवाचमनविधिः । सामान्यार्घस्थापनादिविधिः । कराङ्गुलीषु हृदयादिषड्ङ्गेषु च मातृकान्यासः । शरीरान्तस्थचतुर्दलपद्मे वशषसादिचतुर्वर्णन्यासः । सर्वाङ्गप्रत्याङ्गादिषु मातृकावर्णन्यासः । षड्ङ्गेषु केशवादिकीर्त्यादिदेवताद्वन्द्वन्यासः । पुनस्तत्र प्राणादि-मत्यादितत्त्वन्यासः । प्राणायमः । देवतापीठन्यासः । मानसपूजा । शङ्खस्थापनादिप्रकारः । पीठपूजा । देवतापूजा ।

No. 925. प्राणतोषिणी ।

Substance, country paper, 18½ × 6½ inches. Folia, 304. Lines, 13 on a page. Extent, 19,513 s'lokas. Character, Bengali. Date of printing Sk. 1743. Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose and Verse. Correct.

Beginning. हृदि स्थमपि दूरस्थं सर्वमाहृत्य तिष्ठति ।
यन्मह: परमं वीजं तदानन्दपदं नुमः ॥
रहः शश्चिभ्रता समं विविधकेलिमातन्वती
मुहुः स्मरमहोत्सवे शिवमुखाब्जचुम्बार्थिनी ।
दिगम्बरहृताम्बरा + + + + + मौलेस्थित
ह्रिया नतमुखी सदा चितिधरेन्द्रकन्यावतु ॥
मङ्गलानन्दवीजानि भक्तानामतिसन्ततम् ।
गुरूणां चरणाब्जानि पुनः पुनरुपास्महे ॥
ज्ञात्वा शास्त्रमशेषमादिविदुषामालोक्य नानामतं
हेरम्बाङ्घ्रिस(रोज) युग्ममलं नत्वानिभक्त्या सुधीः ।
श्रीनारायणपादपद्ममधुलिण्नारायणः श्रीनिधि-
र्यत्नेनामरपञ्जिकां वितनुते सङ्क्षेपतः सत्कविः ॥

End. इह ग्रन्थविस्तरभयान्नोक्तं तत् शिष्टानां पूर्वाचार्याणां च प्रयोगाज्ज्ञेयम् । यथा, स्त्री-पुंसयोः । विप्रचतुष्टयी, विप्रचतुष्टयः । गोधनानि पुंस्यपि नपुंसकेपि । पोटा स्त्री-त्याद्युदाहार्यमूह्यम् ।

Colophon. इति पदार्थकौमुद्याममरकोषटीकायां लिङ्गादिसङ्ग्रहवर्गार्थप्रकाशः । समाप्तोयं ग्रन्थः ।

विषयः । अमरकोषकाण्डत्रयार्थविवरणं ।

No. 923. वस्तुतत्त्वं ।

Substance, country paper, $11\frac{3}{4} \times 6\frac{1}{2}$ inches. Folia, 38. Lines, 14—15 on a page. Extent, 1090 s'lokas. Character, Bengali. Date, Sk. 1747. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally Correct.

Vastutattva. On the philosophy of the Vaishṇava faith, so treated as to establish the divinity of Kṛishṇa. By Rámasundara Vidyávágís'a. The work was composed in the S'aka year 1727, and originally comprised seven sections, of which the MS. under notice comprehends the last five. Contents: 3. Máyá, Mahattva and other categories described. 4. The great soul defined. 5. Vásudeva defined and described. 6. Brahma without attributes described. 7. Bhagaván described.

Prāṇatoshaṇī. A summary of the Tántric cult. The work was compiled by Rámatoshaṇa S'armá, under the patronage of Práṇakrishṇa Vis'vása, a zemindar of Khaḍadaha in the neighbourhood of Calcutta, and printed for private circulation in the S'aka year 1743. The name of the work is made up of the second word of the author's name, and the first of that of the patron. It comprises large extracts from the authentic Tantras.

Beginning. जड़े काव्यं दावी द्रुतमुदकविन्दौ जलधितां
पयोधौ पाथोणत्वमपि न तु सर्वैकवशगा ।
गिरौ धूलीत्वेऽप्यत्वमचलवरत्वं रजसि वा
विचित्रेच्छासैरं जयति जयतारेत + + + ॥ इत्यादि ।
(खण्डितत्वात्समाप्तिवाक्यादिकं नास्ति ।)

विषयः । (विषयस्तस्य सूचीपत्रे द्रष्टव्यः ।)

No. 926. लिङ्गादिसङ्ग्रहटीका ।

Substance, country yellow paper, $12\frac{1}{2} \times 3$ inches. Folia, 17. Lines, 7—11 on a page. Extent, 330 sl'okas. Character Bengali. Date, Sk. 1759. Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose. Generally correct.

Liṅgádisaṅgraha-ṭíká. A commentary on the Liṅgádisaṅgraha,—a treatise on grammar. By Bharata Mallika.

Beginning. सलिङ्ग इत्यादि । सलिङ्गशास्त्रैः पाणिनिवररुचिचन्द्रादिप्रणीतवक्ष्यमाणलिङ्ग-लक्षणसूत्रसहितैः । इत्यादि ॥

End. इति प्रयोगाच्च लज्जापर्यायत्वेन स्त्रीत्वे प्राप्ते पुंस्त्वं । एवमन्यत्रापि ज्ञेयम् । समाप्ता लिङ्गसङ्ग्रहादिटीका ।

Colophon. इति श्रीभरतमल्लिककृता टीका ।

विषयः । कृत्तद्धितान्तादिशब्दानां लिङ्गनिर्द्धारणपरस्य लिङ्गादिसङ्ग्रहस्य वाक्यार्थविवरणं ।

No. 927. शब्दार्थसारमञ्जरी ।

Substance, country yellow paper, $12\frac{1}{2} \times 3$ inches. Folia, 30. Lines, 6 on a page. Extent, 525 s'lokas. Character, Bengali. Date, Sk. 1761. Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose. Generally correct.

S'abdárthasára-manjarí. A treatise on the syntax of the Sanskrit language. By Jayakrishna S'armá.

Beginning. हेरम्बचरणद्वन्द्वं विघ्ननाशकरं परं ।
प्रणम्य जयकृष्णेन क्रियते सारमञ्जरी ॥ १ ॥
तत्र प्रथमतः कालनिरूपणम् ।

End. आलोक्य विविधग्रन्थान् विचार्य च पुनः पुनः ।
कृतेयं जयकृष्णे न शब्दार्थसारमञ्जरी ।

Colophon. इति जयकृष्णशर्मविरचितशब्दार्थसारमञ्जरी समाप्ता ।

विषयः । आख्यातार्थनिरूपणं। शाब्दबोधप्रकारः । कारकविचारः । समासवादः । एवंशब्दविचारादि । सर्वनामपदशक्तिविचारः । एवशब्दविचारः । उपसर्गविचारः। क्तप्रत्ययविचारः। नञर्थकथनं। वैधहिंसाविचारः । पदशक्तिनिरूपणं । शक्तिग्राहकपदार्थनिरूपणं। शब्दविचारः। वाचकत्वस्य लक्षणं। वीप्साविचारः। शाब्दबोधप्रकारान्तरं। एकादिपरार्द्धपर्यन्तसङ्ख्याशब्दविचारः ।

No. 928. गीतगोविन्दटीका ।

Substance, country yellow paper, $12\frac{1}{2} \times 3$ inches. Folia, 34. Lines, 8—11 on a page. Extent, 134 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Gítagovinda Ṭíká. A commentary on the Gítagovínda of Jayadeva. Anonymous.

Beginning. टीका। राधामाधवयो रहःकेलयो जयन्ति। निभृतक्रीडा जययुक्ता भवन्तु इत्यर्थः। कुत्र यमुनाकूले। किम्भूतयोः। इत्थं अनेन प्रकारेण पथ्यङ्गोत्स्खलितयोः(?) । नन्दनिदेशमाह। हे राधे तत् तस्मात् त्वमेव इमं श्रीकृष्णं गृहं प्रापय आनय इत्यर्थः।

End. किम्भूतं । विरहानलदग्धपुरुषं यो मृतस्य वपुर्देहोऽग्निना दह्यते दग्धस्य मृतस्य विनाशस्य पुणो भवति इति विनाशः ॥ ५ ॥ (ख०)

विषयः । जयदेवकविविरचितगीतगोविन्दमहाकाव्यस्य व्याख्यानं ।

No. 929. बालबोधिनीनाम्नी गीतगोविन्दटीका, मूलसहिता ।

Substance, country paper, $10\frac{1}{4} \times 5\frac{3}{4}$ inches. Folia, 42. Lines, 14—17 on a page. Extent, 2250 s'lokas. Character, Bengali. Date, ? Place oi deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Bálabodhíni. A commentary on the Gítagovínda of Jayadeva. Anonymous. Jayadeva is said in this MS. to have been the son of Vámadeva and grandson of Bhojadeva.

Beginning. टीकाप्रा० । श्रीचैतन्यकृपासीधुकणोन्मत्तेन केनचित् ।
टीका सङ्गृह्यते गीतगोविन्दस्य समासतः ॥
स्वयं बोद्धुमभिप्रायं जयदेवमहामतेः ।
क्रमेणोपक्रमादेषा ग्रथ्यते बालबोधिनी ॥

मूलप्रा० । मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥

End. टीकास० । अतः सर्गोऽयं सम्वृद्धिमदाख्यसम्भोगरसानन्दितः पीताम्बरः प्रियाधीनत्वेन तद्वर्णवर्णवसनप्रियः श्रीकृष्णो यत्र स इति ।
इति स्वपितृमातृकस्मरणपूर्वकपराशरादिमतज्ञा एवास्याधिकारिण इति तान् प्रत्याशिषयति भोजेति । भोजदेवनामास्य पिता वामदेवीनाम्नी जननी पराशरादीनां ये प्रियाः तन्मतज्ञास्तेष्वपि ये बन्धवस्तन्मतसारश्रीराधामाधवरहःकेलिज्ञानेन बन्धुत्वं प्राप्तास्तेषामेव कण्ठे भूषणवत् सदा गीतगोविन्दाख्यं कवित्वमस्तु ।

मूलस० । यच्छन्ति यावज्जावं शृङ्गारसारस्वतमिह जयदेवस्य विश्वग्वचांसि ।
इति श्रीजयदेवकृतौ गीतगोविन्दे महाकाव्ये स्वाधीनभर्तृकावर्णने सुप्रीतपीताम्बरो नाम द्वादशः सर्गः ।
श्रीभोजदेवप्रभवस्य वामदेव्यात्मजश्रीजयदेवकस्य । पराशरादिप्रियबन्धुकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥

विषयः । जयदेवकविविरचितगीतगोविन्दाख्यमहाकाव्यस्य व्याख्यानं ।

No. 930. पुराणदानमाहात्म्यं ।

Substance, country paper, $10\frac{1}{4} \times 4\frac{3}{4}$ inches. Folia, 6. Lines, 10—11 on a page. Extent, 62 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Generally correct.

Purána-dána-máhátmya. Nature, character, and extent, of the Puráṇas, and the religious merit of presenting them in MS. to Bráhmaṇas. Anonymous. The style of the work is Puráṇic, and, I suspect, it is an extract from the Matsya Puráṇa. It is narrated by Brahmá in reply to the question of a sage named Matsya.

Beginning. मत्स्य उवाच । पुराणं धर्मशास्त्राणां प्रथमं ब्रह्मणा स्मृतं ।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥
पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघ ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरं ॥
निर्दग्धेषु च लोकेषु वाजिरूपेण वै मया ।
अङ्गानि चतुरो वेदा पुराणन्यायविस्तरः ॥
मीमांसा धर्मशास्त्रं च परिगृह्यात्मसात्कृतं ।
मत्स्यरूपेण (हि) पुनः कल्पादावुदकार्णवे ॥
अशेषमेतत्कथितमुदकान्तर्गतेन च ।
श्रुत्वा जगाद स मुनीन् प्रतिवेदं चतुर्मुखः ॥
प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः ।
कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप ॥
व्यासरूपमहं कृत्वा संहरामि युगे युगे ।
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा ॥
तदाष्टशतधा कृत्वा भूर्लोकेऽस्मिन् विभाव्यते ।

End. तद् ब्रह्माण्डपुराणन्तु ब्रह्मणा समुदाहृतं ।
योदद्यात्तु व्यतीपाते + + + + + संयुतं ।
राजसूयसहस्रस्य फलमाप्नोति मानवः ॥ १८ ॥
चतुर्लक्षमिति प्रोक्तं व्यासेनाद्भुतकर्मणा ।
मत्पितुर्मम पित्रा च मया तुभ्यं निवेदितम् ॥

Colophon. इति पुराणदानमाहात्म्यम्।

विषयः। पुराणश्लोकसङ्ख्या, पुराणनामव्युत्पत्तिः, पुराणदानविधिश्च।

No. 931. काव्यकलापः।

Substance, white and yellow country paper, 17 × 3 inches. Folia, 7. Lines, 7 on a page. Extent, 214 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Paṇḍit Purushottama Tarkálañkára. Appearance, fresh. Prose and verse. Incorrect.

Kávya-kalápa. A romance in prose and verse. By Mahánanda Dhíra. The MS. is a mere fragment and very corrupt.

Beginning. नत्वा श्रीदेवदेवीं त्रिभुवनजननीं श्यामरूपां वरेण्यां
यस्याः क्रोड़े निवसति सदा दिव्यरूपं सुरेशम्।
आद्यं मेघाघनरुचिरतरं पीतवासं तड़ित्‌तं (?)
वक्ष्ये काव्यं कलापं कलितप्र+सवं नीलकण्ठस्य वक्त्रात्॥

End. सा इति वाक्यं कथयित्वा राजपुत्रो नयचेष्टां कृतवती।
ततः श्रीकाव्यकलापो महानन्दधीरेण कथितुमारब्धः॥

विषयः। (अतःपरमस्पष्टाक्षरत्वादुर्वाच्यम्। तत्पाठेऽप्यसमाप्तमिति लक्ष्यते।
चम्पूकाव्यमेतत्। असम्पूर्णत्वादस्य पुस्तकस्य प्रकरणच्छेदोऽज्ञेयः।)

No. 932. क्रमसङ्ग्रहः।

Substance, white and yellow country paper, $19\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 23. Lines, 6 on a page. Extent, 638 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Paṇḍita Purushottama Tarkálañkára. Appearance, old. Prose and verse. Correct.

Kramasañgraha. The law of succession according to the Bengal school. By S'ríkṛishṇa Tarkálañkára Bhaṭṭáchárya.

Beginning. जगद्व्यापद्द्वन्द्वमापदां चयसाधनम्।
विश्वकोटिविनिर्माणस्थितिसंहारकारणम्॥
निधाय हृदये दायाधिकारक्रमसङ्ग्रहः।

क्रियत पण्डितामोदी श्रीमच्छ्रीकृष्णशर्मणा ॥
अथ दायाधिकारक्रमः—

End. स्वयमूढायान्तु दास्यां तथाविधापत्यस्य विभाज्यलमेवेति। स्मार्त्तसम्मतमप्यत-द्विति ॥

Colophon. इति श्रीश्रीकृष्णतर्कालङ्कारभट्टाचार्यविरचितो दायाधिकारक्रमसङ्ग्रहः समाप्तः ॥

विषयः। अत्र दायाधिकारक्रमादिर्वर्णितः।

No. 933. उत्तरगीता।

Substance, yellow country paper, $14 \times 3\frac{1}{4}$ inches. Folia, 13. Lines, 6 on a page. Extent, 204 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Tarkálaṅkára. Appearance, old. Verse. Generally correct.

Uttara Gítá. A sequel to the Bhagavat Gitá, treating of theocratic Vedánta philosophy.

Beginning. अर्जुन उवाच। यदेकं निष्कलं ब्रह्म व्योमातीतं निरञ्जनं।
अप्रतर्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितम्॥ १ ॥
कैवल्यं केवलं शान्तं शुद्धमत्यन्तनिर्मलम्।
कारणं योगनिर्मुक्तं हेतुसाधनवर्जितम्॥ २ ॥
हृदयाम्बुजमध्यस्थज्ञानं ज्ञेयस्वरूपकम्।
तत्क्षणादेव मुच्येत यज्ज्ञानाद् ब्रूहि केशव॥ ३ ॥
श्रीभगवानुवाच। साधु पृष्टं महाबाहो बुद्धिमानसि पाण्डव।
यन्मां प्रच्छसि तत्त्वार्थमशेषं तद् वदाम्यहम्॥ ४ ॥

End. भूतवस्तून्यशाचित्ते पुनर्जन्म न विद्यते।

Colophon. इति श्रीमदुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे वैराग्योदयो नाम तृतीयोऽध्यायः समाप्तः।

विषयः। श्रीकृष्णार्जुनयोः कथोपकथनव्याजेन ज्ञानोपदेशोऽध्यायत्रयात्मकः। तत्र १ अध्याये ब्रह्मनिरूपणम्। २, आत्मानुभवः। ३, वैराग्योदयः। (अस्यान्तिमपत्रे हंसमन्त्रः, तत्साधनप्रयोगादिश्च विद्यते।)

No. 934. श्यामामन्त्राः ।

Substance, country paper, 18 × 3¼ inches. Folia, 13. Lines, 9 on a page. Extent, 432 s'lokas. Character, old Bengali. Date, ? Place of deposit, Navadvípa, Paṇḍita Vrajanátha Vidyáratna. Appearance, very old, with annotations on the margin. Prose and verse. Correct.

S'yámámantráh. A collection of *Vijamantras* of the ten great Vídyás, or manifestations of the Goddess Durgá. Anonymous.

Beginning. अथ श्यामामन्त्राः । तत्र काले तन्त्रे कामत्रयं वह्निसंस्थं रतिविन्दुसमन्वितं ।
कूर्चयुग्मं तथा लज्जायुगलं तदनन्तरम् ॥
दक्षिणे कालिके चेति पूर्ववीजानि वोच्चरेत् ।,
अन्ते वह्निवधून्दद्याद् विद्या राज्ञी प्रकीर्त्तिता ॥
अस्याः पूजाप्रयोगः । प्रातःकृत्यादिकं कृत्वा स्नात्वा मन्त्राचमनं कुर्याद् । तद्यथा ।

End. इति छिन्नमस्ताप्रकरणम् । भैरवतन्त्रे ।
अथ वक्ष्ये महाविद्याः कालिकायाः सुदुर्लभाः ।
यासां विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः ॥
नात्र चित्तविशुद्धिः स्यान् न वा मित्रादिदूषणम् ।
न वा प्रयासबाहुल्यं समयासमयादिकं ॥
न वित्तव्ययबाहुल्यं कायक्लेशकरं न च ।
य एनां चिन्तयेन्मन्त्री सर्वकामसमृद्धिदाम् ॥
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्नसंशयः ।
गद्यपद्यमयी वाणी सभायां तस्य जायते ॥
तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः ।
राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ॥
वन्हेः शैत्यं जलस्तम्भं गतिस्तम्भं विवस्वतः ।
दिवारात्रिव्यत्ययश्च वशीकर्मक्षमो भवेत् ॥
अन्ते च लभते देव्या गणत्वं दुर्लभं नरः ।

Colophon. (समाप्तिसूचकं वाक्यं न विद्यते। परं शेषपङ्क्तिलिखनप्रकार-दर्शनात षोड़शनम-महाविद्यायाः छिन्नमस्तकायाः प्रकरणसमाप्तिपूर्वकफलश्रुतिकथनदर्शनेन शेषवक्तव्यस्यापरस्याभावाच्च समाप्तमेवेति गम्यते ।)

विषयः। कालीताराप्रभृतीनां षोड़शानां महाविद्यानां मन्त्राः, सप्रमाणं पूजापद्धत्यादिश्च। (परिच्छेदशून्यम्।)

No. 935. पितृपद्धतिः।

Substance, yellow country paper, 18 × 3 inches. Folia, 2. Lines, 8 on a page. Extent, 87 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Pandita Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Generally correct.

Pitṛipaddhati. An elementary treatise on S'ráddhas, or rites meet for the dead. By Gopála A'chárya.

Beginning. अखिलनिगमहस्तैर्दिव्यवीणां वहन्ती
स्मितविकसितवक्त्रा ज्ञानदीपप्रसन्ना।
अनुकुलफलयुक्ता शाखिनी सेवकानां
हृदि लसतु सदा मे भारती सर्वशुक्ला॥
ध्यात्वा नन्दीश्वरं देवं नत्वा पितृपदद्वयम्।
गोपालो बालतोषाय विलिखेत् पितृपद्धतीः॥
सांवत्सरिकं श्राद्धं गौरणैव कर्त्तव्यमिति वृद्धसम्मतम्।

End. अतो गोत्रखगोत्रयोर्विकल्प इति शूलपाणिः॥ ०॥

Colophon. इति गोपालाचार्य्यविरचितपितृपद्धतौ प्रमाणखण्डो नाम प्रथमपरिच्छेदः॥
ग्रन्थोऽयं लिखितो यत्नात् हरिनारायणशर्म्मणा॥
ॐ गङ्गा॥ (अत्र समाप्तिवाक्ये प्रथममितिपदश्रुतेरसमाप्तमिदमित्यनुमीयते)।

विषयः। श्राद्धविषयकप्रमाणादिः।

No. 936. तन्त्रसारः।

Substance, red and yellow country paper, 18 × 4½ inches. Folia, 297. Lines, 8—9 on a page. Extent, 13,815 s'lokas. Character, Bengali. Date, Sk. 1773. Place of deposit, Navadvípa, Pandit Vrajanátha Vidyáratna. Appearance, soiled. Prose and verse. Correct. Copies have also been found at Navadvípa in the possession of Yádavachandra Bhaṭṭáchárya and Yadunátha Sárvabhauma Naiyáyika. Several copies are also available in Calcutta.

Tantrasára A summary of the Tántric cult, comprising mantras, diagrams and rituals for the adoration of the different Hindu divinities, both S'ákta and Vaishṇava. By Kṛishṇánanda Bhaṭṭáchárya. The work is held in high estimation, and has been very extensively quoted as a standard authority.

Beginning. नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरवन्दितम्।
गुरुञ्च ज्ञानदातारं कृष्णानन्देन धीमता ॥
तत्तद्ग्रन्थगताद् वाक्याज्ज्ञानार्थं प्रतिपद्य च ।
लोकयोर्थकृत सङ्क्षेपात् तन्त्रसारः प्रतन्यते ॥

End. गमनागमने जाग्रती सा तनुयायो फलानि कुण्डली।
उदिता कुलकामधेनुरेषा भजतां काङ्क्षितकल्पवल्लरीम् ॥
वेदार्थशास्त्रविपरीतविलोकनेन प्रायोभवद्यजनलोपमवेक्ष्य मातः।
तद्गूढकूटविशदीकरणेषु जातान् मातः क्षमस्व तव पादयुगेषु याचे ॥
यद् यन्मया नाथ विमूढबुद्ध्या स्पष्टीकृतं गुह्यतमन्तु तन्त्रे।
क्षन्तव्यमेतत् करुणानिधान क्रोधो न चार्हः खलु पामरेषु ॥

Colophon. इति श्रीमहामहोपाध्यायश्रीकृष्णानन्दभट्टाचार्यविरचिते तन्त्रसारे तृतीयपरिच्छेदः ॥ समाप्तोऽयं तन्त्रसारः ॥

विषयः। बहुतरतन्त्रादिभ्यः तान्त्रिकदीक्षादिविषयकप्रमाणान्युद्धृत्य यथाक्रमेणेह सङ्गृहीतः। अत्र त्रयः परिच्छेदाः सन्ति। तत्र प्रथमे, प्रथमं लक्षणचक्रादि, ततो व्यवस्था। तद् यथा—गुरुलक्षणम्, शिष्यलक्षणम्, कुलाकुलचक्रम्, राशिचक्रम्, नक्षत्रचक्रम्, अकथहचक्रम्, ऋणिधनिचक्रम्, अकडमचक्रम्, दीक्षाकालः, वारनियमः, तिथिनियमः, नक्षत्रनियमः, योगनिर्णयः, करणनिर्णयः, लग्ननिर्णयः, निषिद्धमासतिथिनियमः, मालानिर्णयः, मालायां मणिनियमः, आसनभेदाः, मालासंस्कारः, पुरश्चरणम्, भक्ष्यादिनियमः, वर्ज्यद्रव्याणि, भूतलिपिः, स्त्रीणां होमाधिकारः, अन्यप्रकारपुरश्चरणं, पुरश्चरणप्रयोगः, कूर्मचक्रम्, मन्त्राणां दशसंस्काराः, मातृकायन्त्रम्, ग्रहणपुरश्चरणसङ्कल्पः, कलावतीदीक्षाप्रयोगः, चन्द्रसूर्याग्नीनां कलानां नाम, षोड़शाङ्गादिधूपः, पञ्चायतनी दीक्षा, सङ्क्षेपदीक्षा, सर्वतोभद्रमण्डलम्, नवनाभमण्डलम्, त्रिलौही मुद्रा चेति।

द्वितीये प्रथमं सामान्यपूजादि, ततो मन्त्राः। तद् यथा—सामान्यपूजा, सन्ध्याप्रयोगः, स्नानविधिः, गायत्री, गायत्रीध्यानम्, पूजाप्रयोगः; भुवनेश्वरी-

मन्त्राः, अन्नपूर्णा०, त्रिपुरा०, दुरिता०, वज्रप्रस्तारिणी०,दुर्गा०,महिषमर्दिनी०, जयदुर्गा०, शूलिनी०, वागीश्वरी०,पारिजातसरस्वती०,गणेश०,हेरम्ब०, हरिद्रागणेश०, लक्ष्मी०, महालक्ष्मी०, सूर्य०, अजपा०, विष्णु०, श्रीराम०,श्रीकृष्ण०, बालगोपाल०, वासुदेव०,हयग्रीव०, नृसिंह०,हरिहर०,वराह०,शिव०, मृत्युञ्जय०,चिन्तामणि०, नीलकण्ठ० चण्ड०,क्षेत्रपाल०,वटुक०,त्रिपुरभैरवी०, सम्पत्प्रदाभैरवी०,कौलेशीभैरवी०, सकलसिद्धिदाभैरवी०,चैतन्यभैरवी०, भयविध्वंसिनीभैरवी०, कामेश्वरीभैरवी०, षट्कूटाभैरवी०, नित्यभैरवी०, रुद्रभैरवी०,भुवनेश्वरीभैरवी०, सकलेश्वरीभैरवी०, त्रिपुरबाला०, नवकूटबाला०, अन्नपूर्णेश्वरीभैरवी०, श्रीविद्या०, कामराज०, लोपामुद्रा०, मनूपासिता०, कुवेरोपासिता०, चन्द्रोपासिता०, द्वितीयलोपामुद्रा०, वैष्णवीषट्कूटा०, नन्दिपूजिता०, सूर्योपासिता०, इन्द्रोपासिता०, शङ्करोपासिता०, दुर्वासउपासिता०, पञ्चमीविद्या०, पारिभाषिकषोड़शी०, महाषोड़शी०, वीजावलिषोड़शी०,कमलासुन्दरी०,भुवनसुन्दरी०, वाक्सुन्दरी०, शक्तिसुन्दरी०, श्री०, प्रचण्डचण्डिका०, श्यामा०, गुह्यकाली०, भद्रकाली०, श्मशानकाली०, महाकाली०, तारिणी०,एकजटा०, नीलसरस्वती०, कुल्लुका०, उग्रतारा०,महानीलसरस्वती०,तारापीठा०,अष्टतारिणीमन्त्राः, रहस्यपुरश्चरणम्, वीरसाधनम्, अधिकारिलक्षणम्, चितालक्षणम्, शवसाधनम्, विद्याभेदकथनम्, चण्डोग्रशूलपाणिमन्त्राः, मातङ्गी०, उच्छिष्टचाण्डालिनी०, धूमावती०, भद्रकाली०, धनदा०, श्मशानकाली०,वगलामुखी०, कर्णपिशाचीमन्त्राः, सिद्धिलक्षणम्, मञ्जुघोषः, तारिणीकल्पः, सारस्वतकल्पः, कात्यायनीकल्पः, दुर्गामन्त्राः, गौरी०, विशालाक्षी०, राजमुखी०,इन्द्र०,गरुड़०, माला०, विषहराग्नि०, हनुमत्कल्पः,,हनुमद्वीरसाधनम्, आर्द्रपटी, श्मशानभैरवीमन्त्रः, ज्वालामालिनी०, महाकाली०, तत्प्रयोगः, ज्वालामालिनीप्रयोगः, निगड़मोक्षणम्, त्रिटिमन्त्रः, त्र्यम्बक०, मृतसञ्जीवनी०, आकर्षणम्, विद्वेषणम्, उच्चाटनम्, सुखप्रसवमन्त्रः, अदर्शनम्, योगिनीसाधनम्, योगिनीसाधनकालः, तत्राधिकारिनिर्णयः, पूजाधारः, यन्त्रसंस्कारः, चक्रप्रतिष्ठाप्रयोगश्चेति।

तृतीये जपहोमप्रकाराद्युपदेशो यन्त्रादिलिखनप्रकारादयश्च। तद्यथा—प्रकीर्णकम्, पूजायां विहितनिषिद्धम्, पञ्चशुद्धिः, मन्त्रसिद्धेरुपायः, मन्त्रसिद्धिलक्षणम्, मन्त्रदोषाः, मन्त्रदोषशान्तिः, होमार्थं कुण्डनिर्णयः, नवकुण्डानि, कुण्डानां विशेषफलम्, काम्यहोमार्थं कुण्डनिर्णयः, नागशिरआदिनिर्णयः, नवकुण्डयोनिनियमः, नमोऽन्ते नमोदद्यादित्यादिविचारः, नित्यहोमः,सङ्क्षेप-

होमः, इहद्धोमः, होमद्रव्यप्रमाणम्, षट्कर्मलक्षणम्, आसनम्, ग्रथन-विदर्भ-सम्पुट-बोधन-योग-पल्लवनिर्णयः, षट्कर्ममन्त्रलिखने द्रव्यम्, शान्तिकादौ पात्रनियमः, भूतानां मण्डलानि, भुवनेश्वर्याः स्तवकवचानि, अन्नपूर्णायाः०, त्रिपुटायाः०, दुर्गायाः०, महिषमर्दिन्याः०, लक्ष्म्याः०, सरस्वत्याः०, गणेशस्य०, हरिद्रागणेशस्य०, सूर्यस्य०, विष्णोः०, श्रीरामस्य०, श्रीकृष्णस्य०, गोपालस्य०, नृसिंहस्य०, शिवस्य०, वटुकस्य०, भैरव्याः०, श्रीविद्यायाः०, महात्रिपुरसुन्दर्याः०, प्रचण्डचण्डिकायाः०, काल्याः०, तारायाः०, वगलामुख्याः०, चतुःषष्ट्युपचाराः, अष्टादशोपचाराः, षोडशोपचाराः, दशोपचाराः, पञ्चोपचाराः, निर्माल्यकथनम्, त्रिपुरसुन्दर्याः षोडशोपचाराः, रुद्राक्षमाहात्म्यम्, रुद्राक्षप्रतिष्ठा, रुद्राक्षसंस्कारः, परिभाषा, विष्ण्वाराधनकल्पाः, विष्णुविषये नैमित्तिकादिकर्मभङ्गप्रायश्चित्तम्, शिवशक्तिविषये नैमित्तिकादिकर्मभङ्गप्रायश्चित्तम्, पञ्चप्रकार इज्या, वैष्णवानां द्वादशशुद्धिः, द्वादशतिलकानि, योगाङ्गासनानि, मुद्रा; षटार्गलायन्त्रम्, त्वरिता०, नवदुर्गा०, लक्ष्मी०, भैरवी०, त्रिपुरागायत्री०, त्रिपुरा०, श्रीविद्या० गणेश०, श्रीराम०, नृसिंह०, गोपाल०, कृष्ण०, शिव०, काली०, शान्तिकादौ तारायन्त्रम्, यन्त्रलिखनद्रव्यम्, शान्त्युदकस्नानम्, सङ्क्षेपतः सर्वदेवानां नित्यपूजाविधिः, नैमित्तिकविधिः, चरणामृतमाहात्म्यम्, स्त्रीनपुंसकमन्त्राणां लक्षणम्, सुप्तप्रबोधकालः, योगाङ्गासनानि, श्रीविद्यायजनम्, प्रयोगविधिः, भुवनेश्वरी०, त्वरिता०, दुर्गा०, सरस्वती०, लक्ष्मी०, गणेश०, सूर्य०, श्रीराम०, कृष्ण०, दधिवामन० हयग्रीव०, नृसिंह०, वराह०, मृत्युञ्जय०, दक्षिणमूर्त्ति०, भैरवी०, सुन्दरी०, त्रिपुरा०, छिन्नमस्ता०, श्यामा०, काम्यतर्पणम्, निग्रहादुपायाः, वेतालसिद्धिः, बालकसंस्कारः, शान्तिमन्त्रः, छागादिबलिः, कुलाचारः, दूतीयागः, यजनप्रकारः, द्रव्यशुद्धिः, शक्तिशोधनम्, वीराणां पुरश्चरणम्, मन्त्रिणां मन्त्रस्नाननिरूपणम्, सन्ध्या, अवपूजा, पञ्चमकारयजनप्रकारः, तत्प्रक्रिया, ग्रन्थकृतकृतस्वदोषक्षमापणञ्चेति।

इह बहुतरयन्त्राणि चित्रितानि सन्ति ॥

No. 937. दुर्गभञ्जनम् ।

Substance, country yellow paper, 19 × 3½ inches. Folia, 84. Lines, 8 on a page. Extent, 4200 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Durgabhañjana. A treatise on Smṛiti rites, illucidating doubtful points, and solving many moot questions regarding proper times for performing particular ceremonies. By Chandras'ekhara S'armá, a Várendra Bráhmaṇa of Navadvípa. The work is divided into four chapters, (lit. forts). The first treats of the age of the moon, and the proper times when particular ceremonies ordained for specifical days of the moon, should be performed. The second treats of months, their conjunctions, and the ceremonies appertaining to them. The third is devoted to resolutions to perform ceremonies, persons qualified to perform them, and the details thereof. Prominent mention is made in this chapter of the rules for commencing the Durgá pújá. The fourth has for its subjects, optional fasts and penances.

Beginning. भजत भजत कृष्णं गोपनारीसतृष्णं
निखिलभुवनवन्द्यं नन्दगोपाभिनद्यम् ।
सुकृतिहृदयवन्द्यं प्रेमभक्त्यैकगम्यं
सकलललितगेहं सच्चिदानन्दगेहम् ॥
याता माता मया किं नवदधि विहृतं भुज्यते नेति मत्वा
दृष्ट्वा तद्वृत्तमाशु प्रियतमतनयाभुङ्क्ष्व वत्सेत्युवाच ।
लब्ध्वा मातुः प्रसादं सपदि गतभयं स्मेरवक्त्रं वदन्तं
मानद्दोषो न मेऽयं बलकृतमिति तं नन्दसूनुं नमामि ॥
सदानन्दमयीं स्मृत्वा चन्द्रशेखरशर्मणा ।
वरेन्द्रान्वयसम्भूतनवद्वीपनिवासिना ॥
श्रीकृष्णप्रीतये गूढशास्त्रार्थस्याभिसन्धितः ।
स्मृतीनां क्रियते दुर्गभञ्जनं बुधरञ्जनम् ॥
अथ तिथेर्दुर्गभञ्जनम् । तत्र, राशिचक्रचलत्सूर्यावधिकं वाश्रयविकर्षप्रयो-
जकताहशचन्द्रक्रिया तिथिः । तथाहि—

End. वियागे पारणं कुर्य्युर्मुनयो ब्रह्मवादिन इति । वियोगे उभयोर्विच्छेदे तद्योगस्य उपस्थितत्वात् स च एकतरक्षयादपि भवतीति ॥ ० ॥

Colophon. श्रीहरिनारायणशर्म्मणः पुस्तकमिदं स्वाक्षरञ्च इति ॥ ० ॥ यथा दृष्टमित्यादि ॥

विषयः । अत्र चत्वारि परिच्छेदाः । प्रथमं तिथिदुर्गभञ्जनम् । तत्र राशिचक्रस्य देश-रूपता, अमापोड़शभागेनेत्यादिवचनार्थः, अष्टम्यांशे चतुर्द्दश्या इति वचन-व्याख्या, चन्द्रकलास्वरूपः, देवतानां कलानिर्णयः, तिथिखण्डविशेषनियमश्चेति । द्वितीयं मासादुल्लेखदुर्गभञ्जनम् । तत्र निमित्तोल्लेखविचारः, इषोत्सर्गादि-विचारः, मासादुल्लेखविचारश्चेति । तदेतत् खण्डद्वयात्मकं प्रथमखण्डम् । सङ्कल्प-स्मृतिदुर्गभञ्जनाख्यतृतीयपरिच्छेदारम्भे पृथङ्मङ्गलाचरणदर्शनात्; तथाहि— "सदानन्दमयीं स्मृत्वा चन्द्रशेखरशर्म्मणा । सङ्कल्पस्मृतिदुर्गानां भञ्जनं क्रियते-ऽधुना ॥" इति । तत्र च काम्यकर्म्मणि सङ्कल्पः, निष्कामानां काम्येऽपि सङ्कल्पा-भावः, सुगमसङ्कल्पः, अधिकारिलक्षणम्, विशिष्टफलं प्रति कामनाधिकारः, काम्यकर्म्मणि रागिणां प्रीतिकामनायां तत्फलप्राचुर्य्यम्, सङ्कल्पनिरूपणम्, जन्मतिथिविहिताश्वत्थामादिपूजनफलं, सङ्कल्पवाक्यरचना, सङ्कल्पवाक्ये फल-भागिन एव नामगोत्राद्युल्लेखो न तु प्रतिनिधेः, सङ्कल्पकालः, सप्तम्यादिमहाष्ट-म्यादिकल्पे षष्ठ्यां बोधनम्, विशेषबाधकाभाव एव प्रकरणाद् वाक्यस्य बलव-त्त्वम्, दिवसाद्यन्तनाड़ीचतुष्टयस्य सन्ध्यात्वकीर्त्तनम्, सायंसन्ध्यायाः प्राशस्त्या-दिकम्, उपवाससङ्कल्पकालः, गस्नान्ते पुत्रताभोजनान्तरम्, ग्रहणनिमित्तक-स्नानादिकार्य्यम्, नैमित्तिकानि काम्यानि च कर्म्माणि चेति । चतुर्थं व्रतदुर्ग-भञ्जनम् । तत्र—अष्टमी, जन्माष्टम्युपवासो नित्यः, जन्माष्टम्युपवासफलम्, व्रतका-लव्यवस्था, पारणव्यवस्थादिश्चेति ।

No. 938. प्रायश्चित्तव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 19 × 3½ inches. Folia, 14. Lines, 6—7 on a page. Extent, 539 s'lokas. Character, Bengali. Date, Sk. 1728. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Práyas'chitta-vyavasthá-saṅkshepa. A summary of the laws bearing on expiations. This and the following five works are evidently due to the same author, who attempted to produce a series of manuals like the *Tattvas* of Raghunandana, or the *Vivekas* of S'úlápaṇi, but his name does not appear in the codices under notice.

Beginning. अथ प्रायश्चित्तव्यवस्थासङ्क्षेपः। तत्रादौ प्रायश्चित्तलक्षणम्। तथाच हारीतः। प्रयतत्वाद्वोपचितमशुभं नाशयतीति प्रायश्चित्तम्।

End. तथाच पौत्रभ्रात्रादिना क्रियमाणा—(इतः खण्डितम्)

विषयः। प्रायश्चित्तलक्षणादिः, पातकानि, अतिपातकप्रायश्चित्तम्, महापातकप्रायश्चित्तम्, ब्रह्मवधप्रायश्चित्तम्, सुरापानप्रायश्चित्तम्, स्वर्णस्तेयप्रायश्चित्तम्, गुर्वङ्गनागमनप्रायश्चित्तम्, पतितसंसर्गप्रायश्चित्तम्, गोवधप्रायश्चित्तम्, प्रायश्चित्तपूर्वाङ्गकृत्यम्, बाल्यादिभेदेन प्रायश्चित्तभेदः, ज्ञानकृतादिनिरूपणम्, ब्राह्मणस्वामिकगोवधप्रायश्चित्तम्, एकहायन्यादिगोवधप्रायश्चित्तं, बोधनादिनिमित्तकगोवधप्रायश्चित्तम्, अपालननिमित्तकगोवधप्रायश्चित्तम्, गोवधापवादः, क्षत्रियादिवधप्रायश्चित्तम्, स्त्रीवधप्रायश्चित्तम्, गर्भवधप्रायश्चित्तम्, मार्जारादिवधप्रायश्चित्तं, मत्स्यादिवधप्रायश्चित्तम्, मण्डपोद्यानादिदेवतडागादिभेदनप्रायश्चित्तम्, अभिचारप्रायश्चित्तञ्चेति।

No. 939. तिथिव्यवस्थासङ्क्षेपः।

Substance, country yellow paper, 18 × 3½ inches. Folia, 51. Lines, 6 on a page. Extent, 1836 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Tithi-vyavasthá-sankshepa. A summary of the laws regarding the moon's age, with references to the ceremonies to be performed on particular lunar days.

Beginning. प्रायःसङ्कल्पानामेव कर्मणामारम्भकत्वादादौ स एव निरूप्यते।

End. अत्रामावास्याष्टमीव्यतिरिक्ता द्वादशतिथयः शुक्ला ग्राह्याः। एतासु पौर्णमास्यन्तमासो ग्राह्यः॥

Colophon. इति तिथिव्यवस्थासङ्क्षेपः समाप्तः।

विषयः। सङ्कल्पनिरूपणम्, मलमासो रविसङ्क्रान्तिशून्यः, विधिस्तु त्रिविधः, अर्थवादः, निषेधपर्युदासौ, विकल्पः, जन्मतिथिव्यवस्था, प्रतिपद्-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमी-कृत्यम्, माघसप्तमी, अष्टमी, कृष्णजन्माष्टमी, पारणकालः, दूर्वाष्टमी, भीष्माष्टमी, अशोकाष्टमी, नवमी, श्रीरामनवमी, दशमी, दुर्गोत्सवः, बलिदानम्, धूपाः, उपचाराः, षोडशोपचाराः, एकादशी,

चातुर्मास्यव्रतारम्भः, आरब्धव्रतत्यागे प्रायश्चित्तं, मत्स्यादित्यागफलम्, हरिशयनादिव्यवस्था, द्वादशी, श्रवणद्वादशी, त्रयोदशी, वारुणत्रयोदशी, चतुर्दशी, सावित्रीचतुर्दशी, अनन्तव्रतम्, शिवचतुर्दशी, मदनचतुर्दशी, पौर्णमासी, महाज्यैष्ठी, कोजागरः, रविसङ्क्रान्तिरात्रिसङ्क्रमणव्यवस्था, कार्त्तिककृत्यम्, ग्रहणम्, अमावास्या, अर्द्धोदययोगः, युगाद्याः, युगाद्यारहस्यञ्चेति ।

No. 940. उद्वाहव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 18 × 3½ inches. Folia, 3. Lines, 5 on a page. Extent, 79 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose. Correct.

Udváha-vyavasthá-sańkshepa. A summary of the laws regarding marriage.

Beginning. अथोद्वाहव्यवस्थासङ्क्षेपः । तत्र सापिण्ड्यं निरूप्यते ।

End. वरे म्रृते कन्या देवराय प्रदातव्या । एतच्च कन्यानुमतौ । वाग्दत्ताया अपि कन्यायाः कुमारीवद् विवाहः ॥ ० ॥

Colophon. इत्युद्वाहव्यवस्थासङ्क्षेपः ॥

विषयः । सापिण्ड्यनिरूपणादिः, पितृबान्धवादिनिर्णयश्चेति ।

No. 941. श्राद्धव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 18 × 3½ inches. Folia, 37. Lines, 6 on a page. Extent 1207 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

S'ráddha-vyavasthá-sańkshepa. A summary of the laws regarding the various s'ráddhas, or offerings to the manes.

Beginning. अथ श्राद्धव्यवस्थासङ्क्षेपः । विप्रेभ्यो दद्यादग्नौ जलेपि वेत्यनेन तस्यापि ब्राह्मणस्वीकारपर्यन्तं, स्वीक्रियते तदा पित्रे बलिदानेऽतिव्याप्तिः ।

End. येन सेतुनानेकेषामुपकारः क्षेत्रिणस्त्वाल्पपीड़ा स सेतुः क्षेत्रिणा न निराकरणीयः ।

Colophon. इति श्राद्धव्यवस्थासङ्क्षेपः ॥

विषयः । श्राद्धलक्षणविचारः, देवतालक्षणम्, यागलक्षणम्, साहित्यलक्षणम्, तन्त्रतालक्षणम्, नवान्नश्राद्धकालः, मघात्रयोदशीश्राद्धम्, अश्वयुक्कृष्णपक्षश्राद्धम्, शस्त्रहतचतुर्द्दशीश्राद्धम्, अष्टकाश्राद्धम्, श्राद्धवेला, मलमासे कर्त्तव्यम्, मलमासनिषिद्धकर्माणि, अमावस्याश्राद्धवेला, प्रतिमासे पार्वणासमर्थस्य पार्वणव्यवस्था, निमन्त्रणव्यवस्था, दर्भाः, श्राद्धशेषभक्षणे नियमविधिः, आमान्नव्यवस्था, जीवत्पितृकश्राद्धम्, मासिककालः, मासिकसपिण्डीकरणयोरपकर्षः, पिण्डमिश्रीकरणम्, विप्रपतितमृताह्नाविदितयोः श्राद्धकालः, मृताहाज्ञाने श्राद्धदिनमासनिर्णयः, एकोद्दिष्टकालनिर्णयः, अभ्युदयश्राद्धम्, सपिण्डीकरणम्, श्राद्धेऽधिकारिनिरूपणम्, वृद्धिश्राद्धव्यवस्था, शूद्रकर्तृकतर्पणवाक्यम्, वृद्धिनिर्णयः, अकृतवृद्धिः, ऋधिविधिः, प्रतिभूः, स्वामिकविक्रयः, सम्भूय समुत्थानम्, दत्ताप्रदानिकं, भृतकविधिः, भाटकविधिश्चेति ।

No. 942. दायव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 19 × 3½ inches. Folia, 14. Lines, 6 on a page. Extent, 456 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Dáya-vyavasthá-sañkshepa. A summary of the laws regarding succession and inheritance.

Beginning. अथ दायव्यवस्थासङ्क्षेपः । तत्र पितॄणामेकैकस्मिन् द्रव्ये एकैकस्य स्वत्वं न तु सर्वेषाम् ।

End. आकालिकं निमित्तकालमारभ्य परदिने तत्कालपर्यन्तं, सज्योतिः दिनमानं रात्रिमानञ्चेत्यर्थः ॥ ॐ गुरवे नमः ॥

Colophon. (समाप्तिवाक्यमिह न दृश्यते परं लेखभङ्ग्या समाप्तमेवेति प्रतीयते)

विषयः । पित्रादीनां स्वत्वनिर्णयः, पितृकृतपितामहधनविभागः, पितृकृतस्वोपार्जितधनविभागः, विभागानर्हाः, विभाज्यानि, स्त्रीधननिरूपणम्, दानविक्रयाधिकारः, स्त्रीधनविभागः, अप्रजास्त्रीधनाधिकारः, विभागानन्तरं जातविभागः, पुत्रिकानन्तरजातौरसविभागः, अपुत्रधनविभागः, संसृष्टिविभागः, विभागकालापकृतिविभागः, पितृधनविभागकालः, पितृस्वत्वनिवृत्तौ भ्रातृकृतविभागव्यवस्था, पितृकृतपैतामहधनविभागः, समयाद्युद्धिनिर्णयश्चेति ।

No. 943. शुद्धिव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 19 × 3½ inches. Folia, 30. Lines, 7 on a page. Extent, 1155 s'lokas. Character, Bengali. Date, SK. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

S'uddhi-vyavasthá-sankshepa. A summary of the laws regarding mourning, and the duties appertaining to that state.

Beginning. अथ शुद्धिव्यवस्थासङ्क्षेपः। तत्रादौ शुद्धिपदार्थो निरूप्यते। तत्र विहितकर्म्मा-र्हत्वप्रयोजको धर्म्मविशेषः शुद्धिः ।

End. युगाद्यावयने पुण्ये मन्वाद्या च विशेषतः ।

Colophon. इति शुद्धिव्यवस्था समाप्ता ।

विषयः । शुद्धिलक्षणादिः, सहमरणानुमरणयोर्व्यवस्था, अनयोरशौचसङ्करः, अतिक्रान्ताशौचम्, अशौचे विधिनिषेधौ, अशौचसङ्करः, गर्भस्रावाशौचम्, स्त्र्यशौचम्, बालाद्यशौचम्, विदेशस्थाशौचम्, सपिण्डाद्यशौचम्, मातामहाद्यशौचम्, मृत्युविशेषाशौचम्, अशौचापवादः, शवानुगमनाशौचम्, अस्थिसञ्चयाङ्गस्पर्शयोः कालः, द्रव्यशुद्धिः, वापीकूपतड़ागेषु मृते जलशुद्धिः, गृहमरणे गृहस्यशुद्धिः, सूतिकादिमरणे दाहव्यवस्था, पर्णनरदाहव्यवस्था, मुमूर्षुकृत्यम्, प्रेततर्पणव्यवस्था, पुत्रस्य वर्षकृत्यम्, पिण्डदानम्, अन्तिमदिनकृत्यम्, अशौचान्तद्वितीयदिनकृत्यम्, वृषोत्सर्गकालः, वृषलक्षणम्, अस्यैव प्रयोगविशेषः, दानव्यवस्था, दानभाषा, दानपरिपाटी, दानप्रयोगः, प्रेतक्रियाधिकारिणः, दत्तककरणपरिपाटी, मृतक्रिया त्रिविधा, विपुलगृहदानम्, वृहदामान्नदानञ्चेति ।

No. 944. उद्वाहव्यवस्था अथवा सम्बन्धव्यवस्थाविकाशः ।

Substance, country yellow paper, 19 × 3½ inches. Folia, 10. Lines, 7 on a page. Extent, 437 s'lokas. Character, Bengali. Date, SK. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose. Correct.

Udváha-vayavasthá alias *Sambandha-vyavasthá-vikás'a.* A treatise on marriage. Anonymous. This is different from the work noticed under No. 649.

Beginning. अथोद्वाहव्यवस्था। तत्र भार्य्यात्वसम्पादकग्रहणं विवाहः। भार्य्यात्वञ्च विवाहजन्य-

कन्याहत्तिसंस्कारविशेषो वरनिरूपितः, अमुकस्य भार्य्यात्वमिति प्रतीतेः । अयमेव
चूड़ादिसंस्कारवत् विवाहसंस्कारोऽपि लाघवात् ।

End. षट्‌षड्‌ग्रासकृताङ्कवद् वक्ररेखया खिथं लिखेत् ।

Colophon. इति सम्बन्धव्यवस्थाविकाशः ।

विषयः । विवाहलक्षणादिविचारः । ९४९ अङ्कीयग्रन्थादस्मौ भिन्नः ।

No. 945. अनुमानदीधितिटिप्पनीपूर्व्वभागः ।

Substance, country yellow paper, 20 × 5 inches. Folia, 149. In 7 parts. Lines, 9 on a page. Extent, 7375 s'lokas. Character, Bengali. Date, Sk. 1721. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old and decayed. Prose. Correct.

Anumána-dídhiti-ṭippaní. A gloss on the commentary of Raghunátha Siromaṇi on the first book of Gaṅges'a Upádhyáya's great Nyáya work the *Chintámaṇi.* By Jagadís'a Tarkálaṅkára. This MS. comprises 13 out of the 25 sections of the work. Nos. 507 to 511 are portions of this work. (Ante I, p. 293).

Beginning. सस्मितानमसरोजमङ्गणे रिङ्गमाणमतिलोलकुण्डलम् ।
रोचनोल्लसितभालमस्तु मे केशवं मनसि शैशवं वपुः ॥
प्राचैरनुचितविविधचोदैः कलुषीकृतोऽपि अधुना ।
दीधितियुतमणिरेष श्रीजगदीशप्रकाशितः स्फुरतु ॥
परमात्मने सर्वात्मस्वरूपात्मने नमः ।

End. ननु प्रकृतस्थले विशिष्टप्रत्यक्षजनकत्वमेव नास्तीत्याह विशिष्टसामग्रीति ।

Colophon. इति श्रीलश्रीजगदीशतर्कालङ्कारभट्टाचार्य्यविरचिता सामान्यलक्षणा समाप्ता
शके चन्द्रमेन्नागविधुमित आदित्यतनये
नभस्यीये सप्ताहनि च सुरनाथं हृदि वहन् ।
दशम्यां शुक्लायां कुसुरकमलानाथ इमकं
प्रयत्नेनालेखीन्निजपरिपठनायेति पुस्तम् ॥
कदा वाराणस्यामिह सुरधुनीरोधसि वसन्
वसानः कौपीने शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि निवसान् ॥

विषयः। जगदीशतर्कालङ्कारकृततत्त्वचिन्तामणिदीधितिटिप्पन्या द्वितीयखण्डम् "अनुमान-दीधितिटिप्पनीति" तस्यैषः पूर्वो भागो व्याप्तिकाण्डमिति प्रसिद्धम्। अत्र—१ अनुमितिः, २ व्याप्तिपञ्चकम्, ३ सिंहव्याघ्रौ, ४ पूर्वपक्षः, ५ व्याधिकरणधर्मावच्छिन्नाभावः, ६ सिद्धान्तलक्षणम्, ७ अवच्छेदकनिरुक्तिः, ८ विशेषनिरुक्तिः (अथवा विशेषव्याप्तिः), ९ अनएवचतुष्टयी, १० व्याप्तिग्रहोपायः, ११ तर्कः, १२ व्याप्त्यनुगमः, १३ सामान्यलक्षणेति त्रयोदशपरिच्छेदाः सन्ति। तदत्र पुस्तके द्वितीयादिपरिच्छेदत्रिकं खण्डितम्। अनुमितिपरिच्छेदेऽपि सप्तमपत्रतः परस्तात् खण्डितञ्च।

No. 946. कातन्त्रवृत्तिपञ्जिका, परार्द्धा।

Substance, country paper, 14 × 2½ inches. Folia, 96. Lines, 9 on a page. Extent, 4644 s'lokas. Character, old Bengali. Date, Sk. 1400. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose. Correct.

Kátantra-vritti-pañchiká. A gloss on Durga Siñha's commentary on the Sanskrit grammar called Kátantra. By Trilochana Dása. The MS. contains the only second half of the work. Durga Siñha's work has been noticed under No. 510, *ante* I, p. 296.

Beginning. प्रारम्भपत्रस्य प्रथमोभागश्छिन्नः खण्डितः। ततश्च पङ्क्त्युपरार्द्धे—अथाप्यानन्तर्यार्थ एव गृह्यते तथाहि प्रश्नः पर्यन्तयोग उच्यते।

End. आव। अत्रापि द्वे इत्यनुवर्त्तते द्विवचनसन्निधानात् उत्तरशब्दोयं पूर्ववत्।

Colophon. इति त्रिलोचनदासकृतायां (इतः खण्डितम्)।

विषयः। कलापव्याकरणीयतिङन्तादिद्वितीयभागस्य व्याख्यानम्।

No. 947. सर्वतोभद्रमण्डलम्।

Substance, country paper, 14 × 2½ inches. Folium 1. Lines, 16. Extent, 31 s'lokas. Character, old Bengali. Date, Sk. 1400. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Verse. Correct.

Sarvato-bhadra-mandala. A description of a mystic diagram so called. It is held in high estimation in astrological works for casting nativities, and calculating future events in the life of man.

Beginning. चतुरस्रे चतुःकोष्ठे कर्णसूत्रसमन्विते । चतुर्ष्वपि च कोष्ठेषु कर्णसूत्रचतुष्टयम् ।
End. त्रिशो रेखा वह्निः कुर्यात् सितरक्तासितैः क्रमात् । मण्डलं सर्वतोभद्रमेतत् साधारणं स्मृतम् ।
विषयः । सर्वतोभद्रमण्डलप्रणयनप्रयोगः ।

No. 948. एकाक्षरकोषः ।

Substance, country paper, 12 × 3 inches. Folia, 2. Lines, 6 on a page. Extent, 34 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Verse. Correct. Copies have been found at Vikramapura, Ḍháká, with Paṇdit Kálíkumár Bhaṭṭáchárya, and in Calcutta, with the Honorable Rája Jotindramohan Tagore Báhádur, and in the Library of the late Rájá Sir Rádhákánta Deva Bahádur.

Ekáksharakosha. A vocabulary of words of one syllable or one Sañskṛit letter each. By Purushottama Deva. The work is of some repute. Professor Aufrecht in his Bodleian Catalogue gives the following account of this work. "Major numerus earum vocum, quas Purushottama hoc libello collegit, e mystica doctrina delectus videtur, Cf. supra, p. 97. n. 3. In quibusdam exemplis, ut si *ga* esse *gaṇapatí* et *gandharva*, *cha* significare *chandramas* et *choara*, *ta* *taskara*, *dha* *dhana*, *ya* *yama*, *va* *váta* et *veruṇa* esse dicuntur, facile vides lusum hunc esse, ubi nomina prima ipsorum syllaba significentur. Aliae voces radices sunt, quae in compositorum fine adjectivorum locum tenent, ut *ga* (*gita*), *cha* (*cheda*, *chedana*), *da* (*dána*, *dátṛi*). Minor pars re vera nomina vel particulæ sunt, et ab optimis quibusque scriptoribus usurpantur, velut *kha*, *bha* (*nakshatra*), *bhá* (*dipti*), *sam* (*kalyáṇa*), etc.

Beginning. कः प्रजापतिरुद्दिष्टो को वायुरिति शब्दितः ।
कश्चैवात्मा समाख्यातः प्रकाशे क उदाहृतः ॥
End. अमिति स्यात् परं ब्रह्म अः स्याच्चैव महेश्वरः ।
Colophon. इति पुरुषोत्तमदेवकृत एकाक्षरकोषः सम्पूर्णः ।
विषयः । एकाक्षराणां बह्वर्थानां शब्दानां परिचयः ।

No. 949. शुद्धिविवेकः ।

Substance, country paper, 13 × 2½ inches. Folia, 94. Lines, 6 on a page. Extent, 2456 s'lokas. Character, old Bengali. Date, SK. 1533. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

S'uddhi-viveka. A treatise on purification and mourning. By Aniruddha.

Beginning. प्रणम्य पुण्डरीकाक्षं पूर्वाचार्य-प्रकीर्त्तिता ।
व्याख्या मन्वादिशास्त्राणां समालोच्य विविच्यते ॥
विशुद्धिरनिरुद्धेन स्वबोधविभवावधि (?) ।
बोधार्थमल्पबुद्धीनां प्रबुद्धानान्तु तुष्टये ॥

End. अनेनाप्यविशुद्धस्य न कार्यमित्युक्तमतः कथमशुद्धस्याप्यात्मघातिनोपि संवत्सरे परिक्रियते ।

Colophon. महोपाध्यायश्रीअनिरुद्धकृता विशुद्धा * * * * समाप्ता ॥ श्रीः ॥ सुरापगातीर विहार * * के———.कृतोनिरुद्धेन———चिमेत्वनेचद्वयश्रीतभानुना, शकस्य वर्षे———लिलेख

विषयः । जननमरणाद्यशौचनिर्णयः ।

No. 950. शार्ङ्गधरपद्धतिः ।

Substance, country red and yellow paper, 13 × 5½ inches. Folia, 269. Lines, 8—9 on a page. Extent, 7263 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Verse. Correct.

S'árṅgadhara Paddhati. A collection of miscellaneous poems, descriptive of various objects. A part of the work is devoted to ornithomancy, chaomancy and other forms of divination; another to bows and arrows—their merits and demerits: the bulk is made up of amatory verses. By S'árṅgadhara, son of Dámodara, and grandson of Rághava Deva, who was the court poet of Hammira, the Chauhan king of Sambher or Harowti, who flourished in the 12th century, and is repeatedly mentioned in

Chand's history of Príthvíráj: he was killed in the year 1192 A. D. S'árṅgadhara has high reputation as a great poet, and was the author of several works, two of which (one on medicine, and the other on arms and military tactics) have been already noticed (Nos. 360 and 790). The MS. is incomplete.

Beginning. यस्मिन् बुद्बुदसङ्करा इव बहुब्रह्माण्डखण्डाः क्वचिद्,
भान्ति क्वापि च सीकरा इव विरिञ्च्याद्याः स्फुरन्ति भ्रमात्।
चिद्रूपा लहरीव विश्वजननी शक्तिः क्वचिद् द्योतते,
स्वानन्दामृतनिर्भरं शिवमहापाथोनिधिं तं नुमः ॥ १ ॥
पुराशाकम्भरीदेशे श्रीमान् हम्मीरभूपतिः।
चाहुवाणान्वये जातः ख्यातः शौर्य्ये इवार्जुनः ॥ २ ॥
तस्याभवत् सभ्यजनेषु मुख्यः परोपकारव्यसनैकनिष्ठः।
पुरन्दरस्येव गुरुर्गरीयान् द्विजाग्रणी राघवदेवनामा ॥ ३ ॥
गोपालदामोदरदेवदाससञ्ज्ञा बभूवुस्तनयास्तदीयाः।
नेत्रावतारा इव चन्द्रमौलेरपाकृतध्वान्तगुणास्त्रयोऽपि ॥ ४ ॥
तेषां मध्ये यस्तु दामोदरोऽभूदुत्पाद्य चीनात्मजान् वीतरागः।
भागीरथ्यां शुद्धदेहं विहाय ज्ञानादात्मन्येव निष्ठां जगाम ॥ ५ ॥
ज्येष्ठः शार्ङ्गधरस्तेषां लघुर्लक्ष्मीधरस्तथा।
कृष्णोऽनुजस्ततस्तेषां त्रयस्त्रेताग्नितेजसः ॥ ६ ॥
जयति शार्ङ्गधरस्त्रिपुरापदद्वयकुशेशयलुब्धमधुव्रतः।
सरससूक्तिसुधौघकलानिधिः कविकरीन्द्रकदम्बमृगाधिपः ॥ ७ ॥
यद्यपि गुणौघनिलयः खलशैलध्वंसने जिष्णुः।
तदपि विमलहृदयान्तरसज्जनलोकस्य यशोऽसौ ॥ ८ ॥
ते सज्जनाः सुकविशाखिकविलपुष्पाण्यादाय गुम्फितवतः स्वगुणैर्मयैतत्।
सन्धारयन्तु कुसुमोज्ज्वलहाररूपं कण्ठे सुभाषितमपास्तसमस्तदोषम् ॥ ९ ॥
न शार्ङ्गधरपद्धतिः खलजनस्य योग्या भवेत्
सुभाषितरसोर्मयः सुकृतिलोकपेया यतः।
सुधामदितिनन्दना दिवि पिबन्ति हृष्टान्तरा-
स्तथैव तमसः शिरो झटिति खण्डितं श्रूयते ॥ १० ॥
आनन्दाय सतां भूयात् सुभाषितमिदं मम।

पृथक् पद्धतिसम्मिश्रं परिच्छेदैर्मनोरमम् ॥ ११ ॥
आदैर्मद्विहितैः पद्यैः कियद्भिरपरैरपि ।
युता पद्धतिरेषास्तु सज्जनानन्ददायिनी ॥ १२ ॥

End. मन्दोऽयं मलयानिलः किशलयं चूतद्रुमाणां वन
साम्प्रतकोकिलकूजितं विचकिलामोदः पुराणं मधु,
बाणानि धिनोति धरं (?) (इतः परं न लिखितम्, तत एव खण्डितम्, लेखनाभावे च आदर्शालाभ एव हेतुरिति च गम्यते, शेषाक्षरलिपिभङ्गीदर्शनाच्छेद (।)-चिह्नसमालङ्कृतत्वाच्च) ।

विषयः । कविना स्वप्रणीतान् पूर्वकविगणभाषितांश्च श्लोककाव्यानिह यथायथं पद्धत्यनुसारेण ग्रथितं, तदसावुत्कृष्टतरः काव्यसङ्ग्रहः सम्पन्नः । अत्र—१ कविवंशवर्णनम्, २ अनुक्रमः, ३ नमस्कृतिः, ४ आशीः, ५ सुभाषितप्रशंसा, ६ काव्यप्रशंसा, ७ सामान्यकविप्रशंसा, ८ विशिष्टकविप्रशंसा, ९ कुकविनिन्दा, १० पण्डितप्रशंसा, ११ कुपण्डितनिन्दा, १२ महतां प्रशंसा, १३ धीरप्रशंसा, १४ सज्जनप्रशंसा, १५ मनस्विप्रशंसा, १६ उदारप्रशंसा, १७ तेजस्विप्रशंसा, १८ गुणप्रशंसा, १९ सन्तोषप्रशंसा, २० संसर्गप्रशंसा, २१ धनप्रशंसा, २२ दुर्जननिन्दा, २३ कृपणनिन्दा, २४ याचकनिन्दा, २५ दरिद्रनिन्दा, २६ मूर्खनिन्दा, २७ तृष्णानिन्दा, २८ लोभनिन्दा, २९ दैवाख्यानम्, ३० उद्यमाख्यानम्, ३१ प्रकीर्णकाख्यानम्, ३२ समस्याख्यानं, ३३ प्रहेलिका, ३४ अपह्नुतिः, ३५ कूटः, ३६ क्रियादिगुप्तचित्राख्यानम्, ३७ प्रश्नोत्तराख्यानम्, ३८ जातिः, ३९ सदाचारः, ४० धर्मनिवृत्तिः, ४१ पातकनिवृत्तिः, ४२ सूर्यान्योक्तयः, ४३ चन्द्रान्योक्तयः, ४४ मेघान्योक्तयः, ४५ वाय्वन्योक्तिः, ४६ हंसान्योक्तयः, ४७ मधुकरान्योक्तयः, ४८ कोकिलान्योक्तयः, ४९ चातकान्योक्तयः, ५० मयूरान्योक्तयः, ५१ शुकान्योक्तिः, ५२ काकान्योक्तिः, ५३ वकान्योक्तिः, ५४ खद्योतान्योक्तिः, ५५ सिंहान्योक्तिः, ५६ गजान्योक्तिः, ५७ मृगान्योक्तिः, ५८ करभान्योक्तिः, ५९ वृषभान्योक्तिः, ६० सामान्यवृक्षान्योक्तिः, ६१ कल्पवृक्षः, ६२ पर्वतान्योक्तिः, ६३ अगस्त्यान्योक्तिः, ६४ समुद्रान्योक्तिः, ६५ रत्नान्योक्तिः, ६६ शङ्खान्योक्तिः, ६७ तड़ागान्योक्तिः, ६८ कमलान्योक्तिः, ६९ कूपान्योक्तिः, ७० मरुस्थलान्योक्तिः, ७१ दावानलोक्तिः, ७२ सङ्कीर्णान्योक्तिः, ७३ सामान्यराजप्रशंसा, ७४ विशिष्टराजप्रशंसा, ७५ अरिपलायनम्, ७६ राजनीतिः, ७७ नीतिः, ७८ मिश्रकनीतिः, ७९ गजप्रशंसा, ८० भद्रलक्षणम्, ८१ मन्दलक्षणं, ८२ मृगलक्षणम्,

८३ मिश्रलक्षणम्, ८४ अश्वप्रशंसा, ८५ खड्गलक्षणम्, ८६ खड्गप्रशंसा, ८७ धनुर्वेदः, ८८ [तत्र—(क) धनुर्दानविधिः, (ख) आचार्यलक्षणम्, (ग) चापप्रमाणम्, (घ) गुणलक्षणम्, (ङ) शरलक्षणम्, (च) फलकलक्षणम्, (छ) नाराचनालीकस्थानम्, (ज) मुष्ट्याकर्षणम्, (झ) गुणमुष्टिः, (ञ) अनध्यायाः, (ट) दृढभेदित्वादिगुणलक्षणम्] गान्धर्वशास्त्रम्। ८९ वृक्षशास्त्रम् [तत्र-(क) उपवनविनोदः, (ख) तरुमहिमा, (ग) भूमिनिरूपणम्, (घ) वीजोप्तिविधिः, (ङ) निषेवणम्, (च) द्रुमरक्षा, (छ) उपवनक्रिया, (ज) कूपार्थं भूमिपरीक्षणम्। ९० शाकुनज्ञानम् [तत्र-(क) भूपतिप्रश्नचेष्टा, (ख) वरकन्याप्रश्नः, (ग) वर्षाप्रश्नः, (घ) राज्ञो जयप्रश्नः (ङ) राज्ञः सन्तानप्रश्नः, (च) विविधप्रश्नः, (छ) रोगिप्रश्नः, (ज) शकुनं, (झ) शिवारुतम्, (ञ) पल्ली, (ट) अङ्गस्फुरणम्, (ठ) सङ्कीर्णशकुनानि, (ड) यात्रानियमः, (ढ) शुभाशुभविचारः, (ण) उलूकपिङ्गले, (त) काकशब्दः, (थ) हंसाचारः, (द) तित्तिरिरावः, (ध) लट्वारावः, (न) करायिकारावः, (प) वृकरावः, (फ) हरिणरावः, (ब) नकुलरावः, (भ) मिश्रशकुनानि, (म) क्षुतम्, जाङ्गिकशकुनं वा, (य) दिशां स्वभावकथनम्, (र) स्वरोदयः], ९१ पशूनां लक्षणचिकित्से [(क) छागानाम्, (ख) शुनकानाम् (ग) गवाम्, (घ) यूथरक्षा, (ङ) पशुवशीकरणम्] स्थावरजङ्गमविषापहरणम्, ९२ भूतविद्या, ९३ कल्पस्थानम्, ९४ केशरञ्जनम्, ९५ शृङ्गारनिर्देशः, ९६ स्त्रीप्रशंसा, ९७ स्त्रीपुरुषजातिभेदलक्षणानि, ९८ स्त्रीपुरुषसंयोगवृत्तिः, ९९ स्त्रीसेवाप्रकारः, १००। सङ्केतस्थानादिविवरणम् [तत्र—(क) सङ्केतस्थानविवरणम्, (ख) दूत्यादिविवरणम्, (ग) स्त्रीपुरुषवशीकरणम्, (घ) द्रावणम्, (ङ) वीर्य्यस्तम्भः, (च) कुसुमजननम्, (छ) गर्भपातरक्षा, (ज) सुखप्रसूतिः, (झ) यौवनरक्षा, (ञ) सुखवासजलवासौ, (ट) अङ्गरागः, (ठ) धूपप्रकरणम्]। १०१ बालावर्णनम्, १०२ युवतीवर्णनम्, १०३ तरुणीवर्णनम्, १०४, समग्रस्त्रीप्रशंसनम् तत्र—(क) ललाटवर्णनम्, (ख) भ्रूवर्णनम्, (ग) नासावर्णनम्, (घ) कपोलवर्णनम्, (ङ) अधरवर्णनम्, (च) दन्त-वर्णनम्, (छ) स्मितवर्णनम्, (ज) सुखवर्णनम्, (ञ) मुखवर्णनम्, (ट) कण्ठवर्णनम्, (ठ) बाहुवर्णनम्, (ड) करवर्णनम्, (ढ) अङ्गुलीवर्णनम्, (ण) स्तनवर्णनम्, (त) मध्यवर्णनम्, (थ) वलित्रयवर्णनम्, (द) नाभिवर्णनम्, (ध) जरुवर्णनम्, (न) जङ्घावर्णनम्, (प) चरणयुगलवर्णनम्, (फ) नखश्रेणिवर्णनम्, (ब) गमनवर्णनम्, (भ) कान्तिवर्णनम्, (म) सामग्रीस्वरूपवर्णनम्] १०५। विप्रलम्भकशृङ्गारे—(क) प्रियप्रस्था-

नवर्णनम्, (ख) श्यामावस्थाकथनम्, १०६ (क) नायिकावचनम्, (ख) नायकवचनम्, (ग) नायिकां प्रति मानम्, १०७ विरहिण्यवस्थावर्णनम्, १०८ नायिकान्तिके सखीवचनम्, १०९ वियोगिनीप्रलापाः, ११० नायकं प्रति दूतीप्रेषणम्, १११ वियोग्यवस्थावर्णन-प्रलापाख्याने, ११२ नायकस्याग्रे दूत्युक्तिः, ११३ नायिकां प्रति दूत्युक्तिः, ११४ दूती-नायिकासंवादः, ११५ शृङ्गारे परस्परविलोकनम्, ११६ प्रियानित्यादिकम्, ११७ मानिनीमानवर्णनम्, ११८ कलहोक्त्यादिकथनम्, ११९ मिथुनस्योक्तयस्तथा, १२० प्रियस्य शिक्षानुनयौ, १२१ परस्परं प्रसादः, १२२ सूर्यास्ते चक्रदुःखम्, १२३ तमसो वर्णनम्, १२४ अभिसारीणां सञ्चारः, १२५ शशाङ्कोदयवर्णनम्, १२६ पानगोष्ठीकथनम्, १२७ (क) चाटुप्रभृतिवर्णनम्, (ख) सुरतप्रशंसा, १२८ नववधूक्रीड़ायां सखीवाक्यम्, १२९ सुरतकेलिकथनम्, १३० विपरीतरतिवर्णनम्, १३१ सुरतनिवृत्तिः, १३२ मध्यरात्रिक्रीड़ानायिकानुनयाः, १३३ प्रभातसमयोक्तयः, १३४ प्रभातवर्णनम्, १३५ (क) प्रभातानिलवर्णनम्, (ख) प्रभातोदयवर्णनम्, १३६ रात्रिसंयोगचेष्टायाः प्रातः प्रकटनम्, १३७ (क) मिश्रकशृङ्गारवर्णनम्, (ख) सतीवर्णनम्, (ग) कुलवधूवर्णनम्, १३८ असतीचरितम्, १३९ वसन्तादेर्वर्णनम्, १४० ग्रीष्मादेर्वर्णनम्, १४१ वर्षादेर्वर्णनम्, १४२ शरदादेर्वर्णनम्, १४३ हेमन्तादेर्वर्णनम्, १४४ शिशिरादेर्वर्णनम्, १४५ सम्मिश्राणाम्, १४६ जलकेलिः, १४७ प्रपोक्तिः, १४८ दोलाकेलिः, १४९ भमरिकाक्रीड़ा, १५० कन्दुकक्रीड़नम्, १५१ नेत्रसम्मीलनम्, १५२ क्रीड़ा, १५३ सम्मिश्रोक्तयः, १५४ भयानकरसोक्तयः, १५५ वीभत्सरसोक्तयः, १५६ रौद्ररसोक्तयः, १५७ शान्तरसे—वैराग्यस्य प्रशंसनम्, १५८ अनित्यतावर्णनम्, १५९ विषयादिविड़म्बनवर्णनम्, १६० पश्चात्तापवर्णनम्, १६१ कालचरितवर्णनम्, १६२ विवेककथनम्, १६३ उपदेशः, १६४ कालसङ्ख्या, १६५ शारीरम्, १६६ चतुर्विधयोगे—योगत्रयनिरूपणम्, १६७ गोरचादिसाधितहठयोगवर्णनम्, १६८ मार्कण्डेयादिसाधितहठयोगप्रकरणम्, १६९ मनःस्थैर्यप्रभावः, १७० अष्टसिद्धिवर्णनम्, १७१ योगिचर्य्याकथनम्, १७२ अरिष्टजं ज्ञानम्, १७३ विदेहमुक्तिकथनञ्चेति परिच्छेदाः।
[अत्र तु पुस्तके वसन्तवर्णनस्य कियदंशं यावद् दृश्यन्ते, ततः सार्द्धचतुस्त्रिंशत्परिच्छेदानामभावः।]

No. 951. प्रायश्चित्ततत्त्वादर्शः।

Substance, country yellow paper. Folia, 13. Lines, 8—10 on a page. Extent, 630 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikrampura, Ḍháká, Kálíkṛishṇa Gañgopádhyáya. Appearance, old. Prose. Correct.

Práyas'chittatattvádars'a. A commentary on Raghunandana's treatise on purification and expiations. By Vishṇuráma Siddhántavágís'a, son of Jayadeva Vidyávágís'a, and grandson of Kavindra Bhaṭṭácháryya.

Beginning. प्रणम्य विष्णुरामेण परमात्मानमव्ययं।
प्रायश्चित्तस्य यत्तत्त्वं तस्य व्याख्या वितन्यते॥
(तद्व्याख्या परितन्यते वा)॥
तत्र ग्रन्थारम्भेऽभिमतं देवं नमस्करोति प्रणम्येति॥
तत्त्वतु विविधमुनिवाक्यार्थावलोकनपूर्वकपञ्चाङ्गाधिकरणाधीनव्यवस्थासङ्ग्रहः॥
तत्र प्राधान्येन यद्वक्तव्यं तत् सङ्कलयन्नाह, प्रायश्चित्तस्येत्यादि॥

End. प्रायश्चित्तान्तरन्तु प्रायश्चित्तविवेकादावनुसन्धेयमिति॥

Colophon. इति कविचन्द्रभट्टाचार्यात्मजजयदेवविद्यावागीशसुतश्रीविष्णुरामसिद्धान्तविरचितः प्रायश्चित्तादर्शः समाप्तः।

विषयः। रघुनन्दनकृतप्रायश्चित्ततत्त्वव्याख्यानं।

No. 952. श्राद्धतत्त्वादर्शः।

Substance, country yellow paper. Folia, 10. Lines, 5—8 on a page. Extent, 370 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájnagara, Vikrampura, Ḍháká, Kálíkṛishṇa Gañgopádhyáya. Appearance, old. Prose. Correct.

S'ráddhatattvádars'a. A commentary on the S'ráddhatattva of Raghunandana. By Vishṇuráma Siddhántavágís'a, the author named in the last preceding notice. The MS. is incomplete.

Beginning. प्रणम्य कमलाकान्तं विष्णुरामेण धीमता।
व्याख्यानं श्राद्धतत्त्वस्य तन्यते विदुषां मुदे॥

तत्रादौ ग्रन्थमारभमाणोभिमतदेवतां नमस्करोति, प्रणम्येत्यादि ॥
तत्त्वं विविधमुनिवाक्यादि ॥

End. एतदभिप्रेत्य पूर्वस्मतितिथिं विद्यायेत्युक्तं ॥ इत्यतः खण्डितः ॥

विषयः । आद्यतत्त्वव्याख्यानं ।

No. 953. सदाचारप्रकरणं ।

Substance, country yellow paper. Folia, 3. Lines, 6—7 on a page. Extent, 89 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Ḍháká, Kálíkṛishṇa Gañgopádhyáya. Appearance, old. Verse. Correct.

Sadácháraprakaraṇa. A metrical treatise on the duties of ascetics. By S'añkara Ácharya. Hall's *Contributions*, p. 142.

Beginning. सच्चिदानन्दकन्दाय जगदङ्कुरहेतवे ।
सदोदिताय पूर्णाय नमोऽनन्ताय विष्णवे ॥ १ ॥
सर्ववेदान्तसिद्धान्तैर्ग्रथितं निर्मलं शिवं ।
सदाचारं प्रवक्ष्यामि योगिनां ज्ञानसिद्धये ॥ २ ॥

End. सदाचारमिमं नित्यं योऽनुसन्धत्ते बुधः ।
संसारसागराच्छीघ्रं मुच्यते नात्र संशयः ॥ ५५ ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्कराचार्य्यविरचितं सदाचारप्रकरणं समाप्तम् ।

विषयः । योगिसदाचारवर्णनं ।

No. 954. वेदान्तशास्त्रसङ्क्षिप्तप्रक्रियानिरूपणम् ।

Substance, country yellow paper. Folia, 9. Lines, 9—10 on a page. Extent, 427 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Ḍháká. Kálíkṛishṇa Gañgopádhyáya. Appearance, old. Verse. Correct.

Vedánta s'ástra sankshipta-prakriyá-nirupaṇa alias *Prakriyá-nirúpaṇa.* A metrical epitome of the Vedánta doctrine. By S'añkara Ácharya.

Beginning. चित्सदानन्दरूपाय सर्वधीवृत्तिसाक्षिणे ।
नमो वेदान्तवेद्याय ब्रह्मणेऽनन्तरूपिणे ॥

यदज्ञानादिदं भाति यज्ज्ञानाद्विनिवर्त्तते ।
नमस्तस्मै चिदानन्दवपुषे परमात्मने ॥

End. यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यविरचितं वेदान्तशास्त्रसंक्षिप्तप्रक्रियानिरूपणं समाप्तम् ॥

विषयः । वेदान्तप्रक्रियाकथनं ।

No. 955. ब्रह्मोपनिषत्, अथर्ववेदीया ।

Substance, country yellow paper. Folia, 2. Lines, 6—7 on a page. Extent, 59 s'lokas. Character, Bengali. Date, ? Place, of deposit, Mahárájanagara, Vikramapura, Ḍháká, Kálíkṛishṇa Gañgopádhyáya. Appearance, old. Prose and verse. Correct.

Brahma Upanishad. A description of Brahma. This is alleged to be an Upanishad of the Atharva Veda. It does not, however, correspond with the work of this name described under No. XXIII.

Beginning. अथास्य पुरुषस्य च चत्वारि स्थानानि भवन्ति, नाभिहृदयकण्ठमूर्द्धेति ।
तत्र चतुष्पादं ब्रह्म विभाति, जागरितं स्वप्नं सुषुप्तं तुरीयमिति ॥

End. आत्मविद्यातपोमूलं तद् ब्रह्मोपनिषत् परं ।
सर्वात्मैकत्वरूपेण तद् ब्रह्मोपनिषत् परं,
तद् ब्रह्मोपनिषत् परमिति ॥ २ ॥

Colophon. इति अथर्ववेदीया ब्रह्मोपनिषत् समाप्ता ॥

विषयः । ब्रह्मनिरूपणं ।

No. 956. ब्रह्मज्ञानं ।

Substance, country yellow paper. Folium, 1. Lines, 12. Extent, 20 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Ḍháká, Kálíkṛishṇa Gañgopádhyáya. Appearance, old. Verse. Correct.

Brahmajṇána. A poem on the essence of the Vedánta doctrine. By S'aṅkara A'chárya. The title of the poem is doubtful. I believe it is generally known by another name, but what that is I cannot now ascertain.

Beginning. नाहं कर्त्ता न कारयिता वा न कार्य्यं
नाहं भोक्ता न भोजयिता न च भोज्यं ।
नाहं दुःखं दुःखयिता वा न च दुःखी
सोऽहं प्रत्यक् चित्स्वरूपोऽहमात्मा ॥

End. का बुद्धिः कायवा ह्यनिर्मम चात्मस्वरूपिणः ।
भजते भोगसेवाभिर्नैकार्थायोपकल्पते ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यविरचितं ब्रह्मज्ञानं समाप्तम् ॥

विषयः । ब्रह्मज्ञाननिरूपणं ।

No. 957. अद्भुतोपनिषत् ।

Substance, country yellow paper. Folium, 1. Lines, 12. Extent, 24 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárája-nagara, Vikramapura, Ḍháká, Kálíkṛishna Gañgopádhyáya. Appearance, old. Prose and verse. Correct.

Adbhuta Upanishad. An Upanishad on the duties of ascetics, treating of various forms of Yoga penance. The MS. does not say to what Veda it is affiliated. Apparently it is apocryphal.

Beginning. यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगः ।

End. निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुते, योगी कैवल्यमश्नुते ।
इति च एवं वेद इत्युपनिषत् ॥

Colophon. इत्यद्भुतोपनिषत् समाप्ता ॥

विषयः । योगप्रक्रियाकथनं ।

No. 958. मनीषापञ्चकं ।

Substance, country yellow paper. Folium, 1. Lines, 10. Extent, 6 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárája-nagara, Vikramapura, Ḍháká, Kálíkṛishna Gañgopádhyáya. Appearance, old. Verse. Correct.

Manísháपanchaka. A discussion between S'aṅkara A'chárya and a Chaṇḍála, on caste distinctions and the Vedántic doctrine. The work is alleged in the text to have been composed by S'aṅkara himself.

Beginning. कदाचित् शङ्कराचार्य्यः काशीं प्रति पुरीं ययौ ।
तस्य ज्ञानपरीक्षार्थं कश्चिद् देवः समागतः ॥
चण्डालरूपिणं दृष्ट्वा गच्छ गच्छेति चाब्रवीत् ।
यथोक्तवन्तमाचार्य्यं स देवः पुनरब्रवीत् ॥

End. यत्साख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता
यच्चित्ते नितरां प्रशान्तिकलने लब्धाम्बुधिर्निर्वृतः ।
यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मविद्
यः कश्चित् स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥ ५ ॥

Colophon. इति श्रीशङ्कराचार्य्यकृतं मनीषापञ्चकं समाप्तं ।

विषयः । ब्रह्मजातीयब्रह्मविद्याविषयकदेवचण्डालयोः कथोपकथनं ।

No. 959. विवेकचूड़ामणिः ।

Substance, country yellow paper. Folia, 31. Lines, 5—7 on a page. Extent, 868 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapurá, Ḍháká, Kálíkṛisṇa Gañgopádhyáya. Appearance, old. Verse. Generally correct.

Viveka chúḍámaṇi. A poetical exposition of the Vedanta doctrine. By S'añkara A'chárya.

Beginning. सर्ववेदान्तसिद्धान्तगोचरं तमगोचरं ।
गोविन्दं परमानन्दं सद्गुरुं प्रणतोऽस्म्यहम् ॥ १ ॥
जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता
तस्माद् वैदिककर्म्ममार्गपरता विद्वत्त्वमस्मात् परं ।
आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थिति-
र्मुक्तिर्नो शतजन्मकोटिसुकृतैः पुण्यैर्विना लभ्यते ॥ २ ॥

End. संसारध्वनितापभानुकिरणप्रोद्भूतदाहव्यथा-
खिन्नानां जलकाङ्क्षया मरुभुवि भ्रान्त्या परिभ्राम्यतां ।
अत्यासन्नसुधाम्बुधिं सुखकरं ब्रह्माद्वयं दर्शय-
न्त्येषा शाङ्करभारती विजयते निर्वाणसम्भाविनी ॥ ५८२ ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशङ्कर-
भगवत्पादकृतो विवेकचूड़ामणिः समाप्तः ॥

विषयः । ब्रह्मज्ञानप्रशंसा ।

No. 960. शुकाष्टकम्, सटीकं ।

Substance, country yellow paper. Folia, 6. Lines, 6—10 on a page Extent, 330 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Ḍháká, Kálíkrishṇa Gañgopádhyáya. MSS. or this work are common enough: the codices in the Libraries of the Asiatic Society, and of the Sanskrit College, of Calcutta are generally correct Appearance, old. Prose and verse. Correct.

S'ukáshṭaka. A poem in eight stanzas in praise of the Vedánta philosophy. Attributed to S'uka Deva, son of Vyása. The text is explained in an elaborate commentary by Gañgádharendra Sarasvatí.

Beginning. (मू॰) भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमधिगतौ नष्टसन्देहवृत्तिः।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥ १ ॥

End. (मू॰) सत्यं सत्यं परमममृतं सर्वकल्याणरूपं
मायारण्ये दहनमनिलं शान्तिनिर्वाणदीपं।
तेजोरूपं निगमसदनं व्यासपुत्राष्टकं यः
प्रातःकाले पठति मनसा याति निर्वाणमार्गं ॥ ८ ॥

विषयः। ब्रह्मज्ञानप्रशंसा।

No. 961. शतरुद्रीयं, सभाष्यं।

Substance, country yellow paper. Folia 13. Line 10—11 on a page. Extent, 786 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Ḍháká, Kálíkṛishṇa Gañgopádhyàya. Appearance, old. Prose and verse. Correct.

S'atarudríya, The S'atarudríya hymn of the White Yajur Veda with the commentary of Sáyana A'chárya. The text is published in Dr. Weber's edition of the Veda, and a translation in Muir's Sanskrit Texts IV.

Beginning. (मू॰) ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥ १ ॥
या त इषुः शिवतमा शिवं बभूव ते धनुः।
शिवा शरव्या या तव तया नो रुद्र मृडय ॥ २ ॥

(भा॰) यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥
इष्टकाचितयः सर्वास्तुर्ये हि समापिताः।
रुद्राध्याये पञ्चमे तु चित्ताग्नौ होम उच्यते ॥

End. (मू॰) नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्द्ध(र्ध्वा)स्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि। इत्येकादशोऽनुवाकः ॥

(भा॰) हे रुद्रा वो युष्माकं जम्भे विदारितास्ये दधामि स्थापयामि।

Colophon. इति सायनाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे यजुःसंहितायां चतुर्थकाण्डे पञ्चमप्रपाठके एकादशोऽनुवाकः समाप्तः ।

विषयः । रुद्रमहिमा ।

No. 962. श्रुतिस्तुतिव्याख्यानं ।

Substance, country yellow paper. Folia, 34. Lines, 4—6 on a page. Extent, 816 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikrampura, Ḍháká, Kálikṛishṇa Gañgopádhyáya. Appearance, old. Verse. Incorrect.

S'ruti-stuti-vyákhyána. A gloss, by Raghunátha Chakravartí, on S'añkara's commentary on the *S'ruti-stuti* or "praise of the S'ruti," of S'rídhara.

Beginning. बालानामुपकाराय श्रीधरीयश्रुतिस्तुतेः ।
व्याख्या व्याख्यायते कापि रघुनाथेन केन च ॥ १ ॥
सतामिति । सतो हेतुः सत इत्यादिना ।

End. इत्यशेषसमाम्नायेत्यत्रोपनिषद्भिन्नो वेदभागः समाम्नायः ।
आनन्दवनयेत्यादिग्रन्थान् दृष्ट्वा श्रुतिस्तुतौ ।
रघुनाथः लिखन् व्याख्यां श्रुतेः शङ्करभाषणं ॥ ४२ ॥

Colophon. इति श्रीरघुनाथचक्रवर्त्तिविरचितं श्रुतिस्तुतिव्याख्यानं समाप्तम् ।

विषयः । श्रीधरकृतायाः श्रुतिस्तुतेः शङ्कराचार्य्येण यत् भाष्यं कृतं तदनुगामिनी व्याख्येयं ।

No. 963. प्रायश्चित्तनिर्णयः ।

Substance, country yellow paper. Folia 30. Lines, 3—7 on a page. Extent, 1443 s'lokas. Character, Bengali. Date, Sk. 1698. Place of deposit, Ḍháká Vikrampura, Gañgácharaṇa Tarkaratṇa, Appearance, old. Prose. Correct.

Práyas'chitta nirṇaya. A summary of Raghunandana's digest of the laws relating to expiations. By Gopála Nyáyapañchánana. It is one of a series of digests prepared by the author under the title of Nirṇaya. The total number of these digests is not known, but five have been met with. (Nos. 963 to 967). The practice of writing such digests under one general name has been common among Indian jurists, the number of separate works under each name extending from three to twenty-seven. The following list comprises the names of some of those which are most frequently met with.

Common title.	*Author's name*
A'dars'a,	A'ditya S'uri.
Ditto,	Jaydeva Paṇḍita.
A'loka,	Gopála Panchánana.
Chandriká,	Divákara.
Ditto,	Gautama.
Ditto,	Vedáṅga Ráya.
Chintámaṇi,	Váchaspati Mis'ra.
Ditto,	Gaṅges'vara.
Didhiti,	Ananta Deva.
Dípiká,	?
Kamalákara,	Kamalákara Mis'ra.
Kaumudí,	Govindánanda.
Kaustubha,	Anantadeva.
Mayukha,	Nílakaṇṭha.
Mimáṅsá,	Nanda Paṇḍita,
Nirṇaya,	Nanda Paṇḍita.
Ditto,	Gopála Nyáyapañchánana.
Ditto,	Bhaṭṭojí Dikshita.
Párijáta,	Ananta Bhaṭṭa.
Pradípa,	Nágadeva.
Prakás'a,	Mitramis'ra Paṇḍita.
Rahasya,	Ramánátha.
Ratna,	Kamalákara.
Ratnákara,	Chandes'vara.
Ditto,	Gopinátha Bhaṭṭa.
Samuchchaya,	?
Sangraha,	Dalapatirája.
Sára,	Nágojí Bhaṭṭa.
Ditto,	Tryambaka.
Ditto,	Dalapatirája.
Sarvasva,	Haláyudha.
Saukhya,	Anonymous.
Sindhu,	Kás'ínátha Upádhyáya.
Tattva,	Raghunandana.
Vidhi,	Kamalákara.
Viveka,	S'úlapáṇi.
Vyavasthá-saṅkshepa,	Anonymous.

Beginning. नत्वा कृष्णपदद्वन्द्वं निर्णयो मुनिसम्मतः ।
प्रायश्चित्तकदम्बानां गोपालेन वितन्यते ॥
अथ प्रायश्चित्तनिर्णयः । तत्र हारीतः । प्रयतत्वादित्यादि ।

End. + + लक्षणप्रामाण्यापत्तिरिति सर्वं रमणीयमिति ।

Colophon. इति महामहोपाध्यायश्रीगोपालन्यायपञ्चाननभट्टाचार्य्यविरचितः प्रायश्चित्तनिर्णयः समाप्तः ।

विषयः । १ प्रायश्चित्तलक्षणं, २ बाल्यादिभेदे प्रायश्चित्तं, ३ विद्वद्विप्रस्त्र्यादीनां मुण्डननिषेधः, ४ नवविधपापानि, ५ धेनुमूल्यनिर्णयः, ६ प्राजापत्यव्रतनिर्णयः, ७ ब्राह्मणस्वामिकसाक्षाद्ज्ञानकृतचतुर्द्धायन्यादिगोबधव्रतनिर्णयः, ८ क्षत्रियस्वामिकगोबधनिर्णयः, ९ प्रायश्चित्तपूर्वकृत्यं, १० वश्यसम्बन्धिगोबधव्रतनियमः, ११ शूद्र॰स्वामिकगोबधव्यवस्था, १२ उत्सर्गवाक्यकथनं, १३ गर्भिण्यादिबधप्रायश्चित्तं, १४ गवां निपातने गर्भनाशप्रायश्चित्तं, १५ यतिब्राह्मणादिबधप्रायश्चित्तं, १६ एकहायन्यादिबधप्रायश्चित्तं, १७ एकप्रयत्नकृतबहुगोबधप्रायश्चित्तं, १८ बहुकर्त्तृकैकगोबधप्रायश्चित्तं, १९ तत्र सङ्क्षेपः, २० वाचनिकदक्षिणानिर्णयः, २१ पञ्चविधबोधननिर्णयः, २२ बोधनादिनिमित्तकव्रतं, २३ अस्थिभङ्गादिप्रायश्चित्तं, २४ उत्सृष्टवृषभादिबधादिप्रायश्चित्तं, २५ अपालननिमित्तकगोबधप्रायश्चित्तं, २६ असुस्थाने विक्रयादिप्रायश्चित्तं ।

No. 964. तिथिनिर्णयः ।

Substance, country yellow paper. Folia, 21. Lines, 5—7 on a page. Extent, 877 s'lokas. Character, Bengali. Date, Sk. 1698. Place of deposit, Vikrampurá, Ḍháká Gañgácharaṇa Tarkaratṇa. Appearance, old. Prose. Correct.

Tithi-nirṇaya. A summary of Raghunandana's digest of the laws relating to the ages of the moon suitable for the performance of religious ceremonies. By Gopála Nyáyapanchánana.

Beginning. श्रीकृष्णचरणाम्भोजसङ्गेन सुचेतसा ।
क्रियते निर्णयस्तिथ्या गोपालेन सुधीमता ॥
अथ तिथिनिर्णयः । तिथेस्तु द्वादशभिर्भागैश्चन्द्रक्रियोपलक्षितः कालविशेषः । यथा अर्कात् विनिःसृतः प्राचीमित्यादि ।

End. (शेषेऽस्पष्टं, जीर्णत्वात् ।)

Colophon. इति महामहोपाध्यायश्रीगोपालन्यायपञ्चाननभट्टाचार्य्यविरचितस्तिथिनिर्णयः समाप्तः ।

विषयः । तिथितत्त्वकथनं ।

No. 965. विवादनिर्णयः ।

Substance, country yellow paper. Folia, 20. Lines, 3—6 on a page. Extent, 420 s'lokas. Character, Bengali. Date, Sk. 1698. Place of deposit, Vikrampura, Ḍháká, Gañgácharaṇa Tarkaratṇa. Appearance, old. Prose. Correct.

Viváda-nirṇaya. A summary of Raghunandá's digest of the laws relating to Jurisprudence. By Gopála Nyáyapañchánana.

Beginning. श्रीकृष्णचरणाम्भोजं ध्यात्वा गोपालशर्म्मणा ।
अष्टादश (शानां) तत्त्वानां निर्णयोऽत्र निगद्यते ॥
अथ विवादनिर्णयः । निर्णयस्तु सद्युक्तिकः करणीयः ।

End. (ग्रन्थशेषे परिसमाप्तौ च विलुप्तं ।)

विषयः । १ व्यवहारलक्षणं, २ अष्टादशविवादपदानि, ३ ऋणादानं, ४ दासादिभ्य उद्धारादिनिषेधः, ५ ऋणादिदानप्रकारप्रभृतयः ।

No. 966. दायनिर्णयः ।

Substance, country yellow paper. Folia, 22. Lines, 6 on a page. Extent, 693 s'lokas. Character, Bengali. Date, Sk. 1689. Place of deposit, Vikramapura, Ḍháká, Gañgácharana Tarkaratṇa. Appearance, old. Prose. Correct.

Dáya-nirṇaya. A summary of Raghunandana's digest of the laws relating to inheritance. By Gopála Nyáyapañchánána.

Beginning. श्रीकृष्णचरणाम्भोजं ध्यात्वा गोपालशर्म्मणा ।
वितन्यते विवादेषु दायभागस्य निर्णयः ॥
अथ दायभागनिर्णयः । दायभागो यावत्सम्बन्धिधनविभागः । मनुना । एष स्त्रीपुंसयो राज्ञा इत्यादि ।

End. शेषे पत्रमेकं विलुप्तं ।

विषयः । दायभागव्यवस्था ।

No. 967. शुद्धिनिर्णयः ।

Substance, country yellow paper. Folia 7. Lines, 6 on a page. Extent, 220 s'lokas. Character, Bengali. Date, Sk. 1689. Place of deposit, Vikrampura Ḍháká, Gangácharaṇa Tarkaratna, Appearance, old. Prose. Correct.

S'uddhi-nirṇaya. A summary of Raghunandana's digest of the laws relating to purifications. By Gopála Nyáyapanchánana.

Beginning. प्रथमपत्रं विलुप्तं ।

End. शेषपत्रमपि विलुप्तं ।

विषयः । मरणाशौचशुद्धिनिर्णयकथनादिः ।

No. 968. आचारनिर्णयः ।

Substance, country yellow paper. Folia, 19. Lines, 6 on a page. Extent, 598 s'lokas. Character, Bengali. Date, Sk. 1689. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

A'chára-nirṇaya. A short summary of the religious duties which a strict Hindu is bound to observe. By Gopála Nyáyapanchánana.

Beginning. आचारस्य श्रेयःसाधनत्वमाह ॥ हारीतः———(अस्पष्टं)

End. आपस्तम्बः ———ति—(इत्यतः खण्डितः ।

विषयः । वर्णाश्रमाचारकथनादिः ।

No. 969. सङ्क्रान्तिनिर्णयः ।

Substance, country yellow paper. Folia, 5. Lines, 6 on a page. Extent, 157 s'lokas. Character, Bengali. Date, Sk. 1689. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháka, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Sankránti-nirṇaya. A summary of the rules regarding the calculation of the passage of the sun from one sign of the zodiac to another. By Gopála Nyáyapanchánana.

Beginning. (प्रथमपत्रस्य प्रथमपङ्क्तिर्विलुप्ता ।)

End. अत्र विषुवस्य पुण्यविशेषजनकत्वात् मेषाद्वाविति विषुवसङ्क्रान्तिपुण्यकालपरं । अन्यथा कालद्वयकल्पनापत्तेः ।

विषयः । सङ्क्रान्तिगणना ।

No. 970. व्याप्तिग्रहोपायप्रभृतीनां भट्टाचार्यटीका ।

Substance, country yellow paper. Folia, 149. Lines, 5—9 on a page. Extent, 8381 s'lokas. Character, Bengali. Date, ? Place of Deposit, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Vyáptigrahopáyaṭíká. A gloss on that portion of Raghunátha's commentary on the Anumána-chintámaṇi of Gaṅges'a which refers to inherent presence. By Gadádhara Bhaṭṭácharya. Vide ante I, p. 295.

Beginning. उपायाभावप्रयुक्तव्याप्तिनिश्चयाभावेनानुमानप्रामाण्यं न निर्वहतीति चार्वाकपूर्वपक्षे भूयःसाध्यसाधनसहचारदर्शनं व्याप्तिग्राहकमिति जरन्नैयायिकसिद्धान्त इत्यादि ।

End. अथ तस्याः प्रत्यक्षत्वाभावे युक्त्यन्तरमेव वाऽनुसन्धेयमिति ।

विषयः । व्याप्तिनिश्चयस्य उपायकथनं ।

No. 971. उपाधिवादटिप्पनी ।

Substance, country yellow paper. Folia, 21. Lines, 6—7 on a page. Extent, 716 s'lokas. Character, Bengali. Date ? Place of deposit, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Upádhiváda Ṭippaṇí. Jagadís'a Tarkálaṅkára's notes on the Upádhiváda chapter of Raghunátha S'iromaṇi's commentary on the Chintámaṇi of Ganges'a. Vide ante I p. 295.

Beginning. स्वीयहेतोर्वाच्यत्वस्येव परकीयहेतोः सोपाधिकत्वस्यापि ज्ञापने वादिनिग्रहसम्भवाद्विजयलक्षणैककार्य्यकारित्वसङ्गत्या व्याप्तिज्ञानविरोधज्ञानाजकत्वरूपप्रसङ्गसङ्गत्या व्याप्त्यन्तरमुपाधिं निरूपयितुमाह उपाधिज्ञानादिति ।

End. अत एवाह एवमिति पक्षेतरत्वविशिष्टसाध्यसामग्रीसत्त्वादिकमपि अप्रसिद्धानुमाने नोपाधित्वेन उद्भाव्यं कथकादिसम्प्रदायविरोधादिति भावः ।

Colophon. इति उपाधिवादटिप्पनी सम्पूर्णा ।

विषयः । परकीयव्याप्तिविघटकतया उद्भावनीयस्य उपाधेर्निरूपणम् ।

No. 972. प्रश्नोत्तरमाला ।

Substance, country yellow paper. Folia 2. Lines, 8 on a page. Extent 38 s·lokas. Character, Bengali. Date, Sk. 1762. Place of deposit, Vikramapura, Ḍháká, Gangácharana Tarkaratna. Appearance, old. Verse. Correct.

Prasnottaramálá. Vedantic catechism. By S'añkara Ácharya.

Beginning. अपारसंसारसमुद्रमध्ये सम्मज्जतो मे शरणं किमस्ति ।
गुरोः कृपालोः कृपया वदैतद् विश्वेशपादाम्बुजदीर्घनौका ॥ १ ॥
बद्धो हि को यो विषयानुरक्तः का वा विमुक्तिः विषयाद् विरक्तिः ।
को वास्ति घोरो नरकः स्वदेहे तृष्णाक्षयः स्वर्गपदं किमस्ति ॥ २ ॥

End. कण्ठं गता वा श्रवणं गता वा प्रश्नोत्तराख्या मणिरत्नमाला ।
तनोतु मोदं विदुषां सुरम्या रमेशगौरीशकथेव सद्यः ॥ ३२ ॥

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचिता प्रश्नोत्तरमाला समाप्ता ।

विषयः । प्रश्नोत्तरमुखेन वेदान्तसारवार्त्ताकथनं ।

No. 973. पाशककेरली ।

Substance, country yellow paper. Folia 8. Lines, 10 on a page. Extent, 220 s'lokas. Character Bengali. Date, Sm. 1905. Place of deposit, Vikramapura, Ḍháká, Gangácharana Tarkaratna. Appearance, old. Prose. Correct.

Pás'aka-keralí. Cleromancy or divination by the cast of the dice. By Garga Rishi.

Beginning. भगवति कुष्माण्डि मातङ्गिनि स्वकार्य्यप्रसाधिनि सर्वकार्य्यनिमित्तप्रकाशिनि
एह्येहि सत्वरं वद वद वरदे वरदे लेहि लेहि मातङ्गिनि सत्यं ब्रूहि स्वाहा
महादेवं नमस्कृत्य केरलज्ञानभास्करं ।
प्रवक्ष्ये सद्गुणोद्दिष्टं ज्ञेयं धेयं शुभाशुभम् ॥ १११ ॥
पदं पदं + वीणा + पतिता शोभनं तव ॥
शुभं वा दृश्यते तत्र सर्वारम्भेषु चिन्तितम् ।
सङ्ग्राम सर्वलाभश्च व्यवहारेण सम्पदः ॥

End. यः पुरासीज्जगद्वन्द्यो गर्गो नाम महामुनिः ।
तेन स्वयं विनिर्णीता सत्या पाशककेरली ॥

Colophon. इति श्रीगर्गर्षिकृता पाशककेरली समाप्ता ।

विषयः । निश्चितपाशकाङ्कानुसारेण प्रश्नशुभाशुभफलकथनं ।

No. 974. अनुमितिमानसवादार्थः ।

Substance, country yellow paper. Folia, 9. Lines, 5—8 on a page. Extent, 502 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Anumiti-mánasa-vádártha. A treatise on Inference. By Gadádhara Bhattácharya. This and the four following are parts of a series of sixty-four special treatises on the Nyáya which the author is reported to have written in addition to his larger works. Hall's Contributions, 41.

Beginning. लिङ्गपरामर्शानन्तरं विलक्षणानुमित्यात्मकप्रतीत्युदयात् तत्करणतया तस्य विलक्षणप्रमाणान्तरता तदेवानुमानमित्यभिधीयते ।
वह्निव्याप्यधूमवान् पर्वत इति परामर्शानन्तरं तदात्मकविशेषदर्शनमूलक-पर्वतो वह्निमानित्याकारकप्रत्यक्षनिर्णयादेव वह्न्यादिगोचरप्रवृत्त्युपपत्तेः, इत्यादि ।

End. अतोऽनुमानं न पृथक्करणमिति दिक् ।

Colophon. इति अनुमितिमानसस्य वादार्थः समाप्तः ।

विषयः । अनुमितेः प्रमाणान्तरताविरहविषयो विचारः ।

No. 975. नव्यमतवादार्थः ।

Substance, country yellow paper. Folia, 15. Lines, 8 on a page. Extent, 885 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká. Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Navya-mata-vádártha. A treatise on the new school of Nyáya with reference to Inference. By Gadádhara Bhaṭṭácharya.

Beginning. अनुमितिं प्रति पर्वतीयधूमव्यापको वह्निरित्याकारकपरामर्श एव हेतुः । न तु वह्निव्याप्यधूमवान् पर्वत इत्याकारकः ।

End. ज्ञानसामान्यानुत्पादस्यानुभवविरुद्धत्वात् सामग्रीसम्बन्धकार्य्योत्पत्तेर्वा(?)कल्पना-भावात् क्षतिमत्त्वं ।

Colophon. इति नव्यमतस्य वादार्थः समाप्तः ।

विषयः । नव्यमतोपरि अनुमितिकारणताविषयो विचारः ।

No. 976. रत्नकोषवादार्थः ।

Substance, country yellow paper. Folia, 27. Lines, 7—8 on a page. Extent, 1290 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Ratna-kosha-vádártha. On the knowledge of the invisible through Inference. By Gadádhara Bhaṭṭácharya.

Beginning. परोक्षज्ञानं निश्चय एवेति सिद्धान्तः। रत्नकोषकारस्तु सत्प्रतिपक्षसम्मेलन-दशायां संशयात्मिकामनुमितिं स्वीकरोति इत्यादि ।

Colophon. इति न किञ्चिदनुमितेः संशयत्वापत्तेरिति क्रत(मल)मतिविस्तरेण इति ।

विषयः । परोक्षज्ञानस्य निश्चयरूपताप्रतिपादको विचारः ।

No 977. व्याप्त्यनुगमवादार्थः ।

Substance, country yellow paper. Folia, 5. Lines, 3—8 on a page. Extent, 270 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Vyáptyanugama-vádártha. A treatise on the perception of the major term. By Gadádhara Bhaṭṭácharya.

Beginning. अनुमितित्वावच्छिन्नं प्रति कीदृग् व्याप्तिविशिष्टपक्षधर्म्मताज्ञानं हेतुः, इत्यादि ।

End. न च भेदेन, वह्निमान् धूमादित्यादावव्याप्तेर्दुर्वारत्वादित्याशयो दीधितिकार-स्येति सङ्क्षेपः ।

Colophon. इति श्रीन्यायवागीशभट्टाचार्यविरचितो व्याप्त्यनुगमवादार्थः समाप्तः ।

विषयः । अनुमितिकारणीभूतज्ञानविषयीभूतायाव्याप्तेरनुगमप्रकारविषयो विचारः ।

No. 978. कारणतावादार्थः ।

Substance, country yellow paper. Folia, 22. Lines, 8 on a page. Extent, 1342 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Káraṇatá-vádártha. A treatise on causation. By Gadádhara Bhaṭṭácharya.

Beginning. अथ निखिलेष्वपि वैदिकेषु लौकिकेषु च कर्म्मसु तत्तत्फलस्य कारणत्वं निश्चयवन्तस्तत्रभवन्तः प्रवर्त्तन्ते न तु तदनाकलयन्तः। तत्र किं नाम कारणत्वं, न तावत् फलाव्यवहितपूर्ववर्त्तित्वं, अतिप्रसङ्गात् इत्यादि।

End. ननु संयोगजसंयोगं प्रति अवयवसंयोगस्य संयोगात्मावयवसंयोगात्मा (?)——— (इत्यतः खण्डितः।)

विषयः। कारणताविषयो विचारः।

No. 979. विरोधिविचारः।

Substance, country yellow paper. Folia, 19. Lines, 7—8 on a page. Extent, 1014 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Virodhi-vichára. Fallacies or hindrances to logical sequence,—a Nyáya dissertation. By Rámachandra Nyáyavágís'a.

Beginning. स्वधर्म्मितावच्छेदकविशिष्टबुद्धेः समानधर्म्मितावच्छेदकग्राह्याभावनिश्चयो विरोधीति तदभावो हेतुः।

End. स्वय उक्तव्यापकसम्बन्धेन क्लृप्तहेतुताकवह्नित्वादिमत्ताभेदस्य सहकारितयैवोपपत्तेरिति दिक्।

विषयः। प्रतिबध्यप्रतिबन्धकभावविषयो विचारः।

No. 980. योग्यताविचारः।

Substance, country yellow paper. Folia, 5. Lines, 8—9 on a page. Extent, 196 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Generally correct.

Yogyatávichára. A Nyáya treatise on the relation of words to their meanings. By Rámachandra Nyáyavágís'a.

Beginning. अयोग्यतानिर्णयदशायां शाब्दबोधानुदयाद् योग्यताज्ञानस्य शाब्दबोधहेतुता कल्प्यते, तत्र यत्संसर्गकयद्धर्म्मावच्छिन्नद्वयाभावप्रतियोगितानवच्छेदकत्वं यद्‌-

र्म्मिनिष्ठं तद्धर्म्मावच्छिन्नविशेष्यकतत्संसर्गकतद्धर्म्मावच्छिन्नो वा बाध(?)स्तद्धर्म्मावच्छिन्नस्य योग्यता इति प्राहुः ।

End. इत्यपि नाविरलक्रमोत्पन्नानामुपस्थितीनामुपद्रवस्थानासम्भवेन प्रत्यक्षासम्भवात् ।

Colophon. (परिसमाप्तिसूचकवाक्यं नास्ति ।)

विषयः । शाब्दबोधहेतुभूतयोग्यतानिर्वचनं ।

No. 981. विधिवादविचारः ।

Substance, country yellow paper. Folia, 22. Lines, 5—8 on a page. Extent, 1342 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratana. Appearance, old. Prose. Generally correct.

Vidhi-váda-vichára. A Nyáya treatise on the nature of Sástric injunctions. By Rámachandra Nyáyavágís'a.

Beginning. ओदनकामः पचेत, स्वर्गकामो यजेत, इत्यादिविधिवाक्यं पाकयागादौ प्रवर्त्तकं तस्य च तथात्वं न साक्षात्, अनुत्पन्नानां ततोऽप्रवृत्तेः । किन्त्वर्थज्ञानद्वारेति तस्य प्रवर्त्तकज्ञानजनकत्वोपपत्तये प्रवर्त्तकज्ञानविषये विधिलिङः शक्तिरिति सर्व्वेषामेवानुमतम् ।

End. अथ क्वचित् प्रतियोगिगोचरद्वेषेण मदकृतं स्वधर्म्मिकक्षतिसाध्यताज्ञानं स्वगोचरचिकीर्षाप्रवृत्तिहेतुः सप्रतियोगित्वञ्च अभावस्यापीति प्राहुः ।

Colophon. इति विधिवादविचारः समाप्तः ।

विषयः । स्वर्गकामो यजेतेत्यादिविधिवाक्यार्थविषयो विचारः ।

No. 982. अभिधावादविचारः ।

Substance, country yellow paper. Folia, 3. Lines, 9—10 on a page. Extent, 78 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭesvara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Incorrect.

Abhidhá-váda-vichára. A Nyáya treatise on deviation from general rules. By Rámachandra Nyáyavágís'a.

Beginning. लिङ्समवेताभिधाभिधं पदार्थान्तरं लिङर्थः प्रवर्त्तनात्वेन तज्ज्ञानस्यैव शब्दाधानप्रवृत्तौ हेतुः। तथाहि प्रवृत्तिसामान्येनेष्टसाधनताज्ञानस्य हेतुत्वसम्भवः।

End. उक्तशाब्दबोधानन्तरञ्च स्वर्गकामनावत्त्वं प्रति विधिधर्म्म(?)यागे प्रवर्त्तयति इति प्रतिशब्दते (?) ततो यागे प्रवर्त्तत इति वदन्ति।

Colophon. इति अभिधावादविचारः समाप्तः।

विषयः। विधिलिङाद्यर्थाभिधाविषयो विचारः।

No. 983. आसत्तिरहस्यं।

Substance, country yellow paper. Folia, 12. Lines, 5—9 on a page. Extent, 911 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Incorrect.

A'satti-rahasya. On logical relations. By Rámachandra Nyáyavágís'a.

Beginning. गिरिर्भुक्तमग्निमान् देवदत्तेन इत्यत्रानासन्नगिरिरग्निमत्पदात्(?)गिर्य्यग्निमत्पदार्थयोरित्यादि।

End. प्रकारतादीनां तत्रानुगमे तादृशानुमित्यादीनां बाधात् प्रतिबध्यत्वप्रसङ्गो विशेष्यतया प्रकारताया एव तादृशप्रतिबध्यप्रतिबन्धकभावावच्छेदकत्वात् इति दिक्।

Colophon. इति आसत्तिरहस्यं समाप्त।

विषयः। शाब्दबोधे कारणीयभूतायाः आपत्तेर्निरूपणम्।

No. 984. शब्दनित्यता।

Substance, country yellow paper. Folia, 3. Lines, 9 on a page. Extent, 189 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Generally correct.

S'abda-nityatá. On the eternity of sound. By Rámachandra Nyáyavágís'a.

Beginning. वर्णात्मकः शब्दो नित्यो न वेतिविप्रतिपत्तिः। अत्र मीमांसाकारा वर्णात्मकशब्दानामुत्पत्तिविनाशकल्पने गौरवान्नित्यत्वमेव स्वीकुर्वन्ति इत्यादि।

End. न च प्रतिककारखकारादिसाधनभावेनैकप्रति न्यकताकल्पने लाघवमिति सङ्क्षेपः ।

Colophon. समाप्तश्चायं शब्दनित्यताविचारः ।

विषयः । शब्दस्य नित्यताप्रतिपादनं ।

No. 985. पथ्यविधानं ।

